# SELF STUDY REPORT

**FOR**

**3rd CYCLE OF ACCREDITATION**

# SHRI LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY

**B-4, QUTUB INSTITUTIONAL AREA, NEW DELHI
110016**

**https://www.slbsrsv.ac.in**

**SSR SUBMITTED DATE: 24-10-2024**

**Submitted To**

**NATIONAL ASSESSMENT AND ACCREDITATION COUNCIL**

**BANGALORE**

**October 2024**

**Executive Summary**

***Introduction:***

SHRI LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY, formerly known as SHRI LAL BAHADUR SHASTRI RASHTRIYA SANSKRIT VIDYAPEETHA, stands as a beacon of Shastraic tradition, higher learning, and the interpretation of Shastras. As per the aspirations of the then President of India Dr. Rajendra Prasad and other national leaders of the country Akhil Bhartiya Sahitya Sammelan established Akhil Bhartiya Sanskrit Vidyapeetha on 8th October, 1962. Establishment of an international Sanskrit Institution in Delhi, the capital of India was the vision of the late Prime Minister Shri Lal Bahadur Shastriji. After Shastriji's death the then Prime Minister Mrs. Indira Gandhi on 2nd Oct, 1966 named it as Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeetha.

On 1st April, 1967 the government of India took over the Vidyapeetha as an autonomous institution under the Ministry of Education. From 21 December, 1970 under the Management of Rashtriya Sanskrit Sansthan, this Vidyapeetha was named as Shri Lal Bahadur Shastri Kendriya Sanskrit Vidyapeetha. On 16th Nov, 1987, it conferred the status of Deemed-to-be-University by erstwhile Ministry of Human Resource Development, Govt. of India. It became fully operational on 1st November 1991, with funding from the UGC.

**Transition to Central University:**

The Government of India, under the Presidentship of Hon'ble President Shri Ram Nath Kovind Ji, dynamic leadership of Hon'ble Prime Minister Shri Narendra Modi Ji, and Dr. Ramesh Pokhriyal Nishank Ji, Hon'ble Minister of Education, approved the transition of Shri Lal Bahadur Shastri Rashtriya Sanskrit Vidyapeeth into a Central University which came into effect from April 30th 2020, marking a significant milestone in the institution's journey.

The University presently has 5 schools having 22 departments with 109 regular teachers and 2141 students. The programmes offered by the university covers a wide range of subjects in Traditional Shastras, Sanskrit Language and Literature, Advanced Research, Modern Subjects, teacher training programme, diploma and certificate courses etc. The university’s remarkable academic performance is evident through good publications, innovations, employability traits and entrepreneurship. SLBSNSU fosters a multilingual and multicultural academic ambiance. Teachers as well as students from all over the country are teaching and studying respectively in various programmes including Ph.D. The university encompasses around 40 percent of female students. The university is having good infrastructure with excellent ICT facilities to meet academic needs of the University including faculty members and students.

***Vision:***

To preserve and promote the rich tradition of Shastric knowledge, interpreting ancient wisdom in the context of modern challenges, ensuring its continued relevance and significance.

***Mission:***

To provide comprehensiveeducation in traditional Sanskrit studies, with specialized focus on advanced disciplines.

To foster advance research in Sanskrit education and the Indian Knowledge System.

To conduct in-depth studies of classical and contemporary Sanskrit literature.

To enrich understanding of Sanskrit heritage through rigorous research.

To offer in-depth interpretations of Shastras, integrating traditional and contemporary perspectives.

To provide deep understanding in Sanskrit knowledge and advanced training in Shastric components like Jyotish, Vastushastra, and Yoga.

To preserve and critically analyze ancient manuscripts.

To train and develop competent Sanskrit teachers for schools.

To prepare teacher educators and faculty for higher education institutions.

To achieve excellence in Sanskrit education and research, establishing a distinct and esteemed reputation.

**SWOC**

***Institutional Strength :***

- Ecofriendly campus with clean, green, beautifully landscaped trees and plants situated in prime location surrounded by premier institutions.
- Preservation and promotion of Bhartiya Gyan Parampara.
- All programmes and courses are designed in the light of NEP 2020.
- Admission, Examination, Administration and Finance procedures governed through E-samarth portal.
- Highly qualified, experienced and dedicated faculty having traditional as well as modern knowledge.
- Good infrastructure having excellent ICT facilities.
- Fully automated library servies with OPAC, Internet and INFLIBNET connectivity.
- Emphasis on co-curricular and extension activities.
- Promoting traditional values through quality teaching and learning processes.
- Unique courses blending traditional and modern knowledge system with experiential learning through internship, institutional attachement, lab works etc.
- Preparing committed and competent teachers in the field of sanskrit education through Teacher Training Program
- UGC-MMTTC for training higher education faculty members across the country.

***Institutional Weakness :***

- Lack of land and space limitations for further expansion of facilities for new courses.
- No hostel facility for female students.
- University-industry less linkage is a constraint for campus placement.
- Need for patent registrations.
- Limited revenue generating sources.

***Institutional Opportunity :***

- The university has the potential to emerge as a global knowledge centre, attracting international collaborators and students.
- Scope for incorporating online value added compulsory courses on SWAYAM, MOOCS in the curriculum.
- Collaborate and sign more MoUs with other universities of national and international repute.
- Scope for undertaking inter-disciplinary and multi-disciplinary research projects.
- Scope for university-industry and corporate collaboration and consultancy.
- Skill development and capacity building in traditional disciplines.
- Faculty student exchange programmes with reputed national and foreign universities.
- Involvement of more students in various extensions and outreach activities for creating awareness and inculcating traditional and cultural values.
- Strong networking with alumni and stakeholders.
- Establishing research Centre for Bhartiya Knowledge system and traditional science.
- Expanding academic programmes in emerging fields like Sanskrit based Artificial Intelligence.

***Institutional Challenge :***

- Obtaining land for expansion of the university's academic and non-academic activities.
- Accommodating various academic programmes in limited available space in the present campus.
- Broadening the placement avenues for the students.
- Successful implementation of NEP 2020.
- Developing employability skills among students pursuing traditional courses.
- Establishment of Research & Development Cell and Incubation Centre.
- Creation of a strong research culture and innovation.
- Attract foreign students to learn Sanskrit and shastras.
- Generating funding resources.

**Criteria wise Summary**

***Curricular Aspects :***

In-line with the vision and mission, the university offers various programmes such as Shastri at UG, Acharya at PG & Vidyavaridhi at Doctorate levels along with Certificate and Diploma programmes through its various traditional departments under the ambit of five Schools viz. Ved Vedanga; Sahitya & Sanskriti; Darshan; Modern Subject & Shiksha. The curriculum of all the programmes follows Choice Based Credit System (CBCS) and are incongruence with NEP- 2020 & UGC Curriculum Framework & Guideline while that of all Teacher Education Programmes with National Council of Teacher Education (NCTE) regulations. The outcome based curriculum planning & development of all programmes involves rigorous exercise
firstly at Faculty Level and then with External Experts in form of workshop followed by
discussion in Board of Studies (BoS) and final approval by Academic Council. The course content is designed unit-wise and developed in-line with the Course Outcomes (COs), Programme Specific Outcomes (PSOs) & Programme Outcomes (POs). The semester wise curriculum implementation strictly adheres to the Academic Calendar. All the curriculum of various programmes provide academic flexibility in terms of Minor, Elective, Skill Enhancement & Ability Enhancement Courses as well as MOOCs and SWAYAM courses. The curriculum enrichment is reflected through integration of cross cutting issues relevant to Gender, Environment, Human Values & Professional Ethics with the course and course content of the syllabus of the offered programmes. In addition to this, number of value added courses for imparting life skill while lab work and internships for imparting practical skills also enriches the curriculum. The feedback on the curriculum is obtained from various stakeholders viz. Students, Teachers, Employers, Alumni & Parents. All the feedback Performas were developed in Google form consisting of 10 items with responses in five categories viz. Excellent, Very Good, Good, Satisfactory and Unsatisfactory. The data collected from respective stakeholder was analyzed item-wise and category-wise followed by preparation of a

comprehensive Feedback Report & Action Taken report further followed by presentation in the Academic Council.

***Teaching-learning and Evaluation :***

The University adopts a transparent admission policy. After admission an orientation programme "Deeksharambh" is organised at the beginning of the session to acquaint students with the University and new learning environment. Professors assess students' knowledge levels, distinguishing those from the Gurukul system, modern schools with intermediate Sanskrit knowledge and those without Sanskrit background. Different learning needs of the slow learners are taken care through Counselling, remedial classes, Sanskrit camp, focusing on basic Vyakaran and conversational skills. The advanced learners are encouraged to participate in national/international level seminars/talks/ Sanskrit related competitions organised by other universities also.

Student centric methods are used for enhancing learning experience of the students. Experiential learning includes Interpretation of birth charts in Falit Jyotish, construction techniques using interactive boards in vastushastra, school internship in shiksha shastri and Institutional attachment in Shiksha Acharya programmes etc. Collaborative, reflective, dialogical, observational learning methods are used in teaching of knowledge texts and Kavyas. The University incorporates traditional pedagogical approaches from Gurukulas and time-honoured Indian Education systems into its curriculum to enrich the learning experience. Qualified faculty are available for teaching new programs and emerging areas of study like Translation Studies, Comparative philosophy, Yoga Darshan, Sanskit manuscriptology, temple culture etc.

The University offers research grants, study leave, sabbatical leave etc. for the professional development the teachers. To encourage students to take part in various shastra exams special efforts are made by teachers. For All India Shastric competition, Sanskrit Pratibha Mahotsava, Essay, speech and other competitions teachers provide information, encouragement and special training to the students.

The University's examination system is technology enabled. Online admission applications, online fee payment, notifications through website are done. Academic Bank Credit (ABC) is also introduced. All the Shastric Courses are in Sanskrit language. Most of the courses are taught in Sanskrit and students are required to write answers in Sanskrit. Research students submit their thesis in Sanskrit. POs, PSOs and COs for all programmes are stated properly and displayed on website and attainment of these are evaluated through internal assessment, attendance, assignments, sessional work, semester exams, internship, programme appraisal etc.

***Research, Innovations and Extension :***

The University is dedicated to the study and research of Indian Knowledge Traditions and Sanskrit culture. It offers various courses in traditional shastric subjects, including Vidyavaridhi (Ph.D.) programme. The University strictly adheres to the UGC specified minimum standards and procedures for awarding Ph.D degree as per UGC regulation. Research incentives, seed money, minor & major projects, innovations and consultancy are pursued. The university provides many ICT enabled facilities like computer systems for browsing, Wi-Fi internet etc. to research scholars. Attempts are being made to created linkages, collaborations with other educational institutions for promoting conducive environment for interdisciplinary and multidisciplinary research. The University houses a manuscript library with 1,697 manuscripts related to various sanskrit scriptures and disciplines. It continuously encourages research scholars to study, edit and publish manuscripts. To facilitate the creation and translation of knowledge, 1000 manuscripts, 200 books and 125 issues of the research journal "Shodh Prabha" have been scanned and digitized under the guidance of the Sarvajna Peeth, Jammu & Kashmir. Commentaries and explanations, on classical Sanskrit texts are published and 640 modules were created for the EPG Pathshala programmes. The University has a research department that functions as informal research laboratory in the field of sanskrit. Professors from foreign universities also visit to deliver special lectures for research scholars. The Teaching Learning centre develops research skills in Sanskrit teachers, teacher educators and evaluators by organizing various programmes. The University features a virtual classroom for the production of virtual lectures and audio recordings for various

Sanskrit subjects for MOOCs and for SWAYAM platforms. The university publishes four research journals: Shodh Prabha, Vastushastra Vimarsh, Bheshajya Jyotish Manjusha and Sumangali. The University has a publication cell to facilitate the preservation, editing and publication of texts. It has collaborated with various institutions to promote Sanskrit activities. The University organizes various extension activities to promote public awareness in society including gender sensitization course/ programmes, cleanliness campaigns, Yuva Manthan, Bhartiya Bhasha Utsav, cultural gathering etc. It has adopted nearby villages to create a Sanskrit speaking environment. The University has established educational collaborations with various institutions, including SAP and National Sanskrit University Tirupati. Training in research methodologies and specialized techniques in the study of scriptures for research scholars is also provided. The university's commitment to research, publication and extension activities has made it a leading centre for Sanskrit studies in India.

***Infrastructure and Learning Resources :***

The area of the University is 10.65 acres. It has four buildings viz Saraswat Sadhna, Swarn Jayanti, Shaikshnik and Brihaspati bhawan with academic and administrative floors. The Infrastructure facilities comprises of 114 classrooms, out of which 23 classrooms are equipped with ICT and few with AC facilities. It has various Labs viz three computer, Psychology, Education Technology, Language and Social Studies, and for traditional discipline Observatory and Yajna Shala, Shraut Yajna Shala for practising different rituals. Besides, the university has Multi Purpose Hall, Seminar Halls, Committee Rooms, Yoga and Meditation Centre, a Manuscript Resource Centre, a Virtual Room, a boy's hostel, a consultation centre, and a women's centre. An automated central library with adequate number of books and journals. It subscribes to 124 print journals and 14 e-journals and having perpetual license of around 300 e-books. Link to all the e-journals and e-books are made available on the library portal. The library uses Libsys 10 ILMS for management and has an integrated RFID system. It has a dedicated accessible corner for the VIS with modern assistive technologies, a self-check-out kiosk, digital signage for disseminating information, an over-head scanner for the digitization of documents, a multipurpose reprographic machine, three PCs for enabling search facility, a cyber-library with ten advanced PCs. around 559 theses have been uploaded on Shodhganga, the best among many universities. The library uses Drillbit PDS to check for plagiarism. It has taken institutional membership of DELNET and SUGAM Pustakalay. It is an official member of the e- ShodhSindhu of INFLIBNET. Facilities like a fully furnished guest house, VC Bunglow, staff quarters, health centre, gym and playgrounds. The university has a well-maintained solar energy plant, sewage treatment plant, and rainwater harvesting system and RO system. The canteen, women's recreation centre, creche etc are well maintained.The entire campus is Wi- Fi enabled with a bandwidth speed of 1 GBPS and is under CCTV surveillance. Besides, it has a robust in-built mechanism for proper maintenance and utilising all amenities of the campus.

***Student Support and Progression :***

The University provides scholarship to UG, PG & Ph.D. students as per the government schemes and scholarship policy of the University. All Ph.D. students get non-net scholarship of Rs.8000/- per months from the University except JRF. The University has important cells like Anti-Ragging Cell; Grievance Redressal Cell and Internal Complaint Committee for timely redressal of student grievances including sexual harassment. SC/ST & OBC cells are active for the rights of students. NSS unit of the University organises various activities in nearby areas. Celebration of the Central Government prescribed programs like Swatch Bharat, Unity Day, Vigilance Awareness Week etc promote student's involvement in these activities showing their contribution in the university's progress.

The University fosters students' academic and shastric skills through diverse academic, creative, cultural and innovative programmes. For this Vakyartha Sabhas, Shastrarth Sabhas, scholarly discussions, Sanskrit speech competitions, shalaka exams and all India Shastra Competitions are organised by the University. Many students from the university win and receive awards in these, competitions. The University enthusiastically celebrates Sanskrit week every year for commemorating Sanskrit Day on Shravan Purnima. Renowned

scholars also deliver lecture on Indian knowledge Traditions. University organised a "Saral Manak Sanskrit" workshop and "Dhyay Vakya Vishleshan" workshop for developing students' creative potential and analytical skills. Utkal Diwas, Himachal Day, Vikhauti is also celebrated for promoting national unity.

SLBSNS University has signed MoUs with various institutions, facilitating collaborative programmes. Vastushastra department having MoU with the school of Planning and Architecture (SPA) organised national workshops and seminars on ancient and modern architecture. Research scholars also presented their papers in seminars. The University has MoU with Maharashi University World-Wide. These collaborations enhance academic excellence and research opportunities.

The university has a student welfare council (Chatra Kalyan Parishad). The council consists of a president, two Vice-Presidents, two General Secretaries and five members selected annually. Council representatives promote discipline, academic progress, participate in cultural activities and help students in the redressal of their complaint through student grievance redressal cell and maintain university's dignity. The Shikshashastra department publishes "Shiksha Jyoti a Magazine exclusively featuring students' articles, fostering their creativity and writing skills.

Alumni Association of the University is functional. Registration of the association is currently in process. It participates in University events like convocation, seminars, workshop etc & stay connected with the students and give them guidance in their studies and career choices.

***Governance, Leadership and Management :***

In accordance with the provisions of the Central Sanskrit Universities Act, 2020, SHRI LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY was established as Central University with effect from 30th April 2020. The University has adopted a decentralized system of governance by constituting various administrative and academic committees as per the statutory provisions. Participative management are practiced through various bodies viz. Executive Council, Academic Council, Finance Committee, Building Committee, Board of Studies, Planning & Monitoring Board, Research Committee, Admission Committees, Hostel Committee, Library Committee, Grievance Committees, Internal Complaint Committee, Screening Committees etc.

The University has competent and effective leadership with decentralization at different levels like Schools, Departments, Sections, Cells, Centres and Units. The President of India is the Visitor of the University. The Chancellor, Vice-Chancellor, Deans of Schools Heads of the Departments, Directors of centres, Registrar, Controller of Examination, Finance Officer and Librarian play effective and significant role in decision making and implementing strategies to address the vision, mission along with the core values of the University. While formulating the strategic plans, care has been taken to involve all the stakeholders of the University. Financial management of the University is transparent with regular internal and external audits.

Appraisal of teaching and non-teaching staff is regularly done as per the UGC guidelines. There are various academic and non-academic welfare measures for the staff member's viz. Health centre, crèche, guest house, canteen, yoga training, recreational facilities etc.

The Internal Quality Assurance Cell (IQAC) has developed guidelines for curriculum design based on Program Outcomes, Program Specific Outcomes, and Course Outcomes. This outcome-based approach ensures that teaching, learning, and assessments align with modern educational standards.

The assessment process has been updated to reflect the new curriculum, with changes in grading to assess students' knowledge, skills, and experience. For successful implementation of New Education Policy the IQAC provided comprehensive training to faculty members under the 'PANDIT MADAN MOHAN MALAVIYA NATIONAL TEACHER TRAINING CENTER' for new students Sanskrit language classes has also been initiated by IQAC.

***Institutional Values and Best Practices :***

The University consistently provides equal opportunities for both male and female students, without gender discrimination, in the learning process, as well as in various co-curricular activities, festivals, national and international programs, and all other initiatives. Additionally, a grievance redressal cell and an internal complaint committee have been established to address and resolve students' issues. The university also offers NCC (National Cadet Corps) program for both male and female students. Centre for Women's Study organizes various programmes on gender awareness and sensitization. University also offers various courses on Human Values, Environmental studies and Professional Ethics on the basis of Vedic and Sanskrit Literature. Time to time birth anniversaries of National and patriotic leaders, days of National importance as Constitution day, Sadhbhawana Diwas, Voters day etc. are celebrated in the University. University is committed for the preservation of environment and promotion of sustainability. The university integrates both theoretical and practical knowledge to achieve this goal. It adopts various Green initiatives. Under the Solar Energy Corporation of India, Ministry of New & Renewable Energy Govt. of India, University has erected a 150.20 KWp Roof Top Solar Power Plant in RESCO mode on the roof tops of existing University buildings. There are provisions for source segregation of waste, to channelize the waste to wealth by recovery, reuse and recycling. The University has installed a 120 KLD FAB Type Sewage Treatment Plant in the campus which treats more than 80% of the water supplied in the campus. The Treated wastewater is being used for gardening and other horticultural purposes, flushing in toilets of Swarna Jayanti Sadan. Coloured bin systems for Green Waste and Dry Waste are available. After segregating the solid waste University Works Department collect the bio-degradable solid waste for decomposition and hence prepared compost is used in gardens and parks of the University. The Engineering Department conducts "Green Audits" through G.G.C. Pvt. Ltd. Green landscapes with beautiful plants and trees are vital part of the life of the campus, providing space for study, play, outdoor events, relaxation and aesthetic appreciation. Rainwater harvesting mechanism and Green campus help recharge groundwater, and also manage to keep clean and cool air in the campus. The University buildings, campus, academic and administrative systems are inclusive in nature including various facilities like Ramps, Rails, Lifts, Braille Software, Rest Rooms, Wheelchair, Scribes for examination. There is special software named Kebox is installed in library for easy accession. The institutional functioning is as per professional code prescribed or suggested by statutory bodies and regulatory authorities viz. UGC, NCTE and Ministry of Education. It maintains complete transparency in its financial, academic, administrative and auxiliary functions. University organizes various distinctive activities to preserve, promote, and enhance Bhartiya knowledge traditions and to take them to new heights. Among these activities, the key ones include Istiyagah (a Vedic ritual), Vastu (architecture), Yoga Education, Natural Medicine, and various programmes Paurohitya Sanskrit grammar and literature. The MMTTC formerly TLC aims to improve the quality of teaching and learning in Sanskrit education. The centre of works on capacity building and skill development for Sanskrit teachers, with focus on innovative and modern approaches in teaching, including technology integration and content creation.

**Profile**

**BASIC INFORMATION**

| **Name and Address of the University** | |
|---|---|
| Name | SHRI LAL BAHADUR SHASTRI NATIONAL SANSKRIT UNIVERSITY |
| Address | B-4, QUTUB INSTITUTIONAL AREA, NEW DELHI |
| City | Delhi |
| State | Delhi |

| | |
|---|---|
| Pin | 110016 |
| Website | https://www.slbsrsv.ac.in |

**Contacts for Communication**

| Designation | Name | Telephone with STD Code | Mobile | Fax | Email |
|---|---|---|---|---|---|
| Vice Chancellor | Murlimanohar Pathak | 011-46060600 | 8595746614 | 011-46060493 | registrar@slbsrsv.ac.in |
| IQAC / CIQA coordinator | Devi Prasad Tripathi | 011-46060615 | 9868155588 | - | iqac@slbsrsv.ac.in |

**Nature of University**

| | |
|---|---|
| Nature of University | Central University |

**Type of University**

| | |
|---|---|
| Type of University | Unitary |

**Establishment Details**

| | |
|---|---|
| Establishment Date of the University | 08-10-1962 |
| Status Prior to Establishment,If applicable | |

**Recognition Details**

**Date of Recognition as a University by UGC or Any Other National Agency :**

| Under Section | Date | View Document |
|---|---|---|
| 2f of UGC | 22-03-2007 | View Document |
| 12B of UGC | 22-03-2007 | View Document |

**University with Potential for Excellence**

| | |
|---|---|
| Is the University Recognised as a 'University with Potential for Excellence (UPE)' by the UGC? | No |

**Location, Area and Activity of Campus**

| Campus Type | Address | Location * | Campus Area in Acres | Built up Area in sq.mts. | Programmes Offered | Date of Establishment | Date of Recognition by UGC/MHRD |
|---|---|---|---|---|---|---|---|
| Main campus | B-4, QUTUB INSTITUTIONAL AREA, NEW DELHI | Urban | 10.65 | 22589.01 | UG, PG, Ph.D, Certificate and Diploma courses | | |

## ACADEMIC INFORMATION

### Affiliated Institutions to the University

| Type of Colleges | Permanent | Temporary | Total |
|---|---|---|---|

### Furnish the Details of Colleges of University

| | Number |
|---|---|
| Constituent Colleges | 0 |
| Affiliated Colleges | 0 |
| Colleges Under 2(f) | 0 |
| Colleges Under 2(f) and 12B | 0 |
| NAAC Accredited Colleges | 0 |
| Colleges with Potential for Excellence(UGC) | 0 |
| Autonomous Colleges | 0 |
| Colleges with Postgraduate Departments | 0 |
| Colleges with Research Departments | 0 |
| University Recognized Research Institutes/Centers | 0 |

**Is the University Offering any Programmes Recognised by any Statutory Regulatory Authority (SRA)** : Yes

| SRA program | Document |
|---|---|
| NCTE | 108721_13699_4_1719309119.pdf |

### Details Of Teaching & Non-Teaching Staff Of University

| Teaching Faculty | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | Professor | | | | Associate Professor | | | | Assistant Professor | | | |
| | Male | Female | Others | Total | Male | Female | Others | Total | Male | Female | Others | Total |
| Sanctioned | 11 | | | | 24 | | | | 104 | | | |
| Recruited | 6 | 0 | 0 | 6 | 12 | 0 | 0 | 12 | 70 | 21 | 0 | 91 |
| Yet to Recruit | 5 | | | | 12 | | | | 13 | | | |

| | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|
| On Contract | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

| Non-Teaching Staff | | | | |
|---|---|---|---|---|
| | Male | Female | Others | Total |
| Sanctioned | | | | 136 |
| Recruited | 87 | 21 | 0 | 108 |
| Yet to Recruit | | | | 28 |
| On Contract | 2 | 0 | 0 | 2 |

| Technical Staff | | | | |
|---|---|---|---|---|
| | Male | Female | Others | Total |
| Sanctioned | | | | 16 |
| Recruited | 11 | 1 | 0 | 12 |
| Yet to Recruit | | | | 4 |
| On Contract | 0 | 0 | 0 | 0 |

**Qualification Details of the Teaching Staff**

| Permanent Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 0 | 0 | 0 | 0 | 0 | 0 | 4 | 0 | 0 | 4 |
| Ph.D. | 6 | 0 | 0 | 12 | 0 | 0 | 63 | 19 | 0 | 100 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 3 | 2 | 0 | 5 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

| Temporary Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 16 | 4 | 0 | 20 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 4 | 2 | 0 | 6 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

| Part Time Teachers | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|
| Highest Qualification | Professor | | | Associate Professor | | | Assistant Professor | | | |
| | Male | Female | Others | Male | Female | Others | Male | Female | Others | Total |
| D.sc/D.Litt/LLD/DM/MCH | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| Ph.D. | 0 | 0 | 0 | 0 | 0 | 0 | 4 | 1 | 0 | 5 |
| M.Phil. | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |
| PG | 0 | 0 | 0 | 0 | 0 | 0 | 2 | 1 | 0 | 3 |
| UG | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 | 0 |

**Distinguished Academicians Appointed As**

| | Male | Female | Others | Total |
|---|---|---|---|---|
| Emeritus Professor | 0 | 0 | 0 | 0 |
| Adjunct Professor | 0 | 0 | 0 | 0 |
| Visiting Professor | 0 | 0 | 0 | 0 |

**Chairs Instituted by the University**

| Sl.No | Name of the Department | Name of the Chair | Name of the Sponsor Organisation/Agency |
|---|---|---|---|
| 1 | Darshan Mimansa | Swami Narayan | Shri Swami Narayan Mandir Vartadham |

**Provide the Following Details of Students Enrolled in the University During the Current Academic Year**

| Program | | From the State Where College is Located | From Other States of India | NRI Students | Foreign Students | Total |
|---|---|---|---|---|---|---|
| UG | Male | 157 | 346 | 0 | 0 | 503 |
| | Female | 103 | 182 | 0 | 0 | 285 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| PG | Male | 94 | 160 | 0 | 0 | 254 |
| | Female | 72 | 53 | 0 | 0 | 125 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| PG Diploma recognised by statutory authority including university | Male | 20 | 19 | 0 | 0 | 39 |
| | Female | 40 | 13 | 0 | 0 | 53 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Doctoral (Ph.D) | Male | 116 | 297 | 0 | 0 | 413 |
| | Female | 80 | 93 | 0 | 0 | 173 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Diploma | Male | 97 | 131 | 0 | 0 | 228 |
| | Female | 48 | 20 | 0 | 0 | 68 |
| | Others | 0 | 0 | 0 | 0 | 0 |
| Certificate / Awareness | Male | 0 | 0 | 0 | 0 | 0 |
| | Female | 0 | 0 | 0 | 0 | 0 |
| | Others | 0 | 0 | 0 | 0 | 0 |

| | |
|---|---|
| **Does the University offer any Integrated Programs?** | No |

**Details of UGC Human Resource Development Centre, If applicable**

| | |
|---|---|
| Year of Establishment | 12-07-2017 |
| Number of UGC Orientation Programs | 5 |
| Number of UGC Refresher Course | 1 |

| | |
|---|---|
| Number of University's own Programs | 5 |
| Total Number of Programs Conducted (last five years) | 79 |

**Details of Programmes conducted on Indian Knowledge Systems**

| Sl.No | Programmes | No of Programmes |
|---|---|---|
| 1 | Number of Shastra Adhyapana Prashikshana Programmes conducted in last five years | 0 |
| 2 | Number of Shastra Vakyartha Prashikshana Programmes conducted in last five years | 0 |
| 3 | Number of Sanskrit Drama Training Programmes conducted in last five years | 0 |
| 4 | Number of Manuscriptology Training Programmes conducted in last five years | 0 |
| 5 | Number of Sanskrit Drama Festivals held in last five years | 0 |
| 6 | Number of Sanskrit Poetry Writing Training Programmes held in last five years | 0 |
| 7 | Number of Sanskrit Sambhashana Shibirams held in last five years | 0 |
| 8 | Number of Teachers Training Programs | 19 |
| 9 | Number of Translations Training Programs | 0 |

**Accreditation Details**

| Cycle Info | Accreditation | Grade | CGPA | Upload Peer Team Report |
|---|---|---|---|---|
| Cycle 1 | Accreditation | B++ | 83.7 | Peer Team Report (First Cycle).pdf |
| Cycle 2 | Accreditation | A | 3.01 | Peer Team Report (Second Cycle).pdf |

| **Institutional preparedness for NEP** | |
|---|---|
| 1. Multidisciplinary/interdisciplinary: | The University has implemented NEP-2020 from the academic Session 2021-22 and accordingly four year Bachelor's Degree programmes with Multiple Entry and Multiple Exit (MEME) System has been introduced. The curriculum for all the UG programmes has been designed and implemented as per the UGC-CCFUP guidelines. Designed curriculum framework, has the features of multidisciplinary and interdisciplinary Major and Minor Courses. 21 multidisciplinary courses are offered by the University at UG level. Curriculum frameworks provide flexibility for learners to move from one discipline to another, through major and minor streams. It also provides opportunity for choosing courses of their interest, in various disciplines. School of Education already has inter-disciplinary programmes, having courses related to various disciplines. Further, 4 new PG Courses viz. MA (English), MA (Hindi) MA (Sociology) and |

| | |
|---|---|
| | MA (Hindu Studies) were also introduced from the academic session 2022-23. The University is also planning to open new schools and departments of both traditional and modern streams of Knowledge. |
| 2. Academic bank of credits (ABC): | University is now on NAD Board for Academic Bank of Credit continuing the chain of building transformative educational set up. For its successful implementation the students were oriented for creation of NAD-ID and ABC-ID through induction meeting. Students were facilitated with instructions and with the help of online videos, for creating ABC-ID on DigiLocker for uploading the academic records. The Provision of ABC-ID and NAD - ID has been made on Admission and Examination application forms also. Till date, approximately 2177 students have been registered on the Portal. From the Academic Session 2021-22 the University has made the provisions in the Ordinance, on the conduct of examination to give equivalence credit weightage to the students for credits earned by them through online Courses on SWAYAM platform for elective subjects in the credit plan of programmes, as per the UGC guidelines. Provisions are also there for collaboration with other institutions for credit transfer. Examination department has started the digitisation of Academic Awards, which can be uploaded on DigiLocker. |
| 3. Skill development: | Skill development is crucial for students to enhance their creativity, employability and overall personal development. The University has made significant efforts for Skill development, by integrating Shastric and Sanskrit Education with modern competencies. Some initiatives are: • Integrated skill development courses have been introduced in all the programmes of the University. • At UG level, University is having 22 Skill Enhancement, 16 Ability Enhancement and 22 Value Added Courses, which include soft skills, hard skills, cognitive skills, digital literacy skills, etc. • Spoken Sanskrit and Indian Language Courses. • Sanskrit shastras and modern subjects pedagogical skills. • Experiential learning opportunities through practicum, field work and internship. • Skill building competitions. • Various certificate, diploma and PG diploma courses are offered. • Collaboration with other Institutions like SPA, IIMC, DU, NCERT, SCERT, DOE etc. |
| 4. Appropriate integration of Indian Knowledge system (teaching in Indian Language, culture, using online course): | The University is a premier Institution for promoting Indian knowledge system. It offers various courses based on Indian Knowledge system at UG and PG levels as major and minor streams, along with multidisciplinary courses. There are around 19 departments of Indian Shastra's viz, Veda, Jyotish, Vastushastra, Vyakaran, Paurohitya, Dharmashastra, Mimansa, SankhyaYoga, Nyaya |

| | |
|---|---|
| | Vaisheshik, Advait Vedant, Vishishtadvait Vedant, Jain Darshan, Sarva Darshan, Sahitya, Puran, Prakrit Bhasha, etc. Besides this, IKS has also been incorporated in Professional Programmes like Shiksha Shastri (B.Ed) and Shiksha Acharya (M.Ed) as Shastra Pedagogy courses (Jyotish, Darshan, Vyakaran, Sahitya, Ved and Karmkand), Yoga Course and various courses having content like Bhartiya Darshan, Purusharth Chatushtaya, Importance of Bhagavad-Gita in Adjustment, Panchkosh for Personality Development, Indian Perspective of Management, Value Education etc. In Ph.D. programme, researchers are encouraged for research work based on IKS. The University preserves ancient manuscripts of various Shastras, conduct research programmes, seminars, training programmes and workshops, to promote Indian knowledge system. It also offers various certificate and diploma courses. The University plays a vital role in preserving and promoting IKS making them relevant and accessible to modern society. |
| 5. Focus on Outcome based education (OBE): | Outcome based Education gives emphasis on measuring students' learning outcomes and ensuring acquisition of specific knowledge, skill and competencies by the students. The University focuses on Outcome Based Education. PSOs, POs, and COs for all the programmes and courses have been formulated by the Curriculum Committees of the respective departments, as per the UGC-LOCF guidelines. For all Programmes and Courses, SMART- Specific, Measurable, Achievable, Relevant and Time bound outcomes have been developed for achieving goals of OBE. The University has proper planning, teaching-learning and assessment system by adopting following measures: - • Curriculum mapping and alignment with the Outcomes. • Appropriate teaching learning methods are used & applied by teachers for ensuring students' progress align with the formulated learning outcomes. • Emphasis is given on higher cognitive ability, skill and competency-based assessment through written examination, oral presentations, projects, seminars, field-based research and performance-based assessment. • By focusing on OBE the Academic and Examination system of University ensures that students possess the Domain Specific knowledge, multidisciplinary/interdisciplinary knowledge along with skills and competencies as identified in POs, PSOs & COs to succeed in their chosen Programme. |
| 6. Distance education/online education: | The university strives to provides equitable access & online instructional opportunities of teaching & learning to all the students enrolled in the various programmes. In order to facilitate this, the university has its G-Suite account which provides |

| | |
|---|---|
| | ample storage space for Gmail accounts created for all the teaching & non- teaching staff, along with number of free available services/facilities. In order to avail more features of G-Suite, four Gmail accounts for further upgraded with paid licenses. The institutional Gmail account of the faculty members empowered them to continue their teaching work, by the use of Google Meet even during the pandemic time. They even shared the links of video recording of their lectures with their students through WhatsApp group or Google Classroom. In addition to this, the university has a well-equipped Studio for video content development & editing. In this regard, the university has developed e-courses on MOOCs & SWAYAM platform. The National Resource Centre (NRC) of the University has developed Annual Refresher Programme in Teaching (ARPIT) equivalent to Refresher Course on Sanskrit Pedagogy & Methodology of Teaching Sanskrit for the years 2018, 2019 & 2020, each with 40 modules. The resources viz. PPTs scanned notes, video links, audio etc. developed for the course content offered under various programmes by the faculty members are managed & shared through university Learning Management System (LMS) as well faculty's personal Google Classes. The Computer Centre of the university provides an ancillary support for conducting technology oriented & integrated day-to-day academic & administrative activities. All the university related important information & activities are disseminated through university's website. The university is also in the process of blending the offered programmes with basket of SWAYAM courses. Thus, online education in the university is being confined with the extensive use of ICT in education including social media platforms such as Twitter now known as X & Facebook etc. |

| **Institutional Initiatives for Electoral Literacy** | |
|---|---|
| 1. Whether Electoral Literacy Club (ELC) has been set up in the College? | Yes, the Electoral Literacy Club (ELC) was established in the University in April 2022 under the NSS Unit. The aim of the ELC is to promote electoral awareness, responsible citizens and foster critical thinking and democratic values among students and staff members. |
| 2. Whether students' co-ordinator and co-ordinating faculty members are appointed by the College and whether the ELCs are functional? Whether the ELCs are representative in character? | Yes, students and staff members are appointed to the core committee of ELC by the University. The chairperson of the committee is Dr. Abhishek Tiwari (Associate Professor & NCC officer), Secretary Dr. Saurabh Dubey (Assistant Professor and Nodal officer-NSS unit), Coordinating members are Smt. Bharti Tripathi (Assistant |

| | |
|---|---|
| | Registrar), Shri Raj Kumar (Section Officer) and three students viz. Sh. Dheeraj Suyal, Sh. Deepanshu Sharma and Km Varsha Bairwa. Thus, the ELC is representative in character. |
| 3. What innovative programmes and initiatives undertaken by the ELCs? These may include voluntary contribution by the students in electoral processes-participation in voter registration of students and communities where they come from, assisting district election administration in conduct of poll, voter awareness campaigns, promotion of ethical voting, enhancing participation of the under privileged sections of society especially transgender, commercial sex workers, disabled persons, senior citizens, etc. | A video clip for electoral awareness in Sanskrit Language was developed by the ELC of NSS Unit. The video was uploaded on social media platforms for electoral awareness and democratic participation in the electoral process. The University has been notified as a polling station for General Election, Municipal-corporation and Assembly elections by the Election Commission of India. Therefore, at the time of elections, students and staff members voluntarily contribute to facilitate in conduction of the poll and provide adequate facilities and support to every section of society including Divyangjan for enhancing electoral participation. |
| 4. Any socially relevant projects/initiatives taken by College in electoral related issues especially research projects, surveys, awareness drives, creating content, publications highlighting their contribution to advancing democratic values and participation in electoral processes, etc. | The University always plays a leading role in National missions. The university organises awareness drives for electoral-related issues in the local community and also uses social media platforms to create and raise awareness. National Voters Day is celebrated every year on 25th January. On this day staff members and students take the pledge as citizens of India having abiding faith in democracy, to uphold the democratic tradition of our country and the dignity of free, fair, and peaceful elections. A Programme “First vote is the key of democracy” was organised on 6th March 2023 by the ELC of NSS unit for the youth, especially for first-time voters to envision the future of the Nation by nurturing a sense of responsibility and patriotism in them. The objective of this campaign is to inculcate the spirit of democracy and to exercise their constitutional rights to represent aspirations, values and vision for the Nation. A Campaign entitled “Mera Pehla Vote desh ke Naam” i.e. “My first vote for Nation" was also organised to encourage youths to actively participate in the Electoral process. The staff of the University in collaboration with the Election Commission of India (ECI) participate in various electoral processes. Staff members designated as BLOs by the ECI are doing House to House field verification Survey in a Special Summary Revision of the Photo Electoral Roll and significantly contributing to the process of draft Publication of Electoral Rolls. |
| 5. Extent of students above 18 years who are yet to be enrolled as voters in the electoral roll and efforts by ELCs as well as efforts by the College to institutionalize mechanisms to register eligible students as voters. | Number of students who are yet to be enrolled as voters - NIL. However, an Electoral Literacy Club (ELC) was duly established in the University to promote electoral awareness and to institutionalize mechanisms to register eligible students as voters. |

**QIF**

**1.Curricular Aspects**

**1.1 Curriculum Design and Development**

***1.1.1 Curricula developed/ rare shastric texts adopted have relevance to the local/ national/ regional/ global developmental needs with learning objectives including programme outcomes, programme specific outcomes and course outcomes of all the programmes offered by the University.***

***विकसिता पाठ्यचर्या/ स्वीकृता दुर्लभाः शास्त्रग्रन्थाः, स्थानीय-राष्ट्रिय-प्रादेशिक-वैश्विक-विकासस्य आवश्यकतया अधिगमोद्देश्यैः पाठ्यक्रमस्य परिणामैः सह निर्दिष्टपाठ्यक्रमस्य परिणामैः, विश्वविद्यालयेन प्रवर्तितानां सर्वेषां पाठ्यक्रमाणां च परिणामैः सङ्गतिं भजन्ते।***

**Answer:**

**विश्वविद्यालयस्य दृष्टिः- शास्त्रीयपरम्परायाः शास्त्राणां च व्याख्यानेन संरक्षणे च आधुनिकसन्दर्भे समस्यासमाधानं प्रति तत्प्रासङ्गिकता वर्तते।**

विश्वविद्यालयस्य शास्त्रीयपाठ्यक्रमः - शास्त्री (सम्मानित-Honours), आचार्यः, शिक्षाशास्त्री, शिक्षाचार्यः, विशिष्टाचार्यः, विद्यावारिधिश्च। इमे पाठ्यक्रमाः सम्प्रति NEP-2020 इति नीत्यनुसारेण सञ्चालिताः भवन्ति।

**अस्मिन् विश्वविद्यालये पञ्चपीठानि सन्ति।**

1. **वेदवेदाङ्गपीठान्तर्गतं-** वेद-पौरोहित्य-व्याकरण-ज्योतिष-धर्मशास्त्र-वास्तुशास्त्राणि।
2. **साहित्य एवं संस्कृतिपीठान्तर्गतं-** साहित्य-प्राकृतभाषा-पुराणेतिहासाः।
3. **दर्शनपीठान्तर्गतं-** न्यायवैशेषिक-सांख्ययोग-मीमांसा-अद्वैतवेदान्त-विशिष्टाद्वैतवेदान्त-जैनदर्शन-सर्वदर्शन-योगविज्ञानानि।
4. **आधुनिकविषयपीठान्तर्गतं-** हिन्दी, अंग्रेजी, पर्यावरणं, मानवाधिकारः, मूल्यशिक्षा, समाजशास्त्रं, राजनीतिशास्त्रं, एन.सी.सी., हिन्दू-अध्ययनं, संगणकं, शोधश्चेति।
5. **शिक्षापीठान्तर्गतं-** शिक्षाशास्त्रम् इति नानाशाखाभिः सह साम्प्रतिकीं सामाजिकसङ्गतिं सम्पादयति।

**निम्नलिखितानां संकेतानाम् उपलब्धता वेवसाइट मध्ये विद्यते।**

1. विश्वविद्यालयस्य सर्वे कार्यक्रमाः विश्वविद्यालयानुदानायोगस्य (UGC) NCTE इति संस्थाद्वयस्य दिशानिर्देशभ्युपगत्य शैक्षणिककैलेण्डर (Academic calendar) इत्यनुसारं प्रचलन्ति । विश्वविद्यालयस्य सत्रारम्भः विश्वविद्यालयानुदानायोगस्य दीक्षारम्भछात्रप्रेरणाकार्यक्रम" इत्यनुसारं प्रचलति ।
2. सञ्चालितानां सञ्चाल्यमानानां शास्त्रिपाठ्यक्रमाणां आचार्यपाठ्यक्रमाणां च परिणामाः मुख्याङ्गरूपेण सततं सफलाः सन्ति। 2021 वर्षं यावत् सञ्चाल्यमानस्य विशिष्टाचार्यपाठ्यक्रमस्य परिणामाः सफला आसीत्।
3. विश्वविद्यालयानुदानायोगस्य निर्देशानुसारं CBCS इत्यन्तर्गतं 2018-19 तमे वर्षे चयन-विकल्पाधारित-क्रेडिटप्रणाल्यनुसारेण पाठ्यक्रमः विश्वविद्यालयेन सञ्चालितः।
4. विश्वविद्यालये शिक्षाशास्त्री शिक्षाचार्यः कार्यक्रमश्च NCTE नियमानुसारं प्रचलति। शिक्षाशास्त्री-शिक्षाचार्यकार्यक्रमं विहाय सर्वे कार्यक्रमाः UGC नियमानुसारं प्रचलति।
5. अस्माकं विश्वविद्यालये विषयाधारिताः कार्यक्रमाः 82 आसन्। यत्र शास्त्री, बी.ए.योग, आचार्य, एम.ए.योग, शिक्षाशास्त्री, शिक्षाचार्यः, विशिष्टाचार्यः, विद्यावारिधिः चेति। पुनश्च स्ववित्तपोषित अंशकालीनाः कार्यक्रमाः 21 आसन्। यत्र षाण्मासिककार्यक्रमाः, एकवर्षीय PG डिप्लोमा, द्विवर्षीय PG डिप्लोमा चेति। आहत्य-102 (2019-2020), 102 (2020-2021), 85 (2021-22), 88 (2022-23), 88 (2023-24)। पाठ्यक्रमाणां 2019-20 संख्या-1008, 2020-21 संख्या-1008, 2021-22 संख्या-967, 2022-23 संख्या-1007, 2023-24 संख्या-1007
6. विश्वविद्यालयस्य पाठ्यक्रमेषु CUET (NTA) परीक्षोत्तीर्णछात्राणां प्रवेशः भवति, वैकल्पिकरूपेण पारम्परिकविषयेषु विश्वविद्यालयस्य नियमानुसारं भवति।
7. राष्ट्रियशिक्षानीति- (NEP-2020) अनुसारं 2021-2022 तमे वर्षे प्रथमचरणान्तर्गतं स्नातकस्तरे कार्यक्रमस्य सञ्चालनं प्रारब्धम्। यत्र इति नीतेः यदुद्देश्यं विद्यते तत्स्वीकृत्य प्राथमिकरूपेण भारतीयशास्त्रपरम्परायाः संस्कृतेश्च सम्बद्धनार्थं वेदादारभ्य अष्टादशविद्यास्थानामध्यापनार्थञ्च प्रयत्नशीलः। विश्वविद्यालयानुदानायोगस्य कालिकानिर्देशानुसारं (CCFUP) इत्यन्तर्गतं पाठ्यक्रमाणां परिवर्द्धनं विश्वविद्यालयेन क्रियते । अत्र कार्यक्रमाणां संख्या-84 (2021-2022)

8. एतेषां सर्वेषां पाठ्यक्रमाणां POs, PSOs, COs, LOs अत्र संलग्नाः सन्ति। एवञ्च तत्र मुख्योद्देश्यस्य साफल्याय 'पाठ्यक्रमेषु स्तरानुगुणं निर्दिष्टोद्देश्यानुगुणञ्च अङ्गीकृताः दुर्लभाः शास्त्रग्रन्थाः' प्रमुखाः हेतवः भवन्ति ।
9. **वेदवेदाङ्गपीठम्-** सर्वं वेदात् प्रसिध्यति इति वचनामृतानुसारेण वेदविभागस्य पाठक्रमे 'ऋग्वेदभाष्यभूमिका' दुर्लभशास्त्रग्रन्थानां परिणामैः सह संगतिप्रदर्शनम् ज्ञापयति । कात्यायनश्रौतसूत्रम्, महीधरभाष्यम्, सायणभाष्यम्, प्रातिशाख्यञ्च अन्यत्र दुर्लभं वेदवाङ्मये निहितं रहस्यम् अधिगन्तुं बहूपकारकमस्तीति निश्चप्रचं वक्तुं शक्यते। विश्वविद्यालयेन प्रवर्त्यमानः पौरोहित्यकर्मकाण्डपाठ्यक्रमः समाजे विशेषतः भारतीयसेनायां जूनियर कमिशन अधिकारी (जे.सी.ओ.) इति पदप्राप्तये, विभागपक्षतः प्रायोगिकप्रशिक्षणं दीयते । डिप्लोमामाध्यमेन कर्मकाण्डस्य प्रशिक्षणमपि कारयति एषः पौरोहित्यविभागः। व्याकरणविभागस्य पाठ्यक्रमे अष्टाध्यायी, पातञ्जलमहाभाष्यम्, वैयाकरणभूषणसारः, लघुशब्देन्दुशेखरः , परिभाषेन्दुशेखरः वाक्यपदीयञ्चत्यादयः सन्ति। ज्यौतिषविभागस्य सिद्धान्त-फलितज्योतिषपाठ्यक्रमे बृहत्संहिता, होरा, संहिता, गणितञ्चेति अध्ययनमध्यापनञ्च प्रचलति, भैषज्यज्यौतिषादिकं विषयं स्वीकृत्य डिप्लोमापाठ्यक्रमं सञ्चाल्यति। वास्तुशास्त्रे निहितज्ञानानां छात्रेषु समाजेषु सञ्चरणं क्रियते। वास्तुशास्त्रीयविशिष्टग्रन्थानां समरांगणसूत्रधार-विश्वकर्मप्रकाश-मयमतम् इत्यादीनामध्ययनं सततमत्र प्रचलति। अत्रैव विभागे वास्तुडिप्लोमादिपाठ्यक्रमाणां सञ्चालनमपि भवति। धर्मशास्त्रविभागस्य पाठ्यक्रमे व्यवहारमयूखः, दायभागः , कौटिलीयम् अर्थशास्त्रम्, कालमाधवश्चेत्याध्यः ग्रन्थाः सन्ति।
10. **साहित्य एवं संस्कृतिपीठम्-** साहित्ये काव्यशाखायाः अलङ्कारशाखायाश्च अध्ययनं प्रचलति। तत्र ध्वन्यालोकः, व्यक्तिविवेकः, काव्यप्रकाशः, साहित्यदर्पणः, रसगङ्गाधरः, भरतसूत्रम् इत्येते पाठ्यक्रमे स्वीकृता ग्रन्थाः सन्ति। प्राकृतभाषाविभागे प्राकृतगाथानां विशिष्टाध्ययनं. प्राकृतव्याकरणस्यावबोधं च कारयति । पुराणसाहित्यस्य विभागः वर्तते, तत्र रामायणस्य महाभारतस्य श्रीमद्भगवद्गीतायाः भागवतपुराणं, च अध्ययनमध्यापनञ्च प्रचलिताऽऽसीत्।
11. **दर्शनपीठम्-** न्यायविभागस्य पाठ्यक्रमे विशेषतः न्यायाभिमतप्रमाणानां तदङ्गानाञ्चाध्यापनं भवति। यत्र न्यायकुसुमाञ्जलिः, न्यायमञ्जरी, गादाधरी, जागदीशी, न्यायभाष्यम्, वैशेषिकभाष्यम् इत्यादिग्रन्थेषु प्रतिपादिताः दुर्लभाः विषयाः इतरशास्त्राणां पाठ्यक्रमाणां प्रमेयज्ञानार्थमत्यन्तम् अपेक्षिताः सन्ति। जैनदर्शनविभागस्य पाठ्यक्रमे सर्वाथसिद्धि, प्रमेयरत्नमाला, पञ्चास्तिकायसङ्ग्रहः, समयसारः, स्याद्वादमञ्जरी चेत्यादयः ग्रन्थाः पाठ्यक्रमे सन्ति। अस्मिन्नेव विभागे प्रमाणपत्रीय-डिप्लोमापाठ्यक्रमं प्रचलति। मीमांसादर्शनविभागस्य पाठ्यक्रमे शाबरभाष्यम्, श्लोकवार्त्तिकम्, भाट्टरहस्यम्, मीमांसाकौस्तुभः इत्येते शास्त्रीयग्रन्थाः स्वीकृताः सन्ति। अत्र अद्वैतवेदान्ते ब्रह्मसूत्रशाङ्करभाष्यम्, पञ्चदशी, अद्वैतसिद्धिरित्यादिग्रन्थानामध्यापनं भवति। विशिष्टाद्वैतवेदान्तविभागे श्रीभाष्यम्, न्यायसिद्धाञ्जनम्, शतदूषणी इत्यादिग्रन्थानामध्यापनं भवति। सांख्ययोगविभागे सांख्यकारिका, सांख्यतत्त्वकौमुदी, पातञ्जलयोगसूत्रव्यासभाष्यम्, हठयोगप्रदीपिका आदि ग्रन्थानामध्यापनं प्रचलति। सर्वदर्शनविभागस्य पाठ्यक्रमे समेषां दार्शनिकानां मतमभ्युपेत्य तत्तद्दर्शनेषु प्रसिध्दग्रन्थानामध्यापनं प्रचलति। योगविभागपाठ्यक्रमे प्रायोगिकसंरचना विद्यते। योगडिप्लोमास्वास्थ्यविषयकपाठ्यक्रमः बहूपकारी वर्तते।

अत्रैव विश्वविद्यालये शिक्षां शिक्षणं प्रशिक्षणञ्चावाप्य छात्राः देशे देशान्तरेषु च स्वीयां वृत्तिम् अवाप्नुवन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***1.1.2 Percentage of programe where syllabus revision was carried out during the last five years***

## *विगतपञ्चवर्षेषु विहितस्य पाठ्यक्रमपुनरीक्षणस्य प्रतिशतता।*

**Answer:** 40.3

1.1.2.1 How many Programmes were revised out of total number of Programmes offered year-wise during the last five years

विगतपञ्चवर्षेषु सञ्चालिताः कति पाठ्यक्रमाः प्रतिवर्षं पुनरीक्षीताः?

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 22 | 20 | 23 | 22 | 100 |

1.1.2.2 Number of all Programmes offered by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थायां कति पाठ्यक्रमाः प्रतिवर्षं सञ्चालिताः?

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 88 | 88 | 84 | 102 | 102 |

| File Description | Document |
|---|---|
| Minutes of relevant Academic Council/BOS meeting | View Document |
| Details of Programme syllabus revision in last 5 years (Data Template) | View Document |
| Any additional information | View Document |

***1.1.3 Average percentage of courses having focus on indepth-shastric learning/ creative writing/ employability/ entrepreneurship/ skill development/ Interdisciplinary/ Indigenous Knowledge base with modern application during the last five years***

***विगतपञ्चवर्षाणाम् आमूलशास्त्राध्ययनं/ सर्जनात्मकलेखनं/ उद्यमिताम्/ उद्योगप्राप्ति-सामर्थ्यम्/ कौशलविकासम्/ अन्तश्शास्त्रीयं/ देशजज्ञानप्रणालीं च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यपत्राणां प्रतिशतं मध्यमानस्य मानम्।***

**Answer:** 100

1.1.3.1 Number of courses having focus on employability/ entrepreneurship/ skill development year-wise during the last five years

विगतपञ्चवर्षेषु उद्यमिताम्/ उद्योगप्राप्ति-सामर्थ्यं/ कौशलविकासं च लक्ष्यीकृत्य प्रवर्तितानां पाठ्यपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1007 | 1007 | 967 | 1008 | 1008 |

1.1.3.2 Number of courses in all Programmes year-wise during the last five years

विगतपञ्चवर्षेषु सर्वेषु कार्यक्रमेषु सम्मिलितपाठ्यपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1007 | 1007 | 967 | 1008 | 1008 |

| File Description | Document |
|---|---|
| Programme/ Curriculum/ Syllabus of the courses | View Document |
| MoUs with relevant organizations for these courses, if any | View Document |
| Minutes of the Boards of Studies/ Academic Council meetings with approvals for these courses | View Document |
| Details of courses having focus on employability/ entrepreneurship/ Indigenous knowledge (Data Template) | View Document |
| Any additional information | View Document |

***1.1.4 All Syllabi related to Sanskrit/Shastra subjects are available through Sanskrit medium.***

***सर्वे संस्कृतसम्बद्धाः शास्त्रसम्बद्धाः च पाठ्यांशाः संस्कृतमाध्यमेन उपलभ्यन्ते।***

**Answer:**

संस्कृतवाङ्ग्ये निहितस्य ज्ञानराशेः अवाप्त्यर्थं सर्वेभ्यः अवसरप्रदानम्, सौकर्यप्रकल्पनञ्च विद्यते। संस्कृते निहिता विषयाः संस्कृतमाध्यमेन पाठ्यमानाः निर्दिष्टम् उद्देश्यं सफलयिष्यन्ति। प्रचाल्यमानेषु पाठ्यक्रमेषु संस्कृतसम्बद्धाः शास्त्रसम्बद्धाश्च पाठ्यांशाः शतं प्रतिशतं संस्कृतमाध्यमेन उपलभ्यन्ते। तेषां पाठ्यांशानां विवरणम् एवं वर्तते- शास्त्रिपाठ्यक्रमः (स्नातकः) शास्त्रिपाठ्यक्रमः विश्वविद्यालयस्य स्नातकपाठ्यक्रमः शास्त्रीकक्षायां षट्सु सत्रेषु वेदवेदाङ्गसङ्कायान्तर्गतं शुक्लयजुर्वेदः, पौरोहित्यम्, धर्मशास्त्रम्, नव्यव्याकरणम, प्राचीनव्याकरणम्, सिध्दान्तज्योतिषम्, फलितज्योतिषम्, वास्तुशास्त्रम्, इति विषयाणां, दर्शनसङ्कायान्तर्गतं नव्यन्यायः, प्राचीनन्यायवैशेषिकम्, मीमांसा, सांख्ययोगः, जैनदर्शनम्, अद्वैतवेदान्तः, विशिष्टाद्वैतवेदान्तः, सर्वदर्शनम् इति विषयाणां, साहित्य एवं संस्कृतिसङ्कायान्तर्गतं साहित्यम्, पुराणेतिहासः, प्राकृतभाषा इति विषयाणां चेति एकोनविंशतिः- (19) पारम्परिकशास्त्रीयविषयाणां शास्त्रार्थपध्दतिमनुसृत्य संस्कृतभाषामाध्यमेन अध्ययनमध्यापनञ्च प्रचलति। एवञ्च शिक्षापीठान्तर्गतं शिक्षाशास्त्रमपि संस्कृतभाषामाध्यमेन अध्ययनमध्यापनं परीक्षा च प्रचलति।

1. प्रथमवर्षस्य सत्रद्वये चत्वारि पत्राणि, द्वितीयवर्षस्य सत्रद्वये षट्पत्राणि तृतीयवर्षस्य सत्रद्वये चत्वारि पत्राणि चाहत्य स्व-स्वशास्त्रीयसम्बध्दानि चतुर्दश (14) पत्राणि भवन्ति। आंग्ल-भाषा-हिन्दीभाषा-सङ्गणक-राजनीतिशास्त्र-समाजशास्त्र-मूल्यशिक्षा मानवाधिकारश्चेत्यादीनामाधुर्निकविषयणामपि शास्त्रिकक्षासु षट्सु सत्रेषु अध्यापनं भवति। विश्वविद्यालयीयछात्राणां शास्त्रान्तनिहितज्ञानं भवेद् एतदर्थं शास्त्रीतृतीयवर्षस्य सत्रद्वये वैकल्पिक (DSE) रूपेण शास्त्रीयविषयणां चत्वारि पत्राणि सञ्चाल्यन्ते। अनेन प्रकारेण विश्वविद्यालयीयाः विभागाः विमलबुद्धिं पदव्यवहारशक्तिं शास्त्रान्तराभ्यसनयोग्यतां च प्रयच्छन्ति। पारम्परिकशास्त्रीयविषयं आधुनिकविषयञ्चाहत्य शास्त्रीप्रथमवर्षस्य सत्रद्वये चतुर्दशपत्राणि (14) शास्त्रीद्वितीयवर्षस्य सत्रद्वये चतुर्दश (14) पत्राणि शास्त्रीतृतीयवर्षस्य सत्रद्वये द्वादशपत्राणि (12) सम्मील्यपूर्णरूपेण चत्वांरिंशत्पत्राणाम् (40) अध्ययनमध्यापनञ्च भवति।
2. शास्त्रीप्रथमवर्षस्य सत्रद्वये सामान्यव्याकरणस्य सामान्यनीतेश्च अनिवार्यपत्ररूपेण अध्यापनं भवति। येन समेषां छात्राणां सामान्यव्याकरणस्य परिज्ञानं भवेद्येन वाक्यप्रयोगे समर्थो भवति। अस्माकं विश्वविद्यालयस्य शास्त्रीपाठ्यक्रमः सम्मानितः (Honors) त्रिवर्षात्मकः। अस्माकं विश्वविद्यालये (बी.ए. योग) स्नातक इति एक नवीनः पाठ्यक्रमः प्रचलति। यत्र योगविषयकं ग्रन्थानामध्ययनं आङ्ग्लभाषायां हिन्दीभाषायां संस्कृतभाषायां च भवति। तत्रापि बी.ए. प्रथमवर्षस्य सत्रद्वये चत्वारि पत्राणि भवन्ति चतुर्षु पत्रेषु सत्रद्वयमाहत्य प्रतिसत्रं एकं पत्रं प्रायोगिकं भवति। बी.ए. द्वितीयवर्षस्य सत्रद्वये षट्पत्राणि भवन्ति। तत्रापि प्रतिसत्रं पत्रमेकं प्रायोगिकं विद्यते। बी.ए. तृतीयवर्षस्य सत्रद्वये चत्वारि पत्राणि भवन्ति। पुनश्च प्रतिसत्रमेकं पत्रं प्रायोगिकमस्ति। अनेन प्रकारेण बी.ए. योगकक्षायां वर्षत्रयमाहत्य (14) चतुर्दशपत्राणि भवन्ति।
3. **आचार्यपाठ्यक्रमः (स्नातकोत्तरपाठ्यक्रमः) -**

आचार्यपाठ्यक्रमः स्नातकोत्तरपाठ्यक्रमः विद्यते। यत्र वेदादिशास्त्रम् इत्यादि एकोनविंशतिः (19) पाठ्यक्रमाणां विषयाणामध्यापनं सञ्चाल्यते। येषाम् अध्ययनमध्यापनञ्च संस्कृतभाषामाध्यमेन शास्त्रीयपद्धतिमनुसृत्य च प्रचलति। एतेषां विषयाणां पाठ्यक्रमे चत्वारि सत्राणि प्रचलन्ति। प्रतिसत्रं पञ्चपत्राणि प्रचलन्ति। आहत्य चतुर्षु सत्रेषु (20) विंशतिपत्राणां अध्यापनं प्रचलति। अत्रापि पौरोहित्य वास्तु-सिद्धान्तज्योतिष-वेदविषयेषु पाठ्यक्रमेषु चतुर्थसत्रीयपाठ्यक्रमे पत्रमेकं प्रायोगिकं भवति। प्रायोगिकशिक्षापि संस्कृतमाध्यमेन भवति। एतदपि अवधेयं यत् प्रतिसत्रं प्रतिविषयं पञ्चमपत्रेषु एकं वैकल्पिकशास्त्रीयविषयः निर्धारितः विद्यते।

स्नातकोत्तराचार्यपाठ्यक्रमे संगणकशिक्षायाः परिज्ञानार्थं प्रथमसत्रे चतुर्थसत्रे च प्रतिसत्रं पत्रमेकं सञ्चाल्यते। सर्वमाहत्य (22) द्वाविंशपत्रसमुच्चयात्मकः आचार्यपाठ्यक्रमः सञ्चाल्यते।

### 4. योगपाठ्यक्रमः-

योगविषयस्य स्नातकोत्तरपाठ्यक्रमः सञ्चाल्यते। तत्र भाषात्रयाणां प्रयोगः विद्यते। एतेषु पाठ्यक्रमेषु सत्रचतुष्टयमाहत्य (20) विंशतिपत्राणां अध्ययनमध्यापनञ्च प्रचलति।

### 5. शिक्षाशास्त्रिपाठ्यक्रमः शिक्षाचार्यपाठ्यक्रमः-

शिक्षापीठान्तर्गतं शिक्षाशास्त्रस्य (B.Ed.) पाठ्यक्रमः सञ्चाल्यते। तत्र चत्वारि सत्राणि प्रचलन्ति। प्रथमसत्रं द्वितीयसत्रं तृतीयसत्रञ्च सैद्धान्तिकपाठ्यक्रमः चतुर्थसत्रञ्च प्रायोगिकं शिक्षणाभ्यासपाठ्यक्रमञ्च भवति। प्रथमसत्रादारभ्य तृतीयसत्रं यावत् प्रतिसत्रं पञ्च (05) पत्राणाम्, आहत्य (15) पञ्चदशपत्राणां निर्धारणं विद्यते। यत्र संस्कृतशिक्षणं शास्त्रशिक्षणेषु ज्योतिषशिक्षणं, दर्शनशिक्षणं, व्याकरणशिक्षणं, साहित्यशिक्षणं च पर्यावरणशिक्षेत्यादिविषयाणां संस्कृतमाध्यमेन अध्यापनं भवति। एतदतिरिच्य मनोविज्ञानादिविषयाणामपि अध्यापनं प्रचलति। अत्रैव सङ्काये शिक्षाचार्यस्यापि (M.Ed.) पाठ्यक्रमः प्रचलति। यत्र सत्रचतुष्टये अध्यापनं प्रचलति। प्रथमसत्रे चत्वारि पत्राणि, द्वितीयसत्रे चत्वारि पत्राणि, तृतीयसत्रे द्वे पत्रे चतुर्थसत्रे च त्रीणि पत्राणि आहत्य त्रयोदश (13) पत्राणि पाठ्यन्ते। एतदतिरिच्य प्रशिक्षणम् (Internship) लघुशोधप्रबन्धप्रकारश्च विद्यते। एतत्सर्वं संस्कृतमाध्यमेन प्रचलति।

### 6. विशिष्टाचार्यपाठ्यक्रमः-

अस्माकं विश्वविद्यालये 2020-2021 यावत् विशिष्टाचार्यस्य (M.Phil) पाठ्यक्रमः सत्रद्वये सञ्चालितः आसीत्। प्रथमसत्रे चत्वारि पत्राणि, द्वितीयसत्रे त्रीणि पत्राणि निर्धारितानि आसन्। आहत्य सप्तपत्रेषु निर्मितोऽयं पाठ्यक्रमः शोधप्रविधि-पाडुलिपिविज्ञान-स्वशास्त्रीयविषयाणाम् अध्यापनं प्रचलति स्म। लघुशोधप्रबन्धस्य अनिवार्यता आसीत्। अत्र सर्वेषां पाठ्यक्रमाणां निर्धारणं संस्कृतेनैव प्रचलति स्म।

### 7. विद्यावारिधिपाठ्यक्रमः-

शोधविभागान्तर्गतं शोधसम्बन्धितविषयाणां षाण्मासिकः पाठ्यक्रमः (Course Work) प्रचलति। यत्र पत्रचतुष्टयं विद्यते। शोधप्रविधिः, पाण्डुलिपिविज्ञानं पाठालोचनञ्च, संस्कृतवाङ्मय सर्वेक्षणं शोधसर्वेक्षणञ्च, विषयाणामध्यापनं विद्यावारिध्युपाध्यर्थं शोधच्छात्रैः संरच्यमानः शोधप्रबन्धः संस्कतभाषामाध्यमेनैव प्रचलति। छात्रेषु संस्कृतभाषाः सम्भाषणदक्षतावर्धनाय कौशलविकासाय च विश्वविद्यालयेन च वाग्वर्धिनी पाक्षिकी सभा च सञ्चाल्यते। एवञ्च मध्ये मध्ये संस्कृतभाषाकौशलविकासार्थं तत्तद्विभागैः संस्कृतभाषाप्रशिक्षणशिविरमपि आयोज्यते। आन्तरिकगुणवत्ताप्रकोष्ठन संस्कृतभाषादक्षतावर्धनाय संस्कृतभाषाकौशलविकासाय एकः पाठ्यक्रमः विशेषरूपेण प्रचाल्यते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Provide UG and PG Syllabus prepared in Sanskrit | View Document |
| Provide link of the University website | View Document |

**1.2 Academic Flexibility**

***1.2.1 Whether the University has designed and offered any Innovative Courses/ Courses in emerging area/ Sanskrit based courses including scientific and technical literature leading to both traditional and modern degrees (e.g. Shastri, B.Sc. etc) with combination of yoga/ Ancient and Modern Mathematics/ Economics/ Management/ Law/ Computer Science/ Theoretical Ayurveda/ Krishi-parashara/ Vrikshayurveda etc. If yes give details.***

***विगतेभ्यः पञ्चभ्यः वर्षेभ्यः प्रवर्तितेषु सर्वेषु विविधायामवत्सु पाठ्यपत्रेषु (वैज्ञानिक-प्रौद्योगिक-साहित्यसमाश्रयेण शास्त्री/ बीएस्.सी-प्रभृति पारम्परिकाधुनिकोपाधिनाम्ना योगशास्त्रस्य प्राचीन-आधुनिकगणितयोः/ अर्थशास्त्रस्य/ प्रबन्धनशास्त्रस्य/ विधिशास्त्रस्य/ सङ्गणकविज्ञानस्य/ आयुर्वेदसिद्धान्तस्य (दर्शनस्य)/ कृषिपाराशरस्य/ वृक्षायुर्वेदस्य च सङ्घटनेन समारब्धानि नवीनपाठ्यपत्राणि तथा उदयमानविषयकपाठ्यपत्राणि/ संस्कृताश्रितपाठ्यपत्राणि) अभिनवपाठ्यपत्राणि।***

**Answer:**

साम्प्रतिके वैज्ञानिकयुगे समाजस्य अपेक्षानुगुणं समये समये परिवर्त्यमाना शिक्षाप्रणाल्याः व्यवस्था देशम् उन्नयति अग्रेसारयति च। संस्कृतवाङ्मये विद्यमानानां मौलिकानां व्यक्तेः , समाजस्य, देशस्य, विश्वस्य च क्षेमवर्धकानां सर्वशान्तिप्रदातृणां कौशलविकास-योग्यताभिवर्धनविषयाणां च स्नातकस्तरेषु पाठ्यक्रमेषु शैक्षिकविधिमाध्यमेन सह प्रदानाय विश्वविद्यालयः कृतसङ्कल्पः वर्तते। विश्वविद्यालयस्य शास्त्री(स्नातकः), आचार्यः (स्नातकोत्तरः), शिक्षाशास्त्री (बी.एड्), शिक्षाचार्यः (एम.एड्), पी.जी. डिप्लोमा, विद्यावारिधिः (पीएच.डी), विद्यावाचस्पतिः (डी.लिट्) एतेषु पाठ्यक्रमेषु प्राचीनैः पाठ्यपत्रैः सह कालोचितानि कानिचन नवीनपाठ्यपत्राणि स्वीकृतानि वर्तन्ते।

1. शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च सिद्धान्तज्यौतिषविषयके प्राचीनगणितसम्बन्धीनि पत्राणि भवन्ति। तत्र शास्त्रिपाठ्यक्रमे सिद्धान्तशिरोमणिः, सिद्धान्ततत्त्वविवेकः, केतकीयग्रहगणितम् इतीमानि पत्राणि भवन्ति। आचार्यपाठ्यक्रमे लीलावती, सरलत्रिकोणमितिः, रेखागणितम्, सूर्यसिद्धान्तः इतीमानि पत्राणि प्राचीनगणितसम्बन्धीनि सन्ति। गोलस्य स्थितिं ग्रहाणां गतिञ्च निर्दुष्टतया प्रतिपादयितुं ज्योतिर्विज्ञाने आश्रितस्य प्राचीनस्य गणितस्य परिचयः एतैः पाठ्यपत्रैः सम्पद्यते। भारतीयगणितपद्धत्या ग्रहणकालस्य निर्णयः निर्दुष्टतया ज्ञातुं शक्यते। फलितज्योतिषविषयके प्राचीनगणितम् अध्यापनं भवति।
2. **वास्तुशास्त्रे-** मयमतम्, समरांगणसूत्रधार, अपराजितप्रेक्षा आदि पत्ररूपेण अध्ययनम् अध्यापनञ्च प्रचलति। भारतीयकुण्डलीविज्ञानम् इति पत्रे प्राचीनगणितमाश्रित्य कुण्डलीनिर्माणविधानं प्रतिपादितमस्ति।
3. **अभिनवपाठ्यक्रमेषु अर्थशास्त्रम्-** धर्मशास्त्रविषयके शास्त्रिपाठ्यक्रमे याज्ञवल्क्यस्मृतिः, मनुस्मृतिः चेति द्वे पत्रे भवतः । तत्र व्यवहारः दायभागश्च प्राचीनभारतीयपद्धतेरनुगुणं ज्ञातुं अत्यन्तोपयोगी अस्ति। आचार्यपाठ्यक्रमे च कौटिलीय-अर्थशास्त्रम्, निर्णयसिन्धुः, महाभारतस्य शान्तिपर्वः, आधुनिकहिन्दुविधिः इतीमानि पाठ्यपत्राणि प्राचीनभारतस्य जनानाम् आचारः, नीतिः, व्यवहारः, शासनक्रमः, सामरस्यम्, दण्डविधिः इत्यादीन् विषयान् प्रतिपादयन्ति। आधुनिकहिन्दुविधिः इति पत्रं हिन्दूनां न्यायनीतिं मानवाधिकारश्च च (Hindu Law and Human rights) विमृशति।
4. **अभिनवयोगपाठ्यक्रमः** योगविभागेन संरचितः नवीनः डिप्लोमापाठ्यक्रमः योग एवं प्राकृतिकचिकित्सा स च स्वास्थ्यसंरक्षणविधानं प्राचीनपद्धत्या सह निरूपयति। अस्मिन् पाठ्यक्रमे योगशास्त्रसम्बद्धानि शारीरिकसम्बद्धानि च षट् पत्राणि सन्ति। तानि १. परिचयः योगस्य सामान्य प्रमुखाः धाराः 2. जीवनशैली योगचिकित्सा च ३. शरीरविज्ञानम् 4. द्रव्यविज्ञानं नामरूपज्ञानं च 5. प्राकृतिकचिकित्सा 6. प्रायोगिकयोगः। अत्र सैद्धान्तिकरूपेण योग-मनो-शारीरिकविज्ञानानि सन्ति। मुख्यतया नवीनपाठ्यक्रमस्य अस्य उद्देश्यं सुस्वास्थ्यजीवनशैलीसम्पादनम्, शरीरस्य मनसः च स्वास्थ्यसंरक्षणम्, योगविभागस्य पाठ्यक्रमे मनोविज्ञानस्य ईकाइ रूपेणापि स्वाध्यायो भवति। एतान् विषयान् अवगत्य प्रशस्तजीवनशैलीम् अवाप्तुं शक्यते।
5. **आयुर्वेदस्याभिनवपाठ्यक्रमः** योगविभागः स्ववित्तपोषितांशकालीपाठ्यक्रमस्य पत्ररूपेण आयुर्वेदस्य परिचयपूर्वकमुपयोगितां शिक्षयति। येन आयुर्वेदस्य प्रचार-प्रसारैः सह आयुर्वेदविषयकज्ञानस्य छात्रेषु योग्यताभिवर्धनं भवति।
6. **दर्शनशास्त्रीयाभिनवपाठ्यक्रमः** विश्वविद्यालयस्य शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च न्यायवैशेषिकदर्शनस्य मीमांसादर्शनस्य जैनदर्शनस्य वेदान्तदर्शनस्य सांख्ययोगस्य च अध्यापनं भवति। गुरुत्वादिविज्ञानस्य न्याये प्रतिपादितपञ्चवयवानां हेत्वाभासानां च वर्तमानन्यायालयीयोपयोगितायाश्च मीमांसायां यज्ञीयविधीनां धर्मस्वरूपाणां च जैनदर्शने अहिंसातत्त्वस्य मोक्षमार्गस्य च वेदान्ते अज्ञाननिवृत्तेः उपयानां, सांख्ययोगे अष्टांयोगानां सामाजिकौपयिककौशलं शिक्षयति तत्तद्विभागः।

7. **आधुनिकाभिनवपाठ्यक्रमः** विश्वविद्यालयस्य शास्त्रिपाठ्यक्रमे राजनीतिशास्त्रम् इति प्रतिसत्रम् एकं पत्रम् अस्ति। समाजशास्त्रं शास्त्रिपाठ्यक्रमे स्वीकृतेषु एकोनविंशतिविषयेषु सर्वेषाम् अनिवार्यरूपेण **सङ्गणकविज्ञानम्** एकं पत्रं भवति। द्वितीयसत्रार्धे पर्यावरणशिक्षा इति नवीनेन पत्रेण छात्राणां पर्यावरणस्य प्रयोजनं तस्य संरक्षणम् इत्यादिविषयाणाम् अवगमनं भवति। पञ्चमे षष्ठे च सत्रे मानवीयमूल्यशिक्षा मानवाधिकारश्चेति विषयाणां पाठ्यक्रमः सञ्चाल्यते, येन मानवीयमूल्यानां मानवाधिकाराणां च अवबोधो भवति। शास्त्रिपाठ्यक्रमः पौरोहित्यविषयकः समाजे, भारतीयसेनायाम्, अन्यत्र च धर्मगुरुरूपेण सेवां कर्तुम् अपेक्षितं ज्ञानं प्राप्तुम् उपयुक्तो वर्तते।
8. **शिक्षाशास्त्रस्य अभिनवपाठ्यक्रमः** शिक्षाशास्त्रिपाठ्यक्रमे शिक्षाचार्यपाठ्यक्रमे च संस्कृतभाषायाः शिक्षणविधिः बोध्यते। शिक्षणविधयश्च प्राचीनाः नवीनाश्च संयुक्तरूपेण पाठ्यक्रमे योजिताः सन्ति। तत्र शिक्षाशास्त्रिपाठ्यक्रमे 1. दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा 2. अधिगमविकासयोः मनोविज्ञानम् सामाजिकविज्ञानशिक्षा च 3. नवीनशैक्षिकप्रवृत्तयः शारीरिकशिक्षा, पर्यावरणशिक्षा, जनसंख्याशिक्षा 4. समसामयिकं भारतं शिक्षा च 5. शिक्षायां लैङ्गिक(जेण्डर) शिक्षा/मूल्यशिक्षा/मानवाधिकारशिक्षा/ विश्वशान्तिशिक्षा इतीमानि पत्राणि भवन्ति। इमानि पत्राणि पारम्परिकविषयाणाम् आधुनिकैः विषयैः सह समन्वयरूपेण रचितानि।
9. **शिक्षाचार्यस्याभिनवपाठ्यक्रमः** शिक्षाचार्यपाठ्यक्रमस्य प्रथमसत्रार्धे- १. शैक्षिकप्रक्रियायां दर्शनशास्त्रम् २. पारम्परिकसंस्कृतशिक्षा ३ शैक्षिकानुसन्धानम् आधारभूतसांख्यिकी च ४ शिक्षाशान्तिश्च ५. शैक्षिकं व्यावसायिकं च निर्देशनम् अथवा शैक्षिकम् आयोजनं प्रशासनं च, द्वितीयसत्रार्धे- १ शैक्षिकप्रक्रियायां समाजशास्त्रम् २. शिक्षायां सूचनाप्रविधिः एवं संप्रेषणप्रविधिः, ३. ज्ञानम्, अधिगन्ता, अधिगमप्रक्रिया च 4. प्रौढशिक्षा/मूल्यशिक्षा समावेशात्मकशिक्षा, शैक्षिकप्रविधिः, तृतीयसत्रार्धे- 1. संस्कृतशिक्षायां नवीनप्रवृत्तयः 2. शैक्षिकानुसन्धानम् आधारभूतसांख्यिकी च चतुर्थसत्रार्धे वैयक्तिकविकासार्थं मनोविज्ञानम् एतैः पत्रैः युक्तः पाठ्यक्रमः संस्कृतशिक्षायाः अनुसन्धानस्य विविधसामाजिकस्थितीनां च सम्प्रत्ययस्य मार्गं निर्दिशति। विविधस्तरेषु संस्कृतशिक्षार्थम् अपेक्षितप्रौद्योगिकविषयाणाम् अन्वयविधीन् निर्दिशति। शिक्षकस्य शिक्षणविधानस्य गुणवत्तां निर्दिशति।
10. **साहित्यशास्त्रस्याभिनवपाठ्यक्रमः**- एते पाठ्यक्रमाः उपर्युक्तनिर्दिष्टैः पत्रैः सह श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य तत्तद्विषयेषु सञ्चाल्यन्ते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Minutes of relevant Academic Council/BOS meeting(अध्ययनमण्डलस्य/विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***1.2.2 Percentage of Programmes in which Choice Based Credit System (CBCS)/ elective course system has been implemented (Preceeding academic year data)***

***विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां प्रतिशतता। (प्रगतवर्षस्य दत्तांशः)***

**Answer:** 100

1.2.2.1 Number of Programmes in which CBCS/ Elective course system implemented.

विकल्पाश्रितश्रेयोऽङ्कप्रणाल्या/ ऐच्छिकपाठ्यपत्रप्रणाल्या प्रवर्तितानां पाठ्यक्रमाणां सङ्ख्या।

Answer: 88

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Minutes of relevant Academic Council/BOS meetings (अध्ययनमण्डलस्य/ विद्वत्परिषदः उपवेशनकार्यवृत्तम्) | View Document |
| Institutional data (Data Template)( सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) ) | View Document |

***1.2.3 University provides the flexibility of bringing together the conventional face-to-face mode, MOOCs, online education and allow students to choose and combine the courses they are interested in. Provide details.***

***विश्वविद्यालयेन प्रत्यक्षशिक्षणविधायाः सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य (MOOCs) अतितन्त्रीयशिक्षाणां च परस्परसमन्वयनाय नमनीयता प्रकल्पिता, येन स्वरुचिपूर्णानां पाठ्यक्रमाणां चयने संयोजने च छात्राः अनुमताः। क्रियान्वयनविवरणं देयम्।***

**Answer:**

लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन सञ्चालितेषु कार्यक्रमेषु नमनीयायाः व्यवस्था वैकल्पिकपाठ्यक्रमाणां कृते सततं प्रदीयते। अस्य पाठ्यक्रमस्य संचयने छात्राः स्वतन्त्राः भवन्ति। छात्राणां कृते विषयचयनार्थं स्वतन्त्रता विद्यते। ज्ञानवर्धनाय वैकल्पिकरूपेण विषयाणां स्वतन्त्रतया अङ्गीकर्तुं शक्यते।

1. पाठ्यक्रमं प्रविविक्षुभ्यः छात्रेभ्यः स्वस्य अपेक्षानुगुणम् 1. विषयचयने शास्त्रनमनीयता-शास्त्रिपाठ्यक्रमे आचार्यपाठ्यक्रमे च शास्त्रचयने छात्राणां स्वातन्त्र्यं कल्पितमस्ति विश्वविद्यालयेन। शास्त्रिपाठ्यक्रमे अधीतवेदान्तः छात्रः आचार्यपाठ्यक्रमे साहित्यं फलितज्योतिषम् अन्यद्वा शास्त्रं स्वीकर्तुं शक्नोति। एवम् शास्त्रिपाठ्यक्रमे अन्यतमं शास्त्रम् आचार्यपाठ्यक्रमे अन्यतमं शास्त्रं स्वीकर्तुं शक्यते इति शास्त्रचयने नमनीयता वर्तते। 2. पाठ्यपत्रस्य चयने नमनीयता विश्वविद्यालयस्य आचार्यपाठ्यक्रमे वैकल्पिकप्रश्नपत्राणि भवन्ति। विश्वविद्यालयस्य विभागे एषा व्यवस्था प्रकल्पिता ।

2. 2019 खीष्टाब्दे भारतीयवास्तुशास्त्रम्, परिचयात्मकं संस्कृतव्याकरणम्, वेदः श्रीमद्भगवद्गीता च, न्यायशास्त्रञ्चेति विषयं पुरस्कृत्य पुनश्च 2021 तमे वर्षे भारतीयसंस्कृतिः इतिहासश्च विषयं पुरस्कृत्य च विस्तृतसद्यस्कपाठ्यक्रमस्य (MOOCs) सञ्चालनं कृतम्। सम्प्रत्यपि एतेषां मूक्सपाठ्यक्रमः सञ्चाल्यते। विस्तृतसद्यस्कपाठ्यक्रमः (MOOCs) अन्तर्जालाधारितः निःशुल्कः दूरस्थशिक्षणस्य विधिः वर्तते। अस्य निर्मितिरेव भौगोलिकदृष्ट्या विभक्तानां बहुसंख्यकानां छात्राणां कृते कृतास्ति। किञ्च विस्तृतसद्यस्कपाठ्यक्रमस्य उद्देश्यमेव अन्तर्जालमाध्यमेन सर्वेषां कृते असीमायाः सहभागितायाः मुक्तावसरप्रकल्पनम् ।

3. पारम्परिकपाठ्यक्रमस्य निर्धारिताध्ययनसामग्र्या सह, MOOCs द्वारा, उपयोक्तॄणां वेदिकया (USER FORUM) सामाजिकमाध्यमद्वारा (Social media) वा संभाषणात्मकाः कक्ष्याः संचाल्यन्ते । तेन छात्राणाम् अध्यापकानाम् अध्यापनसहायकानां च मध्ये मिथः संभाषणस्य यथार्थः अवसरः प्राप्यते । तात्कालिकप्रतिपुष्ट्यर्थं स्फूर्तिस्पर्धाः निबन्धनानि च आयोजयितुं शक्यन्ते । 2019 तमे वर्षे समारब्धा अन्तर्जालीयमाध्यमेन प्रसिद्धपद्धतित्वेन ख्याता इयं MOOCs व्यवस्था सम्प्रति विशिष्टेन अनुसन्धानेन प्रवर्तते। MOOCs व्यवस्था विस्तृताध्ययनस्य अत्यन्तनूतनेषु विधिषु अन्यतमा वर्तते। MOOCs व्यवस्था सततं वर्धिष्णुः सती अन्तर्जालीयोच्चशिक्षणे नूतनाध्ययनावसरान् निर्माति। संस्कृतस्यशास्त्राणां पाठ्यक्रमस्य सञ्चालनार्थम् अपेक्षितपाठ्यसामग्रीनिर्माणे सुदृढ उपगमः एषः इत्यतः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन असौ उपक्रमः क्रियते। MOOCs इत्यस्य महत्त्वपूर्णं तत्त्वं भवति गुणवत्ता, इयञ्च गुणवत्ता पाठ्यक्रमस्य निर्माणे प्रदानेषु सर्वेषु सम्बर्द्धनस्तरेषु समाश्रयणीया। पाठ्यक्रमस्य निर्माणावसरे छात्रानुकूलं संस्थायाः पाठ्यक्रमप्रदातॄणां गणस्य स्तरे साधनीया। विश्वविद्यालयस्तरे पाठ्यमानाः विषया अपि MOOCs मध्ये सन्ति। सामान्यतः विश्वविद्यालये पाठ्यमानाः बहवः विषयाः MOOCs पद्धत्या पाठयितुं समर्थाः सन्ति। व्यावसायिकगुणवत्तावर्धनार्थं व्यावहारिककौशलानि अपि महत्त्वपूर्णानि भवन्तीति पाठ्यक्रमस्य सञ्चालनार्थं विश्वविद्यालयस्य सङ्कायाः विभागाः आचार्याश्च सततं प्रेरिताः सन्ति।

4. विश्वविद्यालय-अनुदान-आयोगस्य 2021तमे वर्षे स्थापितनियमानुसारं सस्पृहमनस्कानां यूनां कृते अन्तर्जालमाध्यमेन सद्यस्काध्ययनपाठ्यक्रमस्य क्रेडिट् इति पद्धत्याः स्वीकारविषयकः एकः उपक्रमः कृतो वर्तते। 26.04.2018 यू.जी.सी. द्वारा प्रेषितपत्रस्य कुलपतेः स्वीकृतिपत्रं 26.04.2018 इत्यनुसारेण श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन

SWAYAM-MOOCs पाठ्यक्रमस्य सञ्चालनम् आरब्धम् अस्ति। 2020 वर्षस्य राष्ट्रिय-शैक्षिक-नीत्यनुसारम् संस्कृतविदुषां सामान्यजनानां च महदुपकारक्षमस्य UGC-SWAYAMMOOC इत्यस्य पाठ्यक्रमस्य निर्माणे संभावनानां चिन्तनार्थं मध्ये मध्ये समितेः उपवेशनम् आयोज्यते।

5. एवञ्च TLC इति केन्द्रेण SWAYAM इति कल्पे (Annual refresher program teaching ) **'अर्पित'** इति पाठ्यक्रमः 2018-2019 तः सततं प्रचलति। यत्र 2018-2019 तमे वर्षे 40 अनुखण्डयुक्तः "संस्कृतशिक्षणस्य पद्धतिः" विषयकः पाठ्यक्रमः सञ्चालितः आसीत्, तत्र 144 शिक्षार्थिनः आसन्। 2019-20 तमे वर्षे 40 अनुखण्डयुक्तः "संस्कृतशिक्षाशास्त्रम्" इति विषयकः पाठ्यक्रमः सञ्चालितः आसीत्, तत्र 608 शिक्षार्थिनः सम्बद्धाः आसन्। 2020-21 तमे वर्षे 40 अनुखण्डयुक्तः "संस्कृतशिक्षाशास्त्रम्" (पुनः सञ्चालम्) इति विषयकः पाठ्यक्रमः सञ्चालितः आसीत्। तत्र 521 शिक्षार्थिनः सम्बद्धाः आसन्। अयं च पाठ्यक्रमः प्रक्रियानुसारं सततं प्रचलति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide Link to MOOCs, online Platform(सामूहिकमुक्तान्तर्जालपाठ्यक्रमस्य अन्तर्जालानुबन्धः,) | View Document |

**1.3 Curriculum Enrichment**

***1.3.1 Institution integrates cross cutting issues as reflected in Sanskrit literature relevant to Gender, Environment and Sustainability, Human Values and Professional Ethics and traditional system of shastric learning into the Curriculum.***

***संस्था संस्कृतसाहित्ये शास्त्रपरम्परायां च प्रतिफलितान् स्त्रीपुरुष-पर्यावरण-स्थिरता-मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राधिगमप्रणालीविषयकान् सर्वत्रानुस्यूतांशान् पाठ्यचर्यायां समन्वयति।***

**Answer:**

संस्कृतसाहित्यस्य उपदेशसारः वर्तते **'वसुधैव कुटुम्बकम्', 'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्'** इति। वेदाः, शास्त्राणि च प्रभुसम्मिततया, पुराणानि मित्रसम्मिततया, काव्यानि कान्तासम्मिततया च जनान् उपदिशन्ति। अतः एतेषां संस्कृतवाङ्मयगतानां ग्रन्थानाम् अध्ययनस्य उपदेशप्राप्तिपूर्वकं तथा आचरणम् एव मुख्यं प्रयोजनम्। ततः जनाः परस्परं सामरस्येन जीवन्तः सामाजिकीं शान्तिं वर्धयेयुः।

1. **समतास्थिरतादिपाठ्यक्रमः-** पाठ्यक्रमेषु स्थितानि समता, स्थिरता, एकता, देशभक्तिः, अहिंसा, सत्यम्, अस्तेयः, शौचम्, इन्द्रियनिग्रहः, वर्णाश्रमव्यवस्था, आश्रमव्यस्थाचेत्यादीनि मूल्यानि प्राकाश्यं नीतानि। दाम्पत्यधर्मः, राजधर्मः, पौरजानपदधर्मः, कौटुम्बिकाचाराः, नैतिकशिक्षणस्य महत्त्वम्, भारतीयन्यायव्यवस्था, वास्तुनिर्माणकला, मुहूर्तनिर्णयविधिः, संस्कारविधिः, पर्यावरणस्य महत्त्वम्, वृत्तिनीतिः इति नैके विषयाः पाठ्यचर्यायां समन्विताः। तादृशाः सङ्क्षेपतः अत्रोल्लिख्यन्ते।
2. **मानवव्यवहारपाठ्यक्रमः-** शास्त्रिपाठ्यक्रमे प्रथमसत्रार्धे साहित्ये उत्तररामचरितम् इति पत्रे दौष्ट्यगुणस्य हेयता। धर्मशास्त्रे याज्ञवल्क्यस्मृतिः इति पत्रे सदाचारणम्। पुराणेतिहासे वाल्मीकिरामायणस्य सुन्दरकाण्डम् इति पत्रे परोपकारः, दूतधर्मः, सेवकवृत्तिः। शुक्लयजुर्वेदे 'इषे त्वो र्जेत्वा' इत्यादिमन्त्रेषु अस्तेयः गवादिपशुसंरक्षा, सज्जनसंख्यावृद्धिः। 'इदमहम् अनृतात्सत्यमुपैमि' इत्यादिमन्त्रेषु सत्यमार्गः। व्याकरणशास्त्रे भाषायाः साधुत्वमार्गः, ज्योतिषे कालनिर्णयः, वास्तौ वास्तुनिर्माणविधिः, न्याये न्यायप्रणाल्यां पञ्चावयवनां प्रयोगविधिः, वैशेषिके परमाणुतः जगत्सृष्टिविधिः, जैनदर्शने अहिंसाविधिः, मीमांसायां वेदार्थं ज्ञात्वा यागविधिनिर्णय इत्यादिविषयणां परिज्ञानं भवति। अद्वैतवेदान्ते कठोपनिषद् इति पत्रे यमनचिकेतसोः संवादेन आध्यात्मिकं मूल्यम्। शास्त्रिपाठ्यक्रमे द्वितीयसत्रार्धे साहित्ये कादम्बरी इति पत्रे शुकनासोपदेशेन राज्ञः स्वभावः, अतिसम्पदो दुष्परिणामाः, परवञ्चनादात्मरक्षणम्। सर्वदर्शने योगसूत्रम् इति पत्रे भारतीययोगदर्शनस्य सर्वोपादेयता। अद्वैतवेदान्ते मुण्डकोपनिषद् इति पत्रे जीवब्रह्मणोः ऐक्यभावः।

3. **स्त्री-पुरुषविषयकपाठ्यक्रमः-** शास्त्रिपाठ्यक्रमे साहित्ये तृतीयचतुर्थसत्रार्धयोः अभिज्ञानशाकुन्तलम् इति पत्रे **स्त्रीणां पुरुषाणां** च समाधिकारः। महर्षेः कण्वस्य गुरुकुले महर्षेः मारीचस्याश्रमे च वसतां तापस्यः मुनिकुमाराश्च इत्येतेषां स्त्रीपुरुषाणां सहाध्ययनम्। कन्यायाः निजमनोरथानुसारं पतिवरणम्। दम्पत्योः सामरस्येन जीवनम्। तृतीयसत्रार्धे साहित्ये मेघदूतम् इति पत्रे दम्पत्योः मैत्र्या सह जलसंरक्षणम्, वृष्टिविज्ञानम्, भौगोलिकाखण्डता च। पौरोहित्ये श्राद्धविवेकः इति पत्रे पूर्वजानां स्मरणम्। जैनदर्शने इष्टोपदेशः इति पत्रे 'वासनामात्रमेवैतत् सुखं दुःखं च देहिनाम्। इत्यादिना पाठ्यांशेन अतिविषयासक्तेः परित्यागः। ईशावास्योपनिषद् इति पत्रे अधर्ममार्गस्य परित्यागः। आचार्यः पूर्वरूपम् अन्तेवास्युत्तररूपम् विद्या सन्धिः प्रवचनं सन्धानम् इत्यादि-उपनिषद्वाक्यैः पाठ्यांशैः शास्त्रिपाठ्यक्रमे चतुर्थसत्रार्धे पुराणेतिहासे श्रीमद्भगवद्गीता इति पत्रे भक्तिः, पुरुषोत्तमप्राप्तिः।
4. **मूल्यशिक्षा-** शास्त्रीपाठ्यक्रमे पञ्चमसत्रे स्त्रीपुरुषाणां समानाधिकारपरिज्ञानाय मानवाधिकारस्य, सत्य-अहिंसादिमूलकतत्त्वानां मानवीयमूल्यपरिज्ञापनाय षष्ठसत्रे मूल्यशिक्षायाश्च अध्यापनं भवति। येन सामाजिकविसंगतीनाम् अपाकरणं सम्भवति। अनेन प्रकारेण ऐच्छिकरूपेण शास्त्रिपाठ्यक्रमे समाजशास्त्रस्य राजनीतिशास्त्रस्य च अध्यापनं भवति। साहित्ये शिशुपालवधम् इति पत्रे प्राशासनिकं कौशलम्। शास्त्रिपाठ्यक्रमे षष्ठसत्रार्धे वेदान्तसारः इति पत्रे आध्यात्मिकं मौल्यम्।
5. **पर्यावरणम्-** शिक्षाशास्त्री-शिक्षाचार्य-शास्त्रीति पर्यावरणशिक्षा इति पत्रे प्रकृतिसंरक्षणम्, जलसंरक्षणम्, भूमिसंरक्षणम् च। अद्वैतवेदान्ते श्रीमद्भगवद्गीता इति पत्रे अहङ्कारपरित्यागः, आहारपद्धतिः, सत्त्वरजस्तमसां गुणानां स्वरूपम्, तत्प्रभावः च । शास्त्रिपाठ्यक्रमे किरातार्जुनीयम् इति पत्रे राजनैतिकविचाराः। भक्तिरसामृतसिन्धुः इति पत्रे भक्तिमार्गस्य महत्त्वम् । नीतिशतकम् इति पाठ्यांशेन सुभाषितैः सन्मार्गोपदेशः इत्येतानि सार्वकालिकतया अत्यन्तोपादेयानि तत्त्वानि शास्त्रिपाठ्यक्रमे विद्यमानानि पाठ्यचर्यायाम् अनुस्यूततया समन्वयं लभन्ते। वेणीसंहारम् इति पत्रे राजतन्त्रे धर्माधर्मविवेकः।
6. **नीतिः-** आचार्यपाठ्यक्रमे धर्मशास्त्रे कौटिलीयार्थशास्त्रम् इति पत्रे विनयाधिकारनामके प्रथमाधिकरणपाठ्यांशे अमात्योत्पत्तिः, मन्त्रिपुरोहितनियुक्तिः, मन्त्रिणां सत्त्वपरीक्षा, आत्मरक्षणम्, दूतकर्म इत्यादयः राजनैतिकाः विचाराः। मनुस्मृतिः इति पत्रे राज्ञः व्यवहारदर्शनम्, व्यवहारभेदाः, धनसंरक्षणोपायाः इत्यादयः विचाराः। आचार्यपाठ्यक्रमे जैनदर्शने समयसारः इति पत्रे शुद्धात्मस्वरूपम्, कर्मबन्धः, मोक्षः जीवनलक्ष्यम् इति आध्यात्मिक-दार्शनिकाः विचाराः उपलभ्यन्ते।

**मानवीयमूल्यानि-** आचार्यपाठ्यक्रमे सांख्ययोगे भारतीयदर्शनानां परिचयः इति पत्रे दर्शनानां स्वरूपम्, उपादेयता, भारतीयदर्शनानां सारसङ्ग्रहः। आसनम्, प्राणायामः, चक्रम्, कुण्डलिनी, बन्धः, क्रिया, शक्तिः, नाडी, मुद्रा इत्यादीनां हठयोगसम्बन्धिनां साधनोपायाः। आचार्यपाठ्यक्रमे मीमांसायां श्रौतयागानां निरूपणम्। अद्वैतवेदान्ते छान्दोग्योपनिषद् इति पत्रे सत्यस्य अभिव्यक्तिमार्गः। आचार्यपाठ्यक्रमे पुराणेतिहासे श्रीमद्भागवतम् इति पत्रे साधनज्ञानम्, सिद्धज्ञानम्, साधनभक्तिः, सिद्धा भक्तिः, मर्यादामार्गः, अनुग्रहमार्गः द्वैताद्वैतसमन्वयः इत्यादिविषयाः आस्तिकतायाः स्थैर्यसम्पादकाः। भारतीयसंस्कृतिः इति पत्रे भारतीयानां कौटुम्बिकव्यवस्था, जीवनशैली, संस्काराः च। एवं सञ्चालितेषु पाठ्यक्रमेषु, संस्कृतसाहित्ये विद्यमानाः मौलिकाः विषयाः, शास्त्रपरम्परया सिद्धाः समाजे समन्वयं लभमानाः अभ्युन्नतिकारिणश्च विषयाः पाठ्यक्रमे समायोजिताः सन्ति। पौरोहित्यविभागः छात्रान् यागविधिं शिक्षयति प्रशिक्षणं चापि प्रयच्छति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| The list of courses where the above topics are included प्रधानानां पाठ्यपत्राणां सूची यत्र उपर्युक्तविषयाः योजिताः। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| A description of courses which address Gender, Environment and Sustainability, Human Values and Professional Ethics, traditional system of shastric learning स्त्रीपुम्भिदासंवेदने, पर्यावरणस्य स्थिरतायाः विकासस्य मानवीयमूल्य-वृत्तिनीति-पारम्परिकशास्त्राध | View Document |

***1.3.2 Number of value-added courses imparting transferable and life skills offered during the last five years.***

***विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धकानाञ्च पाठ्यपत्राणां सङ्ख्या।***

**Answer:** 123

1.3.2.1 How many new value-added courses are added within the last 5 years

विगतपञ्चवर्षेषु कति मूल्यसंवर्धक-पाठ्यपत्राणि योजितानि?

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 27 | 27 | 27 | 21 | 21 |

| File Description | Document |
|---|---|
| List of value added courses (Data Template) combined with 1.3.3 मूल्यसंवर्धकपाठ्यपत्राणां सूची दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः 1.3.3 बिन्दुना युक्ता। | View Document |
| Brochure or any other document relating to value added courses पञ्चदशतः विंशतिहोरापर्यन्तं ततोऽधिकं वा प्रचालितानां मूल्यसंवर्धकपाठ्यपत्राणां नामानि। | View Document |
| Any additional information अतिरिक्ताः सूचनाः। | View Document |

***1.3.3 Average Percentage of students enrolled in the courses under 1.3.2.***

***1.3.2 बिन्दोः अनुरूपं जीवनकौशलप्रदे मूल्यसंवर्धके च पाठ्यपत्रे प्रविष्टानां छात्राणां प्रतिशतता।***

**Answer:** 43.34

1.3.3.1 Number of students enrolled in value-added courses imparting transferable and life skills offered year-wise during the last five years

विगतपञ्चवर्षेषु प्रचालितानां स्थानान्तरार्हाणां जीवनकौशलप्रदानां मूल्यसंवर्धक-पाठ्यपत्राणां प्रतिवर्षीया सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 892 | 862 | 962 | 868 | 786 |

| File Description | Document |
|---|---|
| List of students enrolled (Data Template) combined with 1.3.2 प्रविष्टानां छात्राणां सूची (दत्तांशप्रारूपम्) 1.3.2 बिन्दुना युक्ता। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***1.3.4 Percentage of students undertaking field projects/ internships/ training programmes/ summer assignments etc. (Preceeding academic year data)***

***क्षेत्रकार्यपरियोजनासु अन्तःप्रशिक्षणेषु प्रशिक्षणपाठ्यक्रमेषु ग्रीष्मावकाशस्तकार्येषु गृहीतभागानां छात्राणां प्रतिशतता। (प्रगतवर्षस्य)***

**Answer:** 28.02

1.3.4.1 Number of students undertaking field project or internships

क्षेत्रकार्यपरियोजनासु ग्रीष्मावकाशादिषु कार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सङ्ख्या।

Answer: 600

| File Description | Document |
|---|---|
| List of Programmes and number of students undertaking field projects / internships (Data Template) पाठ्यक्रमाणां तथा क्षेत्रकार्यपरियोजनाः विरामकालीनकार्याणि कुर्वताम्/ अन्तःप्रशिक्षणं प्राप्नुवतां छात्राणां सूची (दत्तांशप्रारूपम्) | View Document |
| Any additional information | View Document |

***1.3.5 University Curriculum has units and sub-units of the modern subjects like History, Political Science, Education, Psychology, Economics and statistics etc. have contents from Sanskrit based knowledge and being taught in Sanskrit medium. Modern Sanskrit Literature is also included in the curriculum, Provide details.***

***इतिहास-अर्थशास्त्र-शिक्षाशास्त्र-मनोविज्ञान-सङ्ख्याशास्त्र-समाजशास्त्र-राज्यशास्त्रेत्याद्याधुनिक-विषयभागोपभागाः अपि संस्कृतमाध्यमेन पाठ्यमानाः सन्ति। आधुनिकसंस्कृतसाहित्यमपि पाठ्यचर्यायामन्तर्भावितम्, विवरणं देयम्।***

**Answer:**

शास्त्रीयसंस्कृतमाध्यमेन सञ्चालितेषु पाठ्यक्रमेषु संस्कृतशास्त्रीयविषयैः सह आधुनिकाः विषयाः अपि सम्बद्धाः वर्तन्ते।

*1.* समाजशास्त्रं राजनीतिशास्त्रादिकञ्च भारतीयज्ञानपरम्परायाः ज्ञानेन सह विश्वविद्यालयस्य छात्राः आधुनिकविषयेषु नवाचारेषु च विशिष्टं ज्ञानं प्राप्नुयुः, तेन समाजे स्वातन्त्र्येण कालोचितं योगदानं कर्तुं च ते प्रभवेयुः इति उद्देश्येन तान् आधुनिकानपि विषयान् स्वीकृत्य सुविन्यस्तः पाठ्यक्रमः सञ्चालितो वर्तते। तद्विवरणमत्र प्रस्तूयते। शास्त्रिप्रथमवर्षस्य पाठ्यक्रमे वैकल्पिकरूपेण सप्तमपत्रे एते विषयाः वर्तन्ते- *1.* राजनीतिशास्त्रम् *2.* समाजशास्त्रम् *3.* सैनिकशिक्षा (*NCC)* 4. योगविज्ञानञ्च। शास्त्रिद्वितीयवर्षीयपाठ्यक्रमे वैकल्पिकरूपेण षष्ठपत्रे हिन्दीभाषा, अंग्रेजीभाषा च, सप्तमपत्रे समाजशास्त्रम्, राजनीतिशास्त्रम्, पर्यावरणम्, सैनिकशिक्षा, योगविज्ञानञ्च, शास्त्रीतृतीयवर्षीयपाठ्यक्रमे अनिवार्यरूपेण हिन्दीभाषा, मूल्यशिक्षा, मानवाधिकारश्चेति विषयाः निर्धारिताः सन्ति।

*2.* **अर्थशास्त्रम्-** शास्त्रिपाठ्यक्रमे धर्मशास्त्रविषये कौटिल्यस्य अर्थशास्त्रम् इति पत्रं वर्तते। भारतस्य प्राचीनतमः एषः अर्थशास्त्रीयः ग्रन्थः स्वामी, अमात्यः, सुहृत्, कोषः, राष्ट्रम्, दुर्गः, बलम्, इत्येवं रूपेण देशस्य अष्टाङ्गव्यवस्थायाः प्रतिपादकः वर्तते।

*3.* **गणितज्योतिषम्-** ज्योतिषविभागान्तर्गतं सिद्धान्तज्योतिषपाठ्यक्रमे गणितज्योतिषस्य अध्यापनं प्रचलति। येन कुण्डल्यादिनिर्माणे गणितस्य या उपयोगिता विद्यते तस्य पूर्तिः भवत्येव।

*4.* **इतिहासः-** आचार्यपाठ्यक्रमे प्रतिसत्रम् अन्तिमं पत्रं बहुवैकल्पिकं वर्तते। तत्र *1.* संस्कृतशिक्षणाय अधिगमार्थञ्च सामग्र्युत्पादनम्, *2.* संस्कृतसाहित्येतिहासः भाषाविज्ञानञ्च, *3.* संस्कृतं संस्कृतिश्च, *4.* वर्णात्मकं भाषाविज्ञानम्, *5.* ज्यौतिषशास्त्रेतिहासः, *6.* वास्तुशास्त्रेतिहासः, *7.* धर्मशास्त्रेतिहासः, *8.* व्याकरणशास्त्रेतिहासः, *9.* वैदिकसंस्कृतिपरिचयः पौरोहित्यक्रियान्वयनविधिः, *10.* प्राकृतभाषेतिहासः, *1*1. न्यायवैशेषिकदर्शनेतिहासः, *1*2. मीमांसादर्शनेतिहासः, *1*3. अद्वैतवेदान्तदर्शनेतिहासः, *1*4. विशिष्टाद्वैतवेदान्तदर्शनेतिहासः, *1*5. जैनदर्शनेतिहासः, *1*6. सांख्ययोगदर्शनेतिहासः, *1*7. दर्शनशास्त्रेतिहासः, *1*8. योगविभागस्य एम.ए. कक्ष्यायां मनोचिकित्सा, शारीरिकविज्ञानञ्चेति विषयाः नवीनतया पाठ्यांशानां योजनेन सह निर्धारिताः सन्ति। विश्वविद्यालयेन लेखनाय वैकल्पिकावसरः कल्पितो वर्तते। आधुनिकविषयाणाम् अध्यापकाः सामर्थ्यानुसारं संस्कृतभाषां जानन्ति। एवञ्च हिन्दी-आङ्ग्लभाषामाध्यमेन सह अध्यापकाः यथाशक्ति संस्कृतमाध्यमेनापि पाठयन्ति।

*5.* **शिक्षाशास्त्रं प्रबन्धनशास्त्रञ्च-** शिक्षाशास्त्रिपाठ्यक्रमे विषयाः संस्कृतमाध्यमेन पाठ्यन्ते। तत्रापि पत्ररूपेण प्रबन्धनशास्त्रस्यापि अध्यापनं प्रचलति। तेषां विवरणम्- प्रथमवर्षे *1.* दर्शनसमाजशास्त्रयोः परिप्रेक्ष्ये शिक्षा *2.* अधिगमविकासयोः मनोविज्ञानम् *3.* शिक्षणाधिगमयोः सूचना-सम्प्रेषणविधिः *4.* भाषाशिक्षा *5.* संस्कृतशिक्षणम् *6.* आधुनिकविषयशिक्षणम्/आधुनिकभाषाशिक्षणम् *7.* शैक्षिकप्रबन्धनम्/नवीनशैक्षिकप्रवृत्तयः, द्वितीयवर्षे *1.* पाठ्यचर्या विद्यालयश्च *2.* अधिगमाकलनम् *3.* समसामयिकभारतं शिक्षा च *4.* शास्त्रशिक्षणम् *5.* समावेशात्मकं शिक्षणम् तथा मानवाधिकारशिक्षा, शिक्षायां लैङ्गिकसमस्याः, मूल्यशिक्षा शिक्षाचार्यपाठ्यक्रमे सत्रीयप्रणाली परिपाल्यते। प्रथमे द्वितीये च सत्रे प्रत्येकं पञ्च विषयाः पाठ्यन्ते। प्रथमसत्रार्धे- *1.* शैक्षिकप्रक्रियायां दर्शनशास्त्रम्, *2.* शिक्षार्थी अधिगममनोविज्ञानञ्च, *3.* शैक्षिकानुसन्धानप्रविधिः, *4.* शैक्षिकप्रौद्योगिकी, *5.* प्रायोगिकम्। द्वितीयसत्रार्धे- *1.* शैक्षिकप्रक्रियायां समाजशास्त्रम्, *2.* बुद्धिः व्यक्तित्वं परायर्शमनोविज्ञानञ्च, *3.* शैक्षिकानुसन्धाने प्रदत्तविश्लेषणं प्रतिवेदनञ्च च, *4.* अध्यापकशिक्षा, *5.* प्रायोगिकञ्च। तृतीयसत्रार्धे- *1.* प्राथमिकशिक्षा, *2.* माध्यमिकशिक्षा च, *3.* शैक्षिकप्रबन्धनं नेतृत्वञ्च, *4.* अधिगमाकलनञ्च प्राथमिकस्तरे माध्यमिकस्तरे च। चतुर्थसत्रे- *1.* संस्कृतशिक्षा, *2.* ऐच्छिकविषयाः– 1. मूल्यशिक्षा, 2. योगशिक्षा, 3. मानवाधिकारशिक्षा, 4. समावेशीशिक्षा, 5. प्राचीनशिक्षायाः इतिहासः दर्शनञ्च, 6. निर्देशनम् उपबोधनञ्च।

*6.* **मनोविज्ञानम्-** शिक्षाशास्त्रिपाठ्यक्रमे शिक्षामनोविज्ञानम् इति विषयः वर्तते। शास्त्रिपाठ्यक्रमम् आचार्यपाठ्यक्रमं वा समापितवत्सु अशीतिप्रतिशतं छात्राः एनं पाठ्यक्रमं स्वीकृतवन्तः। अतः मनोविज्ञानस्य अध्ययनेन छात्राः अध्यापनाय अपेक्षितं विशिष्टं कौशलं सम्पादितवन्तः। योगविषयकपाठ्यक्रमेऽपि पत्ररूपेण मनोविज्ञानस्य अध्यापनं प्रचलति। दार्शनिकप्रस्थानेऽपि सर्वेषु दर्शनपाठ्यक्रमेषु मनस्तत्त्वस्य अध्यापनं प्रचलति।

*7.* **आधुनिकसंस्कृतसाहित्यम्**- आचार्यपाठ्यक्रमे आचार्यचतुर्थसत्रार्धे 'प्रसिद्धकवयः प्रसिद्धपाश्चात्यसाहित्यकाराश्च' इति विषयके पत्रे आधुनिकानां कवीनां तत्कृतीनां च अध्ययनं प्रावर्तते। बच्चूलाल अवस्थी, राधावल्लभ त्रिपाठी, अभिराजराजेन्द्रमिश्रः, केशवचन्द्रदाशः, आर. राघवन् तत्कृयश्च, इत्यादयः। प्रसिद्धपाश्चात्यसाहित्यकारेषु अरस्तु, होरेसः, रिचर्ड, वर्डस्वर्थ काचे इत्यादीनां पाश्चात्यसाहित्यकाराणां तत्कृतीनां च सामान्यपरिचयः संस्कृतमाध्यमेन दीयते। शास्त्रिपाठ्यक्रमे षट्सु सत्रेषु तृतीय-चतुर्थसत्रे च पञ्चमपत्रं वैकल्पिकं भवति। तत्र हिन्दीसाहित्यम् अंग्रेजीसाहित्यं च इति विषयाः अपि निर्धारिताः वर्तन्ते। उभयथा गद्यम्, कविता, नाटकम्, उपन्यासः, निबन्धः, रसः, अलंकारः, रीतिः, छंदः इति साहित्यस्य विविधप्रकारकाः पाठ्यविषयत्वेन स्वीकृताः सन्ति। मैथिलीशरणगुप्तः, विहारी, कबीरः, तुलसीदासः, सूरदासः, महादेवीवर्मा, हरिवंशरायवच्चन इत्यादीनां साहित्यं स्वीकृतं वर्तते।

*8.* **सङ्गणकम्**- शास्त्रिपाठ्यक्रमस्य पञ्चमसत्रे षष्ठसत्रे च संगणकविषयस्य अनिवार्यरूपेण अध्यापनं भवति। आचार्यपाठ्यक्रमस्य प्रथमसत्रे चतुर्थसत्रे च संगणकविषयस्य अनिवार्यरूपेण अध्यापनं भवति।

**मानवव्यवहारशास्त्रम्**- भारतीयसंस्कृते संरक्षणार्थं मानवव्यवहारार्थं मानवकल्याणार्थं च सर्वे शास्त्रग्रन्थाः अध्याप्यन्ते यत्र वेदादारभ्यः सर्वे शास्त्रग्रन्थाः मानवव्यवहारर्थं कल्याणार्थं च प्रवर्तते। यत्र यागविधिः,धर्मः, कर्तव्याकर्तव्यनिर्णयः,अहिंसा,संस्कारः, वर्णधर्मः, आश्रमधर्मश्चेत्यादिविषयाणामध्ययनमध्यापनञ्च प्रचलति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| List of units and sub-units of the modern subjects आधुनिक-विषयभागोपभागानां सूची। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**1.4 Feedback System**

***1.4.1 Structured feedback received from***

***1) Students***

***2) Teachers***

***3) Employers***

*4) Alumni*

*5) Parents*

*for design and review of syllabus semester wise/year-wise*

***अर्धसत्रप्रणाल्याः, वार्षिकसत्रप्रणाल्याः वा पाठ्यांशसंरचनार्थं समीक्षार्थञ्च संरचिता प्रतिपुष्टिः स्वीक्रियते -***

***१. छात्रेभ्यः***

***२. अध्यापकेभ्यः***

***३. वृत्तिदातृभ्यः***

***४. पूर्वच्छात्रेभ्यः***

***५ अभिभावकेभ्यः***

**Answer:** A. Any 4 of the above (अ. उपरि निर्दिष्टेषु कानिचित् चत्वारि)

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information (Upload) अतिरिक्ताः सूचनाः (उपारोपणीयम्) | View Document |
| Action taken report of the University on feedback report as stated in the minutes of the Governing Council, Syndicate, Board of Management (Upload) हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन कृतकार्यस्य प्रतिवेद | View Document |
| URL for stakeholder feedback report URL हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनम् | View Document |

***1.4.2 Feedback processes of the institution may be classified as follows:***

***संस्थायाः प्रतिपुष्टिप्रक्रिया अधोलिखितक्रमेण विभज्य दर्श्यते –***

**Answer:** A. Feedback collected, analysed, action taken and available on website(अ. प्रतिपुष्टिः सङ्गृहीता, विश्लेषिता, क्रियान्विता च, जालस्थाने उपलभ्यते च।)

| File Description | Document |
|---|---|
| Upload Stakeholder feedback report, Action taken report of the university on it as minuted by the Governing Council, Syndicate, Board of Management. हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनं, शासिपरिषदः कार्यवृत्तानुरूपं विश्वविद्यालयेन क्रियान्वयस्य प्रतिवेदनम् उपारोपणीयम्। | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| URL for feedback report हितधारकाणां प्रतिपुष्टिविषयकं प्रतिवेदनस्य सन्धानम्। | View Document |

***1.4.3 The feedback thus obtained is***

***• Discussed in the Statutory Bodies of the University like Academic Council/ Executive Council etc.***

***• Is used for restructuring the curriculum***

***• Discussed with Traditional scholars/ Peers***

***इत्थं सङ्गृहीता प्रतिपुष्टिः -***

***· विश्वविद्यालयस्य विद्वत्परिषदि/ शासिपरिषदि/ न्यायसभायाम्/ अन्येषु प्राधिकारेषु चर्चिता।***

***· पाठ्यचर्यायाः पुनः निर्माणाय उपयुज्यते।***

***· पारम्परिकैः विद्वद्भिः प्रवरगणैः सह चर्चिता।***

**Answer:**

विश्वविद्यालयस्य IQAC प्रकोष्ठेन गठितसमितिमाध्यमेन विध्यनुसारं प्रतिपुष्टेः निर्माणं क्रियते। सम्बन्धितप्रतिपुष्टिप्रपत्रानुसारं सम्बन्धितसामग्र्याः सञ्चयः क्रियते। तत्र एकभाषामाध्यमेन 2019 तः 2022 यावत्, भाषद्वयमाहत्य 2022 तः 2023 यावत्, भाषात्रयमाहत्य 2023 तः 2024 यावत् प्रतिपुष्टेः (Feedback) निर्धारणं विद्यते। सामग्री तु वर्षद्वयं Manual माध्यमेन, वर्षत्रयं च Online google form माध्यमेन कृतमस्ति। प्रतिपुष्टिस्तु छात्राणाम् अभिभावकानाम् अध्यापकानां नियोक्तृणां च कृतास्ति।

**छात्रप्रतिपुष्टिः-** विश्वविद्यालयः स्वकीयहितधारकेभ्यः प्रतिपुष्टिं संगृह्य पाठ्यचर्यायाः निर्माणे प्रतिपुष्टेः प्रयोगं करोति। अस्य विश्वविद्यालयस्य कार्याणि विविधपरिषद्द्वारा प्रवर्तन्ते। विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं स्वीकर्तुं प्रतिपुष्टेः स्वरूपं निर्धारयितुं बाह्यविशेषज्ञानां मार्गदर्शनं प्राप्यते। विगतपञ्चवर्षाणां 2019 तः 2024 पर्यन्तं विविधसान्दर्भिकप्रश्नानुसारं विविधेभ्यः हितधारकेभ्यः युगानुरोधेन प्रतिपुष्टिं संकलय्य पाठ्यचर्यायाम् आवश्यकतानुगुणं परिवर्तनानि विहितानि। प्राप्तनिर्देशानां IQAC अनुमोदनार्थं AC इत्यत्र प्रस्तावयति। विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः सम्बद्धविशेषज्ञैः साकं चर्चासत्रेषु विमर्शान् कृत्वा बहुमूल्यानि मन्तव्यानि , संस्तुतयः संकलितानि। सर्वेषामपि मन्तव्यानां,संस्तुतीनां व्यावहारिकप्रयोगं विश्वविद्यालयीयपाठ्यचर्याषु पाठ्येतरक्रियासु च कर्तुं संस्थागत- सर्वेषु अपि स्तरेषु चिन्तनं विहितमस्ति।

विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टेः प्रयोगं विविधनीतिनिर्माणकार्येषु साहाय्यं करोति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः विद्या -परिषदः निर्णयान्क्रियान्वयनं कर्तुं सूचयति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्टिः शास्त्रिकक्षासु परिषदः निर्णयान् प्राक्-अनुसन्धान-शैक्षिकक्रियान्वयनं कर्तुं सूचयति। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणसंगणकविज्ञानपाठ्यक्रमः छात्रेभ्यः अनिवार्यरूपेण योजितः। विविधहितधारकेभ्यः प्राप्तप्रतिपुष्ट्यनुगुणं शास्त्रिकक्षासु पर्यावरणविज्ञानपाठ्यक्रमः छात्रेभ्यः योजितः। छात्रेषु पर्यावरणस्य जागरूकतां सम्पादनाय, वायु-जल-ध्वनिप्रदूषणं दूरीकर्तुं सतर्कता सम्पादनाय पर्यावरणविज्ञानपाठ्यक्रमः प्रासङ्गिकः वर्तते।

नियोक्ताप्रतिपुष्टिः विद्यापरिषदः उपवेशने विविधहितधारकेभ्यः(वृत्तिदातृभ्यः) प्राप्तप्रतिपुष्टेः चर्चा कृता। ततः परिषदः सर्वे सदस्याः स्वकीयमतानि स्थापितवन्तः । उपवेशने निर्दिष्टेषु बिन्दुषु चर्चा विहिता । एतत्परिपाटीम् अनुसृत्य पाठ्यक्रमाणां नवीकरणम्, परिवर्तनम्, परिवर्धनम्, इत्यादयः विषयाः विद्यापरिषदः पुरतः उपास्थाप्यन्ते। अपेक्षानुगुणं कार्यपरिषदः अनुशंसां स्वीकृत्य कार्यान्वयः कृतः । आदौ विश्वविद्यालयीयविभागेभ्यः आगताः अभिप्राया अपि परिगृहीताः। मुक्तरूपेण चर्चा विहिता। परिषदः निर्णयानुसारं तन्निर्देशम् अनुसृत्य विश्वविद्यालयः कार्यं करोत्येव। विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्टेः विश्लेषणं व्यावहारिकसंस्तुतयश्च कार्यपरिषदि, योजना-नियन्त्रणमण्डल्यां, वित्तसमितौ, विद्यापरिषदि, परीक्षामण्डल्यां, केन्द्रीयानुसन्धान-मण्डल्यां, प्रकाशनसमितौ, प्रशासनसमितौ इत्यादिषु प्रेष्यते विचार्यते च । शैक्षिकाणि, प्राशासनिकानि, आनुसन्धानिकानि च कार्याणि विश्वविद्यालयस्य प्रगतेः साक्षात् सूचकानि भवन्ति। क्रियाशीलाः इमाः परिषदः निर्दिष्टानां कार्याणां निर्वाहे विशिष्टम् अनुभवम् आवहन्ति। विविधहितधारकेभ्यः अध्यापकेभ्यः , छात्रेभ्यः, पूर्वछात्रेभ्यः, नियोजकेभ्यः प्राप्तप्रतिपुष्टेः इमाः परिषदः प्रयोगं कुर्वन्ति। विविधहितधारकेभ्यः अध्यापकेभ्यः , छात्रेभ्यः, पूर्वछात्रेभ्यः, नियोजकेभ्यः प्राप्तप्रतिपुष्टेः निर्णयाय विद्यापरिषद् एव मुख्या भवति। तस्याः परिषदः अङ्गीकारात्परं प्रतिपुष्टेः निर्णीतस्य प्रकल्पस्य क्रियान्वयनं क्रियते। शैक्षणिकपुरोगतिं प्राप्य विश्वविद्यालयः अन्यसंस्थाभिः सह स्पर्धितुम् ईहते। प्रतिपुष्टेः प्रयोगः पाठ्यक्रमरचनादिषु शैक्षिककार्येषु अविलम्बं लक्ष्यपूर्तये अध्ययनमण्डलीं रचयितुं इयं परिषत् प्रोत्साहयति अनुमन्यते च। अध्ययनमण्डलीद्वारा अङ्गीकृतं निर्णयं परिशीलयति। अपेक्षानुगुणं परिष्कारं सूचयति। शैक्षणिकनिर्णयाः पूर्णतया छात्रकेन्द्रिताः छात्रप्रियाश्च भवेयुः, तदर्थं

शैक्षणिकपरिषद् सततं तत्परा भवति। परिषदः कार्यतन्त्रस्य लक्ष्यं भवति अधीतशास्त्राः स्पर्धात्मके जगति अनतिश्रमेण उद्योगं लभेरन् इति। विद्यापरिषद् अध्ययनमण्डली एते उभे अपि सहयोगेन विश्वविद्यालयस्य शैक्षणिकीं कार्यप्रणालीं कुरुतः।

विश्वविद्यालयस्य सर्वाङ्गिकविकासे तयोः उभयोः कार्ययोजना, काले अङ्गीक्रियमाणः निर्णयः, स्थाने दीयमाना प्रतिपुष्टिः च विशिष्टां भूमिकां वहति। विविधहितधारकेभ्यः अध्यापकेभ्यः , छात्रेभ्यः, पूर्वछात्रेभ्यः, नियोजकेभ्यः प्राप्तस्य प्रतिपुष्टेः प्रयोगः समाजस्य अध्येतृणां च अपेक्षाः सूक्ष्मं विज्ञाय शैक्षिकनिर्णयानां क्रियान्वयः क्रियते। यतः स एव विश्वविद्यालयीयविभागानाम् अध्ययने अध्यापने च परिणामजनको भवति। शिक्षाशास्त्रिपाठ्यक्रमस्य शिक्षाचार्यपाठ्यक्रमस्य च शैक्षिककार्याणि NCTE नियमावल्याधारेण प्रवर्तन्ते। विश्वविद्यालयस्य विद्यापरिषद् अस्याः संस्थायाः नियमान् परिशीलयति। तदविरोधेन विश्वविद्यालयस्य उद्देश्यं साधयितुं कार्ययोजनां करोति।

विभागीयभौतिकमाध्यमेन छात्रेभ्यः प्रतिपुष्टेः संग्रहणं कृतमस्ति। इत्थं स विविधहितधारकेभ्यः अध्यापकेभ्यः , छात्रेभ्यः, पूर्वछात्रेभ्यः, नियोजकेभ्यःप्राप्तस्य प्रतिपुष्टेः प्रयोगः विशिष्य छात्रेभ्यः विश्वविद्यालयस्य कल्याणाय कल्पते। शैक्षणिकपरिषदः अध्ययनमण्डल्याः च विविधहितधारकेभ्यः प्राप्तस्य प्रतिपुष्ट्याधारेणैव विश्वविद्यालयः पाठ्यपत्रं निर्धारयति।

शास्त्रिपाठ्यक्रमे अनिवार्यपत्रत्वेन सङ्गणकविज्ञानम् योजितमस्ति। अद्यत्वे सङ्गणकविज्ञानं सर्वत्र औद्योगोकक्षेत्रेषु अनिवार्यतया अपेक्षितम् अस्ति। तेन संस्कृतपदवीग्रहीतृणाम् औद्योगिकक्षेत्रस्य विस्तारः सञ्जायते। शास्त्रिपाठ्यक्रमे पर्यावरणविज्ञानम् इति पत्रं योजितं विद्यते। समाजस्य प्रतिपुष्ट्यनुसारं शैक्षिकपरिषदः क्रियान्वयनस्य इदम् अन्यदुदाहरणम्।

एवञ्च समाजे नैतिकरीतिसम्बर्द्धनाय, समतुल्यत्वप्रदर्शनाय, मानवानामधिकारविषयकज्ञानप्रदानाय च मूल्यशिक्षायाः मानवाधिकारस्य समाजशास्त्रस्य च पाठ्यक्रमाः सन्निविष्टाः वर्तन्ते। विश्वविद्यालयस्य सर्वे शैक्षणिककार्यक्रमाः पाठ्यक्रमाः च विविधहितधारकेभ्यः प्रतिपुष्टिम् अनुसृत्य-सततं प्रवर्तन्ते प्रवर्धन्ते च।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload the Minutes of the Academic Council/ Executive Council etc. विद्वद्परिषदादीनां निर्णयान् उपारोपयतु | View Document |
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

**2.Teaching-learning and Evaluation**

**2.1 Student Enrollment and Profile**

***2.1.1 Average percentage of students from other States and Countries during the last five years***

***विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां मध्यमानस्य प्रतिशततायाः मानम्।***

**Answer:** 62.62

2.1.1.1 Number of students from other states and Countries, year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु अन्येभ्यः राज्येभ्यः राष्ट्रेभ्यश्च प्रविष्टानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1314 | 1211 | 1220 | 1419 | 1151 |

| File Description | Document |
|---|---|
| List of students (other states and countries) छात्रसूची (अन्येभ्यः राज्येभ्यः/ राष्ट्रेभ्यश्च) | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Copy of the domicile certificate/passport from respective countries) अधिवासप्रमाणपत्रम् /आज्ञापत्रम् (सम्बद्धदेशानां) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.1.2 Demand Ratio (Average of last five years)***

***अभियाचनायाः अनुपातः (विगतानां पञ्चानां वर्षाणां मध्यमानम्)***

**Answer:** 123

2.1.2.1 Number of eligible applications received for admissions to all the Programmes year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रचालितेषु सर्वेषु कार्यक्रमेषु प्राप्तार्हतानाम् आवेदनपत्राणां वार्षिकक्रमेण सम्पूर्णा सङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 3070 | 3734 | 2865 | 3203 | 3708 |

2.1.2.2 Number of seats available year-wise during the last five years.

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् उपलब्धानां स्थानानां सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 2747 | 2675 | 2443 | 2796 | 2813 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.1.3 Average percentage of seats filled against seats reserved for various categories (SC, ST, OBC, Divyangjan, etc.) as per applicable reservation policy during the last five years***

***विगतेषु पञ्चसु वर्षेषु, आरक्षणनीत्यनुसारेण, नानाप्रवर्गेभ्यः (अनुसूचितजातिः, अनुसूचितजनजातिः, अन्य-अप्रगतजातिः, दिव्याङ्गजनाः, इत्यादयः) निर्दिष्टेषु आरक्षितस्थानेषु, सम्पूरितानाम् आरक्षितस्थानानां प्रतिशतं मध्यमानस्य प्रतिशतता।***

**Answer:** 19.5

2.1.3.1 Number of actual students admitted from the reserved categories year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु प्रतिवर्षम् आरक्षितप्रवर्गेभ्यः प्राप्तप्रवेशानां छात्राणां सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 312 | 374 | 310 | 369 | 316 |

2.1.3.2 Number of seats earmarked for reserved category as per GOI/State Govt. rule year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु भारतशासनस्य अथवा राज्यशासनस्य नियमानुरूपम् आरक्षितप्रवर्गेभ्यः निर्दिष्टानां स्थानानां वार्षिकी सङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1771 | 1723 | 1575 | 1800 | 1758 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

**2.2 Catering to Student Diversity**

***2.2.1 The institution assesses the learning levels of the students, after admission and organises special programmes (including spoken Sanskrit shibirams/ camps/ workshops/ summer schools etc.) for advanced learners and slow learners***

***छात्राणां प्रवेशानन्तरं संस्था तेषाम् अधिगमस्तरान् परीक्षते, अग्रसराधिगन्तॄणां मन्दाधिगन्तॄणां च कृते विशिष्टान् शैक्षिकपाठ्यक्रमान् (संस्कृतसम्भाषणशिबिराणि/ आवासीयशिबिराणि/ कार्यशालाः/ ग्रीष्मकालिकशिबिराणि इत्यादि) आयोजयति।***

**Answer:**

नवदेहलीस्थः श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः भारतीय-ज्ञान-परम्परायाः संरक्षणाय संवर्धनाय च सततं सन्नद्धो वर्तते। भारतीयज्ञानपरम्पराम् अधिगन्तुं संस्कृतभाषायां निबद्धशास्त्राणां पठन-पाठनमेव प्रधानमार्गः, अस्मिन्नेव मार्गे दिनानुदिनं समुत्कर्षं समर्जयन् विश्वविद्यालयोऽयं स्वकीर्तिपताकां प्रसारयति।

अस्मिन् विश्वविद्यालये देशस्य विभिन्नेभ्यः कोणेभ्यः स्व-स्वरुच्यनुगुणं शास्त्रम् अध्येतुं छात्राः सोत्साहं प्रविशन्ति। प्रवेशाद् अनन्तरं प्राध्यापकाः प्रविष्टानां छात्राणाम् अधिगमस्य स्तरस्य विविधप्रविधिभिः मूल्यांकनं कुर्वन्ति, यतो हि सर्वेषां छात्राणां बौद्धिकः स्तरो भिन्नो भवत्येव। तेषु प्रविष्टच्छात्रेषु गुरुकुलीयच्छात्राणां प्रारम्भिकस्तरे शास्त्रस्य अध्ययनत्वात् संस्कृतशास्त्रेषु तेषां ज्ञानं विशिष्टं भवति। आधुनिकविद्यालये ये छात्राः संस्कृतम् अधीतवन्तः तेषां संस्कृतस्य ज्ञानस्तरः मध्यमो भवति तथा ये विद्यालयस्य स्तरे संस्कृतं न अधीतवन्तः तेषां संस्कृतस्य ज्ञानस्तरो निम्नो भवति। एतेषु त्रिषु संस्कृतज्ञानस्तरेषु विभक्तानां छात्राणां कृते तेषां स्तरस्य अनुगुणं विविधाः कार्यक्रमाः विश्वविद्यालये समायोज्यन्ते।

छात्राणां प्रवेशाद् अन्तन्तरं तेषां स्वस्वशास्त्रस्य अध्ययनात् पूर्वं विश्वविद्यालयस्य पक्षतः मन्दाध्येतृविद्यार्थिनां कृते पक्षात्मकस्य संस्कृते सम्भाषणस्य शिबिरस्य समायोजनं क्रियते। तत्र प्रयोगात्मकस्य व्याकरणस्य सामान्यसिद्धान्ताः पाठ्यन्ते । स्वस्वसंकायेषु स्वस्वसंकायाध्यापकैः स्वस्वसंकायसम्बद्धानां छात्राणाम् अत्र पाठनं क्रियते । अस्मिन् शिबिरे छात्राः सम्भाषणविधिना संस्कृतज्ञानम् अर्जयन्ति, छात्राः संस्कृतभाषया सम्भाषणे कुशलाश्च भवन्ति। एवमेव विश्वविद्यालयस्य आन्तरिक- गुणवत्ता- आश्वासन- प्रकोष्ठेन (IQAC) अपि प्रतिदिनं प्रातः 9 वादनतः 10 वादनपर्यन्तं तथा च सायंकाले 5 वादनतः 6 वादनपर्यन्तं संस्कृतभाषाकौशलकक्षा सर्वेषां छात्राणां कृते प्रचाल्यते। एतासु कक्षासु मन्दाध्येतृच्छात्राः सम्भाषणे लेखने अधिगमे च स्वकौशलवर्धनाय प्रोत्साहिताः भवन्ति। विश्वविद्यालयस्य प्रायः सर्वेषु पाठ्यक्रमेषु मन्दाध्येतृच्छात्राणां कृते अनुशिक्षणकक्षाणां व्यवस्था अपि सुनिश्चिता वर्तते।

विश्वविद्यालये छात्राणां विविधाः शैक्षणिकभ्रमणकार्यक्रमाः आयोज्यन्ते। देहल्यां विविधेषु विश्वविद्यालयेषु महाविद्यालयेषु संग्रहालयेषु च छात्राणां यथाकालं गमनागमनं भवति, तत्र छात्राः नूतनं ज्ञानमर्जयन्ति तथा तत्र आयोज्यमानासु स्पर्धासु भागग्रहणपुरस्सरं स्वप्रतिभामपि प्रदर्शयन्ति। देशस्य विविधेषु विश्वविद्यालयेषु अखिलभारतीयस्तरे अपि विविधाः स्पर्धाः कार्यक्रमाश्च समायोज्यन्ते, तेष्वपि विश्वविद्यालयस्य छात्राः प्राध्यापकानां निर्देशने श्लोकान्त्याक्षरी- शलाका- कण्ठपाठ- भाषण- वादविवाद- योग- गायन- अभिनयक्रीडादिषु भागग्रहणपुरस्सरं विश्वविद्यालयस्य गौरवं वर्धयन्ति।

विश्वविद्यालयस्य प्रायः सर्वेषु विभागेषु पञ्चदिवसीया सप्तदिवसीया दशदिवसीया उत वा पंचदशदिवसीयाः कार्यशालाः सर्वेषां छात्राणां विशेषरूपेण प्रगताध्येतृणां कृते प्रतिवर्षं समायोज्यन्ते। अत्र देशस्य विभिन्नेभ्यः कोणेभ्यः समागताः स्व -स्वशास्त्रेषु कृतभूरिपरिश्रमाः विद्वांसः पङ्क्तिशः निर्दिष्टग्रन्थान् पाठयन्ति। एतासु कार्यशालासु विश्वविद्यालयस्य छात्राः बाह्यछात्राश्च सोत्साहं भागं स्वीकुर्वन्ति।

संस्कृते यत्किमपि ज्ञानं वर्तते तत् सर्वं विज्ञानस्य मूलकमेव तथापि विश्वविद्यालयोऽयं विविधाभिः विज्ञानकसंस्थाभिः सह मिलित्वा संयुक्ते तत्त्वावधाने विविधान् कार्यक्रमान् समायोजयति, तत्र प्रामुख्येन वास्तुशास्त्रविभागः देहलीस्थस्य योजना एवं वास्तुकला विद्यालयः (School of Planning and Architecture, New Delhi) इति संस्थया सह प्रायः प्रतिवर्षं कार्यशालां संगोष्ठीं वा समायोजयति। विश्वविद्यालयस्य नैके प्राध्यापकाः देशस्य प्रतिष्ठितासु वैज्ञानकसंस्थासु मुख्यातिथिरूपेण, विशिष्टातिथिरूपेण, सारस्वतातिथिरूपेण मुख्यवक्तृरूपेण (Keynote Speaker) संसाधनव्यक्तिरूपेण ( Resource Person ) च भागं स्वीकुर्वन्ति।

विश्वविद्यालयस्य परिसरे पौरोहित्यप्रयोगशालारूपेण यज्ञशाला देवसदनं च वर्तते। तत्र आवर्षं प्रायोगिककर्मकाण्डो भवति। विशेषतया सत्रारम्भे श्रावणमासे गुरुपूर्णिमायां नवरात्रेषु दीपावल्यां वसन्तपञ्चम्यां रामनवम्यां प्रभृतिषु विशिष्टदिवसेषु विशेषानुष्ठानानि अनुष्ठीयन्ते। अनेन छात्राणां कर्मकाण्डस्य प्रयोगात्मकं ज्ञानं वर्धते।

देवसदनं निकषा एव श्रौतयज्ञानां प्रयोगशाला अपि स्थापिता वर्तते। श्रौतयज्ञशालासु दर्श-पौर्णमास्यादिकानां वैदिकयज्ञानां वैदिकरीत्या अनुष्ठानविधिः प्रायोगिकरूपेण छात्राणां समक्षे प्रदर्श्यते। अनेन छात्राणां वेदाग्निहोत्रस्य प्रयोगात्मकं ज्ञानं परिपुष्टं भवति।

विश्वविद्यालये पाण्डुलिपिकार्यशाला समायोज्यते, अत्र छात्राः पाण्डुलिपिसम्पादनस्य शोधस्य च ज्ञानमर्जयन्ति तथा ये छात्राः विशेषतया पाण्डुलिपिमवलम्ब्य शोधकार्यं कर्तुमिच्छन्ति ते विविधेषु पाण्डुलिपिशोधसंस्थानेषु हस्तलेखागारेषु च गच्छन्ति।

मन्दाध्येतृच्छात्राणां कृते काले काले विशेषकक्षाः अपि सञ्चालिताः सन्ति। विशेषरूपेण नेटपरीक्षासज्जताकेन्द्रम् इत्याख्यस्य उपक्रमस्य अन्तर्गता अनुसूचितजाति-अनुसूचितजनजाति-अन्यपिछडावर्गीयच्छात्राणां कृते प्रो. सुखदेवभोईवर्याणां निर्देशने 2019-2020 तमे सत्रे कक्षाः समायोजिताः।

इत्थं विश्वविद्यालयोऽयं छात्राणां विकासाय भारतीयज्ञानपरम्परायाः संरक्षणाय च अहर्निशं कटिबद्धो दृश्यते कार्यं करोतीति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document |

***2.2.2 Student - Full time teacher ratio***

## *छात्राणां पूर्णकालिकाध्यापकानां च अनुपातः*

**Answer:** 19.64

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

| Other Upload Files | |
|---|---|
| 1 | View Document |

**2.3 Teaching- Learning Process**

***2.3.1 Student centric methods, such as experiential learning, participative learning and learning through dialogue mode and use of hermeneutics in the teaching of knowledge texts and Kavyas, problem solving methodologies are used for enhancing learning experiences.***

***अनुभवात्मकः अधिगमः, सहभागी अधिगमः, संवादपद्धत्या अधिगमः इत्यादयः छात्रकेन्द्रितविधयः, वादपद्धत्या शिक्षणं, शास्त्राणां काव्यानां च पाठने टीकाभाष्यादिपद्धतयः समस्यापरिष्कारविधिविज्ञानानि च अधिगमानुभवसमभिवर्धनाय उपयुज्यन्ते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयद्वाराभारतीयपरम्परागतशास्त्रेषु मुख्यतया शास्त्रिसम्मानितपाठ्यक्रमः, आचार्यपाठ्यक्रमः, विद्यावारिधिपाठ्यक्रमश्च सञ्चाल्यन्ते। 2021 ईसवीयाब्दपर्यन्तं विशिष्टाचार्यपाठ्यक्रमः अपि सञ्चालितः आसीत्। इमे च पाठ्यक्रमाः सम्प्रति राष्ट्रियशिक्षानीति (NEP) 2020 अनुसारं प्रचलन्ति।

एतेषां भारतीयपरम्परागतशास्त्राणां सुदीर्घा अध्ययनाध्यापनपरम्परा वर्तते। गुरुः शिष्यस्य स्तरं ज्ञात्वैव पाठ्यविषयं समुचितेन प्रकारेणाध्यापयति, समये समये पर्यवेक्षते, परीक्षते च । तत्र छात्रकेन्द्रिताः प्रमुखाः विधयः एते सन्ति -

1. **अनुभवात्मकः अधिगमः**:- साहित्ये रसालङ्कारादीनां परिचयः कक्ष्यायां प्राप्यते । फलितज्योतिषे जातकस्य कुण्डल्यां फलादेशविचारः पाठ्यते । छात्राः स्वानुभवेन सह फलादेशविधानमाभ्यस्यन्ति। एवमेव वास्तुशास्त्रे भवननिर्माणप्रविधिं वैद्युतफलके प्रदर्शनेन छात्राः अनुभवेन विषयान् आत्मसात्कुर्वन्ति।

2. **साहचर्याधिगमः**:- व्याकरणे पठितानां सूत्राणाम् उपरि सहाध्यायिनः परस्परं चर्चां कुर्वन्ति । सिद्धान्तज्यौतिषे ग्रहचारादीनामुपपत्तिं गणितीयप्रक्रियां च अवगन्तुं छात्राः सम्भूय अभ्यस्यन्ति । एवं फलितज्यौतिषे, वास्तुशास्त्रे, सांख्ययोगे, मीमांसायाम्, अद्वैतवेदान्तादिषु शास्त्रेषु च द्वयोः त्रयाणां वा समूहं निर्मीय प्रत्येकं समूहस्य कृते एकैकः विषयः प्रदीयते, छात्राः तस्य विषयस्योपरि समूहे चर्चां कृत्वा समाधानमन्वेषयन्ति ।

3. **श्रवणपूर्वकः अधिगमः**:- कक्ष्यायां विशेषावधानपूर्वकं श्रोतुं सूचना दीयते । अल्पसमयापेक्षी विषयः अध्यापकेन पाठ्यते। छात्रैः ऐकाग्र्येण श्रूयते । शिक्षाशास्त्रे विशेषरूपेणास्य प्रयोगः क्रियते।

4. **मननाधिगमः**:- योगशास्त्र-न्याय-साहित्य-वेदान्त-मीमांसा-सांख्ययोग-व्याकरण-ज्योतिष-वास्तुशास्त्रादिषु च छात्राः मननाधिगमस्य अवसरं प्राचुर्येण प्राप्नुवन्ति । हेत्वाभासः, रसः, भावना, स्फोटः इत्यादयः प्रमेयाः मननेन अधिगच्छन्ति ।

5. **स्वाध्यायाधिगमः** – स्वाध्यायेन छात्राः विषयं सम्यक् प्रकारेण अवगच्छन्ति। यथा व्याकरणे रामशब्दस्य प्रक्रियापाठनात्परम् अकारान्तपुल्लिङ्गशब्दान् कृष्णादीन् स्वाध्यायेन अधिगच्छन्ति।

6. **परिसंवादपूर्वकः अधिगमः**:- छात्राः कक्ष्यायां सहाध्यायिभिः सह उत वा अध्यापकेन सह परिसंवादं कुर्वन्ति । यथा साहित्ये अभिज्ञानशाकुन्तलस्य पाठ्यांशानां संवादं कुर्वन्ति । वेदान्ते कठोपनिषदं संवादात्मकतया पठन्ति ।

7. **अवलोकनात्मकाधिगमः**:- ज्योतिषे चन्द्रसूर्यग्रहणादिविचारः । वेदे मन्त्राणाम् अनुवाकः। वास्तुशास्त्रे भवन-राजप्रासाद-देवप्रासादादीनां अवलोकनं क्रियते। अपि च छात्राः पाठ्यांशेन सम्बद्धान् अन्यान् विषयान् यूट्यूब् इत्यादिजालस्थानेषु अवलोकयन्ति।

8. **प्रश्नविधिः**- प्रश्नोपनिषदि ब्रह्मचर्येण श्रद्धया संवत्सरं संवत्स्यथ यथाकामं प्रश्नान् पृच्छत इति निर्देशः लभ्यते । कालांशे कश्चन समयः छात्राणां जिज्ञासोपशमनाय निर्दिष्टो भवति। छात्राः प्रश्नान् पृच्छन्ति । पाठितस्य विषयस्य पठनसमये

उत्पन्नान् प्रश्नान् अग्रिमकालांशे पृच्छन्ति। ततः अध्यापकात् समाधानं प्राप्नुवन्ति । वाग्वर्धिनीपरिषदि छात्र-अध्यापकयोः मध्ये प्रवर्तमानेन प्रश्नोत्तरमाध्यमेन शास्त्रीयं विषयम् अवगच्छन्ति।

**9. प्रयोगपूर्वकः अधिगमः**- साहित्ये नाटकस्य, ज्योतिषे फलादेशविचारस्य, वास्तुशास्त्रे वास्तुपदविन्यासादीनां, पौरोहित्ये कर्मकाण्डस्य च योगशास्त्रे आसनानां प्रयोगपूर्वकं ज्ञानं सम्पाद्यते।

**अध्यापनविधयः-**

**1. व्याख्यानविधिः-** प्रसिद्धोऽयं विधिः प्रायः परम्परागतशास्त्रीयविषयाणाम् अध्यापने प्रयुज्यते। यथा- साहित्ये नैषधीयचरितम्, सांख्ये सृष्टिप्रक्रियाम् इतरशास्त्रविषयान् च बोधयितुम् अवलम्ब्यते।

**2. वादविधिः**- वादे वादे जायते तत्त्वबोधः । शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते। अतः वेदान्त-न्याय-व्याकरण-मीमांसा-बौद्धदर्शन-जैनदर्शन-सांख्ययोगे च अध्यापकाः अमुं विधिम् आश्रयन्ते । वाक्यार्थपरिषदि अध्यापकाः विशेषतः अनेन विधिना प्रमेयं प्रतिपादयन्ति ।

**3. दृष्टान्तविधिः-** यथा- व्याकरणे स्फोटः, वर्णनित्यत्वम्, वेदान्ते अध्यासः, साहित्ये वृत्तयः, मीमांसायां लौकिकन्यायानाम् उपयोगः। एवमेव अन्येषां विषयाणां पाठने अपि एषः विधिः प्रयुज्यते । प्रदीयमानेन दृष्टान्तेन छात्राणां विषये सुलभतया गतिः भवति।

**4. आदर्शवाचनविधिः-** पुराणम्, वेदमन्त्राः, काव्यानि, पाठ्यश्लोकाश्च इत्यादीनां पाठनाय प्राचुर्येण असौ विधिः स्वीक्रियते ।

**5. कथाविधिः-** प्रतिपाद्यस्य विषयस्य तत्सम्बन्धिनश्च अनेके कथाप्रसङ्गाः शिक्षणसमये श्राव्यन्ते। यथा- काव्यानाम्, पुराणानाम्, उपनिषदां भगवद्गीतादीनां च पाठने असौ विधिः आश्रीयते ।

**6. अध्यारोप-अपवादविधिः-** सोपानक्रमेण विषयोपन्यासेन अध्यापनम् | स्थूलात् सूक्ष्मं प्रति, अज्ञातात् ज्ञातं प्रति, इन्द्रियगम्याद् अतीन्द्रियं प्रति विषयं क्रमेण बोधयितुम् एषः विधिः आश्रीयते। यथा- अद्वैतवेदान्ते ब्रह्मणः स्वरूपकथनादौ प्रयुज्यते।

**7. समस्या-समाधानविधिः-** शास्त्रीयविषयाणां पाठनसमये आदौ संशयः ततः समाधानं पुनः संशयः ततः समाधानम् इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते । विश्वविद्यालयस्य पाठ्यक्रमाणाम् अध्यापने एनं अत्यन्तोपयोगिनं विधिम् आश्रयन्ते अध्यापकाः ।

**8. टीकाभाष्यपद्धतिः-** विभिन्नपाठ्यक्रमेषु विद्यमानानां शास्त्रीयग्रन्थानां पाठनाय टीकापद्धतिः अत्यन्तम् उपादेया वर्तते। परम्परागतशास्त्रीयविषयाणां वेद-दर्शन-ज्योतिष-साहित्य-वास्तुशास्त्राणामध्यापने पद्धतिरियं स्वीक्रियते।

**9. परीक्षाविधिः-** शास्त्राणां दृढावगतिसम्पादनाय शलाकापरीक्षा क्रियते । अवान्तरविषये पाठिते घटकपरीक्षा क्रियते ।

एतैः विधिभिः सह प्रवचनविधिः, सङ्गोष्ठी, कण्ठस्थीकरणम्, अभिनयविधिः इत्यादयः विधयः यथोपयोगितया आश्रीयन्ते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |
| Link for Additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.3.2 Percentage of teachers using ICT for effective teaching with Learning Management Systems (LMS), E-learning resources etc.***

***अधिगम-प्रबन्धन-प्रणाली(अ.प्र.प्र)-वैद्युत-अधिगम-संसाधन(वै.अ.स)-प्रभृतिभिः सह सूचना-संप्रेषण-प्राविधिकीं (सू.सं.प्रा) प्रभाविशिक्षणार्थम् उपयुञ्जताम् अध्यापकानां प्रतिशतता।***

**Answer:** 83.49

2.3.2.1 Number of teachers using ICT

सूचना-सम्प्रेषण-प्राविधिकीम् (सू.सं.प्रा) उपयुञ्जताम् अध्यापकानां सङ्ख्या

Answer: 91

| File Description | Document |
|---|---|
| Upload List of teachers (using ICT for teaching) based on Data Template दत्तांशप्रारूपाधारेण सूचना-संप्रेषण-प्राविधिकी (सू.सं.प्रा) (अ.प्र.प्र., वै.अ.सं) उपयुञ्जताम् अध्यापकानां सूची उपारोपणीया | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Provide link for webpage describing the " LMS/ Academic management system" जालपुटस्य सन्धानं दीयतां यत्र अधिगम-प्रबन्धन-प्रणाली (अ.प्र.प्र) वैद्युत-अधिगम-संसाधनानां (वै.अ.स) विवरणं लभ्यते | View Document |

***2.3.3 Ratio of mentor to students for academic and stress related issues (preceding academic year data)***

***शैक्षिकसमस्याविषये, उद्वेगविषये च छात्राणां कृते उपलब्धानाम् उपदेष्टॄणाम् अनुपातः (प्रगतवर्षस्य दत्तांशः)***

**Answer:** 19.64

2.3.3.1 Number of mentors

मार्गदर्शकानां सङ्ख्या

Answer: 109

| File Description | Document |
|---|---|
| Upload year-wise list of number of students, full time teachers and mentor/mentee ratio <br> छात्राणां तथा पूर्णकालिकाध्यापकानां वार्षिकी सूची तथा उपदेष्टृ-उपदेश्यानामनुपातश्च उपारोपणीयः | View Document |

***2.3.4 University encourages the Grurukula method of teaching/ Pathashalas/ Traditional Oriental Learning System (TOLS)/ Gurukula/ Shastrapeethas***

***विश्वविद्यालयः गुरुकुलपद्धत्या अध्यापनं/ पाठशालाः/ परम्परागतप्राच्याधिगमप्रणालीः/ गुरुकुलानि/ शास्त्रार्थपीठानि च पोषयति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमाः अनुसन्धानक्षेत्रस्य भूमिकां वर्धयन्ते। अध्यापनपद्धतिः आधुनिकप्रणाल्या सह गुरुकुलप्रणाल्यनुसारम् अपि भवेद् एतदर्थं विश्वविद्यालये परम्परागतप्राच्याधिगमप्रविधिना शास्त्राध्यापनं क्रियते। देवसदनम्, यज्ञशाला, वेदाग्निहोत्रशाला वेधशालादिव्यवस्था च पौरोहित्य-वेद-ज्योतिष-

मीमांसादिपाठ्यक्रमेषु प्रायोगिकं ज्ञानं ददति । वास्तुशास्त्रपाठ्यक्रमे प्रायोगिकज्ञानार्थं विविधतन्त्रयुक्तीनां यन्त्राणां च प्रयोगः क्रियते । ज्योतिषपाठ्यक्रमे प्रायोगिकज्ञानार्थं प्रयोगशालाद्वारा वेधशालामाध्यमेन च विषयाः पाठ्यन्ते ।

अत्र पाठ्यक्रमे निर्दिष्टानाम् उपर्युक्तानां भारतीयपरम्परागतशास्त्राणां सुदीर्घा अध्ययन-अध्यापनपरम्परा वर्तते। विश्वविद्यालयः शास्त्राध्ययनप्रणालीं पारम्परिकानुगुणं वर्तते। अन्तश्शास्त्रीयाः विषयाः अपि पाठ्यक्रमे सन्निहिताः सन्ति। आचार्यपाठ्यक्रमे चतुर्षु अपि सत्रार्धेषु प्रतिसत्रार्धम् विषयेतरच्छात्राणां कृते एकम् ऐच्छिकं वैकल्पिकं पत्रम् अन्तश्शास्त्रीयं वर्तते । एतद्द्वारा अन्तश्शास्त्रीयेषु विषयेषु पठनस्य अवसरः कल्पितो वर्तते। आचार्यपाठ्यक्रमे उपर्युक्तानां सर्वेषां विषयाणां अन्तश्शास्त्रीयं अध्ययनं पाठ्यक्रमे भवितुमर्हति। एवमेव विकल्पाधारित क्रेडिट प्रक्रिया (सी. बी. सी. एस.) अनुसारेण शास्त्रीतृतीयवर्षे तृतीयचतुर्थपत्रयोः अन्तःशास्त्रीयसम्बद्धानां विषयाणां न्यासः वर्तते। येषु तत्तच्छास्त्राणां परिचयः मुख्यबिन्दवश्च पाठ्यक्रमे वर्तन्ते।

विश्वविद्यालये काले काले छात्राणां कृते सङ्गोष्ठयः, वाग्वर्धिनीसभाः, विभागीयवाक्यार्थगोष्ठयः, शास्त्रचर्चा, शास्त्रपरीक्षा, शास्त्रस्पर्धा, संस्कृतकविसमवायः, संस्कृतभाषाविकासकार्यक्रमः विविधविषयेषु कार्यशालाः. विशिष्टव्याख्यानमालाश्च इत्यादयः अनुसन्धाने प्रेरकाः कार्यक्रमाः समायोज्यन्ते। अनेन छात्राः प्रतिस्पर्धार्थं तत्पराः समुत्सुकाश्च भवन्ति।

विश्वविद्यालये विविधेषु शास्त्रीयेषु विषयेषु विशिष्टव्याख्यानानि आयोज्यन्ते । यत्र शास्त्रेषु विशिष्टानां प्रसिद्धविपश्चिदां व्याख्यानैः छात्राः अनुसन्धानात्मकं चिन्तनं लभन्ते ।

विश्वविद्यालये वास्तुशास्त्रविभागेन विभागीयच्छात्राणां कृते प्रतिवर्षं वास्तुशास्त्र-नवीकरण-कार्यक्रमस्य विशिष्टव्याख्यानमाला आयोज्यमानाः सन्ति। अस्यां व्याख्यानमालायां दशाधिकानि व्याख्यानानि आयोज्यन्ते। एवमेव विश्वविद्यालये प्रतिवर्षं 09 प्रसिद्धानां स्मृतिशेषविदुषां स्मृतौ एकदिवसात्मिका 09 व्याख्यानमालाः आयोज्यन्ते। तासां व्याख्यानमालानां नामानि सन्ति-

1. श्रीलालबहादुरशास्त्रीस्मारकव्याख्यानमाला साहित्यविभागेन आयोज्यते।

2. डॉ. मण्डनमिश्रस्मारकव्याख्यानमाला सर्वदर्शनविभागेन आयोज्यते।

3. श्री पट्टाभिरामशास्त्रीव्याख्यानमाला मीमांसाविभागेन आयोजिता भवति।

4. श्री गौरीनाथशास्त्रीस्मारकव्याख्यानमाला दर्शनसंकायेन आयोजिता भवति।

5. श्री रमाकान्त-उपाध्यायस्मारकव्याख्यानमाला शिक्षासंकायेन आयोज्यते।

6. म.म.पं. कल्याणदत्तशर्मस्मारकव्याख्यानमाला ज्योतिषविभागेन आयोजिता भवति।

7. श्री आदित्यनाथझास्मारकव्याख्यानमाला आधुनिकविषयपीठेन आयोज्यते।

8. डॉ. वाचस्पति-उपाध्यायस्मारकव्याख्यानमाला वेदविभागेन  आयोजिता भवति।

9. प्रो. शुकदेवचतुर्वेदिस्मारकव्याख्यानमाला वास्तुशास्त्रविभागेन आयोजिता भवति।

10. जैनविभागेन स्ववित्तपोषिता आचार्यविद्यानन्दमुनिराज व्याख्यानमाला आयोज्यते।

11. प्राकृतभाषाविभागेन स्ववित्तपोषिता कुन्दकुन्दभारती व्याख्यानमाला आयोज्यते।

अनेन प्रकारेण विभागीयवाक्यार्थगोष्ठीनाम् आयोजनाय विश्वविद्यालयेन प्रोत्साहनं दीयते । विश्वविद्यालयस्य विभागीयप्राध्यापकैः एताः गोष्ठयः आयोज्यन्ते। गोष्ठीषु प्राध्यापकाः छात्रेभ्यः वाक्यार्थाय समस्याः प्रददति। ततः छात्राः शास्त्रीयेषु सूक्ष्मेषु विषयेषु स्वसमाधानं प्रस्तुत्य गवेषणमार्गः कीदृशः भवेत् इति ज्ञातुम् अवसरं प्राप्नुवन्ति ।

विश्वविद्यालये गुरुकुलेषु आश्रियमाणाः विधयः उत वा परम्परागतप्राच्य-अधिगमप्रणाल्यः विश्वविद्यालयस्य पाठ्यक्रमेऽपि अध्यापनाय अवलम्ब्यन्ते-

1. **व्याख्यानविधिः-** प्रायः परम्परागतशास्त्रीयविषयेषु व्याख्यानविधिः प्रयुज्यते।

2. **वादविधिः**- शास्त्रीयग्रन्थेषु दर्शनग्रन्थेषु च प्रमेयविचारः वादसरण्या प्रतिपादितो वर्तते।

3. **दृष्टान्तविधिः**- व्याकरणे स्फोटः, वर्णनित्यत्वम्, वेदान्ते अध्यासः, भ्रमः, साहित्ये वृत्तयः, मीमांसायां विभिन्नप्रमेयाः (लौकिकन्यायानाम् उपयोगः) एवं नैकेषां विषयाणां पाठने च दृष्टान्तविधिः उपयुज्यते ।

4. **अध्यारोप- अपवादविधिः** - सोपानक्रमेण विषयोपन्यासेन अध्यापनम् । इन्द्रियगम्याद् अतीन्द्रियं प्रति विषयं बोधयितुम् अध्यारोप- अपवादविधिः आश्रीयते ।

5. **कथाविधिः**- पुराणादिविषयेषु विषयप्रतिपादनसमये सम्बन्धिनः अनेके कथाप्रसङ्गाः समुत्पद्यन्ते।

6. **आदर्शवाचनविधिः**- पुराण-वेदमन्त्र-काव्य-संस्कृतश्लोकादीनां पाठने प्राचुर्येण आदर्शवाचनविधिः प्रयुज्यते ।

7. **समस्या-समाधानविधिः**- शास्त्रीयविषयाणां पाठनसमये विषयवस्तुनि शङ्काः समस्याः वा जायन्ते। तेषां निराकरणाय समस्या-समाधानविधिः अत्यन्तमहत्त्वपूर्णो वर्तते। आदौ संशयः ततः समाधानं पुनः संशयः ततः समाधानम् इत्येवं क्रमेण सिद्धान्तस्य स्थापनं क्रियते। विश्वविद्यालयस्य पाठ्यक्रमेषु अत्यन्तोपयोगिनं समस्यासमाधानविधिम् आश्रयन्ते अध्यापकाः ।

8. **प्रश्नविधिः**- शास्त्रचर्चानां शास्त्रपरीक्षाणाञ्च विश्वविद्यालये अध्यापकैः प्रयोगः क्रियते। प्राचीनः परीक्षाविधिः प्रश्नविधिः वापि उपयुज्यते।

9. **टीकाभाष्यपद्धतिः**- विभिन्नपाठ्यक्रमेषु विद्यमानानां शास्त्रीयग्रन्थानां अध्यनाय टीकाभाष्यपद्धतिः अत्यन्तम् उपादेया ।

10- **अभिनयविधिः**- साहित्यादिविषयेषु नाट्यग्रन्थानामध्यापने अभिनयविधिः अधिकः प्रभावपूर्णो भवति।

अथ च प्रवचनविधिः कण्ठस्थीकरणम् इत्यादयः विधयः यथोपयोगितया आश्रीयते । एतैः विधिभिः अध्यापितान् विषयान् छात्राः अत्यन्तरुचिपूर्वकं पठित्वा अनुसन्धानदृष्टिं वर्धयन्ति। अनेन छात्राः नूतनगवेषणाय प्रेरिताः भवन्ति। भारतीयपरम्परागतशास्त्राणां मिथः सम्बन्धो वर्तते। अतः अनुसन्धातारः अन्तः सम्बद्धेषु विषयेषु शोधकार्यार्थं निर्दिश्यन्ते।

राष्ट्रियशिक्षानीतिः भारतीयज्ञानपरम्पराम् अध्ययनाय प्रोत्साहयति। एतदर्थं विश्वविद्यालये विभिन्नेषु अन्तःशास्त्रीयविषयेषु कार्यशालाः सङ्गोष्ठ्यादयश्च आयोज्यन्ते। अस्मिन्नेव क्रमे वास्तुशास्त्रविभागः योजना एवं वास्तुकला विद्यालयेन साकं मिलित्वा वास्तुकला-वास्तुशास्त्रयोरुपरि कार्यशालाद्वयम् आयोजितवान्। परिसरस्य विभिन्नसङ्गोष्ठीषु विषयगतच्छात्रैः सह विषयेतरच्छात्रा अपि भागं गृह्णन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

**2.4 Teacher Profile and Quality**

***2.4.1 Average percentage of full time teachers against sanctioned posts during the last five years***

***अनुमोदितानि पदानि लक्ष्यीकृत्य गतेषु पञ्चसु वर्षेषु नियुक्तानाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 76.26

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |

| | |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.2 Average percentage of full time teachers with Ph.D. during the last five years***

***गतेषु पञ्चसु वर्षेषु, विद्यावारिधिः (पीएच.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 95.28

2.4.2.1 Number of full time teachers with Ph.D. year-wise during the last five years

विगतपञ्चवर्षेषु, विद्यावारिधिः (पीएच्.डी) इत्युपाधिमतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 104 | 97 | 99 | 101 | 104 |

| File Description | Document |
|---|---|
| List of number of full time teachers with PhD and number of full time teachers for 5 years (Data Template) गतेषु पञ्चसु वर्षेषु विद्यावारिधिमतां पूर्णकालिकाध्यापकानां तथा पूर्णकालिकाध्यापकानाञ्च सूची | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.3 Average teaching experience of full time teachers in number of years***

***पूर्णकालिकाध्यापकानाम् अध्यापनानुभवस्य वर्षप्रमाणेन मध्यमानम्***

**Answer:** 17.87

2.4.3.1 Total experience of full-time teachers

पूर्णकालिकाध्यापकानां सम्पूर्णः अध्यापनानुभवः

Answer: 1948

| File Description | Document |
|---|---|
| List of Teachers including their PAN, designation, dept and experience details (Data Template) आयकरसङ्ख्या-पदवी-विभाग-अनुभवानां विवरणसहिता अध्यापकसूची | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.4 Average percentage of full time teachers who received awards, recognition, fellowships at State, National, International level from Government recognised bodies during the last five years***

***विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 5.06

2.4.4.1 Number of full time teachers receiving awards from state/ national/ international level from Government recognised bodies year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्रस्तरेषु, सर्वकार-सर्वकाराभिज्ञातनिकायैः पुरस्कारं प्राप्तवतां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 10 | 4 | 4 | 4 | 5 |

| File Description | Document |
|---|---|
| Institutional data: as per Data Template सांस्थानिकदत्तांशः देयः (दत्तांशप्रारूपम्) | View Document |
| e-copies of award letters (scanned or soft copy) पुरस्कारसम्बद्धानां पत्राणां वैद्युतप्रतिलिपयः | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.5 Average percentage of full time teachers from other States against sanctioned posts during the last five years***

***विगतपञ्चवर्षेषु अनुमोदितेषु पदेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 71.65

2.4.5.1 Number of full time teachers from other states year-wise during the last five years -

विगतपञ्चवर्षेषु अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां वार्षिकसङ्ख्या -

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 102 | 96 | 97 | 100 | 103 |

| File Description | Document |
|---|---|
| List of full time teachers from other state and state from which qualifying degree was obtained (Data Template) अन्यराज्येभ्यः नियुक्तानां पूर्णकालिकाध्यापकानां सूची। राज्यस्य नामसहिता यतः तैः प्रमाणपत्रं प्राप्तम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.4.6 University has devised a mechanism to enable the young faculty to learn shastras under learned Gurus. Specify the names of Gurus from whom the teachers/ faculty members have studied Shastras/ Veda Shakhas.***

***विश्वविद्यालयः युवाध्यापकान् वरिष्ठविदुषां सन्निधौ शास्त्राध्ययनाय प्रोत्साहयति। गुरूणां नामानि सूचयन्तु येभ्यः अध्यापकाः शास्त्राणां वेदशाखानां वा पारम्परिकम् अध्ययनमकुर्वन्।***

**Answer:**

परम्परागतभारतीयशास्त्राणाम् अध्ययनम् अध्यापनम् अनुसन्धानञ्च सम्यग्रूपेण भवेदपि च समाजेन सह एतेषु संस्थितस्य ज्ञानस्य प्रचाराय प्रसाराय च शास्त्रज्ञानस्य गाम्भीर्यम् आवश्यकं वर्तते। युवानः प्राध्यापकाः वरिष्ठानां गुरुकल्पानां विदुषां प्राध्यापकानां सन्निधौ अपि गत्वा शास्त्रचर्चां कुर्वन्ति, शास्त्राध्ययनञ्च अनुवर्तयन्ति। तेषां केषाञ्चन नामानि इत्थं वर्तन्ते -

डॉ. दयालसिंहः, डॉ. नरेशकुमारबैरवा, डा.धर्मपालप्रजापतश्च आचार्याणां जयकान्तसिंहशर्मवर्याणां रामसलाहीद्विवेदिवर्याणां प्रो. सुजातात्रिपाठीवर्याणाञ्च सन्निधौ व्याकरणविषयकशास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

प्रो. हनुमानप्रसादमिश्रः आचार्यश्रीगोपालशर्मवर्येभ्यः वेदशास्त्रमधीत्य सम्प्रत्यपि शास्त्रचर्चां करोति।

डा. ओंकार सेलूकरः, प्रो. हनुमानप्रसादमिश्रः, प्रो. देवेन्द्रमिश्रः. प्रो. सुन्दरनारायणझा, प्रो. रामानुजउपाध्यायः च घनपाठिनाम्, प्रो. हरिहरत्रिवेदिवर्याणां, प्रो. लक्ष्मीश्वरझावर्याणां च सन्निधौ वेदशास्त्रं पठितवन्तः। अपि च आचार्यश्रीगोपालशर्मवर्यैः सह शास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

प्रो. एस. सुदर्शन प्रो. के. सतीशश्च प्रो. के. अनन्तवर्याणां सन्निधौ वेदान्तविषयस्य शास्त्रचर्चां शास्त्राध्ययनं च कुरुतः।

डॉ विजय गुप्ता, प्रो. जवाहरलालः, प्रो. प्रभाकरप्रसादश्च आचार्याणां प्रो. संगीता खन्नामहोदयानां सन्निधौ सर्वदर्शनविषये शास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

प्रो. कुलदीपकुमारः, प्रो.वीरसागरजैनवर्याणां सन्निधौ जैनदर्शनम् अधीत्य शास्त्रचर्चां करोति। प्रो. अनेकान्तकुमारजैनश्च प्रो.वीरसागरजैनवर्याणां सन्निधौ जैनदर्शनविषये शास्त्रचर्चां शास्त्राध्ययनं च करोति।

डा. राजेशगुर्जरः आचार्याणाम् ए. एस. आरावमुदनवर्याणां सन्निधौ मीमांसाशास्त्रम् अधीते।

प्रो. अशोकथपलियालः, डा. प्रवेशव्यासः, डा.योगेन्द्रशर्मा, डा. दीपकवशिष्ठश्च आचार्याणां देवीप्रसादत्रिपाठिवर्यैभ्यः सन्निधौ वास्तुशास्त्रं ज्यौतिषञ्च अधीत्य शास्त्रचर्चां कुर्वन्ति।

डा. देशबन्धु, डा. प्रवेशव्यासः, डा.योगेन्द्रशर्मा, डा. दीपकवशिष्ठः, डा. नवीनपाण्डेयश्च आचार्याणाम् अशोकथपलियालमहोदयानाम् आचार्याणां देवीप्रसादत्रिपाठिवर्याणां च सन्निधौ वास्तुशास्त्रं ज्यौतिषञ्चेति विषययोः शास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

आचार्यसुमनकुमारझावर्याः, आचार्यधर्मानन्दराउतवर्याः, आचार्यभागीरथिनन्दवर्याः, आचार्याणां रमेशकुमारपाण्डेयवर्याणां सन्निधौ साहित्यविषये शास्त्रचर्चां शास्त्राध्ययनं च कृतवन्तः।

डा. अनमोल, डा. सौरभ, डा. कामाक्षम्मा, डॉ अरविन्दकुमारश्च आचार्याणां रमेशकुमारपाण्डेयवर्याणाम् आचार्याणां भागीरथिनन्दवर्याणाम् आचार्याणां सुखदेवभोईवर्याणां सन्निधौ साहित्यविषये विषययोः शास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

आचार्यशिवशङ्करमिश्रवर्याः,आचार्याणां रमेशकुमारपाण्डेयवर्याणां सन्निधौ शोधप्रविधिविषये हिन्दूअध्ययनविषये च शास्त्रचर्चां शास्त्राध्ययनं च कृतवन्तः।

डा. सुदेशः डा. मीनाक्षी आचार्ययशवीरमहोदयानाम् आचार्यसुधांशुभूषणपण्डामहोदयानां च सन्निधौ धर्मशास्त्रम् अधीयाते।

डा. मीनाक्षी, डा. सुदेश, डा. हिमांशुत्रिपाठी चेत्येते आचार्ययशवीरमहोदयानाम् आचार्यसुधांशुपण्डामहोदयानां च सन्निधौ धर्मशास्त्रे शास्त्रचर्चां शास्त्राध्ययनं च कुर्वन्ति।

प्रो. कल्पनाजैनः आचार्याणां सुदीपकुमारजैनवर्याणां सन्निधौ प्राकृतभाषाविषये शास्त्रचर्चां शास्त्राध्ययनं च करोति।

प्रो. शीतलाप्रसादशुक्लः प्रो. इच्छारामद्विवेदिवर्याणां सकाशे पुराणेतिहाससम्बद्धशास्त्रचर्चां शास्त्राध्ययनं च कृतवान्।

प्रो. बिहारीलालशर्मा, प्रो. प्रेमकुमारशर्मा, प्रो. दिवाकरदत्तशर्मा, प्रो. विनोदशर्मा, प्रो. नीलमठगेला, प्रो. परमानन्दभारद्वाज, प्रो. अशोकथपलियाल चेत्यादयः आचार्याः गुरुवर्याणां प्रो. शुकदेवचतुर्वेदीमहोदयानां, प्रो. ओंकारनाथचतुर्वेदीमहोदयानां च सन्निधौ ज्योतिषशास्त्रम् अधीतवन्तः।

प्रो. बिहारीलालशर्मा, प्रो. प्रेमकुमारशर्मा, प्रो. दिवाकरदत्तशर्मा, प्रो. विनोदशर्मा, प्रो. नीलमठगेला, प्रो. परमानन्दभारद्वाज इत्यादयः आचार्याः प्रो. फणीन्द्रचौधरी, प्रो.रश्मिचतुर्वेदी, प्रो. सुशीलशर्मा, डा. देशबन्धु, डा. प्रवेशव्यासः, डा. योगेन्द्रशर्मा चेत्यादीन् अध्यापकान् ज्योतिषशास्त्रम् अध्यापयन्।

डॉ अनीता, डॉ कैलाश चन्द मीणा, डॉ सुनील कुमार शर्मा, डॉ इक्कुर्ति वेंकटेश्वर्लुः, डॉ दिनेश कुमार यादवः, डॉ प्रदीप कुमारः, झा, डॉ जीतेन्द्रकुमारः, डॉ विचारीलालमीना, डॉ आरती शर्मा, डॉ परमेशकुमारशर्मा, डॉ ममता, डॉ शिवदत्त आर्यः, डॉ अजयकुमारः, डॉ पिंकी मलिकः, डॉ तमन्ना कौशलः, डॉ प्रेमसिंहसिकरवारः, डॉ सुरेन्द्र महतो, डॉ सविता रायः, डॉ मनोज कुमार मीना च इत्येते प्राध्यापकाः प्रो. सदनसिंह-प्रो. एम्. जयकृष्णन्- प्रो. अमिता पाण्डेयभारद्वाज- प्रो. मीनाक्षी मिश्रा- प्रो. विमलेशशर्मा- प्रो. रचनावर्मामोहन-प्रो. के. भारतभूषण - प्रो. रमेशप्रसादपाठकानाम् आचार्याणां सन्निधौ शिक्षाशास्त्रसम्बद्धानां विविधविषयाणाम् अध्ययनं तद्विषयकं चर्चां च कुर्वन्ति।

ऋग्वेदभाष्यभूमिकास्वाध्यायकार्यशाला, लीलावत्याः गोलपरिभाषा क्षेत्रव्यवहारश्चेति कार्यशाला, याज्ञवल्क्यस्मृतेः व्यवहाराध्यायस्य समिताक्षरग्रान्थिकमध्ययनम्, नव्यन्यायभाषाप्रदीपग्रन्थस्य स्वाध्यायकार्यशाला, सर्वदर्शनसंग्रहग्रन्थस्य स्वाध्यायकार्यशाला, वैयाकरणसिद्धान्तमञ्जूषायाः बौद्धार्थप्रकरणस्य विशिष्टमध्ययनमित्यादिषु स्वाध्यायकार्यशालासु समागतानां विषयविशेषज्ञानाम् आचार्याणां प्रो. वशिष्ठत्रिपाठी- प्रो.जी.एस.आर.कृष्णमूर्ति, प्रो. नरोत्तम सेनापति-प्रो. वैद्यनाथझा- प्रो. रामकिशोरत्रिपाठी -प्रो.रमाकान्तपाण्डेय-प्रो.वाचस्पतित्रिपाठी-प्रो.वेदप्रकाशउपाध्याय-प्रो. हंसधरझा- प्रो. सुब्रह्मण्यम- प्रो. वासुदेव शर्मा- प्रो. मधुसूदन पेन्ना- प्रो. रहसविहारी द्विवेदी- प्रो. धर्मदत्त चतुर्वेदी- प्रो. अभिराजराजेन्द्रमिश्र- प्रो. राधावल्लभत्रिपाठी- प्रो. सुदर्शनशर्मा- प्रो. के.ई.देवनाथन्- प्रो.धरणीधरन्- प्रो. कृष्णकान्तशर्मा- प्रो.हरिप्रसाद अधिकारी- प्रो.रामपूजनपाण्डेय- प्रो.ओमनाथ विमली- प्रो. रामनाथझा- प्रो. राजारामशुक्ल- डॉ मणिद्रविडशास्त्री- डॉ. विश्वनाथधितालप्रभृतीनां विदुषां सन्निधौ छात्रैः सह प्राध्यापकाः तत्तत्कार्यशालादिषु शास्त्राध्ययनं चर्चां च कृत्वा लाभान्विताः जाताः।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.4.7 Qualified faculty are available for new programmes/ emerging areas of study (computational linguistics, Computational Sanskrit, Translation Studies, Comparative Philosophy, Comparative Aesthetics, Yogic Science, Yoga Darshan, Samskrit Journalism, Sanskrit manuscriptology, Management, Jurisprudence, Cultural tourism, Temple Culture and Administration, Vastushastra, Medicinal Astrology etc.)***

***नूतनपाठ्यक्रमाणाम् उदयमान-क्षेत्राणां (सङ्गणकीय-भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तुलनात्मकदर्शनं, तुलनात्मकं सौन्दर्यशास्त्रं, योगविज्ञानम्, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रम्, प्रबन्धनशास्त्रं, विधिशास्त्रं, सांस्कृतिकयात्रिकं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम् इत्यादीनाम्) अध्यापनाय योग्यतावन्तः अध्यापकाः उपलभ्यन्ते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये शोधपत्राणि, परियोजनाः, परामर्शः, प्रशिक्षणानुभवः, धर्मशास्त्रं, सांस्कृतिकपर्यटनं, सङ्गणकीय- भाषाशास्त्रं, सङ्गणकीय-संस्कृतम्, अनुवादाध्ययनं, तौलनिकं दर्शनं, तौलनिकं सौन्दर्यशास्त्रं, योगविज्ञानं, योगदर्शनं, संस्कृतपत्रकारिता, संस्कृतमातृकाशास्त्रं, प्रबन्धनशास्त्रं, विधिशास्त्रं, देवालयसंस्कृतिः प्रशासनं च, भैषज्यज्योतिषं, वास्तुशास्त्रम्, भारतीयरङ्गमञ्चः ग्रीक्-नाटकपरम्परा, अवधानकला, आयुर्वेदसाहित्यम् आहारविज्ञानं च, वास्तुकला चेत्यादीनां नूतनपाठ्यक्रमाणाम् अध्यापनाय प्राज्ञाः अध्यापकाः सन्ति। अध्यापकाः साहित्यम्, शब्दशास्त्रम्, दर्शनशास्त्रम्, योगशास्त्रम्, संस्कृतपत्रकारिता, ज्योतिषम्, वास्तुशास्त्रम्, पौरोहित्यं देवालयसंस्कृतिश्च इत्यादीनां विषयाणां बोधने संलग्नाः सन्ति । आङ्ग्लम्, हिन्दी, समाजशास्त्रम्, राजनीतिशास्त्रम्, पर्यावरणम्, मानवाधिकारः, हिन्दू-अध्ययनञ्च इत्यादीन् विषयान् ते बोधयन्तः वर्तन्ते।

प्रतिशैक्षिकसत्रं संपर्ककक्ष्याः यथाकालं प्रवर्तन्ते। तस्मिन् समये त्रिवारं चतुर्वारं वा एताः कक्ष्याः सञ्चाल्यन्ते। विषयविशेषज्ञाः अध्यापकाः कक्ष्यासु व्याकरण-योगदर्शनादिविषयान् साररूपेण अध्यापयन्ति । पाठ्यक्रमे प्रविष्टाः अध्येतारः यथाविधि कक्ष्यायां भागं गृह्णन्ति। अध्यापितान् विषयान् अधिगत्य सन्तुष्टा भवन्ति । विशिष्टयोग्यतावताम् अध्यापकानां मार्गदर्शनेन अध्येतारः शास्त्रनिपुणाः भवन्ति। अध्यापकाः सूक्ष्मेक्षिकया अध्ययनसामग्रीं सज्जीकुर्वन्ति।

अन्याः याः शैक्षिकसंस्थाः उपरिनिर्दिष्टेषु विषयेषु नवीनपाठ्यक्रमान् चालयन्त्यः सन्ति, ताभिः सह उत्कर्षे स्पर्धमानः सन् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः साधु योगं भजति । शुभोदर्कं विचिन्त्य विभिन्नान् संयुक्तपाठ्यक्रमान् निर्मातुं योजना वर्तते। संयुक्ते पाठ्यक्रमे आधुनिकविषयाणाम् अध्यापनाय अपेक्षितां व्यवस्थां कर्तुं विश्वविद्यालयः कार्ययोजनां विदधाति। सङ्गणकीयभाषाशास्त्रस्य, सङ्गणकीयसंस्कृतस्य च बोधनकौशलानाम् अवाप्तये अयम् अवसरः वर्तते। पाठ्यक्रमः एषः विश्वविद्यालये कार्यरतान् सङ्गणकीय- अध्यापकान् प्रोत्साहयति ।

सङ्गणकीयकार्यक्रमनिर्माणे संस्कृतभाषायाः आनुरूप्येण योगः इतराभ्यः भाषाभ्यः अतिशयितफलदः इति जगति विदितं वर्तते। विश्वे बहवः इमां वस्तुस्थितिं जानीनाः विश्वविद्यालयाः संस्कृतपाठ्यक्रमाणां सञ्चालने उत्सहमाना वर्तन्ते ।

सङ्गणकीयभाषाशास्त्रम् बह्वपेक्षितं सद् अद्य उदयमानेषु शिक्षाक्षेत्रेषु इतरेभ्यः विशिष्यते। अस्मिन् सङ्गणकीयभाषाशास्त्रे ज्ञानप्रदतन्त्रज्ञानम्, संस्कृतव्याकरणशास्त्रम्, आधुनिकभाषाशास्त्रम् इति त्रयः विभागाः भवन्ति । पाणिनीय- अष्टाध्यायी एव अस्य बहुविषयकपाठ्यक्रमस्य मूलाधारो भवति । न्यायः, मीमांसा, व्याकरणम्, साहित्यम् इत्यादिषु शास्त्रेषु भाषाशास्त्रीयाः नैके पक्षाः विचारिताः सन्ति । वर्णस्य, पदस्य, पदावयवस्य, वाक्यस्य, वाक्यसमुदायस्य, अर्थस्य, सम्बन्धस्य इत्येवं रूपेण ते सन्ति। आधुनिकभाषाशास्त्रस्य अन्वितया प्रवर्तमानम् एतेषां विशिष्टम् अध्ययनम् बहून् अवसरान् सृजति। प्राकृतिकभाषाप्रक्रियायाः योजनेन संस्कृतभाषायां तान्त्रिक क्षेत्रस्य विस्तारः भवति । तुलनात्मकतत्त्वशास्त्रं विशिष्टं विभक्ताध्ययनं कर्तुम् अवसरं ददाति । भारतीयदर्शनशास्त्रेण सह तौलनिकाध्ययनेन पाश्चात्त्यदर्शनशास्त्रस्य अन्तर्दृष्टिः गोचरीभवति। तुलनात्मकशास्त्रीयम् अध्ययनमपि विशिष्टप्रयोजनकं वर्तते । एषः पाठ्यक्रमः भरतमुनेः नाट्यशास्त्रस्य अरिष्टाटलस्य काव्यशास्त्रस्य च तुलनात्मक-अध्ययनाय भूयांसम् अवसरं कल्पयति । अरिष्टाटलेन उक्तं क्याथर्सिस्, भरतमुनिना उक्तः रसानन्दश्च समानौ इति विज्ञाय छात्राः काव्यतत्त्वस्य वैश्विकी दृष्टिं लभेरन् । सम्प्रति योगः संयुक्तराष्ट्रसङ्घेन अपि अङ्गीकृतो वर्तते । समग्रं विश्वं योगशास्त्रं भारतञ्च सकौतुकं वीक्षते । योगेन आधेः व्याधेश्च शमनं भवतीति विषयं विज्ञाय वैदेशिकाः शास्त्रमिदं प्रति सबहुमानम् आद्रियन्ते ।

संस्कृतपत्रकारिता नूतनः पाठ्यक्रमः विश्वविद्यालये वर्तते । अत्र अनेकाः सम्भावनाः वर्तन्ते । प्रतिगृहं प्रायेण दूरदर्शनं वर्तते। जनेषु षष्ट्यां प्रतिशतं मोबाईल वर्तते । अधिकांशा जनाः जगतः वृत्तान्तं ज्ञातुम् इच्छन्ति । अतः संस्कृतपत्रकारितायाः दृश्यमाध्यमेषु भूयान् उद्योगावसरः सम्भाव्यते ।

संस्कृते प्रबन्धनशास्त्रस्य अद्य अपेक्षा वर्तते । वैदेशिकाः प्राचीनभारतीयप्रबन्धनशास्त्रद्वारा नैतिकमूल्येन सह प्रबन्धनपद्धतिं ज्ञातुं समुत्सुकाः भवेयुः । सांस्कृतिकयात्रिकस्य उपक्रमः संस्कृतेः सूक्ष्मं ज्ञानं सम्पादयितुम् विशिष्टम् अवसरं कल्पयिष्यति । अनुवादादध्ययनेन उद्योगावसराः नैके सम्भाव्यन्ते । एवम् अन्यभाषासाहित्यस्य संस्कृते अनुवादेन च सन्ति प्रयोजनानि । भारतीयवास्तुशास्त्रस्य अपेक्षानुगुणं प्रसारो न वर्तते । वास्तुशास्त्रपाठ्यक्रमस्य उपक्रमेण सः भवेत्। एवमेव देवालयसंस्कृतिः भारतस्य भूमिकां निर्वहति । देवालयसंस्कृतिद्वारा भारतीयसंस्कृतेः विभिन्नस्रोतसां सूक्ष्मतत्त्वानि अधिगन्तुं शक्यन्ते । तत्र प्राशासनिकनैपुण्याः विमर्शः प्रासङ्गिकतां भजते ।

पाठ्यक्रमसम्बद्धतया शोधपत्राणि, परियोजनाः, परामर्शः च सम्प्रति अपेक्षाम् अञ्चन्ति। संस्कृतमातृकाशास्त्रस्य भूयान् अवसरः वर्तते। तेन मातृकाणां सम्पादनादिकार्यं सुष्ठु निर्वर्तयितुं शक्यते ।

वास्तुशास्त्रम्, भैषज्यज्योतिषम् इत्यादिविषयकाः नवीनाः पाठ्यक्रमाः भारतीयज्ञानपरम्परायाः गाम्भीर्यं प्रकटयन्ति। विश्वविद्यालये वास्तुशास्त्रविभागो वर्तते ,येन शास्त्री-आचार्य-विद्यावारिधिपाठ्यक्रमाः परिचाल्यन्ते। अपि च वास्तुशास्त्रस्यानुरागिणां जिज्ञासूनां च सामाजिकानां कृते डिप्लोमास्तरे पी.जी.डिप्लोमापाठ्यक्रमः. षाण्मासिकप्रमाणपत्रीयः एकवर्षीयडिप्लोमापाठ्यक्रमःएडवांशडिप्लोमापाठ्यक्रमश्च आयोज्यन्ते। एवमेव ज्योतिषविभागेन भैषज्यज्योतिषविषये डिप्लोमापाठ्यक्रमः सञ्चाल्यते। एवं प्रकारेण संस्कृते निहितानां विषयाणां सामाजिकानां कृते प्रसारः प्रचारः क्रियते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

***2.4.8 Specify the names of Shastra-Chudamani/ Emeritus/ Adjunct Faculty/ Fellows/ Visiting Professors/ Post Doctoral Fellows on the rolls of the University.***

***विश्वविद्यालयेन सह सम्बद्धानां शास्त्रचूडामणिविदुषां, राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणां, संयोजिताचार्याणां, प्रतिष्ठिताचार्याणां, विद्यावारिध्युत्तरशोधरतानां विदुषां च नामानि सूचयन्तु।***

**Answer:**

विश्वविद्यालयः राष्ट्रस्तरीयाचार्याणाम्, अतिथ्याचार्याणाम्, प्रतिष्ठिताचार्याणाम्, विद्यावारिध्युत्तरशोधरतानां विदुषां च सम्बन्धं स्थापयति। गतेषु पञ्चसु वर्षेषु अस्माकं विश्वविद्यालयेन सम्बद्धानां केषाञ्चन विदुषां नामानि अत्र प्रस्तूयन्ते –

**सेवानिवृत्ताचार्याः (Emeritus Professors)-**

- **काशीहिन्दूविश्वविद्यालयवाराणसीतः-** प्रो. रामचन्द्रपाण्डेयः, प्रो. चन्द्रमापाण्डेयः, प्रो. कमलेश कुमार जैन, प्रो. चन्द्रमौलि उपाध्यायः, प्रो. सुधांशुशेखरशास्त्री, प्रो. कृष्णकान्तशर्मा, डॉ. विश्वनाथधिताल
- **केन्द्रीयसंस्कृतविश्वविद्यालयतः -** प्रो. राधावल्लभत्रिपाठी, प्रो. वासुदेवशर्मा, प्रो. हरेकृष्णमहापात्रः, प्रो. के. पी. केशवन, प्रो. वैद्यनाथझा, प्रो. श्रियांशसिंघई
- **सम्पूर्णानन्दसंस्कृतविश्वविद्यालयवाराणसीतः -** प्रो. अभिराजराजेन्द्रमिश्रः, प्रो. सदानन्दशुक्लः, प्रो. नागेन्द्रपाण्डेयः, प्रो. फूलचन्द्रजैन, प्रो. उमाशंकरशुक्लः
- **राष्ट्रियसंस्कृतविश्वविद्यालयतिरुपतितः-** प्रो. एम्.एल्.नरसिंहमूर्तिः, प्रो. श्रीपादभट्टः
- **श्रीला.ब.शा.रा.सं.विद्यापीठनवदेहलीतः -** प्रो. ओंकारनाथचतुर्वेदी, प्रो. रमेशकुमार पाण्डेयः, प्रो. अमिताशर्मा, प्रो. शुद्धानन्दपाठक, प्रो. महेशप्रसादसिलोडी, प्रो. चन्द्रकान्तदवे, प्रो. केदारनाथपरोहा, प्रो. कमलाभारद्वाजः
- **दिल्लीविश्वविद्यालयतः -** प्रो. देवेन्द्रमिश्रः
- **कामेश्वरसिंहदरभंगासंस्कृतविश्वविद्यालयतः-** प्रो. रामचन्द्रझाः, प्रो. देवनारायणझा,
- **श्रीसोमनाथसंस्कृतविश्वविद्यालयतः -** प्रो. अर्कनाथचौधरी
- **पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयतः -** प्रो. व्रजकिशोरस्वाईं, प्रो. माधवचन्द्रपण्डा
- **दरभंगास्थित के. एस.डि. संस्कृतविश्वविद्यालयतः -** प्रो.वाचस्पतिशर्मात्रिपाठी
- **अहिंसा-अनुसंधानकेन्द्रवैशालीतः -** डा. ऋषभचन्द्रजैन
- **पुणस्थसावित्रीविश्वविद्यापीठतः-** प्रो. रवीन्द्रमुले
- **कुरुक्षेत्रविश्वविद्यालयतः -** प्रो.वेदप्रकाशउपाध्यायः
- **जबलपुरस्थरानीदुर्गावतीविश्वविद्यालयतः-** प्रो. रहसविहारीद्विवेदी

**विश्वविद्यालये समागताः कुलपतयः/राष्ट्रस्तरीया आचार्याः** –

- **केन्द्रीयसंस्कृतविश्वविद्यालयतः-** प्रो. श्रीनिवासवरखेडी, प्रो. विजयकुमारजैन, प्रो. रामकुमारशर्मा, प्रो.वाई.एस्.रमेशः, प्रो.ललितकुमारत्रिपाठी, प्रो. सुब्राय वि. भट्टः, प्रो. रमाकान्तपाण्डेयः, प्रो. मदनमोहनपाठकः, प्रो. भारतभूषणमिश्रः, प्रो. हंसधरझाः, प्रो. पी. बी.वी.सुब्रह्मण्यम, प्रो. श्यामदेवमिश्रः,
- **योजना तथा वास्तुकला विद्यालय, (मानवसंसाधनविकास- मन्त्रालयः, भारतसर्वकारः), 6 ब्लाक- बी-इन्द्रप्रस्थ स्टेट, नवदेहलीतः -** प्रो. पी.एस.एन. रावः, प्रो.अनिलदीवानः, डॉ. गौरवशौरी,
- **हरिद्वारस्थ-उत्तराखण्डसंस्कृतविश्वविद्यालयतः-** प्रो. देवीप्रसादत्रिपाठी, डॉ. रतनलालशर्मा
- **नवदेहलीस्थराष्ट्रीयसङ्ग्रहालयतः -** प्रो. अनूपापाण्डेयः,
- **सोमनाथसंस्कृतविश्वविद्यालयतः -** प्रो. एस. के. सेनापतिः
- **कर्णाटकसंस्कृतविश्वविद्यालयतः -** प्रो. के.ई.देवनाथन्
- **तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयतः -** प्रो जी. एस. आर. कृष्णमूर्तिः कुलपतिः, प्रो. मुरलीधरशर्मा पूर्वकुलपतिः, प्रो. उन्नीकृष्णन् नम्बूथिरी, प्रो. सुदर्शनशर्मा, डा. राधागोविन्दत्रिपाठी, डॉ. कृष्णकुमारभार्गवः,

- **बेङ्गलूरुस्थयोगविश्वविद्यालयतः** - प्रो. रामचन्द्रभट्टः
- **जमशेदपुरस्थनेताजीसुभाषचन्द्रविश्वविद्यालयतः** - प्रो. गंगाधरपण्डा
- **असमस्थकुमारभास्करवर्मासंस्कृतविश्वविद्यालयतः** - प्रो. प्रह्लादजोशी
- **सम्पूर्णानन्दसंस्कृतविश्वविद्यालयतः**- प्रो. राजारामशुक्लः पूर्वकुलपतिः, प्रो. दिव्यचैतन्यब्रह्मचारी, प्रो. रामकिशोरत्रिपाठी, प्रो.हरिप्रसाद अधिकारी, प्रो.रामपूजन पाण्डेयः, प्रो. अमितकुमार शुक्लः, प्रो. शशिरानी मिश्रः
- **अलीगढ़मुस्लिमविश्वविद्यालयतः**- प्रो. सत्यप्रकाशशर्मा
- **दिल्लीविश्वविद्यालयतः** - प्रो. बलरामशुक्लः, प्रो.ओमनाथविमली, डॉ. उमाशंकरः
- **पुरीस्थश्रीजगन्नाथसंस्कृतविश्वविद्यालयतः** - प्रो.किशोरचन्द्रपाढी,
- **इन्दिरागान्धीराष्ट्रियमुक्तविश्वविद्यालयतः** - प्रो.वि.पाण्डुरङ्गनरसिंहरावः
- **मङ्गलूरुविश्वविद्यालयतः** - प्रो.के. कृष्णभट्टः
- **उडुपीस्थ- एस्.एम्.एस्.पि.संस्कृतमहाविद्यालयतः**- प्रो.लक्ष्मीनारायणभट्टः
- **काशीहिन्दूविश्वविद्यालयतः** - प्रो. रमाकान्तपाण्डेयः, प्रो. विनयकुमारपाण्डेयः, प्रो. शत्रुघ्नत्रिपाठी, प्रो. गिरिजाशंकरशास्त्री, डॉ.सुभाषपाण्डेयः
- **भोपालस्थमाखनलालचतुर्वेदीपत्रकारिताविश्वविद्यालयतः** - प्रो. के. जे. सुरेशः,
- **वीरभूमस्थविश्वभारतीविश्वविद्यालयतः** - प्रो. नरोत्तमसेनापतिः
- **नागपुरस्थक.कु.गु.कालिदाससंस्कृतविश्वविद्यालयतः** - प्रो. मधुसूदनपेन्ना, प्रो. कृष्णकुमारपाण्डेयः, डॉ. दिनकरमराठे, डॉ. प्रसादगोखले
- **सारनाथस्थकाशीविद्यापीठतः** - प्रो. धर्मदत्तचतुर्वेदी
- **पाण्डिचेरीविश्वविद्यालयतः** - प्रो.धरणीधरन्
- **देहलीस्थजवाहरलालनेहरूविश्वविद्यालयतः**- प्रो. रामनाथझा
- **गुरुग्रामस्थसुशान्तविश्वविद्यालयतः** – प्रो. विभूतिसचदेवः
- **कर्नाटकविश्वविद्यालयतः** - डा. वेणीमाधवजोशी
- **कर्नाटकस्थवेदसंस्कृत-अकादमीतः** - डा.गोपालकृष्णहेगडे
- **एर्नाकुलमस्थचिन्मयविश्वविद्यापीठतः (मानितविश्वविद्यालयतः)**- डॉ. रामकृष्णपेजत्ताय,
- **रुडकीस्थभारतीयप्रौद्योगिकीसंस्थानतः (आई आई टी रुडकी)** - डॉ. अवलोकिताअग्रवाल
- **उज्जयिनीस्थमहर्षिपाणिनिवैदिक एवं संस्कृतविश्वविद्यालयतः** - प्रो. सी जे मेनन , डॉ. शुभमशर्मा, डॉ उपेन्द्रभार्गव
- **दरभंगासंस्कृतविश्वविद्यालयस्य मुज्जफरपुरस्थधर्मसमाजसंस्कृतमहाविद्यालयतः**- डॉ निगमपाण्डेयः
- **जयपुरस्थजगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्वविद्यालयतः** - डॉ. विनोदकुमारशर्मा

**विश्वविद्यालये अतिथि-आचार्याः (**Adjunct/Guest Faculty**)** –

- **ज्योतिषविभागे** - डॉ. होमेशदत्तः, डॉ. बृजमोहनशर्मा, डॉ. खेमराजरेग्मी
- **मानविकीविभागे** - डॉ. हिमानीशर्मा, (आंग्लभाषा) डॉ.श्वेतायादवः (समाजशास्त्रम्), डॉ. आलोककुमारः(राजनीतिशास्त्रम्), डॉ. वीरेन्द्रः(हिन्दीभाषा), सुश्री प्रियंकामिश्रा (हिन्दीभाषा), डॉ. नीरजभारद्वाजः (हिन्दीभाषा)
- **आधुनिकज्ञानविभागे** - श्री पीयूषशर्मा (कम्प्यूटर साइंस)
- **वास्तुशास्त्रे** - डॉ. अव्यक्तरैणा
- **पौरोहित्यविभागे** - डॉ. रवीन्द्रकुमारपण्डा, डॉ. मधुसूदनशर्मा
- **पुराणेतिहासविभागः** - डॉ. सीमाशर्मा
- **सांख्ययोगविभागे** - डॉ. लेखराजसिंहः, डॉ. रोहितकुमार
- **योगविभागे**- डॉ. जयसिंह भडिया, श्रीमती प्रियंका पाण्डेयः, डॉ. बलवीरसिंहः, श्री विवेककुमारमिश्रः.
- **अद्वैतवेदान्तविभागे**- डॉ. योगेशकुमारत्रिपाठी, श्री मनोतोषसरकारः
- **मीमांसाविभागे**- डॉ. पीताम्बरपोडैलः
- **हिन्दू-अध्ययनविभागे**- डॉ. श्रद्धामिश्रा, डॉ. जीवनजोशी
- **व्याकरणविभागे** - श्री धर्मराजनिरौला

**विद्यावारिध्योत्तरशोधार्थिनः (Post Doctoral Fellow)-**

- **वास्तुशास्त्रविभागे** - डॉ. रीतिकाजैन, डॉ. रजनी

- **न्यायविभागे** - डॉ. दीप्तिसिंहः,
- **व्याकरणविभागे** - डॉ. वन्दनाशर्मा,

**परियोजनासहायकाः (Fellow/Research Associate/Assistant etc.)**

- **एस ए पी- डी.आर.एस-2,** 2019-21 - डॉ. गोपालकुमारझा,
- **आई सी एस एस आर परियोजना** 2023-24 - डॉ. मञ्जुलामौर्या, डॉ. जगदीशकुमारः, श्री प्रवीणकुमार

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |
| Link for additional Information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |

***2.4.9 Specify the systems adopted to recharge academically and rejuvenate teachers (e.g. learning with traditional Gurus, providing research grants, study leave, nomination to national/ international conferences/ seminars, in-service training, organizing national/ international conferences, vakyartha-Sadhas, Shastrtha-Sabha, Shastra-Pareeksha, Shastra-spardha/ Samskrita-Kavi-Samavaya (Sanskrit Poets' Meet) etc.)***

***अध्यापकान् शैक्षिकरूपेण पुनर्नवीकर्तुम् अभिगृहीताः व्यवस्थाः सूचयतु- यथा- पारम्परिकगुरूणां सविधे अध्ययनम्, अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम्/ सेवारतप्रशिक्षणं, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलनस्य आयोजनं, वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकवि-समवायः इत्यादयः।***

**Answer:**

अध्यापकानां शैक्षिकरूपेण पुनर्नवीकरणाय श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन अनेके कार्यक्रमाः आयोज्यन्ते । विश्वविद्यालयानुदानायोगेन तथा भारतसर्वकारेण निर्धारिताः अनुसन्धानानुदानप्रदानम्, अध्ययनावकाशप्रदानम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलने नामनिर्देशनम् / सेवारतप्रशिक्षणम्, राष्ट्रिय/ अन्ताराष्ट्रियसम्मेलनस्य आयोजनम्, इति नैकाः व्यवस्थाः कल्पयति। परिसरेषु अध्यापनरतानाम् अध्यापकानां वाक्यार्थसभाः, शास्त्रार्थसभाः, शास्त्रपरीक्षाः, शास्त्रस्पर्धाः, संस्कृतकविसमवायः इत्यादयः कार्यक्रमाश्च विश्वविद्यालयद्वारा आयोजिता भवन्ति ।

प्रतिवर्षं संस्कृतसप्ताहः विश्वविद्यालये समाचर्यते । श्रावणपूर्णिमायां संस्कृतदिवसम् उपलक्ष्य आचर्यमाणे अस्मिन् कार्यक्रमे शैक्षिकाः सङ्गोष्ठ्यः आयोज्यन्ते ।

प्रतिवर्षं जून् मासस्य २१ तमे दिनाङ्के 'अन्ताराष्ट्रिययोगदिवसः' आयोज्यते । अस्मिन् योगदर्शनस्य महत्त्वम् उपलक्ष्य विशिष्टं व्याख्यानम् आयोज्यते। योगासनानां प्रशिक्षणं दीयते । अध्यापकाः तत्र भागं गृह्णन्ति। तेन प्रतिदिनम् आसनानि कर्तुं प्रभवन्ति।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षकाधिगमकेन्द्रेण प्रतिवर्षं काले काले विद्यालयानां विश्वविद्यालयानां संस्कृतशिक्षकाणां कृते सेवारतप्रशिक्षणवर्गः आयोज्यते । अस्मिन् वर्गे भारते विद्यमानानां विद्यालयानां विश्वविद्यालयानाम् अध्यापकाः भागं गृह्णन्ति । तत्र भाषाप्रबोधनदृष्ट्या कार्यशाला च आयोजिता भवति ।

प्रतिवर्षं वाक्प्रतियोगिता, शलाका, स्फूर्तिस्पर्धा, कण्ठपाठस्पर्धा च आयोज्यते । विविधेषु शास्त्रीयेषु विषयेषु स्पर्धाः सञ्चाल्यन्ते। ताः स्पर्धाः स्थानीयस्तरे, राज्यस्तरे च भवन्ति । छात्राः इतरच्छात्रैः सह स्पर्धित्वा स्थानीयस्तरे राज्यस्तरे च चिताः सन्तः राष्ट्रस्तरे प्रवेशं लभन्ते । विविधस्तरेषु भागं गृह्णतां छात्राणां कृते विश्वविद्यालयीयाः अध्यापकाः मार्गदर्शनं

प्रयच्छन्ति । स्पर्धार्थं निर्धारितान् विषयान् छात्रान् पाठयन्ति । तदर्थं ते विशिष्टां कौशलञ्च सम्पादयन्ति । अत्र छात्राणां यशसि अध्यापकानां शास्त्रीयम् अध्यापनकौशलं बिम्बितं भवति।

विश्वविद्यालये प्रतिवर्षं अन्ताराष्ट्रियाः राष्ट्रस्तरीयाश्च सङ्गोष्ठ्यः, अन्तर्जालीयाः सङ्गोष्ठ्यः, सम्मेलनानि कार्यशालाः च आयोज्यन्ते। तदेतद् आयोजनम् अध्यापकानां शैक्षणिककौशलानां पुनर्नवीकरणे एका वेदिका भवति ।

विश्वविद्यालये अध्यापनरतानाम् अध्यापकानां कृते विश्वविद्यालयानुदान आयोगस्य नियमानुसारम् अपेक्षितेषु सेवानिरतप्रशिक्षणेषु भागं ग्रहीतुं अवसरः कल्प्यते । ते अध्यापकाः यू.जी.सी. - मानवसंसाधनविकासकेन्द्रेषु आयोज्यमाने पुनश्चर्यापाठ्यक्रमे (RC), अभिविन्यासपाठ्यक्रमे (Orientation Programme) शीतकालीने/ग्रीष्मकालीने विद्यालयपाठ्यक्रमे (Winter/Summer School Programme) संकायविकासकार्यक्रमे (FDP) संकाय अभिप्रेरणा कार्यक्रमे (FIP) च भागग्रहणाय प्रेष्यन्ते । अध्यापकाः एतत्पाठ्यक्रमेषु भागं गृहीत्वा नैकानि अध्यापनकौशलानि प्राप्नुवन्ति। अत्र सम्पद्यमानैः शास्त्रेषु विशिष्टानां प्रसिद्धविपश्चिदां व्याख्यानैः अध्यापकाः अधिकं प्रयोजनं लभन्ते। विश्वविद्यालये वास्तुशास्त्रविभागेन विभागीयच्छात्राणां कृते प्रतिवर्षं वास्तुशास्त्र-नवीकरण-कार्यक्रमस्य विशिष्टव्याख्यानमाला आयोज्यमानाः सन्ति। अस्यां व्याख्यानमालायां दशाधिकानि व्याख्यानानि आयोज्यन्ते। एवमेव विश्वविद्यालये प्रतिवर्षं 09 प्रसिद्धानां स्मृतिशेषविदुषां स्मृतौ एकदिवसात्मिका 09 व्याख्यानमालाः आयोज्यन्ते। तासां व्याख्यानमालानां नामानि सन्ति- 1-श्रीलालबहादुरशास्त्रीस्मारकव्याख्यानमाला साहित्यविभागेन, 2- डॉ. मण्डनमिश्रस्मारकव्याख्यानमाला सर्वदर्शनविभागेन, 3-श्री पट्टाभिरामशास्त्रीव्याख्यानमाला मीमांसाविभागेन, 4- श्री गौरीनाथशास्त्रीस्मारकव्याख्यानमाला दर्शनसंकायेन, 5- श्री रमाकान्त उपाध्याय स्मारकव्याख्यानमाला शिक्षासंकायेन, 6- म.म.पं. कल्याणदत्तशर्मस्मारकव्याख्यानमाला ज्योतिषविभागेन,7- श्री आदित्यनाथ झा स्मारकव्याख्यानमाला आधुनिकविषयपीठेन 8- डॉ. वाचस्पति उपाध्याय स्मारकव्याख्यानमाला वेदविभागेन तथा च 9- प्रो. शुकदेवचतुर्वेदी स्मारकव्याख्यानमाला वास्तुशास्त्रविभागेन आयोजिताः भवन्ति। अपि च जैनविभागेन स्ववित्तपोषिता आचार्यविद्यानन्दमुनिराज व्याख्यानमाला तथा प्राकृतभाषाविभागेन स्ववित्तपोषिता कुन्दकुन्दभारती व्याख्यानमाला आयोज्यते।

विश्वविद्यालये कार्यरताः अध्यापकाः अनुसन्धानपरियोजनार्थम् आवेदयन्ति। इदानीमपि विश्वविद्यालयस्य वास्तुशास्त्रविभागीयाः अध्यापकाः डॉ. देशबन्धुः आई.ए.एस.एस.आर. परियोजनायां, डॉ. प्रवेशव्यासः आई.के.एस.अनुसन्धानपरियोजनायां तथा च प्रो. अशोक थपलियालः महाराजाविक्रमादित्यवरिष्ठशोधवृत्तिपरियोजनायां च संलग्नाः सन्ति।

शिक्षणाधिगमकेन्द्रान्तर्गतं (टी एल सी) बहवः शैक्षिकाः कार्यक्रमाः अध्यापकानां पुनर्नवीकरणाय अभिगृहीताः वर्तन्ते येषु संकायानुबोधनकार्यक्रमः (एफ आई पी), संकायविकासकार्यक्रमः (एफ डी पी), पुनश्चर्यापाठ्कयक्रमश्च (रिफ्रेशर कोर्स) प्रमुखाः सन्ति। एतेषु कार्यक्रमेषु विश्वविद्यालयस्य आचार्याः अपि भागं गृहीत्वा स्वज्ञानसम्प्रेषणकौशले वृद्धिं कुर्वन्ति, अपि च शिक्षणे नूतनसंसाधनानां प्रयोगविषये अद्यतनीयाः भवन्ति।

एवमेव विश्वविद्यालयः विद्यावारिधि-विद्यावारिध्युत्तरशोधकरणाय प्रोत्साहनार्थम् अध्ययनावकाशमपि प्रददाति। विगतवर्षेषु विद्यावारिध्युत्तरशोधकरणाय प्रो. के. अनन्तावर्यश्च अध्ययनावकाशं स्वीकृतवान्।

अनेन प्रकारेण विश्वविद्यालयपक्षतः अध्यापकानां शैक्षिकरूपेण पुनर्नवीकरणाय अनेके कार्यक्रमाः समायोजिताः भवन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

***2.4.10 Specify the names of faculty imparting indepth shastra knowledge/ Avadhana/ shastrartha to the students and encouraging them to take various shastra exams conducted by different organisations in addition to regular teaching.***

***नित्याध्यापनातिरिक्तत्वेन च्छात्राणां कृते विविधसंस्थाभिः सञ्चालितासु शास्त्रार्थपरीक्षासु स्पर्धासु च भागं ग्रहीतुं शास्त्रार्थेषु अवधानकलायां विशेषप्रशिक्षणं प्रददताम् अध्यापकानां विषये विवरणं प्रयच्छत।***

**Answer:**

विश्वविद्यालयस्य छात्राः न केवलं विश्वविद्यालये आयोजितानां सङ्गोष्ठीषु, वाग्वर्धिनीसभासु, वाक्यार्थ-सभासु, विभागीयवाक्यार्थगोष्ठीषु, शास्त्रचर्चासु, शास्त्रपरीक्षासु, शास्त्रार्थसभासु, शास्त्रस्पर्धासु च भागं गृह्णन्ति अपि च अन्यसंस्थाभिः समायोजितानां विभिन्नस्पर्धासु भागं स्वीकुर्वन्ति। एतासु शास्त्रीयादिस्पर्धासु भागग्रहणात्पूर्वं छात्रान् सज्जीकरणार्थं तत्तदविभागीयाः आचार्याः यथाकालं विशेषप्रशिक्षणं मार्गदर्शनञ्च ददति। तत्र उल्लेखनीयरूपेण प्रयतमानानां प्राध्यापकादीनां विशेषविवरणं प्रस्तूयते-

1. **अखिलभारतीयशास्त्रीयस्पर्धा** – केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रायः प्रतिवर्षं समायोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायां ज्योतिष-सांख्ययोग-न्याय-वैशेषिक-मीमांसा-व्याकरण-साहित्य-धर्मशास्त्र-वेदान्तादिविषयेषु भाषणस्पर्धासु, शलाकापरीक्षासु, कण्ठपाठप्रतियोगितासु च छात्राः भागं गृह्णन्ति पुरस्कारञ्चापि प्राप्नुवन्ति।

ज्योतिषभाषणस्पर्धार्थं ज्योतिषशलाकापरीक्षार्थं च ज्योतिषवास्तुशास्त्रयोः प्राध्यापकाः प्रो. प्रेमकुमारशर्मा, प्रो. देवीप्रसाद त्रिपाठी, प्रो. दिवाकर शर्मा, प्रो. विनोदकुमार शर्मा,प्रो. नीलम ठगेला, प्रो. परमानन्द भारद्वाजः, प्रो. फणीन्द्र चौधरी, प्रो. अशोकथपलियाल इत्यादयः छात्रान् प्रचोदयन्ति, प्रोत्साहयन्ति, मार्गदर्शनं कुर्वन्ति, विशेषपरीक्षणं च प्रददति।

न्याय-वैशेषिकविषये भाषणस्पर्धा-न्यायशलाकास्पर्धार्थञ्च प्रो. पीयूषकान्तदीक्षितः, प्रो. विष्णुपदमहापात्रः, प्रो. महानन्द झाः, प्रो. रामचन्द्र शर्मा चेति महाभागाः छात्रान् प्रेरयन्ति, विशेषप्रशिक्षणं च प्रयच्छन्ति।

एवमेव मीमांसाविषये प्रो. ए.एस. आरावमुदनः डॉ. राजेशगुर्जरः चेति छात्रान् अभिप्रेरयन्तः, विशेषप्रशिक्षणं च प्रयच्छतः।

व्याकरणविषये प्रो. जयकान्तसिंहशर्मा, प्रो. रामसलाहीद्विवेदी, प्रो. सुजाता त्रिपाठी, प्रो. दयालसिंहः, डॉ धर्मपालप्रजापतः, डॉ. नरेश बैरवा इत्यादयः छात्रान् प्रचोदयन्ति, मार्गदर्शनं कुर्वन्ति, विशेषपरीक्षणं च प्रददति।

साहित्यविषये प्रो. भागीरथिनन्दः, प्रो. सुखदेव भोईः, प्रो. धर्मानन्द राउत, प्रो.सुमनकुमार झाः, डॉ. अनमोलशर्मा, डॉ. सौरभदुबे महाभागाः छात्रान् प्रोत्साहयन्ति, मार्गदर्शनं कुर्वन्ति तेषां परीक्षणं च प्रददति।

वेदान्तविषये प्रो. ए.एस. आरावमुदन्, प्रो. के. अनन्ता, प्रो. सुदर्शनः इत्यादयः छात्रान् प्रेरयन्ति, विशेषप्रशिक्षणं च ददति।

धर्मशास्त्रविषये प्रो. सुधांशुभूषणपण्डा, प्रो. यशवीरसिंहः, डॉ. मीनाक्षी मिश्रः, डॉ. हिमांशुः, चेत्यादयः महाभागाः छात्राणां मार्गदर्शनं कुर्वन्ति, परीक्षणं च प्रददति।

विभिन्नकण्ठपाठप्रतियोगितासु छात्रान् सज्जीकरणार्थं प्रो. जयकान्तसिंहशर्मा, प्रो. सुजाता त्रिपाठी, प्रो.नीलमठगेला चेति आचार्याः छात्राणां मार्गदर्शनं कुर्वन्ति, परीक्षणं च प्रयच्छन्ति।

1. **राज्यस्तरीयशास्त्रीयस्पर्धा**- अखिलभारतीयशास्त्रीयस्पर्धासु भागग्रहणाय योग्यतापरीक्षणार्थं प्रप्रथमं राज्यस्तरेषु केन्द्रीयसंस्कृतविश्वविद्यालयेन शास्त्रीयस्पर्धाः आयोज्यन्ते। एतासु स्पर्धासु भागग्रहणात्पूर्वं भागगृहीतृणां छात्राणां प्रोत्साहनाय मार्गदर्शनाय विशेषपरीक्षणप्रदानाय विश्वविद्यालयस्य तत्तद्विभागीयाचार्याः सततं कार्यं कुर्वन्ति। एतेषु आचार्येषु प्रो. पीयूषकान्तदीक्षितः, प्रो. प्रेमकुमारशर्मा, प्रो. देवीप्रसाद त्रिपाठी, प्रो. जयकान्तसिंहशर्मा, प्रो. ए.एस. आरावमुदन्, प्रो. भागीरथिनन्दः, प्रो. सुखदेव भोईः, प्रो. धर्मानन्द राउत, प्रो. के. अनन्ता, प्रो. रामसलाहीद्विवेदी, प्रो. सुजाता त्रिपाठी, प्रो. दयालसिंहः, प्रो. दिवाकर शर्मा, प्रो. विनोदकुमार शर्मा, प्रो. नीलमठगेला, प्रो. परमानन्दभारद्वाजः , प्रो. विष्णुपदमहापात्रः, प्रो. महानन्दझाः, प्रो. रामचन्द्रशर्मा, प्रो.सुमनकुमार झाः, प्रो. फणीन्द्रचौधरी, प्रो. सुशीलशर्मा, प्रो. रश्मिचतुर्वेदी, प्रो. सुदर्शनः, प्रो. अशोकथपलियालः, डॉ. देशबन्धुः, डॉ.प्रवेशव्यासः, डॉ. योगेन्द्रकुमारशर्मा, डॉ धर्मपालप्रजापतः, डॉ. नरेशबैरवा, डॉ. राजेशगुर्जरः, प्रो. सुधांशुपण्डा, प्रो. यशवीरसिंहः, डॉ. मीनाक्षीमिश्रः, डॉ. हिमांशुः चेत्यादयः आचार्याः प्रमुखाः सन्ति।

2. **संस्कृतप्रतिभामहोत्सवः-** तिरुपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रायः प्रतिवर्षं संस्कृतप्रतिभामहोत्सवः समायोज्यते। तत्कृते सज्जीकरणाय विश्वविद्यालयीयाः प्राध्यापकाः छात्राणां मार्गदर्शनं कुर्वन्ति, परीक्षणं च प्रयच्छन्ति। येषु प्रो. जयकान्तसिंहशर्मा, प्रो. भागीरथिनन्दः, प्रो. शिवशंकरमिश्रः, प्रो. नीलम ठगेला, प्रो. विष्णुपदमहापात्रः, प्रो. महानन्द झाः, प्रो. रामचन्द्र शर्मा चेत्यादयः प्रमुखाः सन्ति।
3. **निबन्ध-भाषणादिस्पर्धाः** – दिल्लीसंस्कृतअकादम्या, दिल्लीस्थाभिः अनेकाभिः संस्थाभिश्च समये समये समायोजितासु निबन्धभाषणादिस्पर्धासु विश्वविद्यालयीयाः छात्राः भागं गृह्णन्ति पुरस्कारादिभिः सम्मानिताश्च भवन्ति। भागग्रहणात्पूर्वं छात्रान् सज्जीकरणाय विश्वविद्यालयीयाः प्राध्यापकाः प्रो. नीलमठगेला, प्रो. यशवीरसिंहः, प्रो. मीनूकश्यपः, प्रो. सुजाता त्रिपाठी, डॉ. सविता रायः, डॉ. आरतीशर्मा, डॉ. परमेशशर्मा, डॉ. दिनेशयादवः, डॉ. मीनाक्षी मिश्रः चेत्यादयः सूचनाप्रदानपूर्वकं प्रोत्साहनं विशेषपरीक्षणं च ददति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Link for additional Information अतिरिक्तसूचनानां कृते सन्धानम् | View Document |

**2.5 Evaluation Process and Reforms**

***2.5.1 Average number of days from the date of last semester-end/ year-end examination till the declaration of results during the last five years***

***विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां सङ्ख्यायाः मध्यमानम् -***

**Answer:** 53.4

2.5.1.1 Number of days from the date of last semester-end/ year-end examination till the declaration of results year-wise during the last five years.

विगतपञ्चवर्षेषु, षाण्मासिक्याः वार्षिक्याः च परीक्षायाः अन्तिमदिनाङ्कात् परीक्षापरिणामघोषणादिनाङ्कं यावत् दिनानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 56 | 69 | 52 | 56 | 34 |

| File Description | Document |
|---|---|
| List of Programmes and date of last semester and date of declaration of results (Data Template) पाठ्यक्रमसूची, अन्तिमषाण्मासिक्याः दिनाङ्कः, परीक्षापरिणामघोषणदिनाङ्कश्च (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.2 Average percentage of student complaints/ grievances about evaluation against total number appeared in the examinations during the last five years.***

***विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां***

***मध्यमानस्य प्रतिशतता।***

**Answer:** 0.72

2.5.2.1 Number of complaints/ grievances about evaluation year-wise during the last five years.

विगतपञ्चवर्षेषु, परीक्षासु सम्मिलितेषु छात्रेषु मूल्याङ्कनविषये अभियाच्ञाम्/ अभियोगं वा कृतवतां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 44 | 35 | 0 | 0 | 20 |

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.3 Average percentage of applications for revaluation leading to change in marks***

***पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां प्रतिशतं मध्यमानस्य मानं, यत्र अङ्कानां परिवर्तनं जातम्।***

**Answer:** 17.1

2.5.3.1 Number of applications for revaluation leading to change in marks year-wise during the last five years

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या, यत्र अङ्कानां परिवर्तनं जातम्।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 15 | 11 | 0 | 0 | 4 |

2.5.3.2 Number of revaluation applications year-wise during the last five years.

विगतपञ्चवर्षेषु पुनर्मूल्याङ्कनाय प्राप्तानाम् आवेदनानां वार्षिकी सङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 44 | 35 | 0 | 0 | 20 |

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***2.5.4 Positive impact of reforms on the examination procedures and processes including IT integration and continuous internal assessment on the examination management system.***

***परीक्षाप्रबन्धनप्रणाल्याः परीक्षापद्धतेः सूचनाप्रविधेश्च निरन्तरम् आन्तरिकपरीक्षणस्य च अनुकूलः प्रभावः अनुभूयते।***

**Answer:**

श्रीलालबहादुर- शास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य परीक्षापद्धतिः, तन्त्रज्ञानसम्पत्तेः सहकारेण सूचनाप्रविधिसंयोजनेन परीक्षासम्बन्धिकार्याणि निर्वहति । परीक्षापद्धतिः, आन्तरिकपरीक्षाप्रणाली, आन्तरिकमूल्याङ्कनं च यथाकालं समन्वेति। विश्वविद्यालयेन शास्त्रिपाठ्यक्रमः, आचार्यपाठ्यक्रमः, शिक्षाशास्त्रिपाठ्यक्रमः, शिक्षाचार्यपाठ्यक्रमः, विद्यावारिधिपाठ्यक्रमः, प्रमाणपत्रीयपाठ्यक्रमः, एकवर्षीयडिप्लोमापाठ्यक्रमः एडवांशडिप्लोमापाठ्यक्रमः पी.जी.डिप्लोमापाठ्यक्रमश्च सञ्चाल्यन्ते। अत्र सर्वे पाठ्यक्रमाः सत्रार्धपद्धत्या च प्रवर्तन्ते।

## 1. प्रवेशपरीक्षाप्रक्रिया

शास्त्रि-शिक्षाशास्त्रि-शिक्षाचार्य-आचार्य-विद्यावारिधि-पाठ्यक्रमेषु च प्रवेशेच्छुकच्छात्राणां कृते अखिलभारतीयस्तरे प्रवेशपरीक्षाः आयोज्यन्ते। 2019 तः 2021 यावत् शिक्षाशास्त्री-शिक्षाचार्य-विद्यावारिधिः इति पाठ्यक्रमाणां प्रवेशपरीक्षा क्रमशः CSSET, CSAET, CVVET रूपेण राष्ट्रियस्तरीया समायोजिताऽसीत्, येन प्रदेशान्तरेषु वहवः योग्याः छात्राः अत्र प्रवेशं लब्धवन्तः। 2022 ईसवीयाब्दतः संयुक्तविश्वविद्यालयप्रवेशपरीक्षा (CUET-NTA) माध्यमेन अपि विश्वविद्यालये प्रवेशाः स्वीक्रियन्ते। इमाः प्रवेशपरीक्षाः प्रायेण मई-जूनमासयोः आयोज्यन्ते। सर्वाः प्रवेशपरीक्षाः सद्यस्कमाध्यमेन (Online Application) सञ्चाल्यन्ते। तदर्थं मासद्वयात् पूर्वं सूचनाप्रसारादयः सर्वविधाः सिद्धताः विश्वविद्यालयस्य परीक्षाविभागेन निरुह्यन्ते । परीक्षाविभागः प्रश्नपत्रनिर्माणाय विषयज्ञानानुभविनः अध्यापकान् सूचयति । एतदर्थं विस्तृताः सूचनाः विश्वविद्यालयस्य जालपुटेषु प्रसिद्धवार्तापत्रिकासु च विज्ञापिताः भवन्ति ।

परीक्षार्थिनः छात्राः परीक्षाप्रपत्रं पूरयेयुः । निर्दिष्टं email सङ्केतं कूटाक्षरञ्चादाय निर्दिष्टजालपुटद्वारा परीक्षाशुल्कं समर्पयेयुः। प्रवेशपत्रं जालपुटे आरोपितं परीक्षार्थिनः स्वयमवरोपणं कर्तुं शक्नुवन्ति । छात्रैः नियमाः परिपाल्यन्ते। प्रश्नपत्राणाम् उत्तरपुस्तिकायाः च मुद्रणं विधाय परीक्षाकेन्द्रं प्रति प्रेष्यते । परीक्षायाः सुष्ठुसम्पादनाय सर्वेषु परीक्षाकेन्द्रेषु मुख्यपरीक्षकः/केन्द्राध्यक्षः, उपकेन्द्राध्यक्षः, पर्यवेक्षकाः, कक्षनिरीक्षकाश्चेत्यादयः परीक्षाकार्यं सम्यक्तया निष्पादयन्ति।

2- **सत्रीयपरीक्षाप्रक्रिया-** शास्त्रित्रिवर्षीयपाठ्यक्रमे, शास्त्रिचतुर्वर्षीयपाठ्यक्रमे, आचार्यद्विवर्षीयपाठ्यक्रमे, आचार्यएकवर्षीयपाठ्यक्रमे द्विवर्षीयशिक्षाशास्त्रिपाठ्यक्रमे द्विवर्षीयशिक्षाचार्यपाठ्यक्रमेऽधीयानानां छात्राणां प्रतिवर्षं द्वे सत्रार्धपरीक्षे (Semester Exams) आयोज्येते । एवमाहत्य शास्त्रिपाठ्यक्रमस्य षट्/अष्ट सत्रार्धपरीक्षाः, आचार्यपाठ्यक्रमस्य द्विः/चतस्रः सत्रार्धपरीक्षाः, शिक्षाशास्त्रपाठ्यक्रमस्य शिक्षाचार्यस्य चापि चतस्रः सत्रार्धपरीक्षाः समायोज्यन्ते । आसु सत्रार्धपरीक्षासु प्रथम-तृतीय-पञ्चम-सप्तम-सत्रार्धपरीक्षाः नवम्बर-दिसम्बरमासयोर्मध्ये द्वितीय-चतुर्थ-षष्ठ-अष्टम-सत्रार्धपरीक्षाः मई-जूनमासयोर्मध्ये आयोज्यन्ते।

विद्यावारिधिपाठ्यक्रममधीयानानां शोधच्छात्राणां कृते षाण्मासिकपाठयक्रमस्यान्ते लिखितपरीक्षाऽऽयोज्यते अपि च शोधकार्यस्यऽन्ते शोधप्रबन्धसमर्पणात् परं मौखिकी परीक्षाऽऽयोज्यते ।

सर्वेषामपि पाठ्यक्रमाणां प्रत्येकं प्रश्नपत्रस्य लिखितपरीक्षया साकमान्तरिकपरीक्षणमपि विधीयते । शास्त्री-आचार्यपरीक्षयोः प्रश्नपत्राणां 80 अङ्काः लिखितरूपेण 20 अङ्काश्चान्तरिकपरीक्षणमाध्यमेन क्रियते । शिक्षाशास्त्री-शिक्षाचार्ययोः प्रश्नपत्राणां 75 अङ्काः लिखितरूपेण 25 अङ्काश्चान्तरिकपरीक्षणमाध्यमेन क्रियते । वास्तु-ज्योतिष-कर्मकाण्ड-शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमाणां कृते प्रायोगिकपरीक्षाऽपि आयोज्यते । यत्र बाह्यपरीक्षकः छात्राणां प्रायोगिककार्याणां कौशलानाञ्चाधारेण मूल्याङ्कनं करोति।

**3- सूचनातकनीकिप्रविधेः साहाय्यम्-** श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये समायोजितेषु परीक्षाकार्यक्रमेषु सूचनातकनीकिप्रविधेः साहाय्यमपि स्वीक्रियते। शिक्षाजगति नित्यनूतनानां प्रयोगाणां परिणामतो नवीनाः नवीनाः प्रविधयः प्रयुज्यमाना वर्तन्ते। अधुना शिक्षणप्रशिक्षणेऽध्ययनाध्यापने मूल्याङ्कने विभिन्नगतिविधीनां सम्पादने च सूचनाप्रविधिः परमसहायको भवति। परीक्षाप्रबन्धनप्रणाल्याः सञ्चालनेऽपि सूचनाप्रविधिरत्यन्तमुपकारी वर्तते। पूर्वं सूचनाप्रविधेरभावे परीक्षानिमित्तमावेदनपूरणे एव महान् कालः व्यतीतो भवति स्म, तदधुना सूचनाप्रविधेः कारणात् भृशं रक्ष्यते। सम्प्रति श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयद्वारा आयोज्यमानानां विभिन्नानां परीक्षाणामावेदनपत्राणि तदर्थं समर्प्यमाणं शुल्कञ्च सर्वमपि सद्यस्कमाध्यमेन (Online) क्रियमाणं वर्तते। अपि च सर्वाः अपि सूचनाः जालपुटमाध्यमेनैव प्रदीयमानाः सन्ति। भाविनि कालेऽस्य प्रविधेः विभिन्नेषु कार्येषु इतोऽप्यनुप्रयोगाय श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः प्रयतमानो वर्तते।

## 4. संरचनात्मकमूल्याङ्कनपद्धत्यनुसृता आन्तरिकपरीक्षणप्रणाली

विश्वविद्यालयस्य परीक्षाप्रणाली संरचनात्मकमूल्याङ्कनपद्धत्यनुसृता विद्यते। निरन्तरमान्तरिकपरीक्षणप्रणाली सम्प्रति सर्वत्रापि परीक्षणस्य मुख्याङ्गत्वेन विद्यमाना वर्तते। सर्वासु शैक्षिकसंस्थासु बाह्यपरीक्षणेन साकं निरन्तरमान्तरिकपरीक्षणमपि सम्पाद्यते। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेनापि विभिन्नपाठ्यक्रमेष्वधीयानानां छात्राणां निरन्तरमान्तरिकं परीक्षणं सम्पाद्यते। छात्रस्य कक्ष्योपस्थितिः, पुस्तकालये पत्रपत्रिकाणाम् अध्ययनम्, पाठ्यसहगामिक्रियासु सहभागिता, परियोजनाकार्याणां सम्पादनञ्चेति विषयानधिकृत्य निरन्तरमान्तरिकं परीक्षणं विधीयते। छात्रस्य सहभागितानुसारं तस्य प्रदर्शनानुसारञ्च तस्मै अङ्काः प्रदीयन्ते।

**5. सङ्गणकपटलोपरि उत्तरपुस्तिका-मूल्याङ्कनव्यवस्था**

सङ्गणकसहायकानुदेशनैः सह मूल्याङ्कनकार्येष्वपि विश्वविद्यालयस्य परीक्षाविभागेन यथासमयं निर्देशाः दीयन्ते। विगतकोविड 19 महामार्याः प्रकोपविशिष्टपरिस्थितिषु परीक्षाविभागेनोत्तरपुस्तिकाभिः सम्बद्धमूल्याङ्कनायापि स्पष्टनिर्देशाः प्रदत्ताः एव। निर्देशेषु ऑनलाइनमाध्यमेनोत्तरपुस्तिकानां सङ्गणकपटलोपरिमूल्याङ्कनमेव कर्तव्यमिति विशिष्टमेव। एतदर्थमुत्तरपुस्तिकानां भौतिकस्वरूपम् अनङ्गीकृत्य मूल्याङ्कनञ्चाभवत्। अनया प्रक्रियया अनावश्यककर्गदवित्तादिव्ययोऽपि नाभवत्, तथैवाध्यापकानां परीक्षकाणाञ्च सहयोगोऽपि प्राप्तः। एतैः क्रियाकलापैः परीक्षाप्रबन्धनसमितेः वर्धनेऽऽनुकूल्यं समानीतं वर्तते।

**6. शैक्षणिकश्रेयाङ्काधिकोशः (एकेडमिक बैंक ऑफ क्रेडिट)** – शैक्षणिकश्रेयाङ्काधिकोशस्तु आभासिकसङ्ग्रहणस्थलं वर्तते, यत्र छात्रस्य शैक्षणिकसामग्री संरक्षिता भवति। अस्माकं विश्वविद्यालय अप्येतदर्थं शैक्षणिकश्रेयाङ्काधिकोशयोजनायां पञ्जीकृतो वर्तते। अस्यान्तर्गतमध्ययनरतानां छात्राणां पाठ्यक्रमानुसारेण लब्धश्रेयाङ्कसामग्रीणां संरक्षणं भवति। समर्थपॉर्टल इति माध्यमेन छात्राणां पञ्जीकरणं भवति। अस्माकं विश्वविद्यालये Digi-Locker इति माध्यमेन परीक्षाप्रणाली प्रचलति। राष्ट्रियशिक्षानीति 2020 इत्यनुसारेण छात्रः बहुविधप्रवेशः बहुविधनिकासश्च (Multiple Entry & Multiple Exit) कर्तुं शक्नोति। तदनुसारेण यदि कश्चिच्छात्रः शास्त्री(स्नातक)पाठ्यक्रमे मध्य एव अध्ययनं विरम्य गच्छति तदा समयचक्रानुरूपं सः प्रथमवर्षोत्तीर्णानन्तरं प्रमाणपत्रं (सर्टिफिकेट), द्वितीयवर्षोत्तीर्णानन्तरमुपाधिपत्रं (डिप्लोमा) तृतीयवर्षोत्तीर्णानन्तरमथवा पाठ्यक्रमोत्तीर्णानन्तरं स्नातकोपाधिं (डिग्री) च प्राप्स्यति। सः स्वसमयानुरूपं शैक्षणिकश्रेयाङ्कानुसारमग्रे कस्मिन्नपि विश्वविद्यालये अग्रिमपाठ्यक्रमे पठितुमर्हति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document |

***2.5.5 Status of automation of Examination division along with approved Examination Manual-***

***परीक्षाविभागस्य यान्त्रिकीकरणेन सह अङ्गीकृतायाः परीक्षामार्गदर्शिकायाः स्थितिः -***

**Answer:** B. Only student registration, Hall ticket issue & Result Process (आ. केवलं छात्राणां पञ्जीकरण-परीक्षा-प्रवेशपत्रं फलितांशप्रक्रिया च।)

| File Description | Document |
|---|---|
| Current Manual of examination automation system परीक्षा-यान्त्रिकीकरण-प्रणाल्याः अधुनातनी दर्शिका | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Annual reports of examination including the present status of automation (Data Template) अधुनातन्याः | View Document |

| | |
|---|---|
| यान्त्रिकीकरणस्थित्या सहितं परीक्षायाः वार्षिकं वृत्तम् (दत्तांशप्रारूपम्) | |

***2.5.6 Use of Sanskrit as a medium for Question Paper setting and Answering in Examination.***

***विश्वविद्यालयः परीक्षाप्रश्नपत्राणां निर्माणे उत्तरलेखने च संस्कृतमाध्यममनुसरति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये आधुनिकविषयान् विहाय सर्वे शास्त्रीयपाठ्यक्रमाः संस्कृतमाध्यमेन प्रचलन्ति।विश्वविद्यालयः भारतीयपरम्परागतशास्त्राणां शिक्षणार्थं प्रोत्साहयति। इमे वेदाः, वेदाङ्गानि, वास्तुशास्त्रम्, दर्शनशास्त्राणि, पुराणानि, काव्यानि च भवन्ति। वेदादीनां सम्यगवगमनाय संस्कृतभाषा एव आश्रयणीया। भाषान्तरे अवगमनापेक्षया मूलभाषायां सम्प्रत्ययः याथार्थ्येन भवति। अतः संस्कृतविश्वविद्यालयस्य सर्वे पाठ्यक्रमाः संस्कृतभाषायां संरचिताः सन्ति। विषयाणाम् अध्यापनं संस्कृतमाध्यमेन भवति। परीक्षायाः लेखनमाध्यमः संस्कृतभाषा देवनागरीलिपिश्च वर्तते।

विश्वविद्यालयः शास्त्रशिक्षणपरम्पराक्षेत्रे उच्चशिक्षां प्रदानाय शास्त्रिकक्षातः विद्यावारिधिपर्यन्तं (स्नातककक्षातः शोधोपाधिकार्यक्रमपर्यन्तं) शुक्लयजुर्वेदः, पौरोहित्यम्, धर्मशास्त्रम्, प्राचीनव्याकरणम्, नव्यव्याकरणम्, फलितज्योतिषम्, सिद्धान्तज्योतिषम्, अद्वैतवेदान्तम्, विशिष्टाद्वैतवेदान्तम् जैनदर्शनम्, मीमांसा, साहित्यम्, पुराणेतिहासः, प्राकृतभाषा, सांख्ययोगः, नव्यन्यायदर्शनम्, प्राचीनन्यायवैशेषिकदर्शनम्, शिक्षाशास्त्रञ्चेति पाठ्यक्रमान् संस्कृतभाषायां प्रचालयति। योगपाठ्यक्रमः हिन्दू-अध्ययनपाठ्यक्रमश्च संस्कृत-हिन्दी-आंग्लेति त्रिभाषासु प्रचाल्येते। अनेन प्रकारेण एतेषां पाठ्यक्रमाणाम् अध्ययनम् अध्यापनञ्च प्रायशः संस्कृतभाषया भवति। अतः छात्राणाङ्कृते पाठ्यपुस्तकानि प्रायः संस्कृतभाषायामेव सन्ति। विश्वविद्यालयस्य नीत्यनुसारं छात्राणां मूल्याङ्कनाय समायोजिते परीक्षाकार्यक्रमे प्रश्नपत्राणि संस्कृतभाषामाध्यमेन प्रदीयन्ते, येषामुत्तराणि अपि संस्कृतभाषायामेव अनिवार्यरूपेण छात्रैः साधनीयानि भवन्ति। एवमेव विद्यावारिध्युपाधये परम्परागतानां शास्त्रीयविषयाणां मूल्यांकनाय समायोजिता वाक्परीक्षा अपि संस्कृतभाषामाध्यमेनैव समायोज्यते।

शास्त्रिपाठ्यक्रमे तथा आचार्यपाठ्यक्रमे प्रतिसत्रं विंशतेः अङ्कानाम् आन्तरिकी परीक्षा भवति। तत्र आन्तरिकमूल्याङ्कनाय लिखितपरीक्षा भवति । तस्याः परीक्षायाः प्रश्नपत्रं संस्कृतमाध्यमेन भवति, छात्राः संस्कृतमाध्यमेन उत्तरन्ति। शिक्षाशास्त्रिपाठ्यक्रमे आधुनिकभाषाविषयं विहाय इतराणि पत्राणि संस्कृतमाध्यमेन पाठ्यन्ते । छात्राणां शिक्षणाभ्यासः मनोविज्ञानस्य प्रायोगिकपरीक्षा च संस्कृतभाषया एव प्रवर्तते। विद्यावारिधिपाठ्यक्रमे शोधरताः छात्राः शोधप्रबन्धं संस्कृतमाध्यमेन प्रस्तुवन्ति। संस्कृतभाषायां लिखितस्यैव शोधप्रबन्धस्य परीक्षणयोग्यता इति विश्वविद्यालयस्य सामान्यः नियमः वर्तते। तेषां शोधस्य मूल्याङ्कनं परीक्षणञ्च संस्कृतमाध्यमेन भवति । एतत्तु छात्राणां गवेषणेन सह संस्कृतभाषायां विशिष्टां गतिं प्राप्तुं महान्तम् अवसरं प्रकल्पयति।

स्वस्थापनाकालादेव परम्परागतसंस्कृतशास्त्राणां संस्कृतभाषायाः संस्कृतसाहित्यस्य च क्षेत्रे संस्कृतविश्वविद्यालयस्य उल्लेखनीयं स्थानं वर्तते। अस्मात्कारणादेव विश्वविद्यालयस्य दीक्षान्तकार्यक्रमेषु अन्येषु कार्यक्रमेषु च भारतस्य माननीयराष्ट्रपतिमहोदयानां, भारतसर्वकारस्य मन्त्रिणां, सांसदानां, न्यायमूर्तीनां, विधायकानां, महतां नेतृणां, औद्योगिकनेतृणां, समाजस्य विभिन्नानां महत्त्वपूर्णसंस्थानामधिकारिवर्गाणां, प्रशासनिकाधिकारिणां, सम्भ्रान्तनागरिकाणाञ्चागमनं विश्वविद्यालयस्य गौरववर्धनाय भवत्येव। नैके नागरिकाः संस्कृतं संस्कृतिञ्च प्रति अनुरागत्वाद् विश्वविद्यालयस्य विभिन्नडिप्लोमादिपाठ्यक्रमेषु कार्यशालासु संगोष्ठ्यादिषु च भागग्रहणाय समुत्सुकाः भवन्ति। विंशत्यधिकत्रिशताधिकानां कार्यक्रमाणाम् आयोजनं कृत्वा, समाचारपत्रादिषु अनेकानि प्रकाशनानि विधाय, अन्यसञ्चारमाध्यमेन च संस्कृतभाषायाः वैभवस्य स्थापनायाम् अयं विश्वविद्यालयः समाजस्य अपेक्षापूर्त्यर्थं सततं प्रयतमानो वर्तते।

संस्कृतविश्वविद्यालयस्य इयं दृढनीतिः वर्तते यत् परीक्षाकार्यक्रमेषु सर्वेषां पाठ्यक्रमाणां प्रश्नपत्राणां निर्माणं संस्कृतभाषया भवेत्। अपि च, प्रश्नपत्रे संस्कृतमाध्यमेन पृष्टानां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेनैव छात्राः प्रदेयुः, एतदर्थं छात्रान् प्रोत्साहयितुं, छात्राणां संस्कृतभाषाधिगमे लेखने च कौशलवर्धनाय विश्वविद्यालयेन शास्त्रिस्तरे “संस्कृतभाषाकौशलम्” इति अतिरिक्तविषयः प्रकल्पितो वर्तते। अपि च छात्रेभ्यो निबन्धलेखनप्रतिस्पर्धा अपि आयोज्यते। एतदतिरिक्तं विश्वविद्यालयः छात्राणां वाक्कौशलवर्धनाय संस्कृतभाषायां वादविवादकार्यक्रमाणां ,संगोष्ठीनां ,कार्यशालादीनां च आयोजनमपि करोति। अनेन छात्रेषु सामान्यस्तरेषु जागरूकतायाः निर्माणम् अभवत् ,येन संस्कृतानुरागिण अनेके स्वयंसेवकाः अग्रे समागत्य अस्यां दिशि कार्यं कर्तुं प्रोत्साहिताः जाताः।

पारम्परिकधारायाम् अधीत्य प्रविष्टाः छात्राः इव आधुनिकधारायाम् अधीत्य प्रविष्टानाम् अपि सुलभग्राह्यतया सम्भाषणपाठ्यक्रमः रुचिं वर्धयति । असौ पाठ्यक्रमः संस्कृतेन अपरिचितेषु छात्रेषु जायमानां भीतिं निवारयति । अस्मिन्पाठ्यक्रमे शब्दकोषः, उच्चारणम्, वाक्यरचना, क्रियापदावली इत्येतेषु बिन्दुषु अवधानं दीयते । सर्वेऽपि सम्भाषणादिपाठ्यक्रमाः पूर्णतया संस्कृतमाध्यमेन सञ्चाल्यन्ते। भाषणकौशलम् अधिगन्तुम् एषः सरलः मार्गः । तस्मात् छात्राः अस्मिन् पाठ्यक्रमे उत्साहेन भागं गृह्णन्ति । एवं सर्वेषु स्तरेषु छात्रस्नेही पाठ्यक्रमः सञ्चालनीयः इत्यपि विश्वविद्यालयस्य चिन्तनं वर्तते। छात्रावस्थायां प्राप्तं सम्भाषणकौशलम् अग्रिमकाले अध्यापकत्वेन नियुक्तये अध्यापनकर्मणि च बहूपकारि भविष्यति । तद् इतरेभ्यः वैशिष्ट्यं ख्यापयति । अतः संस्कृताध्यापकस्य संस्कृतसम्भाषणम् 'सत्ता' भवति । सम्प्रति प्राशासनिकविभागेषु संस्कृतं परिचाययितुं विश्वविद्यालयः कार्ययोजनां निर्माति । अग्रिमकाले संस्कृतविश्वविद्यालयस्य सर्वेऽपि विभागाः संस्कृतसम्भाषणेन परिचिताः भविष्यन्ति। विश्वविद्यालयपरिसरे संस्कृतभाषया सम्भाषणं कर्तुं विश्वविद्यालयद्वारा प्रोत्साहनं प्रदीयमानं वर्तते । तेन कार्यालयीयाः अपि विशिष्टां प्रेरणां प्राप्य संस्कृते सम्भाषणं कर्तुं प्रभवन्ति । अध्यापकाश्च नूनं संस्कृतसम्भाषणं कुर्युः येन परिसरीयं वातावरणं संस्कृतमयं भवेदिति विश्वविद्यालयेन उद्दिष्टं वर्तते । अतः नियुक्तौ तादृशाः कुशलाः एव अध्यापकत्वेन चीयन्ते । तेन छात्राः स्वयं प्रेरिता भविष्यन्ति। विश्वविद्यालयस्य संगोष्ठ्यः, कार्यशालाः ,व्याख्यानमालाः उत्कर्षमहोत्सवः चेत्यादयः अनेके कार्यक्रमाः संस्कृतभाषायां भाषणस्य आद्यतां वहन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Upload a few answer papers of some programs written in Sanskrit. (संस्कृतमाध्यमेन लिखितोत्तराणां केषाञ्चित् पाठ्यक्रमाणां कानिचित् उत्तरपत्राणि।) | View Document |
| Provide link for Additional Information (अतिरिक्तसूचनानां सन्धानम्) | View Document |

**2.6 Student Performance and Learning Outcomes**

***2.6.1 Programme outcomes, Programme specific outcomes and course outcomes for all Programmes offered by the institution are stated and displayed on website and communicated to teachers and students.***

***संस्थाद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः, पाठ्यक्रमाणां विशिष्टपरिणामाः,पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने निर्दिश्यन्ते, प्रदर्श्यन्ते च, छात्राणां शिक्षकाणां च कृते प्रेष्यन्ते।***

**Answer:**

**विश्वविद्यालयस्य सर्वेषां पाठ्यक्रमाणां POs, PSOs, COs, LOs विश्वविद्यालयानुदानायोगस्य (UGC) निर्धारितनीतिनियमानुसारं निर्मितं विद्यते।**

विश्वविद्यालयद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः उद्घोष्यन्ते। पाठ्यक्रमाणां विशिष्टपरिणामाः अन्तर्जाले प्रदर्श्यन्ते। तेन छात्रैः अध्यापकैः च यथासमयं परिणामाः ज्ञातुं शक्यन्ते । विश्वविद्यालयस्य अन्तर्जाले सुलभग्राह्या सरणिः अनुसृता वर्तते। सम्बन्धिन्यः सूचनाः सम्बद्धाः साक्षात् तत्तत्स्थाने प्राप्तुं शक्यन्ते । अन्तर्जाले परिणामानां प्रकाशनस्य निर्दिष्टा काचित् प्रक्रिया वर्तते । विश्वविद्यालयद्वारा प्राप्तोपाधयः तया प्रक्रियया सन्तुष्टाश्च सन्ति।

विश्वविद्यालयद्वारा शास्त्री, बी.ए., शिक्षाशास्त्री, आचार्यः, एम.ए., शिक्षाचार्यः, विद्यावारिधिः चेति पाठ्यक्रमाः सञ्चाल्यन्ते। 2021 ईसवीयाब्दपर्यन्तं विशिष्टाचार्यपाठ्यक्रमः अपि सञ्चालितः आसीत्। शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमौ राष्ट्रियशिक्षकशिक्षापरिषदः नियमम् अनुसृत्य प्रवर्तेते । अन्ये पाठ्यक्रमाः विश्वविद्यालयानुदान आयोगस्य नियमाधारेण प्रवर्तन्ते ।

विश्वविद्यालयस्य सर्वेऽपि पाठ्यक्रमाः बहुमुखिनः वर्तन्ते । विषयः, समयः, पुष्टिः, तुष्टिः चेति चतुरः बिन्दून् परिगणय्य पाठ्यक्रमाणां विन्यासः क्रियते । पाठ्यक्रमे अङ्गीकरणीयाः विषयाः शास्त्रीयाः आधुनिकाश्च भारतीयमौल्यप्रतिपादकाः

अपि च अद्यतनीया भवेयुः इति विश्वविद्यालयस्य प्रयासः। पाठ्यक्रमाः अध्येतुः समाजस्य च अपेक्षाणां पूरणे तुष्टिप्रदाः भवेयुः। सर्वे पाठ्यक्रमाः अध्येतुः तोषजनकाः स्युः।

विश्वविद्यालयस्य अध्ययनपरिषत् पाठ्यक्रमाणां निर्धारणं करोति । विश्वविद्यालयस्य माननीयेन कुलपतिना सह विमृश्य परिषदियं तान् पाठ्यक्रमान् निर्धारयति । परिषदि विश्वविद्यालयस्य अन्यविश्वविद्यालयानाञ्च आचार्याः सदस्यत्वेन भवन्ति ।

शैक्षिकविभागः सर्वेषां पाठ्यक्रमाणां सञ्चालनप्रक्रियां निर्वर्तयति । अध्ययनपरिषदा निर्धारितानां पाठ्यक्रमाणाम् अनुमोदनाय शैक्षिकविभागः कार्यपरिषदः पुरस्तात् प्रस्तावं करोति । एवं विविधस्तरेषु अनुशीलन-अनुमोदनपुरस्सरं निर्धारिताः पाठ्यक्रमाः विश्वविद्यालयस्य जालपुटे प्रकाश्यन्ते । समये समये पाठ्यक्रमस्य परिवर्तनं विधीयते ।

विश्वविद्यालयस्य शैक्षिकविभागः पाठ्यक्रमाणां विशिष्टपरिणामान् परिशीलयति । समये समये स्वीक्रियमाणया योजनया परिणामेषु गुणाः लक्ष्यन्ते । ततः अन्यासां शैक्षिकयोजनानां क्रियान्वयने उत्साहः वर्धते। विश्वविद्यालयस्य ध्येयोद्देश्यानुगणं पाठ्यक्रमाः निर्धार्यन्ते । नानाक्षेत्रेषु उद्योगप्राप्तये एते पाठ्यक्रमाः सहकारिणः भवन्ति।

शास्त्रिपाठ्यक्रमस्य अर्हताधारेण विविधाः उद्योगावसराः लभ्यन्ते। वित्तकोषः, भारतीयरेल्वे, राज्यनागरिकसेवा, केन्द्रनागरिकसेवा, भारतीयपोस्ट्-विभागः चेत्यादीनां प्रवेशपरीक्षां लेखितुम् अर्हता प्राप्यते । अन्यविश्वविद्यालयानां पदवीधरैः सह केन्द्रीयविश्वविद्यालयस्य पदवीधराः समानावसरं लभमानाः सन्ति । बहवः उक्तेषु औद्योगिकक्षेत्रेषु वृत्तिम् अलभन्त । वास्तुशास्त्रस्य, ज्योतिषस्य, योगविज्ञानस्य, संस्कृतपत्रकारितायाः, पौरोहित्यकर्मकाण्डस्य च प्रमाणपत्रीयाः डिप्लोमापाठ्यक्रमाः एडवांशपाठ्यक्रमाः पी.जी.डिप्लोमापाठ्यक्रमाश्च कौशलाधारिता वर्तन्ते । तेन लब्धपदवीधराणां स्वतन्त्रतया उद्योगं कर्तुं दक्षता विश्वासश्च सिद्ध्यति । असौ विश्वविद्यालयस्य पाठ्यक्रमाणां साक्षात् परिणामः वर्तते ।

विश्वविद्यालयस्य पाठ्यक्रमेषु प्राचीनविद्यया सह आधुनिकविद्याया अपि समन्वयः वर्तते । संस्कृतपदवीधराः आङ्ग्लभाषायामपि निपुणाः सन्तः विदेशेषु संस्कृतप्रचारकार्यं कर्तुम् उत्सहन्ते । एवं ते भारतस्य सांस्कृतिकप्रतिनिधित्वेन आत्मानं व्यापारयितुं सङ्कल्पन्ते।

विश्वविद्यालयस्य पारदर्शिनी नीतिः छात्रप्रिया शास्त्रप्रिया च वर्तते । शैक्षिककार्याणां सर्वाः सूचनाः विश्वविद्यालयस्य सूचनापटे प्रकाश्यन्ते । ताः सूचनाः अध्यापकैः अभिभावकैश्च सुलभतया अनुसर्तुम् एष उपक्रमः सौविध्यं कल्पयति । एवं पाठ्यक्रमाणां परिणामाः हस्तामलकीक्रियन्ते ।

विद्यावारिधिपाठ्यक्रमे ईमैलद्वारा, दूरवाणीमाध्यमेन च अनुसन्धातुः कृते मौखिकपरीक्षायाः सूचना दीयते। मौखिकपरीक्षायाम् उत्तीर्णानां नामानि विश्वविद्यालयस्य अन्तर्जाले प्रकाश्यन्ते । एवं विश्वविद्यालयस्य अन्तर्जालप्रभावेण दूरस्थाः अपि अभ्यर्थिनः पार्श्ववर्तिनः इव लक्ष्यन्ते । तत्परिणामेन उक्तानाम् उपलब्धीनां क्रियान्वयः सुकरः सम्पद्यते ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload POs, PSOs, COs for all courses सर्वेषां पाठ्यक्रमाणां परिणामाः पाठ्यक्रमाणां विशिष्टपरिणामाः, पाठ्यपत्राणां परिणामाः च संस्थाजालस्थाने उपारोपणीयाः। | View Document |
| Upload a description of Mechanism of Communication सम्प्रेषणकार्यतन्त्रस्य विवरणम् उपारोपणीयम्। | View Document |
| Provide the URL जालस्थानसन्धानं निर्दिशन्तु | View Document |

***2.6.2 Attainment of Programme outcomes, Programme specific outcomes and course outcomes are evaluated by the institution***

***एतेषां सर्वेषां पाठ्यक्रमपरिणामानां, पाठ्यक्रमविशिष्टपरिणामानां, पाठ्यपत्रपरिणामानां निष्पत्तीनां च मूल्याङ्कनं संस्था करोति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमाः भारतीयज्ञानपरम्पराश्रिताः वर्तन्ते। भारतपरम्परा, संस्कृतिः, वेदेषु शास्त्रेषु च निहिताः विचारधाराः इत्येते बिन्दवः पाठ्यक्रमेषु बिम्बिताः भवन्ति। पाठ्यक्रमाणां निर्माणम्, निष्पत्तिः, परिणामानां मूल्याङ्कनम्, निष्पत्तेः मूल्याङ्कनम्, मापनम् इत्यादीनि चाक्रिककार्याणि यथाकालं विधीयन्ते।

**पाठ्यक्रमस्य परिचयप्रदानम् -** प्रवेशकाले पाठ्यक्रमगतानां वैकल्पिकानां शास्त्रविषयाणां सामान्यपरिचयः क्रियते । छात्रेण चीयमानस्य पाठ्यक्रमस्य पाठ्यपत्राणामपि परिचयः क्रियते । पाठ्यक्रमाणां विशिष्टं प्रयोजनं किमित्यपि उच्यते ।

अध्यापकेन निर्दिष्टसमये पाठ्यांशः समापनीयः । अतः प्रत्येकं विषयस्य अध्यापकेन पाठ्यपत्रे प्रतिमासं पाठनीयस्य अंशस्य विभागः क्रियते । मासे मासे निर्दिष्टः पाठ्यांशः पूर्यते । तेन समये पाठ्यांशपूरणं सम्भवति। पुनरवलोकनम्, परीक्षासिद्धता च तत्र कर्तुं सौविध्यं वर्तते ।

तत्र पाठ्यक्रमेषु आन्तरिकमूल्याङ्कनाय उपस्थितिः, प्रदत्तकार्यस्य समीक्षणम्, मासिकपरीक्षा, ग्रन्थालयकार्यम् इति चत्वारः अंशाः परिगण्यन्ते ।

**कक्षायामुपस्थित्यादिकार्याणि -** अध्यापने छात्राणाम् उपस्थितिः पाठ्यक्रमस्य परिणामं निर्धारयति । प्रतिशतं पञ्चसप्ततिः उपस्थितिः न्यूनतमत्वेन परीक्षायाम् उपवेशनाय अपेक्षिता वर्तते ।

**प्रदत्तकार्यम्-** छात्राः निर्दिष्टे पाठ्यविषये लिखितरूपेण उत वा पीपीटी द्वारा विषयोपस्थापनम्, ग्रन्थानाम् अवलीनिर्माणम्, लघुसमीक्षा इत्यादिकार्याणि कुर्वन्ति।

**मासिकपरीक्षा -** पाठिते विषये मासि मासि परीक्षा क्रियते । तेन छात्राः अन्तिमपरीक्षायाः न बिभ्यति ।

**ग्रन्थालयकार्यम्-** विभागीयपुस्तकानां वर्गीकरणम्, शास्त्रग्रन्थेषु मङ्गलश्लोकसङ्ग्रहः, भरतवाक्यानां सङ्ग्रहः, संस्कृतपत्रिकाणाम् अवलीनिर्माणम्, ई-ग्रन्थालयानां परिचयः इत्यादीनि कार्याणि दीयन्ते।

**अनुशिक्षणम् -** अतिरिक्तकक्ष्यारूपे अनुशिक्षणम् आन्तरिकमूल्याङ्कनेन सह छात्राणां क्रमितमापनं भवति । सामान्यतया ते मन्दाध्येतारः, मध्यमाध्येतारः, प्रगताध्येतारः इति विभक्ताः भवन्ति। आद्ययोः स्तरोन्नयनार्थं क्रियमाणः प्रयत्नः परिणामे मुख्यं पात्रं वहति । अतिरिक्तकक्ष्याः स्वीकृताः तत्परिणामाश्च लक्ष्यीकृताः।

**सत्रीयपरीक्षाः** छात्राणां परीक्षाफलेन पाठ्यक्रमाणां गुणः निर्धार्यते । विश्वविद्यालयद्वारा परीक्षा, मूल्याङ्कनम्, फलितांशस्य पट्टिकानिर्माणम्, तस्य घोषणा, अङ्कतालिकाप्रदानम् च क्रियते। एताभिः अवान्तरक्रियाभिः पाठ्यक्रमाणां परिणामाः ज्ञातुं शक्यन्ते। सञ्चालितेषु पाठ्यक्रमेषु अन्ते सत्रीयपरीक्षाः सञ्चाल्यन्ते ।

**प्रत्यादानम्(Feedback)** प्रत्येकं पाठ्यक्रमस्य समाप्तौ स्वीक्रियमाणं प्रत्यादानं पाठ्यक्रमाणां परिणामं निर्धारयति। विश्वविद्यालयद्वारा पत्रकेण प्रत्यादानं स्वीकृतम्।

**वृत्तिः**- विश्वविद्यालये पाठ्यक्रमं समाप्य प्राप्तपदवीकाः विभिन्नेषु क्षेत्रेषु वृत्तिं लभन्ते। शिक्षाशास्त्रिपाठ्यक्रमं समाप्तवन्तः विविधराज्येषु विद्यालयादिषु वृत्तिम् अलभन्त। अन्ये नागरिकसेवादिषु आत्मानं व्यापारयितुं प्रेरणाम् अलभन्त। तत्परीक्षासु सिद्धतारता अभूवन् । JRF प्रभृतिषु शोधवृत्त्यर्थं सिद्धता जाता । NET, SET, CTET इत्यादि-उद्योगद्वारपरीक्षाः उत्तीर्णाः। बहवः योगः, पौरोहित्यम्, वास्तुशास्त्रम्, ज्योतिषम् इत्यादीन् कौशलाधारितपाठ्यक्रमान् समाप्य स्वयमुद्योगम् आरब्धवन्तः।

विश्वविद्यालयेन पाठ्यक्रमाणां परिणामानां निष्पत्तेश्च मापनं विहितम् । अत्र शास्त्री, बी.ए., शिक्षाशास्त्री, आचार्यः, एम.ए., शिक्षाचार्यः, विशिष्टाचार्यः, विद्यावारिधिः, प्रमाणपत्रम् (सर्टिफ़िकेट), उपाधिपत्रम् (डिप्लोमा), स्नातकोत्तर-उपाधिपत्रम् (पी.जी.डिप्लोमा) इत्येते पाठ्यक्रमाः सञ्चालिताः। एते पाठ्यक्रमाः निर्दिष्टोद्देशैः सह प्रवर्तिताः। शिक्षाशास्त्रिपाठ्यक्रमे मनोविज्ञानादिना अन्तरितमापनं भवति। पाठ्यक्रमेषु प्रतिसत्रं सत्रीयपरीक्षासु प्राप्तं फलं वीक्ष्य आनुपातिकं मापनं भवति। तेन पाठ्यक्रमे परिवर्तनं परिवर्धनं च कर्तुं चिन्तनं जायते। Covid 19 महामारीकाले अपि सर्वकारस्य दिशानिर्देशानुसारं विश्वविद्यालये स्वशैक्षणिकगतिविधीनां सञ्चालनं जातम् इति विश्वविद्यालयस्य महदुपलब्धिः।

**(Report Presentation)-** शिक्षाचार्यपाठ्यक्रमे विशेषरूपेण प्रतिवेदनस्य प्रस्तुतीकरणं निर्धारितं वर्तते। अनेन छात्राणां प्रस्तुतीकरणकौशलविषयम् अवगत्य तेषां त्रुटीनां परिमार्जनं प्राध्यापकः करोति।

**प्रशिशिक्षुता (Internship)-** राष्ट्रीयशिक्षानीति 2020 इत्यनुसारेण शास्त्रीतृतीयवर्षस्य पाठ्यक्रमे प्रशिशिक्षुताकार्यम् अनिवार्यमस्ति, एवमेव शिक्षाशास्त्रि-शिक्षाचार्यपाठ्यक्रमयोरपि प्रशिशिक्षुताकार्यक्रमो वर्तते। अनेन अधिगतविषयस्य निर्भ्रान्तं दृढीकरणं व्यवहारे प्रयोगश्च भवति।

**प्रायोगिकपरीक्षा (Practical)-** आचार्यकक्षायां शिक्षाशास्त्रिकक्षायाम् आचार्यकक्षायाञ्च प्राप्तज्ञानस्य प्रायोगिकपरीक्षणाय प्रायोगिकपरीक्षा पाठ्यक्रमे निर्धारितो वर्तते।

**सत्रीयकार्यमूल्याङ्कनम् (Semester Work Assessment) -** अध्यापकाः छात्राणां सत्रस्य कार्यप्रगतिं तेषाम् अध्ययनपरायणतां समयप्रतिबद्धताञ्च सत्रीयकार्यमूल्याङ्कनेन ज्ञातुं प्रभवति।

**निष्पादनमूल्याङ्कनम् (Performance Appraisal)-** अध्यापकाः निष्पादनमूल्याङ्कनेन छात्राणां ज्ञानग्रहणक्षमतां कौशलञ्चाधिगन्तुं शक्नोतीति।

**शैक्षणिश्रेयाङ्काधिकोशः (Academic Bank of Credit)** – शैक्षणिकश्रेयाङ्काधिकोशस्तु आभासिकसङ्ग्रहणस्थलं वर्तते, यत्र छात्रस्य शैक्षणिकसामग्री संरक्षिता भवति। अस्माकं विश्वविद्यालय अपि एतदर्थं शैक्षणिकश्रेयाङ्काधिकोशयोजनायां पञ्जीकृतो वर्तते। अस्यान्तर्गतम् अध्ययनरतानां छात्राणां पाठ्यक्रमानुसारेण लब्धश्रेयाङ्कसामग्रीणां संरक्षणं भवति। राष्ट्रियशिक्षानीति 2020 इत्यनुसारेण छात्रः बहुविधप्रवेशः बहुविधनिकासश्च (Multiple Entry & Multiple Exit) कर्तुं शक्नोति। तदनुसारेण यदि कश्चिच्छात्रः शास्त्रि(स्नातक)पाठ्यक्रमस्य मध्य एव अध्ययनं विरम्य गच्छति तदा समयचक्रानुरूपं सः प्रथमवर्षोत्तीर्णानन्तरं प्रमाणपत्रं (सर्टिफिकेट), द्वितीयवर्षोत्तीर्णानन्तरं उपाधिपत्रं (डिप्लोमा) तृतीयवर्षोत्तीर्णानन्तरं अथवा पाठ्यक्रमोत्तीर्णानन्तरं स्नातकोपाधिं (डिग्री) च प्राप्स्यति। सः स्वसमयानुरूपं शैक्षणिकश्रेयाङ्कानुसारं अग्रे कस्मिन्नपि विश्वविद्यालये अग्रिमपाठ्यक्रमे पठितुमर्हति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document |

***2.6.3 Average pass percentage of students***

## *छात्राणाम् उत्तीर्णताप्रतिशततायाः मध्यमानम्*

**Answer:** 82.96

2.6.3.1 Total number of final year students who passed the university examinations

विश्वविद्यालयस्य परीक्षासु उत्तीर्णानाम् अन्तिमवर्षीयाणां छात्राणां सङ्ख्या

Answer: 589

2.6.3.2 Total number of final year students who appeared for the examinations

अन्तिमवर्षपरीक्षासु सम्मिलितानां छात्राणां योगः

Answer: 710

| File Description | Document |
|---|---|

| | |
|---|---|
| Upload list of Programmes and number of students passed and appeared in the final year examination (Data Template) पाठ्यक्रमसूची, परीक्षायाम् उत्तीर्णानां छात्राणां सङ्ख्या, आन्तिमवर्षपरीक्षायां सम्मिलितानां छात्राणां योगः च उपारोपणीयाः(दत्तांशप्रारूपम्) | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः उपारोपणीयाः | View Document |
| Provide link for the annual report वार्षिकप्रतिवेदनस्य सन्धानम्। | View Document |

***2.6.4 The Institution has mechanism to evaluate the performance of students through the vakyartha/ shastrartha-Sabhas, Shalaka-Pareeksha, Shastra-Pareeksha (Oral), Shastra-spardha, Writing Sanskrit-Slokas/ Padya/ Poetry etc.***

### *संस्था वाक्यार्थ/शास्त्रार्थसभा-शलाकापरीक्षा-शास्त्रपरीक्षा(मौखिकं)-शास्त्रस्पर्धा-संस्कृतश्लोक-पद्य-काव्यादिभिः छात्राणां प्रस्तुतेः मूल्याङ्कनार्थं किमपि कार्यतन्त्रमनुसरति।*

**Answer:**

विश्वविद्यालये काले काले छात्राणां कृते सङ्गोष्ठयः, वाग्वर्धिनीसभाः, वाक्यार्थसभा विभागीयवाक्यार्थगोष्ठयः, शास्त्रचर्चा, शास्त्रपरीक्षा, शास्त्रार्थसभा, शास्त्रस्पर्धा, संस्कृतकविसमवायः, संस्कृतभाषाविकासकार्यक्रमः विविधविषयेषु कार्यशालाः. विशिष्टव्याख्यानमालाश्च इत्यादयः समायोज्यन्ते। एतासु विविधासु स्पर्धासु छात्राणां प्रस्तुतेः मूल्यांकनार्थं विविधोपायान् करोति। अस्माकं विश्वविद्यालयः छात्राणां प्रस्तुतेः मूल्यांकनार्थं बहुविधं कार्यतन्त्रमनुसरति, तद्यथा -

1. **वाग्वर्धिनी सभा-** छात्राणां वक्तृत्वक्षमताया मूल्यांकनार्थ विश्वविद्यालये प्रतिविभागं वाग्वर्धिनी सभा आयोज्यते। सभासंचालनं स्वागतभाषणं मंगलाचरणं विषयोपस्थापनं कार्तज्ञ्यज्ञापनं सर्वविधं कार्यं छात्रा एव कुर्वन्ति। स्वकीयशास्त्रस्य निर्दिष्टविषयमवलब्य यात्रा व्याख्यानानि/स्ववक्तव्यानि कुर्वन्ति। अनेन तेषां वक्तृत्वकौशलं सभासञ्चालनादिकौशलं च वर्धते। विश्वविद्यालयः एतान् छात्रान् पुरस्कारार्थं प्रोत्साहयति। विशेषोलब्धिप्राप्तछात्राणां कृते पुरस्काराञ्च प्रयच्छति।
2. **शलाकापरीक्षा** – शलाकापरीक्षायाः कृते छात्राः वर्षपर्यन्तं सज्जां कुर्वन्ति, तत्र त्रयो घट्टा भवन्ति। प्रथमे घट्टे कण्ठस्थीकरणपरीक्षा, द्वितीये घट्टे पंक्तीनां व्याख्यानपरीक्षा तृतीयघट्टे विषयचर्चा भवति। अनेन घट्टत्रयेण छात्राणां कण्ठस्थीकरणसामर्थ्यं, व्याख्यानकौशलं, निर्भीकत्वादिगुणानां वृद्धिर्भवति।
3. **संस्कृतसप्ताहमहोत्सवः-** रक्षाबन्धनस्य दिनत्रयपूर्वात् सप्तदिवसपर्यन्तं संस्कृतमहोत्सवः विश्वविद्यालयेन समायोज्यते। अत्र विविधाः स्पर्धाः भवन्ति, तेषां विवरणं निम्नलिखितं वर्तते-

- संस्कृतनिबन्धलेखनस्पर्धा
- श्लोकान्त्याक्षरी
- गीताकण्ठस्थीकरणप्रतियोगिता
- वेदमन्त्रोच्चारणप्रतियोगिता
- समस्यापूर्तिः
- आशुभाषणम्
- शास्त्रार्थ/वाद-विवादस्पर्धा
- प्रश्नमञ्चस्पर्धा
- संस्कृतगीतस्पर्धा
- योगासनप्रतियोगिता
- रंगवल्लीस्पर्धा
- समूहगानस्पर्धा
- एकपात्राभिनयस्पर्धा

4. आभारतं नाट्यस्पर्धायां नाट्यदलानि प्रेष्यन्ते।

5. केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रतिवर्षं समायोजितायाम् अखिलभारतीयशास्त्रीयस्पर्धायां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विश्वविद्यालयस्य नैके छात्राः शलाकापरीक्षायां, आशुभाषणपरीक्षायां, श्लोकान्त्यक्षरीपरीक्षायां, समस्यापूर्तिस्पर्धायां, प्रश्नमञ्चस्पर्धायां, भगवद्गीता- अमरकोश-काव्यकण्ठपाठ-सुभाषितकण्ठपाठ-अष्टाध्यायीकण्ठपाठादिस्पर्धासु भागं गृह्णन्ति, विजेतारश्च भवन्ति, पदकानि च प्राप्नुवन्ति।

6. आन्ध्रप्रदेशस्थिते तिरूपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रतिवर्षं अखिलभारतीयस्तरे 'वाग्वर्धिनी' इतिनाम्ना एका स्पर्धायोज्यते। अत्र आभारतात् छात्राः भागं गृह्णन्ति तत्रापि श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य नैके छात्राः दिल्लीप्रान्तस्य प्रतिनिधित्वं कुर्वन्तो विजेतारो भवन्ति पदकानि च प्राप्नुवन्ति। अस्यां स्पर्धायां बह्व्यः प्रतियोगिताः समायोज्यन्ते। ताश्च यथा आशुभाषणं-प्रश्नमञ्चस्पर्धा-एकपात्राभिनय-नृत्यस्पर्धा-रंगवल्लीस्पर्धाः चेत्यादयः।

7. दिल्लीसंस्कृत-अकादमीपक्षतः प्रतिवर्षं बह्व्यः प्रतियोगिता राज्यस्तरे समायोज्यन्ते। एतासु प्रतियोगितासु श्री.ला.ब.शा.रा.सं.विश्वविद्यालयस्य नैके छात्रा भागं गृह्णन्ति। प्रथमादिस्थानं सम्प्राप्य पुरस्कान् च प्राप्नुवन्ति। अत्र निम्नलिखिताः स्पर्धा भवन्ति –

संस्कृतव्याकरणसूत्र-अन्त्याक्षरी प्रतियोगिता, अक्षरश्लोकप्रतियोगिता, संस्कृतश्लोकान्त्याक्षरीप्रतियोगिता, एकांकीनाटकप्रतियोगिता, संस्कृतभाषण-प्रतियोगिता, संस्कृतश्लोकप्रतियोगिता, वेदमन्त्रान्त्याक्षरीप्रतियोगिता।

8. एतदतिरिच्य आभारते विविधेषु महाविद्यालयेषु, विश्वविद्यालयेषु, संस्कृत अकादमीषु, संस्कृतसंस्थानेषु, गुरूकुलादिषु च याः याः स्पर्धाः समायोज्यन्ते तासु श्री.ला.ब.शा.रा.सं.विश्वविद्यालयस्य छात्राः भागं गृह्णन्ति विजेतारश्च भवन्ति।

एतासु स्पर्धासु भागग्रहणात्पूर्वं भागगृहीतृणां छात्राणां तत्तद्विभागीयाः आचार्याः यथाकालं मार्गदर्शनं प्रशिक्षणं मूल्यांकनं च कुर्वन्ति। आसु स्पर्धासु भागगृहीतृणां छात्राणां मूल्यांकनं निम्नप्रकारेण भवति-

| क्रमांकः | स्पर्धानाम् | मूल्यांकनम् |
|---|---|---|
| 1. | भाषणस्पर्धा | वक्तृत्वक्षमतायाः विषयगाम्भीर्यस्य परीक्षणम्। |
| 2. | काव्यकण्ठपाठः | उच्चारणस्य कण्ठस्थीकरणसामर्थ्यस्य परीक्षणम्। |
| 3. | शलाकापरीक्षा | कण्ठस्थीकरणस्य, व्याख्यानकौशलस्य झटिति प्रत्युत्तरक्षमतायाः, बौद्धिककौशलस्य च परीक्षणम्। |
| 4. | प्रश्नमञ्चस्पर्धा | अभिनयकौशलस्य निर्भीकतागुणस्य च परीक्षणम्। |
| 5. | एकपात्राभिनयः | अभिनयकलायाः च परीक्षणम्। |
| 6. | शास्त्रार्थः | विषयोपस्थापनस्य तार्किकशक्तेश्च परीक्षणम्। |
| 7. | आशुभाषणम् | प्रत्युत्पन्नमतेः विषयोपस्थापनस्य च परीक्षणम्। |
| 8. | समस्यापूर्तिः | पद्यरचनात्मककौशलस्य प्रत्युत्पन्नमतेश्च परीक्षणम्। |
| 9. | संस्कृतनिबन्धलेखन-प्रतियोगिता | वाक्यरचनायाः शब्दशास्त्रज्ञानस्य कल्पनाशक्तेश्च परीक्षणम्। |
| 10. | गानस्पर्धा | स्वर-लय-तालादीनां परीक्षणम् |

एतदतिरिक्ता विविधाः स्पर्धाः विश्वविद्यालयेन यथाकालं समायोज्यन्ते।

विश्वविद्यालये शास्त्री-आचार्यादिकक्षासु प्रतिसत्रं शतांकैः परीक्षा भवति। तत्र अशीतिः (80) लिखिता तथा विंशतिः (20) अंकानां प्रदत्तकार्यस्य आधारेण आन्तरिकमूल्यांकनं भवति। लिखितपरीक्षाद्वारा लेखनकौशलस्य विषयोपस्थानस्य, चिन्तनशक्तेः, प्रदर्शनक्षमतायाश्च परीक्षणं भवति। आन्तरिकमूल्यांकनेन च कार्यनिष्पादनक्षमतायाः चिन्तनशक्तेश्च परीक्षणं भवति।

तदित्थं श्रीला.ब.शा.रा.सं.विश्वविद्यालयः छात्राणां प्रतिभाविकासाय व्यक्तित्वसंवर्धनाय सर्वांगीणविकासाय च एताः स्पर्धाः प्रतिवर्षं समायोजयति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for Additional Information अतिरिक्तसूचनानां सन्धानम् | View Document |

**2.7 Student Satisfaction Survey**

***2.7.1 Online student satisfaction survey regarding teaching learning process.***

***अध्यापन-अधिगमयोः प्रक्रियाविषये अधितन्त्रि छात्रसन्तुष्टेः सर्वेक्षणम्।***

**Answer:**

**3.Research, Innovations and Extension**

**3.1 Promotion of Research and Facilities**

***3.1.1 The institution has a well defined policy for promotion of research and Research Committee to monitor and address issues related to research and the same is uploaded on the institutional website. (Yes /No)***

***संस्थायाम् अनुसन्धानस्य प्रोन्नत्यै सुचारुनिर्दिष्टा योजना अस्ति। अनुसन्धानस्य समस्यानां निराकरणाय, अनुसन्धानस्य प्रगतेः संवीक्षणाय अनुसन्धानसमितिः अस्ति। तत्सर्वं संस्थायाः जालस्थाने स्पष्टतया उपारोपितम्। (आम्/न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Minutes of the the Research Committee/ Academic Council/ Governing Council/ Syndicate/ Board of Management related to research promotion policy adoption | View Document |
| Institutional data in prescribed format | View Document |
| Any additional information | View Document |
| URL of Policy document on promotion of research uploaded on website | View Document |

***3.1.2 The institution provides seed money for in-depth Shastric training/ inter-disciplinary training to its teachers for research during the last five years***

***विगतपञ्चवर्षेषु संस्था अध्यापकेभ्यः अनुसन्धानाय तलस्पर्शिशास्त्रप्रशिक्षणाय अन्तःशास्त्रीयप्रशिक्षणाय च मूलनिधिं ददाति।***

**Answer:** 2.24

3.1.2.1 The amount of seed money provided by institution to its faculty year-wise during the last five years (INR in lakhs)

संस्थया विगतपञ्चवर्षेषु अध्यापकेभ्यः प्रदत्तस्य मूलनिधेः वार्षिकसङ्ख्या (लक्षशः)।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 10.68 | 0.54 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| Minutes of the relevant bodies of the University (विश्वविद्यालयस्य योग्यनिकायस्य कार्यवृत्तम्) | View Document |
| List of teachers receiving grant and details of grant received (Data Template) (प्राप्तानुदानविवरणेन सह अनुदानं प्राप्तवताम् अध्यापकानां सूची। (दत्तांशप्रारूपम्) | View Document |
| Budget and expenditure statements signed by the Finance Officer indicating seed money provided and utilized (विश्वविद्यालयस्य वित्ताधिकारिणा हस्ताक्षरितं मूलनिधेः प्राप्तराशेः व्ययीकृतराशेश्च सूचकम् आयव्ययपत्रकं व्ययपत्रकं च। ) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.1.3 Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and any other research fellowships in the University enrolled during the last five years.***

***विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां सङ्ख्या-***

**Answer:** 94

3.1.3.1 The Number of JRFs, SRFs, Post Doctoral Fellows, Research Associates and other research fellows in the university enrolled year-wise during the last five years

विश्वविद्यालये विगतपञ्चवर्षेषु पञ्जीकृतानां कनिष्ठशोधच्छात्राणां(JRF) वरिष्ठशोधच्छात्राणां (SRF) शोधोत्तरानुसन्धातृणाम् (PDF) अनुसन्धानसहायकानाम् अन्येषां च अनुसन्धातृणां वर्षक्रमेण सङ्ख्या-

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 14 | 24 | 11 | 31 | 14 |

| File Description | Document |
|---|---|
| List of research fellows and their fellowship details (Data Template) (अनुसन्धातृणां सूची, छात्रवृत्तिविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| Any additional information( अतिरिक्ताः सूचनाः) | View Document |

***3.1.4 University has the following facilities***

***1. Central Instrumentation Centre/ Language Laboratory ComputerLab/ ICT Lab***

***2. Museum***

***3. Studios/ Recording Studio for Audio-Video/ e-P.G.Pathashala Facilities***

***4. Research/ Statistical Databases***

*5. Manuscript Resource Centre (MRC)*

*6. Manuscript Conservation Centre(MCC)*

*7. Yoga Training Centre*

*8. Yoga Therapy Centre with modern equipments*

*9. Observatory/ Yajnashala*

*10. Psychology Laboratory*

*विश्वविद्यालये अधोलिखितानि सौविध्यानि सन्ति-*

*1. केन्द्रीयम् उपकरणकेन्द्रम्/ भाषाप्रयोगशाला/ सङ्गणकप्रयोगशाला/ सूचना-सम्प्रेषण -प्रविधिप्रयोगशाला*

*2. पुरातत्त्वसङ्ग्रहालयः*

*3. दृश्य-श्रव्य-सामग्रीनिर्माणाय चित्राङ्कनशालायाः ध्वन्यङ्कनशालायाः ई.पी.जी पाठशालायाः वा सौविध्यानि*

*4. अनुसन्धानम्/ सांख्यकीयो दत्तांशनिधिः*

*5. पाण्डुलिपिसंसाधनकेन्द्रम्*

*6. पाण्डुलिपिसंरक्षणकेन्द्रम्*

*7. योगप्रशिक्षणकेन्द्रम्*

*8. आधुनिकयन्त्रसहितं योग-उपचारकेन्द्रम्*

*9. वेधशाला/ यज्ञशाला*

*10. मनोविज्ञानप्रयोगशाला*

**Answer:** A. Any six facilities exist (अ. उपर्युक्तेषु कानिचित् षट्सौविध्यानि सन्ति)

| File Description | Document |
|---|---|
| Upload the list of facilities provided by the university and their year of establishment (Data Template)(विश्वविद्यालयेन दत्तानां सौविध्यानां सूची, स्थापनायाः वर्षञ्च। (दत्तांशप्रारूपम्)) | View Document |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Paste link of videos and geotagged photographs (भूचित्रसंवलितानां दृश्यसामग्रीचित्राणां सन्धानम्।) | View Document |

***3.1.5 Percentage of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency***

*विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य (SAP) प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., आय.सी.एस्.एस्.आर्., आय्.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः, शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां प्रतिशतता।*

**Answer:** 100

3.1.5.1 Number of departments with UGC-SAP, CAS, funding from DST/ ICSSR/ ICPR, Shastra-chudamani Scheme, Ashtadashi Scheme and other similar recognitions by government agency

विश्वविद्यालयानुदानायोगस्य विशिष्टसहायताकार्यक्रमस्य प्रगताध्ययनकेन्द्रत्वेन डी.एस्.टी., ऐ.सी.एस्.एस्.आर्., ऐ.सी.पी.आर्. संस्थाभ्यः शोधनिमित्तं धनप्राप्तिः शास्त्रचूडामणियोजनायां प्रकर्षकेन्द्रत्वेन नवाचारकेन्द्रत्वेन वा अष्टादशीयोजनायाम् अन्यस्यां वा सदृशयोजनायाम् अभिज्ञातानां विभागानां सङ्ख्या।

Answer: 7

3.1.5.2 Number of departments offering academic programme

शैक्षिकपाठ्यक्रमान् सञ्चाल्यमानानां विभागानां सङ्ख्या

Answer: 7

| File Description | Document |
|---|---|
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| e-version of departmental recognition letters or other award letters (विभागीय-अनुदान-अनुमतिपत्राणां वैद्युतभागः अथवा अन्यानुमतिपत्राणि) | View Document |

***3.1.6 Does the university has the following –***

***1. Scheme for preparation of critical edition of unpublished manuscripts for research projects and research degrees***

***2. Sanskrit as the compulsory medium of writing thesis/ dissertation/ Project Report etc.***

***3. Provision for the translation of Sanskrit/Shastric texts as part of formal research degree?***

***4. Incentive to write Sanskrit-Teeka-s/ commentaries on Sanskrit texts***

***5. Scheme for production of Study materials in Sanskrit***

***विश्वविद्यालये अधोलिखितांशाः सन्ति –***

***1. अनुसन्धानपरियोजनानां शोधोपाधीनां च कृते अप्रकाशितपाण्डुलिपीनां समीक्षात्मकदृष्ट्या ग्रन्थसम्पादनयोजना***

***2. शोधप्रबन्ध/ लघुशोधप्रबन्ध/ परियोजनाप्रतिवेदनेषु अनिवार्यमाध्यमत्वेन संस्कृतम्***

***3. औपचारिक-अनुसन्धान-उपाध्यङ्गतया संस्कृतग्रन्थानां शास्त्रीयग्रन्थानां वाऽनुवादाय प्रोत्साहनम्***

***4. औपचारिक-अनुसन्धान-उपाध्यङ्गतया गृहीतस्य संस्कृतग्रन्थस्य टीका/व्याख्यालेखनार्थं प्रोत्साहनम्***

***5. संस्कृतमाध्यमेन अध्ययनाध्यापनसामग्रीनिर्माणाय योजना***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः शास्त्रपरम्परायाः, उच्चशिक्षणस्य च दीपरूपेण तिष्ठति। भारतसर्वकारस्य शिक्षामन्त्रालयेन स्थापितस्य अस्य विश्वविद्यालयस्य उद्देश्यम् आधुनिकसन्दर्भे तस्य प्रासंगिकतां सुनिश्चित्य संस्कृतज्ञानस्य समृद्धपरम्परां रक्षितुं वर्तते। विश्वविद्यालयः भारतीयज्ञानपरम्परायाः भारतीयसंस्कृतेश्च अध्ययनाय शोधाय च सर्वदा कटिबद्धः विद्यते। विश्वविद्यालये पाण्डुलिपिग्रन्थागारः अस्ति यत्र पाण्डुलिपीनां संग्रहणं संरक्षणम् अध्ययनं च क्रियते। विश्वविद्यालयस्य मुख्योद्देश्येषु अप्रकाशितपाण्डुलिपीनां सम्पादनं अन्यतमं वर्तते। विश्वविद्यालयः पाण्डुलिपिग्रन्थानाम् अध्ययनार्थम्, सम्पादनार्थम्, प्रकाशनार्थं च शोधच्छात्रान् निरन्तरं प्रेरयति। विश्वविद्यालय अयं पारम्परिकशास्त्रीयविषयेषु विविधपाठ्यक्रमान् संचालयति, येषु अन्यतमः भवति

विद्यावारिधिपाठ्यक्रम:। विद्यावारिधिपाठ्यक्रमे प्रविष्ट: कोऽपि शोधच्छात्र: स्वानुसन्धानविषयत्वेन अप्रकाशितपाण्डुग्रन्थस्य समीक्षात्मकसम्पादनम् आधारीकृत्य शोधप्रबन्धं रचयितुं शक्नोति। एतादृश: नियम: विश्वविद्यालयस्य विद्वत्परिषदा विहितो विद्यते। अनेन नियमेन अनेके शोधच्छात्रा: विद्यावारिधिपाठ्यक्रमं सम्पाद्य शोधोपाधिं लब्धवन्त: नैके च सम्प्रत्यपि विद्यावारिधिपाठ्यक्रमे संलग्ना: सन्ति।

अस्य विश्वविद्यालयस्य वैशिष्ट्यमिदं यत् अस्मिन् विश्वविद्यालये अध्ययन-अध्यापनसम्बद्धाः सर्वाः क्रिया: संस्कृतभाषामाध्यमेन एव भवन्ति। सर्वे छात्राः अध्यापकाश्च दैनन्दिनसम्भाषणं संस्कृतमाध्यमेन कुर्वन्ति। तथैव शोधकार्यसम्बद्धानाम् अध्ययनाध्यापनमूल्याङ्कनप्रक्रियाणां माध्यममपि केवलं संस्कृतम् एव भवति। विश्वविद्यालयस्य विद्यावारिधि: इत्यस्मिन् पाठ्यक्रमे प्रविष्टानां शोधच्छात्राणां कृते अनिवार्योऽयं नियम: यत् ते केवलं संस्कृतमाध्यमेन एव स्वकीयं शोधप्रबन्धं रचयेयु:।

विश्वविद्यालय: मौलिकसंस्कृतग्रन्थानां टीका व्याख्यादिनिर्माणार्थं निरन्तरं संस्कृतविदुष: लेखकान् प्रोत्साहयति। तैर्निर्मिता: टीका:/व्याख्याग्रन्था: विश्वविद्यालयपक्षत: प्रकाशिता: भवन्ति।

विश्वविद्यालयस्य शोधविभागः संस्कृतविदुषां ग्रन्थानां प्रकाशानाय सर्वदा सज्जीभवति। संस्कृतग्रन्थानां टीकानां च लेखनाय सर्वदा प्रोत्साहनं करोति। विश्वविद्यालयस्य प्रकाशनविभागत: ये विद्वांस: स्वकीयग्रन्थानां लेखनं कृत्वा प्रकाशनं सम्पादनं वा कुर्वन्ति विश्वविद्यालय: तेभ्य: **ग्रन्थस्य 50 प्रतिलिपयः** प्रोत्साहनरूपेण यच्छति। तथैव निबन्धसंग्रहग्रन्थानां सम्पादनीय 05 प्रतयः प्रोत्साहनरूपेण यच्छति। 2023 तमे वर्षे श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शोधविभागेन **काश्मीरेतिहासः** इति ग्रन्थस्य अनुवादाय एका समितिः रचिता। यत्र विश्वविद्यालयस्य आचार्याः एतस्य ग्रन्थस्य अनुवादाय नियुक्ता:। आचार्येभ्यः अस्य अनुवादस्य कृते प्रोत्साहनं दास्यते इत्यपि योजना कृता अस्ति।

विश्वविद्यालयानुदानायोगस्य एककोटिरूप्यकाणां वित्तीयसहाय्येन ई.पी.जी पाठशालाकार्यक्रमान्तर्गतत्वेन संस्कृतमाध्यमेन संस्कृतस्य स्नातकोत्तरपाठ्यक्रमस्याध्ययनसामग्री विश्वविद्यालयेन निर्मिता। अस्यां योजनायां **640 पाठ्यांशानां निर्माणम्** अभवत्। इयं पाठ्यसामग्री पारम्परिकाधुनिकछात्राणां महते उपकाराय भवति। अनेन एव प्रकारेण विश्वविद्यालयस्य आचार्या: आभासीयकक्षं गत्वा पाठ्यसामग्रीनिर्माणं यथासमयं कुर्वन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

### 3.2 Resource Mobilization for Research

***3.2.1 Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, chairs in the institution during the last five years (INR in Lakhs)***

***संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तमनुदानं पीठानि च (लक्षशः)***

**Answer:** 175

3.2.1.1 Total Grants for research projects sponsored by the non-government sources such as industry, corporate houses, other allied organizations, national/international bodies, endowments, Chairs in the institution year-wise during the last five years (INR in Lakhs) -

संस्थायां गतपञ्चवर्षेषु उद्योग-औद्योगिकाधिष्ठान-दत्तनिधि-राष्ट्रिय-अन्ताराष्ट्रियनिकायैः अन्याभिश्च असर्वकारीयसंस्थाभिः प्रायोजितानां शोधयोजनानां कृते प्राप्तानाम् अनुदानानां वार्षिकयोगः (लक्षशः)-

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 175 | 0 | 0 | 0 | 0 |

| File Description | Document |
|---|---|
| List of project and grant detail परियोजनासूची, अनुदानविवरणञ्च। (दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः) | View Document |
| e-copies of the grant award letters for research projects sponsored by non-government(असर्वकारीयसंस्थाभिः प्रायोजितायाः शोधयोजनायाः कृते अनुदानप्राप्तिपत्रस्य वैद्युतप्रतिलिपयः।) | View Document |

***3.2.2 Grants for research projects sponsored by the government sources like UGC, Rashtriya Sanskrit Sansthan, IGNCA, NMM, Sanskrit Academies, ICPR, DST, ICHR etc. during the last five years (INR in Lakhs)***

***विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोग-राष्ट्रियसंस्कृतसंस्थान-इन्दिरागाँधीराष्ट्रियकलाकेन्द्र-राष्ट्रियपाण्डुलिपिमिशन्-संस्कृताकादमी- भारतीयदार्शनिकानुसन्धानपरिषद्-भारतीयेतिहासानुसन्धानपरिषदादिभिः सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तमनुदानम्। (लक्षशः)***

**Answer:** 44.08

3.2.2.1 Total Grants for research projects sponsored by the government sources year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः प्रायोजितानां शोधपरियोजनानां कृते प्राप्तानामनुदानानां वार्षिकयोगः। (लक्षशः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 15 | 20 | 03 | 00 | 6.08 |

| File Description | Document |
|---|---|
| List of project and grant details (Data Template) (परियोजनासूची, अनुदानविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e-copies of the grant award letters for research projects sponsored by government(शासकीयसंस्थाभिः प्रायोजितायाः शोधयोजनायाः कृते अनुदानप्राप्तिपत्रस्य वैद्युतप्रतिलिपयः।) | View Document |

***3.2.3 Number of research projects per teacher funded by government and non-government agencies during the last five years***

***विगतपञ्चवर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रदत्तशोधयोजनाः।***

**Answer:** 0.06

3.2.3.1 Number of research projects funded by government and non-government agencies year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारीयाभिः असर्वकारीयाभिश्च संस्थाभिः प्रत्येकम् अध्यापकाय आर्थिकसाहाय्येन प्रदत्तशोधयोजनानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1 | 2 | 1 | 0 | 2 |

| File Description | Document |
|---|---|
| Supporting document from Funding Agency(अनुदानप्रदातृसंस्थाभिः प्राप्ताः सहायकाभिलेखाः।) | View Document |
| List of research projects and funding details (Data Template)(परियोजनासूची, अनुदानप्रदातृसंस्थाविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide Link for the funding agency website(अनुदानप्रदातृसंस्थाभिः प्राप्ताः सहायकाभिलेखाः।) | View Document |

***3.2.4 University provide funds out of its internal resources for the promotion of research. Provide details***

***आन्तरिकस्रोतोभ्यः प्राप्तं धनराशिं किं विश्वविद्यालयः अनुसन्धानस्य प्रोन्नयनाय परिकल्पयति? विवरणं देयम्।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः आन्तरिकसंसाधनेभ्यः समर्जितं धनं यथासमयम् अनुसन्धानस्य प्रोन्नयनाय प्रयच्छति। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः विविधेभ्यः शोधकार्येभ्यः संकायसदस्यान् शोधार्थिनश्च प्रोत्साहयति। अत्र कार्यशालाः सम्मेलनानि सङ्गोष्ठ्यश्चान्तर्भवन्ति। विश्वविद्यालयः जनसामान्यानां कृते संस्कृते विद्यमानानां ज्ञानविज्ञानानां प्रदर्शनार्थं देशस्य विविधेषु स्थानेषु यथावसरं पुस्तकप्रदर्शिन्यां पुस्तकमेलापके च प्रतिभागितया भागं गृह्णाति साहाय्यमपि करोति। विश्वविद्यालयः स्वस्रोतसा सम्प्राप्तं धनं विभिन्नानां लघुशोधपरियोजनानाम् अग्रेसारयितुं सहायकाचार्येभ्यो धनाबंटनं करोति। वर्षेऽस्मिन् (5,20,000) धनं शोधप्रोत्साहनाय प्रायच्छत। विश्वविद्यालयपरिसरे कार्यशाला-सङ्गोष्ठी-सम्मेलनानाम् आयोजनार्थं स्वसंसाधनम् अथ च विविधेभ्यः संसाधनेभ्यः प्राप्तधनराशेः आबंटनं करोति।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः न्यायव्याकरणदर्शनधर्मशास्त्रज्योतिषपुराणादीनां नैकानां शास्त्राणाम् अन्तर्निहितं विशिष्टं ज्ञानं प्रकाशयितुं ग्रन्थानां प्रकाशनं कारयति। संस्कृतविद्यापीठप्रकाशनमालायाः प्रथमपुष्परूपेण आचार्यश्रीहनुमत्प्रसादशास्त्रिणा विलिखितः अत्यन्तं दुर्लभः "काश्मीरेतिहासः" इति ग्रन्थः 2024 विक्रमसंवत्सरे प्रकाशितः। अस्य ग्रन्थस्य प्रस्तावनालेखनं डॉ. कर्णसिंहमहोदयेन तथा च सम्पादनं डॉ. मण्डनमिश्रमहोदयेन विहितम्। 'काश्मीरेतिहासः' इति ऐतिहासिकं ग्रन्थं सर्वेषां जनसामान्यानां कृते बोधगम्यं सुलभं च भवेत् इति धिया अस्य ग्रन्थस्य अनुवादकार्यं विश्वविद्यालयेन विशेषज्ञैः आचार्यैः कारितम्। अस्य ग्रन्थस्य अनुवादकार्याय 06 विद्वासः अधिकृताः तेषु प्रो. रामसलाहीद्विवेदी व्याकरणविभागाध्यक्षः, प्रो. रामानुजउपाध्यायः पूर्ववेदविभागाध्यक्षः, प्रो. शिवशंकरमिश्रः, शोधविभागाध्यक्षः, प्रो. रामचन्द्रशर्मा, न्यायविभागाध्यक्षः, डॉ. अनमोल शर्मा, साहित्यविभागः, डॉ. सौरभदुबे, साहित्यविभागश्च आसन्। ग्रन्थस्य हिन्दी भाषया अनुवादकार्यं जातम्। सद्य एतस्य प्रकाशनमपि जायमानमस्ति। अस्मिन् अनुवादकर्मणि ये ये विशिष्टाचार्याः योगदानं कृतवन्तः तेषां कृते नियमानुसारं निर्धारितं पारिश्रमिकमपि विश्वविद्यालयेन निर्धारितम्। 'काश्मीरेतिहासः' इति ग्रन्थस्य अनुवादकार्ये विश्वविद्यालयस्य षडाचार्याः पृथक् पृथग्भागं स्वीकृत्य हिन्दीभाषया अनुवादं विहितवन्तः अतस्तेषां शब्दसङ्ख्यानुसारं पारिश्रमिकमपि विश्वविद्यालयेन प्रदत्तम्। अनेन प्रकारेण श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः स्वसंसाधनैः स्वस्रोतोभिः संस्कृते निगूहितानां ज्ञानविज्ञानानाम् अनुसन्धानाय तत्प्रकाशनाय च नैकप्रकारतया प्रोत्साहनं प्रयच्छति।

***The English version is available in the additional information link.***

| Other Upload Files |
|---|

| | |
|---|---|
| 1 | View Document |
| 2 | View Document |
| 3 | View Document |
| 4 | View Document |

**3.3 Innovation Ecosystem**

***3.3.1 Institution has created an eco-system for innovations including Incubation centre/ Research Labs/ Manuscript repositories/ subject based networks/ teaching learning centers (TLC)/ MOOCS studio/ NRC and other initiatives for creation and transfer of knowledge***

***सम्बद्धसंस्थाद्वारा एका पारिस्थितिकी विरचिता यत्र अभिनवस्य ज्ञानस्य सर्जनार्थं सम्प्रेषणार्थं च अभिनवज्ञाननिष्पत्तिकेन्द्राणि/ अनुसन्धानप्रयोगशालाः/ पाण्डुलिपिसंरक्षणकेन्द्राणि तथा अन्ये उपायाः उपलभ्यन्ते।***

**Answer:**

विश्वविद्यालयस्य स्थापना संस्कृतभाषायाः अभिवर्धनाय शिक्षणानुसन्धानयोः सौलभ्यप्रदानाय ज्ञानप्रदानुन्नत्यै संस्कृतपरम्परागतविषयानां क्षेत्रे समग्रविकासाय, संवर्धनाय, संरक्षणाय, अनुसन्धानाय च जाता। उच्चशिक्षाया: क्षेत्रे विशिष्टयोगदानाय विश्वविद्यालय: अग्रेसर: वर्तते। विश्वविद्यालयः ज्ञानस्य क्षेत्रे नवाचाराणां कृते सर्वदा संसिद्धः वर्तते अपि च विविधप्रकारैः नवोन्मेषाणां कृते प्रोत्साहनं प्रयच्छति। अभिनवज्ञाननिष्पत्तेः केन्द्रत्वेन अस्माकं विश्वविद्यालय: प्रोन्नतं भवेत् अस्यां दिशि विश्वविद्यालय: सर्वदा प्रयासरत: वर्तते। विश्वविद्यालयः अनुसन्धानकार्यादिषु मूर्ध्नि तिष्ठति।

### पाण्डुलिपिसंसाधनकेन्द्रम् -

विश्वविद्यालयः पाण्डुलिपीनां संरक्षणे बद्धादरः वर्तते। अतः एव अतीव प्रधानाः दुर्लभाः च पाण्डुलिपयः विश्वविद्यालयस्य पाण्डुलिपिसंसाधनकेन्द्रे संरक्षिताः विद्यन्ते। विश्वविद्यालये पाण्डुलिपिसंसाधनकेन्द्रं वर्तते, यत्र शास्त्रसम्बद्धाः विविधाः 1697 पाण्डुग्रन्थाः विद्यन्ते। एते पाण्डुग्रन्थाः संस्कृतसाहित्यस्य विभिन्नशाखाभिः सम्बद्धाः वर्तन्ते। तासु तन्त्रम्, वेदाः, उपनिषद्, पुराणानि, ज्योतिषम्, व्याकरणम्, वेदान्तः, सांख्ययोगः, न्यायः, धर्मशास्त्रम्, साहित्यम्, संगीतम्, आयुर्वेदादि प्रभृतयः सन्ति प्रमुखाः। ज्ञानस्य सर्जनार्थं सम्प्रेषणार्थं च जम्मूकश्मीरस्थ-श्रीसर्वज्ञपीठस्य शंकराचार्याणां निर्देशनेन करगदस्य 1000 पाण्डुग्रन्थानां, 200 पुस्तकानां, त्रैमासिकशोधपत्रिकायाः शोधप्रभायाः 125 अंकानाञ्च स्कैनिंगकार्यं सम्पाद्य ई-ग्रन्थरूपेण रूपान्तरं जातम्। अवशिष्टपाण्डुग्रन्थानां ई-रूपान्तरं प्रक्रियाधीनं वर्तते।

### मदनमोहनमालवीयराष्ट्रीयशिक्षणकेन्द्रम्-

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय: (केन्द्रीयविश्वविद्यालय:),नवदेहली इत्यस्य शिक्षणाधिगमकेन्द्रस्य स्थापना शिक्षामन्त्रालयसभारतसर्वकारस्य पण्डितमदनमोहनमालवीयराष्ट्रीयशिक्षक-एवं-शिक्षणयोजनाया: (PMMMNMTT) पाठ्यचर्याशिक्षणशास्त्रयो: उत्कृष्टताकेन्द्रस्य घटकान्तर्गतं जाता। केन्द्रं संस्कृतशिक्षकानां शिक्षक-प्रशिक्षकानां शिक्षण-अधिगम-प्रणालीनां सम्बन्धितकार्यान्वयन-मूल्यांकनाय कौशलान् विकासयति।

भारतसर्वकारस्य शिक्षामन्त्रालयस्य उच्चशिक्षाविभागद्वारा केन्द्रं उच्चशिक्षायां नवनियुक्ताध्यापकानां कृते एकमासात्मकमनिवार्यसंकायानुबोधनकार्यक्रमस्य (FIP) सञ्चालनाय अधिसूचितेषु त्रिंशत्केन्द्रेषु सूचीबद्धं वर्तते।

### मनोविज्ञानप्रयोगशाला-

शिक्षाशास्त्रविभागे मनोविज्ञानप्रयोगशाला 2007 तमे वर्षे प्रारब्धा। अस्यां प्रयोगशालायां मनोवैज्ञानिकपरिक्षणाय एकपञ्चाशदधिकानि उपकरणानि तथा पञ्चविंशतिः प्रायोगिकसामग्रयो विद्यन्ते । एकस्मिन् समये त्रिंशत्छात्रा: अस्या: प्रयोगशालाया: परिक्षणाय तथा प्रयोगाय प्रभावन्ति। इयं प्रयोगशाला Computer, Camera, Visualizer, Smart Board आदिभिरूपकरणै: सुसज्जिता वतते। शिक्षाशास्त्रिकक्षायाः तथा शिक्षाचार्यकक्षायाः विद्यार्थिन: अस्याः प्रयोगं कुर्वन्ति । शिक्षाचार्यकक्षायाः छात्राः लघुशोधप्रबन्धस्य तथा विद्यावारिधे: छात्राः शोधप्रबन्धस्य निर्माणाय अस्या: प्रयोगशालाया: सम्यक्तया प्रयोगं कुर्वन्ति।

**अनुसन्धाताप्रयोगशाला-** विश्वविद्यालये 2007 तमे वर्षे संगणकप्रयोगशाला प्रारब्धा। अस्यां षडशीत्यधिकद्विशतं संगणकयन्त्राणि विलसन्ति, एतेषां प्रयोगः विश्वविद्यालयस्य शोधच्छात्राः कुर्वन्ति। शोधछात्राश्च स्वानुसन्धानकार्यावसरे समुचिततया अस्याः प्रयोगशालायाः लाभं सर्वोपकरणैः सुसज्जितानामासां कक्षाणां समुपयोगः पाठनावसरे आचार्यैश्च क्रियन्ते।

**ज्योतिषप्रयोगशाला**-

ज्योतिषविभागीयछात्राणां प्रायोगिकज्ञानस्याभिवृद्धर्थं चलगोलयन्त्रं वर्तते। गोलयन्त्रेण ग्रहाणां नतांशोन्नतांश-क्रान्तिदक्षिणोतरगोलज्ञानादिविभिन्नविषयाणां ज्ञानं भवति। सार्धषट्षष्ट्यांशल्पाक्षांशप्रदेशेषु मेष-तुलासम्पातस्थिते सूर्ये कथं दिनरात्रिमानं समानं भवतीत्यस्य ज्ञानं सञ्जायते। सूर्ये मेषादितः कन्यान्तं यावदुत्तरगोलस्थिते उत्तरक्षांशप्रदेशेषु कथं दिनमानमधिकं रात्रिमानञ्च न्यूनं तुलादितः मीनान्तं यावद् दक्षिणगोलस्थिते सूर्ये च रात्रिमानमधिकं दिनमानञ्चाल्पं भवत्यस्य प्रायोगिकमाध्यमेन ज्ञानं विधीयते। भूगोले कुत्रैकमासात्मकं द्विमासात्मकं त्रिमासात्मकं चतुर्मासात्मकं पञ्चमासात्मकं दिनं भवतीत्यस्य प्रायोगिकमाध्यमेन तत्तद्देशाक्षांशज्ञानं सञ्जायते। सूर्ये मेषादितः कन्यान्तं यावदुत्तरगोलस्थिते सूर्ये उत्तरध्रुवप्रदेशेषु कथं षण्मासात्मकं दिनं तदादक्षिणध्रुवप्रदेशे च षण्मासात्मिका रात्रिर्भवति। तुलादितो मीनान्तं यावद्दक्षिणभगोलस्थिते सूर्ये उत्तरध्रुवप्रदेशे षण्मासात्मिका रात्रिः दक्षिणध्रुवप्रदेशे च तदा षण्मासात्मकं दिनं कथं भवतीति प्रयोगिकमाध्यमेन विज्ञायते। एतदतिरिक्तमपि विभिन्नपदार्थानां ज्ञानं प्रायोगिकमाध्यमेन गोलयन्त्रेण विधीयते।

**योगप्रशिक्षणकेन्द्रम् -**

विश्वविद्यालयः योगसम्बद्धविविधान् नियमितांशकालिकपाठ्यक्रमान् सञ्चालयति यथा- विद्याविरिधिः, बी.ए., एम.ए, पी.जी.योगडिप्लोमा ,डिप्लोमायोग-एवं-प्राकृतिक-चिकित्सा इत्यादयः। एतेषां सर्वेषां पाठ्यक्रमानां प्रायोगिककक्षाः भवन्ति। एताः प्रायोगिककक्षाः विश्वविद्यालयस्य योगप्रयोगशालायां सञ्चालयन्ते। यत्र छात्राः षङ्कर्मणः सूक्ष्याक्रियाणां च अभ्यासं कुर्वन्ति। एतदतिरिच्य छात्राः आसानप्राणायाममुद्राध्यानादिनामभ्यासं योगप्रशिक्षणकेन्द्रे कुर्वन्ति।

**वेधशाला-**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य परिसरे नवदेहल्यां ज्योतिषयन्त्रालयस्य निर्माणं विहितम्। यन्त्रालयनिर्माणनिदेशकाः पं. कल्याणदत्तशर्माणः परामर्शदातारः प्रो. शुकदेवचतुर्वेदिनः सहयोगिनश्च प्रो. ओंकारनाचतुर्वेदिनः आसन् । अस्य यन्त्रालस्य समुद्घाटनं प्रो. वाचस्पतिउपाध्यायमहोदयानां कुलपतित्वे डॉ. के. पी. ए. मेनोनमहोदयानां कुलाधिपतित्वे च तात्कालिकमानवसंसाधनविकासमन्त्रिभिः डॉ मुरलीमनोहरजोशीमहोदयैः माघकृष्णनवम्यां दशम्याञ्च तिथौ २०५५ तमे विक्रमाब्दे तदनुसारं ११.०९.१९९९ तमे ईशवीये वत्सरे सम्पादितम्। ज्योतिषयन्त्रालयो वेधशालानाम्ना विज्ञायते। स्वर्णजयन्तीवर्षोत्सवावसरे पुनः संस्कारितेयं "वराहमिहिरवेधशाला" इति नाम्ना तात्कालिककुलाधिपतिभिः न्याममूर्तिभिः डॉ. मुकुन्दकामशर्ममहोदयैः पौषमासकृष्णपक्षदशम्यां तिथौ २०६८ तमे विक्रमाब्दे तदनुसारं ०७.०१.२०१३ तमे ईशवीये वत्सरे कुलपतीनां प्रो. राधावल्लभत्रिपाठीमहोदयानां सन्निधाने लोकार्पिता। वेधशालायामस्यां नाडीवलय-शङ्कु-सम्राट-तुरीय-षष्ठ्यंशयन्त्राणि कर्क-मकर- तुलावलययन्त्राणि निर्मितानि सन्ति। नाडीवलययन्त्रेण प्रमुखतया गोलज्ञानं शङ्कुयन्त्रेण पलभाज्ञानं दिग्ज्ञानं याम्योत्तरलंघनकालज्ञानं तुरीययन्त्रेण क्रान्ति - नतांशोन्नतांशाक्षांशज्ञानम् षष्ठयंशयन्त्रेण स्पष्टमध्याह्नकालात् किञ्चित्कालपूर्वमुन्नतांशज्ञानं भवति। कर्क-मकर-तुलावलययन्त्रैर्ग्रहाणां सायनभोगांशकालज्ञानं भवति। वेधशालायां स्थितविभिन्नयन्त्रैः ज्योतिषशास्त्रस्य छात्राणां प्रायोगिकं प्रति रुचिरभिवर्द्धते।

**आभासीयकक्षः स्टूडियो-**

विश्वविद्यालयेन केन्द्रीकृत-रिकार्डिङ्ङ्ग-नियन्त्रणमञ्चेन सह आभासीयकक्षः स्टूडियो स्थापितमस्ति यस्योपयोगः सर्वाधिकः सुलभोऽस्ति तथा च समृद्ध माध्यम-लाइव वेबकास्टिंग-सामग्रीप्रबन्धनस्य, वेब- मोबाइल-वितरण-प्रणाल्याः च कृते सर्वोत्तमः समर्थितश्चास्ति । यस्मिन् हार्डवेयरसॉफ्टवेयरसहितं पूर्णतया एकीकृतसमाधानम् अस्ति, सञ्चालीकरणं, श्रव्यदृश्यसम्मेलनं, नियन्त्रणप्रणाली केन्द्रीकृतं रिकार्डिङ्ग नियन्त्रणप्रणाली च समावेशिसंकुलं भविष्यति ।

***The English version is available in the additional information link.***

| File Description | Document |
| --- | --- |
| Any additional information | View Document |

***3.3.2 Number of awards won by institution/teachers for innovation during the last five years***

***विगतेषु पञ्चसु वर्षेषु संस्थया अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां सङ्ख्या।***

**Answer:** 26

3.3.2.1 Total number of awards for innovation won by institution/teachers year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु संस्थया/ अध्यापकैः नवाचारविषये प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकसमष्टिसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
| --- | --- | --- | --- | --- |
| 06 | 06 | 04 | 03 | 07 |

| File Description | Document |
| --- | --- |
| List of innovation and award details (Data Template)( नवाचारविषयसूची, पुरस्कारविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e- copies of award letters (पुरस्कारपत्राणां वैद्युतप्रतिलिपयः।) | View Document |

***3.3.3 Number of mentoring provided to other newly established Institutes during the last five years***

***विगतपञ्चवर्षेषु अन्येषाम् अभिनवानां सद्यः स्थापितानां संस्थानां समारम्भाय प्रदत्तानां मार्गदर्शनानां सङ्ख्या -***

**Answer:** 1

3.3.3.1 Total number of mentoring provided to other newly established Institutes year-wise during the last five years.

विगतपञ्चवर्षेषु अन्येषाम् अभिनवानां सद्यः स्थापितानां संस्थानां समारम्भाय प्रदत्तस्य मार्गदर्शनस्य वार्षिकसङ्ख्या –

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
| --- | --- | --- | --- | --- |
| 1 | 0 | 0 | 0 | 0 |

| File Description | Document |
| --- | --- |
| Upload letter from the University (mentor) /Mentee for the academic /infrastructure etc.(परिसरे समारम्भाय विश्वविद्यालयात् प्राप्तमनुमतिपत्रम् उपारोपयतु। ) | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |

**3.4 Research Publications and Awards**

***3.4.1 The institution has a stated Code of Ethics to check malpractices and plagiarism in Research***

***(Yes /No)***

***अनुसन्धानविषये कृतिचौर्यं कदाचारं निरोद्धुं काचित् निर्णीता नीतिसंहिता संस्थायाम् अस्ति***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Institutional data as per Data Template (सांस्थानिकदत्तांशः।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| URL to be provided by the Institution (संस्थया जालस्थानसन्धानं दातव्यम्) | View Document |

***3.4.2 The institution provides incentives to teachers who receive state, national and international recognition/ awards***

***(Yes /No)***

***ये अध्यापकाः राज्यस्तरीयां/ राष्ट्रियाम्/ अन्ताराष्ट्रियां मान्यतां/ पुरस्कृतिं प्राप्नुवन्ति, संस्था तान् प्रोत्साहयति।***

***(प्रोत्साहयति/ न प्रोत्साहयति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| List of Awardees and Award details (Data Template)( पुरस्कृतानां सूची पुरस्कारविवरणञ्च। (दत्तांशप्रारूपम्)) | View Document |
| e- copies of the letters of awards(पुरस्कारपत्राणां वैद्युतप्रतिलिपयः।) | View Document |
| Any additional information(अतिरिक्ताः सूचनाः) | View Document |

***3.4.3 Number of Patents acquired/Creative writing / or critical Shastric writing composed in Sanskrit / copyright generated / hitherto unknown manuscripts brought to light through publication and awarded by State and National bodies during the last five years***

***विगतपञ्चवर्षेषु प्राप्तानां स्वत्त्वाधिकाराणां/ सर्जनात्मकलेखानाम्/ अथवा संस्कृतभाषया लिखिता विमर्शात्मकशास्त्रीयलेखानाम्/ उत्पादितप्रतिलिपीनां/ अप्रकाशितमातृकाणां/ प्राकाश्यमानीतानां मातृकाणां कृते राज्य/राष्ट्रीयनिकायैः सम्मानितपुरस्काराणाम् सङ्ख्या।***

**Answer:** 3

3.4.3.1 Total number of the above awards - year-wise during the last five years

विगतपञ्चवर्षेषु प्राप्तपुरस्काराणां संवत्सरशः सङ्ख्या -

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 0 | 1 | 0 | 0 | 2 |

| File Description | Document |
|---|---|
| List of the year of the publications of the patents etc.( पुरस्कारवर्षसहिता स्वत्त्वाधिकाराणां सूची।) | View Document |
| Institutional data as per Data Template (सांस्थानिकदत्तांशः।) | View Document |

| | |
|---|---|
| Any additional information(अतिरिक्ताः सूचनाः) | View Document |

***3.4.4 Number of Ph.D.s awarded per teacher during the last five years***

***विगतपञ्चवर्षेषु प्रत्येकम् अध्यापकस्य निर्देशने विद्यावारिध्युपाधिभाजां शोधच्छात्राणां सङ्ख्या।***

**Answer:** 0.49

3.4.4.1 How many Ph.D's are awarded year-wise during the last 5 years -

विगतपञ्चवर्षेषु कतिभिः छात्रैः विद्यावारिध्युपाधयः प्राप्ताः? (संवत्सरक्रमेण) -

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 53 | 54 | 40 | 49 | 37 |

3.4.4.2 Number of teachers recognized as guides year-wise during the last five years -

विगतपञ्चवर्षेषु मार्गदर्शकत्वेन मानितानाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 97 | 91 | 92 | 95 | 98 |

| File Description | Document |
|---|---|
| List of PhD scholars and their details like name of the guide , title of thesis, year of award etc (Data Template)(शोधच्छात्राणां विवरणात्मिका सूची। (दत्तांशप्रारूपम्)) | View Document |
| URL to the research page on HEI web site(जालस्थाने शोधपुटस्य सन्धानम्।) | View Document |

***3.4.5 Number of research papers per teacher in the Journals notified on UGC website/ recognised peer reviewed journals/ reputed journals published by Sanskrit/ General Universities/ Departments/ Research Institutes and notified journals by the Rashtriya Samskrit Sansthan in its website and Conference Proceedings.***

***विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु, संस्कृतविश्वविद्यालयैः तद्विभागैः प्रकाशितासु शोधपत्रिकासु राष्ट्रियसंस्कृतसंस्थानस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु सम्मेलनकार्यवृत्तेषु वा प्रत्येकम् अध्यापकस्य प्रकाशितशोधपत्राणां सङ्ख्या।***

**Answer:** 4.18

3.4.5.1 Number of research papers in the Journals notified on UGC website year-wise during the last five years

विगतपञ्चवर्षेषु विश्वविद्यालयानुदानायोगस्य जालस्थाने अधिसूचितासु शोधपत्रिकासु प्रकाशितशोधपत्राणां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 101 | 79 | 78 | 86 | 99 |

| File Description | Document |
|---|---|
| List of research papers by title, author, department, name and year of publication (Data Template) (शीर्षकादिविवरणसहिता शोधपत्रसूची (दत्तांशप्रारूपम्)) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.4.6 Number of books edited and chapters in edited volumes/ books published, monographs in Sanskrit and other languages, original creative writing in Sanskrit, Sanskrit Shastras etc. (excluding awarded works), per teacher during the last five years***

***विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ प्रकाशितशोधपत्राणां/ संस्कृते एवं संस्कृतशास्त्रेषु सर्जनात्मकलेखानां सङ्ख्या। (पुरस्कारप्राप्तग्रन्थान् विहाय)***

**Answer:** 4.67

3.4.6.1 Total number of books and chapters in edited volumes / books published, and papers in national/international conference-proceedings monographs, creative writing year-wise during the last five years -

विगतपञ्चवर्षावधौ प्रत्यध्यापकं प्रकाशितग्रन्थानां/ सम्पादितग्रन्थेषु लिखिताध्यायानां/ प्रकाशितपुस्तकानां/ राष्ट्रिय-अन्ताराष्ट्रिय-सङ्गोष्ठीकार्यवृत्तिषु प्रकाशितशोधपत्राणां/ सर्जनात्मकलेखानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 144 | 141 | 96 | 54 | 60 |

| File Description | Document |
|---|---|
| List books and chapters in edited volumes / books published (Data Template) (पुस्तकानां सम्पादितभागेषु प्रकाशिताध्यायानां सूची (दत्तांशप्रारूपम्)) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.4.7 Does the university publish any research journal(s)***

***If yes, indicate the year of starting the research journal, composition of the editorial board, editorial policies and state whether it is listed in any international database. Provide the ISSN No.***

***किं विश्वविद्यालयः शोधपत्रिकाः प्रकाशयति ? यद्येवम्, तर्हि शोधपत्रिकाणां प्रारम्भवर्षम्, सङ्घटिता सम्पादकसमितिः, सम्पादननियमाः, अपि च यत्र एताः क्वचित् अन्ताराष्ट्रियदत्तांशेषु सूचीकृता इति संसूचनीयम्। आइ. एस्. एस्. एन् सङ्ख्या देया।***

**Answer:**

शास्त्रसंरक्षणाय, सम्पादनाय, प्रकाशनाय च सौलभ्यं प्रदातुं प्रकाशनप्रकोष्ठस्य आरम्भः विश्वविद्यालये जातः। प्रकोष्ठद्वारा विविधानां शोधपत्रिकाणां प्रकाशनम् अपि क्रियते, यत्र प्रसिद्धानाम् अध्येतृणां, शिक्षकाणां शोधसहकारिणां च शोधपत्राणि प्रकाश्यन्ते। अनेन प्रकोष्ठेन शोधप्रभा, वास्तुशास्त्रविमर्शः, भैषज्यज्योतिषमञ्जुषा, सुमंगली च चतस्रः शोधपत्रिकाः प्रकाश्यन्ते।

**शोधप्रभा (आइ. एस्. एस्. एन् सङ्ख्या-0974-894)- CARE LISTED**

अस्या: शोधपत्रिकाया: प्रकाशनकार्यं विश्वविद्यालयस्य शोधविभागेन १९७८ तमात् वर्षात् निरन्तरं क्रियते। सम्प्रति शोधविभागाध्यक्षस्य आचार्यशिवशंकरमिश्रमहोदयस्य अध्यक्षतायां परामर्शदातृसमित्या सम्पादकमण्डलेन च विधिवदनुशंसितानां शोधलेखानां शोधप्रभायां सम्पादनं प्रकाशनं च क्रियते। इयं शोधपत्रिका त्रैमासिकी विद्यते, यत्र संस्कृतम्, हिन्दी, आंग्लम् एतासु त्रिभाषासु संस्कृतविदुषां शोधच्छात्राणां च संस्कृतशास्त्रसम्बद्धमौलिकशोधपत्राणां सम्पादनं प्रकाशनं च क्रियते। इयं शोधपत्रिका विश्वविद्यालयानुदानायोगस्य मानितायां शोधपत्रिकायाः तालिकायाम् अपि विद्यते।

**वास्तुशास्त्रविमर्शः (आइ. एस्. एस्. एन् सङ्ख्या-0976-4321)- CARE LISTED**

अस्या: शोधपत्रिकाया: प्रकाशनकार्यं विश्वविद्यालयस्य वास्तुविभागेन 2013 तमात् वर्षात् क्रियते। पदेन वास्तुविभागाध्यक्षस्य अध्यक्षतायां विधिवदनुशंसितानां शोधलेखानां वास्तुशास्त्रविमर्शे सम्पादनं प्रकाशनं च क्रियते। इयं शोधपत्रिका वार्षिकी विद्यते, यत्र संस्कृतम्, हिन्दी, आंग्लम् एतासु त्रिभाषासु संस्कृतविदुषां शोधच्छात्राणां च वास्तुशास्त्रसम्बद्धमौलिकशोधपत्राणां सम्पादनं प्रकाशनं च क्रियते। इयं शोधपत्रिका विश्वविद्यालयानुदानायोगस्य मानितायां शोधपत्रिकायाः तालिकायाम् अपि विद्यते।

**भैषज्यज्योतिषमञ्जूषा (आइ. एस्. एस्. एन् सङ्ख्या-2348-0890)-**

भैषज्यज्योतिषमञ्जूषाया: प्रकाशनकार्यं ज्योतिषविभागेन क्रियते। 2014 तमवर्षात् अस्या: प्रकाशनं क्रियते। पदेन ज्योतिषविभागाध्यक्षस्य अध्यक्षतायां विधिवदनुशंसितानां शोधलेखानां सम्पादनं प्रकाशनं च अस्यां पत्रिकायां क्रियते। इयं शोधपत्रिका वार्षिकी विद्यते, यत्र संस्कृतविदुषां शोधच्छात्राणां च संस्कृतशास्त्रसम्बद्धमौलिकशोधपत्राणां सम्पादनं प्रकाशनं च क्रियते।

**सुमंगली-(आइ. एस्. एस्. एन् सङ्ख्या-2229-6336)-**

शोधपत्रिकासुमंगल्या: प्रकाशनकार्यं 2010 तमवर्षात् विश्वविद्यालये स्थापितेन महिलाध्ययनकेन्द्रेण क्रियते। पदेन महिला-अध्ययन-केन्द्रस्य निदेशकस्य अध्यक्षतायां विधिवदनुशंसितानां शोधलेखानां सम्पादनं प्रकाशनं च अस्यां पत्रिकायां क्रियते। इयं शोधपत्रिका अपि वार्षिकी विद्यते, यत्र संस्कृतविदुषां शोधच्छात्राणां च संस्कृतशास्त्रेषु नारीसम्बद्धमौलिकशोधपत्राणां सम्पादनं प्रकाशनं च क्रियते। इयं शोधपत्रिका विशेषज्ञसमितिद्वारा समीक्षिता (पीयर रिव्यूड) वर्तते।

उपर्युक्तपत्रिकाणां प्रकाशनाय समितीनां गठनं कृतम् अस्ति। शोधप्रभाया: सम्पादनार्थं शोधप्रभा-प्रकाशनपरामर्शदातृसमित्यां विश्वविद्यालयस्य ०५ प्राध्यापकाः सन्ति, निर्णायकमण्डले ११ बाह्यविशेषज्ञाः सन्ति। शोधप्रभायां शोधपत्रप्रकाशनार्थमपि केचन

***The English version is available in the additional information link.***

| File Description | Document |
| --- | --- |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**3.5 Consultancy**

***3.5.1 Institution has a policy on consultancy including revenue sharing between the institution and the individual***

***(Yes /No)***

***व्यक्तिसंस्थयोः मध्ये परामर्शाद् प्राप्तस्य आयस्य संविभागार्थं काचिद् योजना संस्थया कल्पिता***

***( आम् / नो)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload soft copy of the Consultancy Policy (परामर्शकनीतेः वैद्युतप्रतिलिपिः उपारोपणीया) | View Document |
| Upload minutes of the Governing Council/ Syndicate/Board of Management related to consultancy policy(कार्यपरिषदः/ कस्यापि निकायस्य परामर्शकनीतिसम्बद्धकार्यवृत्तम् उपारोपयतु।) | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Paste URL of the consultancy policy document (परामर्शकनीतिसम्बद्धाभिलेखस्य सन्धानम्) | View Document |

***3.5.2 Revenue generated from consultancy during the last five years (INR in Lakhs)***

***विगतपञ्चवर्षावधौ संस्थया परामर्शद्वारा अवाप्तो राशिः (लक्षशः)***

**Answer:** 4.14

3.5.2.1 Total amount generated from consultancy year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षावधौ संस्थया परामर्शद्वारा अवाप्तो राशिः संवत्सरक्रमेण (लक्षशः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 4.14101 | 00 | 00 | 00 | 00 |

| File Description | Document |
|---|---|
| List of consultants and revenue generated by them (Data Template)(परामर्शकानां सूची तैरर्जितधनराशेश्च विवरणम् (दत्तांशप्रारूपम्)) | View Document |
| Audited statements of accounts indicating the revenue generated through consultancy (परामर्शमाध्यमेन अर्जितधनराशिसूचकम् अङ्केक्षणविवरणम्) | View Document |

**3.6 Extension Activities**

***3.6.1 Extension activities in the neighborhood community in terms of impact and sensitising students to social issues and holistic development during the last five years***

***विगतपञ्चवर्षेषु छात्रेषु सामाजिकविषये संवेदनशीलताविकासाय, तेषां समग्रविकासाय च प्रातिवेशिकसमुदाये अनुष्ठिताः विस्तारगतिविधयः -***

**Answer:**

विश्वविद्यालय: समाजस्य कल्याणभावनया सर्वदा कार्यरतो विद्यते। अस्मिन् उपक्रमे विविधैः उपायैः समाजे जनजागरणस्य प्रोन्नयने विश्वविद्यालयः सर्वदा प्रयतते। छात्रेषु सामाजिकसंवेदनशीलताविकासाय तेषां व्यक्तित्वविकासाय विश्वविद्यालय: बहून् कार्यक्रमान् समायोजयति । क्रमशः यथा-

**जागरुकताकार्यक्रमा:-**

महिलाध्ययनकेन्द्रेण विविधा: कार्यक्रमा: अस्मिन् प्रसङ्गे आयोजिता:। यथा- विश्वविद्यालये कार्यरतमहिलाकर्मचारीणां छात्राणां च कृते मानसिकशारीरिकस्वास्थ्यस्य जागरुकतायै कार्यक्रमा: आयोजिता:। तथैव विश्वविद्यालयस्य छात्राणां, कर्मचारीणां तथा च विश्वविद्यालयस्य परिसरे निवासं कुर्वतां कुटुम्बजनानां कृते चिकित्साशिविराणि आयोजितानि।

**स्वच्छभारताभियानम्-**

भारतसर्वकारस्य स्वच्छताभियानस्य अङ्गतया विश्वविद्यालयस्य परिसरे स्वच्छतासम्पादनाय विविधाः कार्यक्रमा: आयोजिता:। विश्वविद्यालयेन गतपञ्चवर्षेषु स्वच्छतासम्पादनाय बहव: कार्यक्रमा: प्रचलिता: यत्र विश्वविद्यालयस्य विद्यार्थिनः, अध्यापकाश्च सोत्साहं भागमगृह्णन्।

**ग्रामपालकत्वोपक्रमः-**

विश्वविद्यालय: संस्कृतस्य प्रचारे प्रसारे च नित्यं परिकल्पनां करोति। एतदनु विश्वविद्यालय: समीपवर्ती-ग्रामान् दत्तकरूपेण स्वीकृत्य तान् ग्रामान् विश्वविद्यालयस्य अध्यापकानां सहाय्येन संस्कृतमयं निर्मातुं प्रयतते। संस्कृतवातावरणनिर्माणार्थं विश्वविद्यालयेन कटवारियासरायग्रामः एवं च किशनगढ़ग्रामश्च च दत्तकरूपेण स्वीकृत:।

**युवामन्थनकार्यक्रम**:-

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये युवामन्थनप्रतिरूपसंयुक्तराष्ट्र-सङ्घस्य आयोजनं कृतम्। आयोजने द्वौ खण्डौ आस्ताम् : क्रमशः २ एप्रिल २०२४ दिनाङ्के COP29 प्रतिनिधीनां सभा, ८ एप्रिल २०२४ दिनाङ्के च AIPPM इति। COP 29 इत्यस्मिन् विश्वविद्यालयस्य 13 विभागेभ्यः आहत्य 35 डिप्लोमास्नातकस्नातकोत्तरछात्राः उत्साहेन आयोजने भागं गृहीतवन्तः। अखिलभारतीयराजनैतिकदलसमागमस्य समये छात्राः असम-गुजरात-उत्तराखण्ड-दिल्ली-हरियाणा-पंजाब-तमिलनाडु-उत्तरप्रदेश-त्रिपुरा-महाराष्ट्र इत्यादीनां भारतीयराज्यानां प्रतिनिधित्वं कृतवन्तः तथा च संचारस्य भाषा हिन्दी आङ्ग्लभाषा च आसीत्।

**संस्कृतिसमागमः-**

2 जनवरी 2024 दिनाङ्के अयोध्यानगरस्य श्रीराममन्दिरस्य निर्माणावसरे, श्रीरामस्य दिव्यमूर्तेः अभिषेकस्य उत्सवस्य च भव्यः कार्यक्रमः विश्वविद्यालयस्य परिसरे अभवत्। आयोजने श्रीरामसंकीर्तनस्य भव्यसमागमः, सुन्दरकाण्डपाठः, सांस्कृतिकप्रदर्शनानि, प्रकाशमहोत्सवश्च अभवत्। पारम्परिकवेषभूषिताः छात्राः सुन्दरनृत्यप्रदर्शनैः, लोकगीतैः, भजन-कीर्तन-प्रतिपादनैः च प्रेक्षकान् मंत्रमुग्धान् कृतवन्तः। दीपोत्सव-कार्यक्रमे छात्रैः, शिक्षकैः, अधिकारिभिः, कर्मचारिभिः च शतशः दीपाः प्रकाशिताः, येन उत्सवस्य वातावरणं वर्धितम्।

**भारतीय-भाषा-उत्सवः-**

विश्वविद्यालये "भारतीय भाषा उत्सव" इत्यस्य आयोजनं छात्राणां प्रतिभाया: वर्धनाय अपि च स्वतन्त्रतासेनानीसुब्रह्मण्यभारतीवर्यस्य राष्ट्रसेवायै समर्पितम्। अस्मिन् अवसरे छात्राणां कृते विविधाः प्रतियोगिताः लोकभाषया आयोजिताः आसन् यथा-भारतीयनृत्यकला, भारतीयभाषागीतानि, मम भाषा मम परिचयः, लोकपाककला यस्मिन् छात्राः उत्साहेन भागं गृहीतवन्तः।

एवमेव छात्रेषु सामाजिकविषयेषु संवेदनां जनयितुं विविधाः कार्यक्रमाः गतपञ्चवर्षेषु समायोजिता: यथा- संस्कृतसप्ताह:, राष्ट्रियमतदातादिवस:, सम्भाषणशिविराणि, अन्ताराष्ट्रियमहिलादिवसः, सशक्तभारताभियानम्, पर्यावरणदिवस:, क्रीडागतिविधय: इत्यादयः एवं अस्माकं विश्वविद्यालयेन प्रतिवर्षं विविधोपायैः विश्वविद्यालयच्छात्राणां मनसि सामाजिकविषयान्, राष्ट्रियविषयान्, इतिहासादिविषयान् च प्रति प्रज्ञाजागरणं क्रियते।

**राष्ट्रियमतदातादिवसः-**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयद्वारा जनवरीमासस्य 25 दिनांके 2024 ई. राष्ट्रियमतदातादिवसकार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे 151 प्रतिभागिनः भागं गृहीतवन्तः।

**वाग्देवीसमर्चनाकार्यक्रमः-**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयद्वारा फरवरीमासस्य 14 दिनांके 2024 ई. मातुः सरस्वत्याः वाग्देव्याः समर्चनकार्यक्रमः आयोजितः। अस्यां समर्चनवेलायां विश्वविद्यालयस्य छात्र-छात्राः अधिकारिणः कर्मचारिणः आचार्याश्च उपस्थिताः आसन्।

**पौधारोपणकार्यक्रमः-**

विश्वविद्यालयस्य राष्ट्रीयसेवायोजनामाध्यमेन अक्टूबरमासस्य 31 दिनांके 2022 ई. पर्यावरणदिवसः परिपालितः। अस्मिन् कार्यक्रमे पौधारोपणकार्यं जातम्। विश्वविद्यालयस्य आचार्याः छात्र-छात्राः भागं गृहीतवन्तः।

**'मेरी माटी मेरा देश' इति कार्यक्रमः-**

युवा एवं खेल-मन्त्रालयस्य निर्देशानुसारम् अस्माकं विश्वविद्यालयस्य राष्ट्रीयसेवायोजनाद्वारा अगस्तमास्य 22-24 दिनांके 2023 ई. श्लोगनलेखनं, पोस्टरनिर्माणं भाषणं गीतगायनं आयोजितम्। समापनावसरे पुरस्कृतानां कृते पुरस्कारवितरणमपि कृतम्।

**तिरंगा यात्रा** –

विश्वविद्यालयस्य राष्ट्रीयसेवायोजनाद्वारा 23 दिनांके 2023 ई. तिरंगायात्रायाः आयोजनं कृतम्। उक्त योजनम् मध्याह्ने 1-3 वादनं यावज्जातम्। अयं कार्यक्रमः विश्वविद्यालय प्रांगणतः 02 किमी यावत् संचालितः।

**स्वच्छतापखवाड़ा -**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन अगस्तमासस्य 30 दिनांके 2023 ई. स्वच्छतापखवाड़ा कार्यक्रमः आयोजितः। अस्मिन् कार्यक्रमे विश्वविद्यालयपरिसरस्य तथा विश्वविद्यालयात् 02 किमी दूरं यावत् स्वच्छताकार्यं विहितम्।

**रक्तदानशिविरः -**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य राष्ट्रीयसेवायोजनायाः (NSS) रेडक्राससोसाइटी नवदेहल्याः संयुक्तत्तत्त्वाधाने फरवरीमासे सप्तदश (17.02.2020) दिनाङ्के स्वैच्छिकरक्तदानशिविरस्य आयोजनमभवत्। अस्मिन् रक्तदानशिविरे मुख्यातिथिः राष्ट्रीयसेवायोजनायाः क्षेत्रीयनिदेशकः डॉ. कमलकुमारकरमहोदयः, कुलपतयः प्रो. रमेशकुमारपाण्डेयमहोदयाः आसन्। रेडक्राससोसाइटी नवदेहली संस्थाया मुख्यचिकित्सकः डॉ. पर्वकालरामहोदयः आसीत्, येन रक्तदानं महादानं भवतीति प्रतिपादितम्। अतः जीवनरक्षायै रक्तदानं करणीयम्। विद्यापीठस्य स्वास्थ्यकेन्द्रस्य चिकित्साधिकारी डॉ. आर. सी. महापात्रमहोदयेन संस्कृतग्रन्थेषु स्वास्थ्यसम्बद्धश्लोकानां माध्यमेन रक्तदानस्य महत्त्वं स्पष्टयत। विद्यापीठस्य यशस्विनः कुलपतयः प्रो. रमेशकुमारपाण्डेयमहाभागाः स्वकीये आध्यक्ष्यीयभाषणे रक्तदानम् अन्नदानेन महत्, अतः रक्तदानं प्रतिवर्षं करणीयम् इति सर्वेषां मार्गदर्शनं कृतवन्तः। अस्मिन् उद्घाटनसत्रे अतिथीनां धन्यवादज्ञापनं विद्यापीठस्य राष्ट्रीयसेवायोजनायाः संयोजकः डॉ. प्रेमसिंहसिकरवारः कृतवान्। अस्य उद्घाटनकार्यक्रमस्य अनन्तरं रक्तदानशिविरस्य शुभारम्भः अभवत्। विद्यापीठस्य छात्र-छात्राः, अध्यापकाः आचार्याः, कर्मचारिणश्च सहर्षं सहभागग्रहणं कृतवन्तः। शिविरस्य समापने ५० (पञ्चाशत्) यूनिट्स रक्तदानमभवत्। शिविरे 60 छात्राः प्रतिभागं कृतवन्तः ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information(अतिरिक्तासूचनानां सन्धानम्।) | View Document |

***3.6.2 Number of awards and recognition received for extension activities from Government /recognised bodies during the last five years***

***विस्तारगतिविधीनां कृते सर्वकारात्/मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्ताः पुरस्काराः/ सम्मानानि***

**Answer:** 9

3.6.2.1 Total number of awards and recognition received for extension activities from Government/ recognised bodies year-wise during the last five years

विस्तारगतिविधीनां कृते सर्वकारात्/ मान्यताप्राप्तनिकायेभ्यः विगतपञ्चवर्षेषु प्राप्तानां पुरस्काराणां/ सम्मानानां वार्षिकयोगः।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 05 | 02 | 01 | 00 | 01 |

| File Description | Document |
|---|---|
| Number of awards for extension activities in last 5 year (Data Template)(• विगतपञ्चवर्षेषु पुरस्कारं प्राप्तवतां विस्तारकार्यक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document |
| e-copy of the award letters(पुरस्कारपत्राणां वैद्युतप्रतिलिपिः।) | View Document |

***3.6.3 Number of extension and outreach Programmes conducted in collaboration with industry, community and Non- Government Organisations through NSS/ Swaccha Bharata Abhiyana/ NCC/ Red cross/ YRC etc., during the last five years***

***विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च सङ्ख्या।***

**Answer:** 45

3.6.3.1 Number of extension and outreach Programmes conducted in collaboration with industry, community and Non-Government Organisations through NSS/Swaccha Bharata Abhiyana/NCC/Red cross/YRC etc., year-wise during the last five years

विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः/ राष्ट्रियबालचरसङ्घः/ रेडक्रास्/ वाई-आर्-सी इत्यादीनां माध्यमेन आयोजितानां विस्तारकार्यक्रमाणां बहिर्मुखकार्यक्रमाणाञ्च वार्षिकी सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 15 | 08 | 02 | 08 | 12 |

| File Description | Document |
|---|---|
| Reports of the event organized (आयोजितकार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Number of extension and outreach Programmes conducted with industry, community etc for the last five years (Data Template)( विगतपञ्चवर्षेषु उद्योगसंस्थायाः, समुदायस्य तथा असर्वकारीयसंस्थानां सहयोगेन राष्ट्रियसेवायोजना/ स्वच्छभारताभियानः / राष्ट्रियबालचर | View Document |

***3.6.4 Average percentage of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras /Yoga camps/ etc. during the last five years.***

***विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः मध्यमानस्य प्रतिशतता।***

**Answer:** 37.22

3.6.4.1 Total number of students participating in extension activities with Government Organisations, Non-Government Organisations and Programmes such as Spoken Sanskrit Camps/ Shibiras/ Yoga camps/ etc. year-wise during the last five years.

विगतपञ्चवर्षेषु सर्वकारीयसंस्थाभिः असर्वकारीयसंस्थाभिश्च सह समायोजितेषु संस्कृतसम्भाषणशिबिर-योगशिबिरादिविस्तारकार्यक्रमेषु छात्राणां भागग्राहितायाः वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 212 | 435 | 1306 | 1391 | 362 |

| File Description | Document |
|---|---|
| Report of the event (कार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Details of students participating in extension activities with Govt. or NGO etc (Data Template) | View Document |

***3.6.5 The University gives attention to make Sanskrit and Shastra learning popular in the surrounding areas by offering evening courses. Provide details***

***विश्वविद्यालयः प्रतिवेशिक्षेत्रेषु संस्कृतस्य शास्त्राणाञ्च लोकप्रियतासम्पादनाय सान्ध्यपाठ्यक्रमान् निर्वर्तयति? यद्येवम्, तर्हि विवरणं देयम्।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः प्रतिवेशिक्षेत्रेषु संस्कृतस्य शास्त्राणाञ्च लोकप्रियतासम्पादनाय सान्ध्यपाठ्यक्रमान् प्रचालयति। एतेषु सान्ध्यपाठ्यक्रमेषु न केवलं सामाजिकाः अपि तु विश्वविद्यालीयच्छात्राः अपि भागग्रहणं कुर्वन्ति। संस्कृतं जनमानसं प्रति निधातुं कटिबद्धः विश्वविद्यालयः उभयकाले सर्वेषां कृते प्रतिवेशिक्षेत्रेषु विविधपाठ्यक्रमाणाम् आयोजनं करोति।

विश्वविद्यालयः संस्कृतस्य संवर्धनाय सर्वदा अग्रे तिष्ठति। यथा विश्वविद्यालये संस्कृतस्य प्रशिक्षणाय संस्कृतभाषाकौशलकेन्द्रम् अस्ति यत्र प्रातः 09:00-10:00 एवं सायं 5:00-6:00 वादनं यावत् कक्षा सञ्चाल्यते। अस्यां कक्षायां संस्कृतलेखनस्य संस्कृतमाध्यमेन भाषणस्य च अभ्यास: कार्यते। अत्र न केवलं छात्रैः अपि च समाजिकजनैः अपि प्रशिक्षणं प्राप्यते।

अस्माकं विश्वविद्यालये अंशकालिकपाठ्यक्रमा: अपि प्रचाल्यन्ते यथा-प्रमाणपत्रीयपाठ्यक्रमाः (षाण्मासात्मकाः) - ज्योतिषप्रवेशिका, वास्तुशास्त्रम्, योगः, पौरोहित्यम्, संस्कृतप्रशिक्षणम्-एवं-सम्भाषणम्, पाण्डुलिपि-शिलालेखश्च। डिप्लोमा-पाठ्यक्रमाः(एकवर्षात्मकाः)- भैषज्यज्योतिषम्, वास्तुशास्त्रम्, स्नातकोत्तरयोगः, पौरोहित्यम्, संस्कृतभाषापत्रकारिता, संस्कृतवांग्मयम्, सङ्गणकानुप्रयोगः, पाण्डुलिपिविज्ञानं लिपिविज्ञानञ्च। एडवांस-डिप्लोमा-पाठ्यक्रमाः (द्विवर्षात्मकाः)- वास्तुशास्त्रम्, स्नातकोत्तरवास्तुशास्त्रम्, ज्योतिषप्रवेशिका, जैनविद्या, ज्योतिषप्राज्ञः, जैनविद्या, ज्योतिषभूषणञ्च।

वास्तुशास्त्रविभागेन सञ्चालयमान: वास्तुशास्त्रद्विवर्षीय: स्नातकोत्तरपाठ्यक्रम: विश्वविद्यालये सोमवासरतः शुक्रवासरं यावत् सायंकाले 5:00 वादनतः 08:00 वादनं यावत् प्रचलति। अयम् एकः शास्त्राणां लोकप्रियतायाः सम्पादनपरः

पाठ्यक्रमः वर्तते। अस्य पाठ्यक्रमस्य सञ्चालनं वास्तुविभागेन क्रियते। अनेन प्रकारेण एव एडवांसडिप्लोमापाठ्यक्रमा: अपि विविधविषयेषु प्रचाल्यन्ते। एतेषां सञ्चालनमपि 2:00 तः सायं 5:00 वादनं यावत् क्रियते।

सामाजिकस्तरे संस्कृतस्य शास्त्राणां च महत्त्वं बोधयितुं प्रतिवर्षं संस्कृतसम्भाषणशिविराणि समायोज्यन्ते। एतेषां पाठ्यक्रमाणां माध्यमेन संस्कृते विद्यमानभारतीयज्ञानभाण्डागारस्य स्पर्शनप्रयासो विधीयते। अध्येतृणाम् अभिलाषानुसारं सन्ध्यासमये अन्यपठ्यक्रमान् पठन्तः छात्रा: पाठ्यक्रमेष्वपि अध्ययनप्रवृत्तिं प्रदर्शयन्तीति पाठ्यक्रमाणां वैशिष्ट्यमवगम्यते। विश्वविद्यालयं परितः विद्यमानासु शैक्षणिकसंस्थासु सामाजिकस्थलेषु च संस्कृतभारतीसंस्थया सह मिलित्वा सामान्यजनानामपि संस्कृते अभिरुचिवर्धनाय संस्कृते: जागरणाय च विश्वविद्यालयेन नैके कार्यक्रमा: सञ्चाल्यन्ते। येन लाभान्विता: अनेके छात्रा: अतिसारल्येन संस्कृतसम्भाषणे दक्षा: अभवन्। संस्कृतभाषया लेखने सम्भाषणे च ते समर्था: अपि अभवन्।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.6.6 Teachers participate in the live commentaries / lectures / discussion programmes on the print and electronic media. Provide details.***

## *वार्त्तापत्रेषु वैद्युतिकगणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय/ धाराविवरणप्रसारणाय/ परिसंवादकार्यक्रमाय शिक्षका भागग्राहिणो भवन्ति, विवरणानि देयानि।*

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य प्रायश: सर्वे प्राध्यापका: वार्तापत्रेषु वैद्युतिकगणमाध्यमेषु च प्रत्यक्षविवरणप्रदानाय परिसंवादकार्यक्रमाय धाराविवरणप्रसारणाय च सोत्साहं भागग्रहणं कुर्वन्ति। सम्प्रति तेषां विवरणं दीयते।

**प्रो.जयकान्तसिंहशर्मा-** आकाशवाण्यां 'समाज के उन्नयन में भर्तृहरि का अवदान' इत्यस्मिन् विषये परिसंवाद: (15/07/2023) । राजस्थानसंस्कृतअकादमीत: समायोजिते व्यासपूर्णिमाकार्यक्रमावसरे संस्कृतसेतु इति यूट्यूबमाध्यमेन 'पिबत भागवतं रसमालयम्' इति विशिष्टं व्याख्यानम् (03/07/2023)। राजस्थानसंस्कृतअकादमीत: समायोजिते माघमहोत्सवकार्यक्रमावसरे संस्कृतसेतु इति यूट्यूबमाध्यमेन 'माघ की काव्यदृष्टि' इति विशिष्टं व्याख्यानम् (04/02/2023)।

**प्रो.रामराज उपाध्याय:-** आकाशवाण्यां 'वेदपरिचय:' इत्यस्मिन् विषये परिसंवाद:(17/5/2023)। Parliament T. V. मध्ये 'रामललाविग्रहप्रतिष्ठा' इत्यस्मिन् विषये परिसंवाद:(22/01/2024)। T9 Bharatvarsh मध्ये 'समाधि क्या है' इत्यस्मिन् विषये परिसंवाद:(04/02/2024)। T9 Bharatvarsh मध्ये 'सूर्यतिलक-रामनवमी' इत्यस्मिन् विषये परिसंवाद: (17/04/2024)। राजस्थानसंस्कृतअकादम्यां व्याख्यानद्वयस्य ध्वन्यङ्कनम् (06/06/2022)

**प्रो.शिवशंकरमिश्र:-** Sansad T.V. मध्ये 'रामजन्मभूमि' इत्यस्मिन् विषये परिसंवाद:(25/01/2024)

**प्रो.विष्णुपदमहापात्र: -** आकाशवाण्यां 'भर्तहरि के काव्य में आधुनिक भारत की कल्पना' इत्यस्मिन् विषये परिसंवाद: (28/03/2024) ।

**प्रो देवीप्रसादत्रिपाठी-** दूरदर्शननेशनल इति आभासीयमञ्चे परिसंवाद:

**प्रो.अनैकान्तजैन: -** DD Bharti मध्ये क्षमावाणीपर्वविषये परिसंवाद: (16/10/2021)। DD News मध्ये 'भारतीयज्ञानपरम्परा में जैनधर्मदर्शन' इत्यस्मिन् विषये परिसंवाद: (20/04/2024)

**प्रो.सुजातात्रिपाठी -** DD News मध्ये संस्कृतविषये परिसंवाद: (06/01/2024)

**प्रो.रामानुज उपाध्यायः-** आकाशवाण्यां 'वैदिकवाङ्मये मानवमूल्यानि' इत्यस्मिन् विषये परिसंवादः(23/08/2023)। आकाशवाण्यां 'वर्तमानसमाजे कर्मकाण्डस्य औचित्यम्' इत्यस्मिन् विषये परिसंवादः(16/11/2023) । T.V. 9 मध्ये 'मूर्तिप्राणप्रतिष्ठा की विधियों का परिचय' इत्यस्मिन् विषये परिसंवादः(22/01/2024)।

**प्रो.अशोकथपलियालः-**Loksabha TV मध्ये 'प्रकृति और पंचांग' इत्यस्मिन् विषये परिसंवादः(31/12/2020)। Sangam Talks इति यूट्यूबमाध्यमेन 'गृहनिर्माण हेतु वास्तुविचार' इत्यस्मिन् विषये परिसंवादः(06/01/2024)।Sangam Talks इति यूट्यूबमाध्यमेन 'सृष्टि की उत्पत्ति एवं वास्तुपरिकल्पना' इत्यस्मिन् विषये परिसंवादः(30/01/2024)। आकाशवाण्यां 'सोशलमीडिया संस्कृतसाहित्य' इत्यस्मिन् विषये परिसंवादः (29/02/2024) ।

**डॉ.देशबन्धुशर्मा-** आकाशवाण्यां 'संस्कृतसाहित्य विच नारी दी महिमा' इत्यस्मिन् विषये परिसंवादः(08/03/2020) । आकाशवाण्यां 'संस्कृतसाहित्य में स्वाथवयसंरक्षण का वर्णन' इत्यस्मिन् विषये परिसंवादः(26/06/2023) । News 18 मध्ये 'राशियों के शुभाशुभप्रभाव' इत्यस्मिन् विषये परिसंवादः(28/05/2022) । ज्ञानदर्शन-चैनल मध्ये 'स्नातकोत्तर ज्योतिषपाठ्यक्रम की विषयवस्तु व सम्भावनाएँ' इत्यस्मिन् विषये परिसंवादः(10/05/2022)। आकाशवाण्यां 'वर्णव्यवस्था का वैज्ञानिक आधार' इत्यस्मिन् विषये परिसंवादः(22/05/2022) ।News 18 मध्ये 'शनिपरिवर्तन' इत्यस्मिन् विषये परिसंवादः(23/04/22)।

**डॉ.बी.कामाक्षम्मा-** आकाशवाण्यां 'आधुनिकयुगे धर्मशास्त्रस्य उपयोगिता' इत्यस्मिन् विषये परिसंवादः(28/12/2023)

**डॉ. विजयसिंहगुसाइं-** आकाशवाण्यां 'बुजुर्गों के लिए योगक्रियाएं ' इत्यस्मिन् विषये परिसंवादः(20/06/2023)

**डॉ.नवदीपजोशी-** DD News मध्ये योगविषये परिसंवादः(21/06/2020)। DD News मध्ये योगविषये परिसंवादः(20/08/2021)। DD News मध्ये योगविषये परिसंवादः(07/10/2021)। DD News मध्ये योगविषये परिसंवादः(26/11/2021)। आकाशवाण्यां योगविषये परिसंवादः(06/03/2022)। DD News मध्ये योगविषये परिसंवादः(21/06/2022)। News National मध्ये योगविषये परिसंवादः(20/06/2023)। GNT Aajtak मध्ये योगविषये परिसंवादः(21/06/2023)। DD News मध्ये योगविषये परिसंवादः(21/06/2023)। आकाशवाण्यां 'योग के विविध आयाम One world One Health' इत्यस्मिन् विषये परिसंवादः(21/06/2023)। 'इतिहास के पन्ने' चैनलमध्ये "जीवन जीने की कला" इत्यस्मिन् विषये परिसंवादः(21/06/2023)। GNT Aajtak मध्ये 'Winter Depression' इत्यस्मिन् विषये परिसंवादः(12/12/23)। सुदर्शन News मध्ये योगविषये परिसंवादः(16/06/2024) । Devbhumi Media News मध्ये योगविषये परिसंवादः(20/06/2024)। DD News मध्ये योगविषये परिसंवादः(21/06/2024)।

**डॉ.दिनेशयादवः-**आकाशवाण्यां 'संस्कृतसाप्ताहिकी' इत्यस्मिन् कार्यक्रमे परिसंवादः(05/03/2023)

**डॉ.सौरभदुबे -** आकाशवाण्यां 'संस्कृत में ललितसाहित्य का महत्त्व' इत्यस्मिन् विषये परिसंवादः (21/12/2023) ।

**डॉ.अनमोलशर्मा -** उत्तरप्रदेशसंस्कृतसंस्थानेन आयोजिते बौद्धिकसत्रे अन्तर्जालमाध्यमेन गीतागौरवम् इतिविषये विशिष्टं व्याख्यानम् (18/12/2023) । आकाशवाण्यां 'संस्कृत में ललितसाहित्य का महत्त्व' इत्यस्मिन् विषये परिसंवादः (21/12/2023) । उत्तरप्रदेशसंस्कृतसंस्थानेन आयोजिते प्रेरणासत्रे अन्तर्जालमाध्यमेन संस्कृतसौन्दर्यम् इतिविषये विशिष्टं व्याख्यानम् (29/04/2024) । केन्द्रीयसंस्कृतविश्वविद्यालयस्य जयपुरपरिसरे MOOC'S Project मध्ये पाठद्वयस्य ध्वन्यङ्कनम् (22/05/2024) ।

**डॉ.मीनाक्षीमिश्रः -** आकाशवाण्यां 'संस्कृत श्लोकों में होली प्रसंग ' इत्यस्मिन् विषये परिसंवादः(12/03/2024) ।

**प्रो.भागीरथिनन्दः -** आकाशवाण्यां 'आधुनिकयुगे धर्मशास्त्रस्य उपयोगिता' इत्यस्मिन् विषये परिसंवादः(01/02/2024)। आकाशवाण्यां 'भारतीयसंस्कृतेर्मूलाधारः संस्कृतम्' इत्यस्मिन् विषये परिसंवादः (30/08/2023)।

**प्रो.दयालसिंहपवारः -** आकाशवाण्यां 'संस्कृते पौराणिकं साहित्यं तदीयश्च प्रभावः' इत्यस्मिन् विषये परिसंवादः(15/02/2024)।

**प्रो. जवाहरलालः-** आकाशवाण्यां 'संस्कृते पौराणिकं साहित्यं तदीयश्च प्रभावः' इत्यस्मिन् विषये परिसंवादः(15/02/2024)।

**प्रो. सुमनकुमारझा-** आकाशवाण्यां 'संस्कृते व्यवसायप्रकल्पाः उच्चतरशिक्षायाः परिप्रेक्ष्ये' इत्यस्मिन् विषये परिसंवादः(15/09/2023)।

**डॉ.प्रवेशव्यासः -** आकाशवाण्यां 'विदेशेषु वर्धमानस्य संस्कृतस्य महत्त्वम्' इत्यस्मिन् विषये परिसंवादः (15/03/2024)।

**डॉ.नवीनपाण्डे-** आकाशवाण्यां 'संस्कृते चिकित्सीयज्योतिषम्' इत्यस्मिन् विषये परिसंवादः (16/02/2024)।

**डॉ.राजेशगुर्जरः -** आकाशवाण्यां 'दुर्लभशास्त्राणां संरक्षणं संवर्धनञ्च' इत्यस्मिन् विषये परिसंवादः (05/01/2024)।

**डॉ.प्रेमसिंहसिकरवारः** - आकाशवाण्यां 'संस्कृतसाप्ताहिकी' इत्यस्मिन् विषये परिसंवादः (24/12/23)

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**3.7 Collaboration**

***3.7.1 University's collaboration with other agencies impacted the visibility, identity and diversity of activities on campus? To what extent has the university benefitted academically and financially because of collaborations? The nature of the skill development Programmes introduced for students initiated by the University in collaboration with professional bodies.***

***विश्वविद्यालयस्य इतरसंस्थाभिः सह संयुक्तोपक्रमः परिसरस्य परिदृश्यं, परिचयं, विविधक्रियाकलापांश्च प्रभावयति? संयुक्तोपक्रमद्वारा विश्वविद्यालयः कियता परिमाणेन शैक्षिकदिशा आर्थिकदिशा च लाभान्वितो भवति? अन्यासां वृत्तिप्रदातृसंस्थानां सहयोगेन छात्राणां कौशलविकासाय विश्वविद्यालयेन समारब्धानां पाठ्यक्रमाणां विवरणम्।***

**Answer:**

शिक्षापीठम्, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षापीठं केषाञ्चन सर्वकारी-असर्वकारीसंस्थानां च संयुक्ताश्रयेण छात्रेषु विविधप्रकाराणां जीवनोपयोगीकौशलानां विकासाय कार्यं करोति । यथा-

1. 'सेन्टजॉन्स एम्बुलेन्स एसोसिएशन'(नवदेहली) इत्यस्य सहाय्येन प्राथमिकोपचारप्रशिक्षणमाध्यमेन प्राथमिकचिकित्सासम्बद्धकौशलानां विकासः।
2. 'दिल्ली भारत स्काउट एण्ड गाइड्स' इत्यस्य सहाय्येन शैक्षिकसामाजिकराष्ट्रियमूल्यानां विकासः।
3. 'शिक्षानिदेशालय दिल्लीप्रशासन' इत्यस्य सहाय्येन विद्यालयसम्बद्धताकार्यक्रममाध्यमेन (इण्टर्न्शिप प्रोग्राम) शैक्षणिककौशलस्य, विद्यालयव्यवस्था-एवं-प्रबन्धनकौशलस्य, लैङ्गिकसंवेदनशीलतायाः समावेशकौशलस्य च विकासः।
4. एनसीईआरटी तथा च एससीईआरटी नवदेहली इत्येतयोः सहाय्येन संस्थासम्बद्धताकार्यक्रममाध्यमेन सम्प्रेषण-भाषा-सूचनाप्रौद्योगिकी-समावेशनं-सामाजिकजीवनम्-शिक्षणम्-समस्यानिराकरणम्-सामाजिककौशलम्-इत्येषां कौशलानां विकासः तथा च अनेन सह टीएलएम पाठ्यक्रमविकासकौशलनां च विकासः।

1. श्रीलालबहादुरशास्त्रीविश्वविद्यालयेन गतवर्षेषु विविधसंस्थाभिः शैक्षिकाभिबन्धाः कृताः। वास्तुविभागस्य एवं च SPA एतयोः मध्ये शैक्षिकाभिबन्धः जातः। एतया संस्थया सह मिलित्वा संयुक्तोपक्रमे विविधाः क्रियाकलापाश्च आयोजिताः। यैः शैक्षिकदिशि विश्वविद्यालयः लाभान्वितः अभवत्। वास्तुविभागः एवं च SPA उभयोः संयुक्ततत्त्वावधाने गतवर्षेषु कार्यशाला, सम्मेलनम्, संगोष्ठीप्रभृतयः कार्यक्रमाः समायोजिताः। यत्र विविधविषयानधिकृत्य विद्वांसः स्वीयव्याख्यानैः छात्रान् उपकृतवन्तः। एतेषु कार्यक्रमेषु शोधच्छात्राणां कृते पत्रवाचनस्य अवसरः अपि परिकल्पितः ।
2. श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः विभिन्नभिः संस्थाभिः सह मिलित्वा संयुक्तायासेन विविधकार्यशालानां यथासमयम् आयोजनं करोति। अनयाकार्यशालया छात्राणां तत्रापि विशेषतः शोधच्छात्राणां विषयविशेषस्य, शास्त्रविशेषस्य, सिद्धान्तविशेषस्य च समग्रं तलस्पर्शीगभीरं ज्ञानं जायते। कार्यशालायां पञ्जीकृताः प्रतिभागिनः विषयविशेषज्ञानां विशिष्टोद्बोधनेन शास्त्रस्य मर्मभूतं यत् तत्त्वं तदङ्गीकुर्वन्ति। प्रशिक्षिताः

छात्रा: विशिष्टज्ञानम् आवाप्य तत्-तत् क्षेत्रे धनार्जनमपि कुर्वन्ति। न केवलं कार्यशालाया: आयोजनेन ज्ञानमेव वर्धते अपितु प्रतिभागिनां पञ्जीकरणेन आर्थिकलाभो एपीआई जायते।

3. विश्वविद्यालये पाण्डुग्रन्थागारः वर्तते, यत्र शास्त्रसम्बद्धाः विविधाः 1697 पाण्डुग्रन्थाः विद्यन्ते। एते पाण्डुग्रन्थाः संस्कृतसाहित्यस्य विविधैः शास्त्रैः सम्बद्धाः वर्तन्ते। तेषु तन्त्रम्, वेदाः, उपनिषद्, पुराणानि, ज्योतिषम्, व्याकरणम्, वेदान्तः, साङ्ख्ययोगः, न्यायः, धर्मशास्त्रम्, साहित्यम्, सङ्गीतम्, आयुर्वेदादयः सन्ति प्रमुखाः। एतेषां संरक्षणदृष्ट्या विश्वविद्यालयस्य एकं सहमतिज्ञापनं जम्मूकश्मीरस्थ-श्रीसर्वज्ञपीठेन सह जातम्। जम्मूकश्मीरस्थ-श्रीसर्वज्ञपीठस्य शङ्कराचार्याणां निर्देशनेन (श्रीमद्जगद्गुरुशारदासर्वज्ञपीठम्, ग्राम शारदी, तहसील- अट्टमुकाम, ज़िला-नीलम (कृष्ण गंगा) पाक अधिकृत जम्मू काश्मीर क्षेत्र भारत संचालन केन्द्र, शंकराचार्य मन्दिर, शंकराचार्य पहाड़ी, डल झील, श्रीनगर, 190001, जम्मू कश्मीर, भारत) Flat no 303,Tower D-4 Ansal Aquapolis, Daundadera.-NH 24 Ghaziabad.(UP) - 201009) करगदस्य 1000 पाण्डुग्रन्थानां, 200 पुस्तकानां, त्रैमासिकशोधपत्रिकायाः शोधप्रभायाः 125 अङ्कानाञ्च स्कैनिंगकार्यं सम्पाद्य ई-ग्रन्थरूपेण रूपान्तरं जातम्। अवशिष्टपाण्डुग्रन्थानां ई-रूपान्तरं प्रक्रियाधीनं वर्तते। ई-ग्रन्थरूपेण रूपान्तरिता: ग्रन्था: archive.orh/deatils/@lal bahadur shastri university इत्यस्मिन् अन्तर्जालसूत्रे उपलब्धा: वर्तन्ते। एतेषां रूपान्तरितग्रन्थानाम् उपयोगः भविष्यत्काले शोधक्षेत्रे लाभप्रदो भविष्यति। ई-ग्रन्थरूपेण रूपान्तरितानां एतेषां ग्रन्थानां संरक्षणमपि भाविकालस्य कृते जातम् इति अस्य सहमतिज्ञापनस्य कश्चन् महान लाभः।

4. विश्वविद्यालयेन समये समये सम्भाषणशिविराणि, प्रशिक्षणवर्गाः, भाषाप्रबोधनकार्यशालाः, महाविद्यालयच्छात्रप्रशिक्षणवर्गाश्च आयोज्यन्ते। अस्मिन् सन्दर्भे संस्कृतभारती इत्यस्याः संस्थायाः सहयोगः सर्वदा भवति। संस्कृतभारत्याः सहयोगेन अस्माकं परिसरच्छात्राः सम्भाषणशिविराणि सञ्चालयितुं प्रशिक्षताः सन्तः विभिन्नेषु स्थानेषु गत्वा संस्कृतसम्भाषणशिविराणि सञ्चालयन्ति।
5. तिरुपतिस्थेन राष्ट्रियसंस्कृतविश्वविद्यालयेन प्रतिवर्षं प्रातिभसमारोहः आयोज्यते। एतस्य अङ्गतया छात्रेभ्यः विविधाः शैक्षिकाः सांस्कृतिकाः क्रीडापराश्च प्रतियोगिताः आयोज्यन्ते। अस्य समारोहस्य सम्पादने विश्वविद्यालयस्य परिपूर्णः सहयोगः भवति।
6. विश्वविद्यालय: अन्यसंस्थाभ्य: विविधपरीक्षानाम् आयोजने स्थानं परिकल्पयति यत्र विविधराज्यानां छात्रा: संस्थाम् आगत्य परीक्षा लेखनेन सहैव अस्माकं संस्थाया: परिचयमपि प्राप्नुवन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***3.7.2 Number of functional MoUs with institutions of national, international importance, other universities, industries, corporate houses etc. during the last five years (only functional MoUs with ongoing activities to be considered)***

***राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च सह कृतानाम् आर्थिकानुबन्धानां सङ्ख्या (केवलं प्रवर्तमानगतिविधीनामेव आर्थिकानुबन्धसहयोगपत्राणि स्वीकरणीयानि)***

**Answer:** 7

3.7.2.1 Number of functional MoUs with institutions of national, international importance, other universities, industries, corporate houses etc. year-wise during the last five years

विगतपञ्चवर्षेषु राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च सह कृतानाम् अधुना प्रवर्तमानानाम् आर्थिकानुबन्धानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 02 | 00 | 02 | 01 | 02 |

| File Description | Document |
|---|---|
| e-copies of the MoUs with institution/ industry/ corporate house(संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैः च हस्ताक्षरितानाम् आर्थिकानुबन्धपत्राणां वैद्युतप्रतिलिपयः।) | View Document |
| Details of functional MoUs with institutions of national, international importance, other universities etc. during the last five years (Data Template) (विगतपञ्चवर्षेषु राष्ट्रिय-अन्ताराष्ट्रियमहत्त्वशालिनीभिः संस्थाभिः, विश्वविद्यालयैः, औद्योगिकपरिवारैश्च सह संस्थया कृतानां प्रवर्तमानार्थिकानुबन्धपत्राणां विवरणम्। (दत्तांशप्रारूपानुगुणं सांस्थानिकदत्तांशः) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

***3.7.3 Provide details of the Joint publication Programme of the University in collaboration with other Universities/institutes and well established publishing firms***

### *विश्वविद्यालयस्य इतरविश्वविद्यालयैः/ लब्धप्रतिष्ठप्रकाशनसंस्थाभिः सह संयुक्तप्रकाशनकार्यक्रमस्य विवरणं प्रदीयताम्*

**Answer:**

विश्वविद्यालयस्य प्रकाशनानुभागस्य स्थापना ग्रन्थानां संरक्षणाय, सम्पादनाय अपि च प्रकाशनेन सहैव शोधच्छात्राणां सौविध्यार्थं जाता। अनेनानुभागेन संस्कृतभाषायाः विभिन्नप्राचीनपाण्डुलिपीनां सम्पादनं कृतम्। अयमानुभागः त्रैमासिकसन्दर्भितशोधपत्रिकायाः 'शोधप्रभायाः' सम्पादनं प्रकाशनञ्च करोति, यस्यां देशस्य विभिन्नविश्वविद्यालयानां प्रसिद्धविदुषां लेखाः एवं च शिक्षकाणां शोधच्छात्राणां च शोधपत्राणि प्रकाशयन्ते। अनेन अनुभागेन वार्षिकशोधकार्यशालानाम् आयोजनम् अतिरिच्य विविधविषयेषु संगोष्ठ्यः अपि आयोजयन्ते। विश्वविद्यालयानुदानायोगस्य विनियमानुसारं, शोधार्थिनां कृते शोधपद्धतिप्रशिक्षणम् अपि च शास्त्राध्ययनस्य विशिष्टपद्धत्या प्रशिक्षणमपि अनेन अनुभागेन प्रदीयते। विश्वविद्यालय: अस्य अनुभागस्य माध्यमेन विश्वविद्यालयस्य इमानि उद्देश्यानि पूरयति। संस्कृतस्य मौलिकग्रन्थानां, तट्टीकानामनुवादं तत्र च सम्बद्धसाहित्यस्य प्रकाशनं, प्रकाशिताप्रकाशितसामग्रीणां सम्वर्धनञ्च । शोधपत्रिका एवं शोधोपयोगाय अनुसन्धानप्रपत्रविषयसूची ग्रन्थसूची इत्यादेः प्रकाशनम्। पाण्डुलिपिसङ्कलनम्, संरक्षणम् एवं प्रकाशनम्, राष्ट्रियसंस्कृतपुस्तकालयस्य संग्रहालयस्य च निर्माणम्। संस्कृतपाण्डुलिपिसु प्रयुक्तलिपीनां प्रशिक्षणप्रबन्धनम्।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य वास्तुशास्त्रविभागेन नैसर्गिकशोधसंस्थाया: दिल्लीप्रभागेन सह मिलित्वा नैसर्गिकपञ्चाङ्गस्य 2078 (सन् 2021-22) इत्यस्य 2021 तमे ईसवीयाब्दे प्रकाशनं कृतम्। विगतदशवर्षेभ्य: नैसर्गिकशोधसंस्थाया: दिल्लीप्रभागेन नैसर्गिकपञ्चाङ्गस्य प्रकाशनं क्रियते। शोधदृष्ट्या अस्मिन् पञ्चाङ्गे वास्तुशास्त्रविभागस्य प्राध्यापका:अवैतनिकरुपे गणित-मुहूर्त- सम्पादनादिकं कार्यं कुर्वन्ति। पञ्चाङ्गमिदं निरयणमतेन हम्तुल्यं केतकीपक्षानुसरेण देहल्या: अक्षांश-रेखांशानुसारेण च निर्मीयते। अस्मिन् चित्रापक्षीयायनांशा:स्वीकृताः सन्ति। अस्य पञ्चाङ्गस्य संरक्षक: प्रधानसम्पादकश्च राष्ट्रपतिपुरस्कारेण सम्मानिता: प्रो. रामचन्द्रपाण्डेयवर्या: सन्ति, ये काशी-हिन्दू- विस्वविद्यालयस्य ज्योतिषविभागस्य अध्यक्षचरा: अपि च संस्कृतविद्याधर्मविज्ञानसङ्कायस्य सङ्कायप्रमुखा: आसन्।

एते नैर्सिकशोधसंस्थायाः महाभागाः राष्ट्रीयाध्यक्षाश्च सन्ति। तेषां मार्गदर्शने हरिद्वारस्थस्य उत्तराखण्डसंस्कृतविश्वविद्यालयास्य कुलपतिचरणां, वर्तमाने वास्तुशास्त्रस्य अध्यक्षमहोदयानां प्रो. देवीप्रसादत्रिपाठिवर्याणां गणितकार्ये सम्पादने च पञ्चाङ्गमिदं प्रकाश्यते। नैसर्गिकशोधसंस्थायाः मुख्यकार्यालयः 38 मानसनगर कॉलोनी वाराणस्यां स्थितोऽस्ति। संस्थारियं बौद्धिक-नवीनशोधकार्याभिवर्धने संलग्नरता वर्तते, अनया संस्थया 'नैसर्गिकी' संज्ञकशोधपत्रिका प्रकाश्यते। संस्थाद्वारा ट्रिनीडडदेशस्य अक्षांश-रेखांशानामुपरि आधारितं

'काशिका ट्रिनीडाड पञ्चाङ्गम्' अपि प्रकाशितम्। नैकानि ग्रन्थरत्नानि अपि अनया संस्थया प्रकाशितानि। अनेन प्रकारेण शोधन्वेषणक्षेत्रे नित्यं संलग्नेयं संस्था वर्तते। वास्तुविभागः अनया संस्थया सह शोधक्षेत्रे निरन्तरं संलग्नो वर्तते।

जम्मूकश्मीरस्थ-श्रीसर्वज्ञपीठस्य शङ्कराचार्याणां निर्देशनेन (श्रीमद् जगद् गुरु शारदा सर्वज्ञ पीठम्, ग्राम शारदी, तहसील अट्टमुकाम, ज़िला नीलम (कृष्ण गंगा) पाक अधिकृत जम्मू काश्मीर क्षेत्र भारत संचालन केन्द्र, शंकराचार्य मन्दिर, शंकराचार्य पहाड़ी, डल झील, श्रीनगर, 190001, जम्मू कश्मीर, भारत) Flat no 303,Tower D-4 Ansal Aquapolis, Daundadera.-NH 24 Ghaziabad.(UP) - 201009) करगदस्य 1000 पाण्डुग्रन्थानां, 200 पुस्तकानां, त्रैमासिकशोधपत्रिकायाः शोधप्रभायाः 125 अङ्कानाञ्च स्कैनिंगकार्यं सम्पाद्य ई-ग्रन्थरूपेण रूपान्तरं जातम्। अवशिष्टपाण्डुग्रन्थानां ई- रूपान्तरं प्रक्रियाधीनं वर्तते। ई-ग्रन्थरूपेण रूपान्तरिता: ग्रन्था: archive.org/deatils/@lal bahadur shastri university इत्यस्मिन् अन्तर्जालसूत्रे उपलब्धा: वर्तन्ते।

***The English version is available in the additional information link.**

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

**4.Infrastructure and Learning Resources**

**4.1 Physical Facilities**

***4.1.1 The institution has adequate facilities for teaching- learning. viz., classrooms, laboratories, computing equipment, etc.***

***कक्ष्याप्रकोष्ठः, प्रयोगशाला, सङ्गणकयन्त्रादीनि शिक्षणाधिगमसम्बन्धीनि भौतिकसौविध्यानि संस्थायामुपलभ्यन्ते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः **10.65 (एकड) क्षेत्रपरिमितः।** तत्र Built up Area भवति **22589.01** Sq. Mtr. अस्मिन् विश्वविद्यालये पारम्परिकशिक्षणप्रशिक्षणार्थम् अध्ययन-अध्यापनक्षेत्रे पञ्च सङ्कायाः सन्ति। तथाहि-वेदवेदाङ्ग-साहित्यसंस्कृति-दर्शन-शिक्षा-आधुनिकविद्यासङ्कायाः। केन्द्रीयविश्वविद्यालयानन्तरं सङ्कायाः पीठरूपेण प्रतिष्ठिताः।

**कक्षाप्रकोष्ठाः- 114**

- वेदवेदांगपीठे वेद-पौरोहित्य-नव्यव्याकरण-प्राचीनव्याकरण-धर्मशास्त्र-फलितज्योतिष-सिद्धान्तज्योतिष-वास्तुशास्त्राणामध्ययनमध्यापनञ्च भवति। वेदस्य पौरोहित्यस्य च अध्ययनाध्यापनार्थमेकं नवीनं भवनं विद्यते "बृहस्पतिभवनम्" द्वितीयतले च पौरोहित्यस्य अध्ययनमध्यापनञ्च भवति। स्वर्णजयन्तीसदनस्य द्वितीयतले प्रायशः नव्य-प्राचीनव्याकरणयोः धर्मशास्त्रविभागस्य, फलित-सिद्धान्तज्योतिषयोः वास्तुशास्त्रस्य कृते च प्रकोष्ठाः निर्धारिताः सन्ति। निर्धारितेषु प्रकोष्ठेषु तत्तच्छास्त्राणाम् अध्ययनमध्यापनञ्च भवति।
- साहित्य एवं संस्कृति संकायान्तर्गतं साहित्य-प्राकृतभाषा-पुराणेतिहासानां विभागाः वर्तन्ते।
- शैक्षिकसदनस्य प्रथमतले पुराणविभागस्य कृते प्रकोष्ठद्वयम्, पुनश्च सम्प्रति पुराणविभागस्य कृते सारस्वतसदनस्य चतुर्थतले एकः प्रकोष्ठः निर्दिष्टोऽस्ति।
- एवञ्च साहित्यविभागस्य कृते तत्रैव चत्वारः प्रकोष्ठाः द्वितीय तले एकः पुनश्च साधनासदनस्य प्रथमतले (3) प्रकोष्ठाः- निर्धारिताः सन्ति। सर्वं सम्मिल्य साहित्यविभागे नव (9) प्रकोष्ठाः सन्ति। प्रकोष्ठद्वये प्राकृतविभागस्य अध्ययनं भवति।
- शैक्षिकसदने द्वितीयतले दर्शनपीठस्य कृते प्रकोष्ठाः निर्दिष्टाः सन्ति। तत्र नव्यन्याय प्राचीनन्यायवैशेषिकयोः कृते चत्वारः प्रकोष्ठा विशिष्टाद्वैतवेदान्तस्य कृते द्वौ प्रकोष्ठौ अद्वैतवेदान्तस्य कृते एकः प्रकोष्ठः, मीमांसायाः कृते द्वौ प्रकोष्ठौ, जैनदर्शनस्य कृते त्रयः प्रकोष्ठाः, सांख्ययोगदर्शनस्य कृते त्रयः प्रकोष्ठाः सर्वदर्शनस्य कृते चत्वारः प्रकोष्ठाः, योगस्य कृते त्रयः प्रकोष्ठाः निर्दिष्टाः सन्ति। साधनासदनस्य भूतले एकः प्रकोष्ठः साधनासदनस्य तृतीतले कक्ष्यासंचालनार्थं त्रयः दीर्घाकाराः प्रकोष्ठाः निर्दिष्टाः सन्ति। योगस्य प्रातःकालीनप्रायोगिकशिक्षणाय साधनासदनस्य विशालाः प्रकोष्ठाः (Hall) निर्दिष्टाः सन्ति।

- सारस्वतसाधनाभवनस्य द्वितीयतले आधुनिकविषयपीठान्तर्गतशोधविभागस्य कक्षः अस्ति। शोधविभागस्य कक्ष्या सारस्वतसाधनासदनस्य तृतीयतले च प्रचलति। द्वितीयतले संगणकस्य अध्ययनमध्यापनं प्रचलति। तत्रैव सामाजिकविज्ञानस्य एवञ्च शैक्षिकसदनस्य प्रथमतले हिन्दीविभागस्य अंग्रेजी-विभागस्य च कृते कक्षा निर्धारिताः सन्ति। हिन्दू अध्ययनस्य कक्षा साधनासदनस्य तृतीतले प्रचलति।
- स्वर्णजयन्तीसदनस्य तृतीयतले चतुर्थतले च शिक्षापीठस्य कृते प्रकोष्ठाः निर्दिष्टाः सन्ति। तत्रैव शिक्षाशास्त्रस्य शिक्षाचार्यस्य च अध्ययनमध्यापनञ्च प्रचलति।
- परीक्षाविभागः सारस्वतसाधनासदनस्य तृतीयतले अस्ति। तत्रैव एकः प्रकोष्ठः आन्तरिकगुणवत्ता-आश्वासन प्रकोष्ठस्य (IQAC) कृते निर्धारितोऽस्ति।

**प्रयोगशाला-**

1. अस्माकं विश्वविद्यालये **संगणकप्रशिक्षणार्थं सारस्वतसाधनासदने** तिस्रः आधुनिकोपकरणैः सुसज्जिता प्रयोगशालाः विद्यन्ते प्रत्येकं प्रयोगशालायां क्रमशः- 60, 56, 38 छात्राणां प्रशिक्षणार्थं स्थानं विद्यते।
2. **ज्योतिषवास्तुविभागीयच्छात्राणां** कृते प्रशिक्षणार्थं विश्वविद्यालये एका वेधशालाऽपि विद्यते।
3. **कर्मकाण्डविभागीयच्छात्राणां** प्रशिक्षणार्थं कर्मकाण्डविभागे देवसदने च यज्ञशालात्मिका प्रयोगशाला विद्यते।
4. **शिक्षापीठे मनोविज्ञानप्रयोगशाला शैक्षणिकतकनीकिप्रयोगशाला भाषाप्रयोगशाला सामाजिकाध्ययनप्रयोगशाला** च विद्यते। मनोविज्ञानप्रयोगशालायाः शैक्षणिकतकनीकिप्रयोगशालायाश्च संस्थापना मार्च मासे 2007 तमे ख्रीष्टाब्दे सञ्जाता। मनोविज्ञानप्रयोगशालायामुपवेशनस्य स्थानं (30) अस्ति। तत्र त्रिंशत् छात्राः अत्र सम्भूय प्रयोगशालायाः उपयोगं कर्तुं समर्थाः भवन्ति। प्रायशः प्रतिदिनं पञ्चदश छात्राः तस्याः प्रयोगशालायाः उपयोगं कुर्वन्ति। अत्र प्रयोगस्य संख्या एकोनसप्तत्युत्तरशतम् (169) संसाधनञ्च पञ्चविंशतिः (25) सन्ति। शिक्षाचार्यस्य शिक्षाशास्त्रस्य च पाठ्यक्रममाधारीकृत्य वारं एकोनसप्तत्युत्तरशतम् (169) प्रयोगमभूत्। शिक्षातकनीकिप्रयोगशालायां चतुश्चत्वारिंशत् (44) स्थानानि विद्यते। आधुनिकतकनीकिमाधारीकृत्य प्रायोगिकपाठ्यक्रमस्य पी.पी.टी. इत्यादेः निर्माणं कर्तुं समर्थाः भवन्ति। 2013 तमे ख्रीष्टाब्दे भाषाप्रयोगशालायाः संस्थापना सञ्जाता। अत्र सप्तपञ्चाशत् (75) छात्राणां स्थानं विद्यते।

**संगणककेन्द्रम्-**

विश्वविद्यालये संगणकयन्त्रादीनि संगणकप्रयोगशालाश्च वर्तन्ते। तत्र प्रयोगशालायामाधुनिक-संगणकयन्त्रस्य विद्यमानता वर्तते। स्मार्टकक्षाणां संगणकप्रयोगशालानाञ्च सञ्चालनमिदं केन्द्रं करोति। स्मार्टकक्षाणां संख्या-23। विश्वविद्यालयस्य शैक्षणिक-तदितरकार्यसम्पादनाय पीठाध्यक्षाणां, विभागाध्यक्षाणां, प्रशासकानामधिकारिणाञ्च कृतेऽऽधुनिकतकनीकसम्बद्धं संगणकयन्त्रं प्रदत्तमस्ति।

**शिक्षणाधिगमकेन्द्रम्-** पारम्परिकविषयाणामध्यापनं पारम्परिकरीतिमनुसृत्यैव भवति। तत्र श्यामपट्टादिप्रयोगेण सहाधुनिकतकनीक्यादियन्त्राणामुपयोगः क्रियते, तेनैव माध्यमेन-स्मार्टकक्षादि (Smart Class Room) प्रयोगेण सचित्रमाध्यमेन खण्डान्वयविधिना दण्डान्वयविधिना चाध्ययनमध्यापनञ्च प्रचलति। मेधान्यूनछात्राणां कृतेऽवशिष्टातिरिक्तसमयं स्वीकृत्याध्यापकाः तान् प्रशिक्षयन्ति। एतादृशं सौविध्यं परिलक्ष्य दिल्लीस्थविश्वविद्यालयान्तरेषु छात्राः अत्राध्यापनार्थं समागच्छन्ति। पुनश्च अंग्रेजी-हिन्दी-समाजशास्त्र-योग (एम.ए.) विभागीयछात्राणां कृतेऽऽयोजितप्रशिक्षणार्थं शैक्षणिकसदनस्य द्वितीयतले त्रयः स्मार्टकक्षाः विद्यन्ते। कक्षसंख्या 126, 127, 128 कक्ष्यायां क्रमशः प्रत्येकं कक्ष्ये 35 छात्राणामुपवेशनस्य स्थानं विद्यते। तद्द्वारेणापि अध्ययनमध्यापनञ्च भवति। शिक्षापीठस्य छात्राणां प्रशिक्षणार्थं विशिष्टकक्षाद्वयं 308, 309 इति (Smart Room) निर्दिष्टं विद्यते यत्र प्रत्येकं कक्ष्ये 70 छात्राणां स्थानं विद्यते। शोधच्छात्राणां कृते एकः विशिष्टाधुनिककक्षः निर्दिष्टः विद्यते। यत्र 60 छात्राणां स्थानं विद्यते। विशेषतः शिक्षकाणां छात्राणाञ्च कृते प्रशिक्षणार्थं विशिष्टाधुनिककक्षः (Smart Room) TLC (Teaching Learning Centre) इत्यस्य कृते शिक्षापीठान्तर्गते 35 स्थानविशिष्टं कक्ष्या निर्दिष्टः विद्यते। अत्र Digital, Interpodium, इत्यादेः सुविधा विद्यते। एतदतिरिच्य आहारसदनस्य सौविध्यमपि विश्वविद्यालयीयानां सर्वेषां कृते विद्यते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|

| | |
|---|---|
| Any additional information अतिरिक्तसूचनानां सन्धानम् | View Document |
| Link for additional information अतिरिक्ताः सूचनाः | View Document |

*4.1.2 The institution has adequate facilities for*

*1. Seminar/ Conference Hall with infrastructural facilities*

*2. Auditorium for cultural activities*

*3. Laboratory for Functional Sanskrit*

*4. Yajnashala*

*5. Observatory*

*6. Language Laboratory*

*7. Psychology Laboratory*

*8. Meditation Centre*

*9. Sports, games (indoor, outdoor, gymnasium, etc)*

*10. Artifacts Museum Ancient Arts/ Objects' Museum*

*11. Heritage Museum*

*12. Manuscript Resource Centre (MRC)*

*13. Manuscript Conservation Centre(MCC)*

*14. Recording Studio/ e-P.G.Pathshala Facilities*

*15. Yoga Training and or Therapy Centre with modern equipments*

*16. Liasion with Bharat Vani Portal*

*17. Sanskrit-Science/ Agama Exhibition Facilities*

*संस्थायाम् अधोनिर्दिष्टानि सौविध्यानि पर्याप्तानि सन्ति।*

*1. मूलसौविध्ययुतं सङ्गोष्ठीभवनम्*

*2. सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्*

*3. प्रायोगिकसंस्कृतप्रकोष्ठः।*

*4. यज्ञशाला।*

*5. वेधशाला।*

*6. भाषाप्रयोगशाला।*

*7. मनोविज्ञान-प्रयोगशाला।*

*8. ध्यानकेन्द्रम्।*

*9. क्रीडासौविध्यानि (अन्तर्द्वार-बहिर्द्वार-देहदार्ढ्यादिकम्)*

*10. कलाकृतिसङ्ग्रहालयः। (प्राचीनकलानां/ वस्तूनां सङ्ग्रहालयः)*

*11. प्राचीनशिल्पकलासङ्ग्रहालयः*

*12. पाण्डुलिपिसंसाधनकेन्द्रम् (एम्.आर्.सि.)*

*13. पाण्डुलिपिसंरक्षणकेन्द्रम् (एम्.सि.सि.)*

*14. ध्वनिमुद्रणालयः/ इ-पी.जी-पाठशालासुविधाः।*

*15. योगशिक्षणकेन्द्रम्/ आधुनिकोपकरणयुक्तं योगचिकित्साकेन्द्रञ्च।*

*16. भारतवाणीपोर्टल् इत्यनेन सहयोगः।*

*17. संस्कृतविज्ञान-आगमप्रदर्शनसुविधाः।*

**Answer:**

**(1) मूलसौविध्ययुतं संगोष्ठीभवनम्-** विश्वविद्यालये त्रयः आधुनिकतकनीकिसम्बद्धसंगोष्ठीकक्षाः विद्यन्ते । तत्र सुप्रसिद्धमस्ति वाचस्पतिसभागारम् तत् सर्वथा आधुनिकतकनीक्या सम्बद्धम्। प्रायशः तत्र अशीति (80) अध्यापकाः छात्राश्च सम्भूय उपवेष्टुं समर्थाः भवन्ति । तत्पार्श्वे पञ्चचत्वारिंशत् (45) कृते एक: संगोष्ठीकक्ष:, एकः कक्षः च पञ्चविंशतिः (25) स्थानविशिष्टः आधुनिकतकनीकिसम्बद्धः TLC अन्तर्गतः विद्यते । एतदतिरिच्य कुलपतीनां कृते कुलसचिवानां कृते च क्रमशः 20, 45 स्थानयुक्तौ द्वौ समितिकक्षौ निर्दिष्टौ विद्येते । तौ अपि आधुनिकतकनीकिसम्बद्धौ। पुनश्च शिक्षणाधिगमकेन्द्रस्य TLC योजनायाः, प्राशासनिकानां च एकैक: आधुनिकतकनीकियुक्तः कक्ष आवण्टितः विद्यते। दर्शनपीठस्य कृते एक सामान्यसमितिकक्षः निर्धारितोऽस्ति। आवश्यकतानुसारं कालानुसारेण समितिकक्षाणामुपयोगः संगोष्ठ्यर्थं क्रियते।

**(2) सांस्कृतिकादिकार्यक्रमाणां कृते सभागृहम्-** स्वर्णजयन्ती सदनस्य अधोभागे (Basement,13000 SQ.) एकं विशालं भव्यं आधुनिकतकनीकियुक्तं सभागृहं विद्यते। यत्र विश्वविद्यालयीयतत्तद्विभागीयच्छात्राणां सांस्कृतिककार्यक्रमाः भवन्ति । योगदिवसे, तत्तत्प्रदेशस्य स्थापनादिवसे वार्षिकानुषङ्गिककार्यक्रमेषु च छात्राः अध्यापकाश्च सम्मिल्य पृथक् पृथग् रूपेण च कार्यक्रमा आयोज्यन्ते, तेषां सांस्कृतिक-कार्यक्रमाणामायोजनार्थं तादृशं सभागृहं सापेक्षितमस्ति ।

**(3) प्रायोगिकसंस्कृतप्रकोष्ठः-** विशिष्टः तादृशः प्रकोष्ठः पृथग्रूपेण यद्यपि निर्दिष्टः तथापि सामान्याध्ययनकक्षेषु, आवश्यकतानुसारं विशिष्टाध्ययनप्रकोष्ठेषु च प्रायोगिकसंस्कृतस्य प्रशिक्षणं छात्राणां कृते विश्वविद्यालयाध्यापकपक्षतः बाह्यसंस्थापक्षतश्च दीयते ।

**(4) स्मार्तयज्ञशाला-** देवसदने एका विस्तृता यज्ञशाला विद्यते। यस्याः प्रतिदिनं आभ्यन्तरीयाः छात्राः अध्यापकाः, बाह्याश्च उपयोगं कुर्वन्ति । यत्र पारम्परिकरीत्या यज्ञकुण्डं विनिर्मितमस्ति । अपरञ्च कर्मकाण्डविभागस्य वेदविभागस्य च छात्राणां प्रशिक्षणार्थं सामान्यतः बृहस्पतिभवनस्य द्वितीयतले एका लघु यज्ञशाला विद्यते । यत्र पारम्परिकपद्धत्या अनुष्ठानस्य प्रशिक्षणार्थं यज्ञाङ्गरूपेण सर्वतोभद्रमण्डल- चतुर्थमण्डल- वास्तुमण्डल - नवग्रहमण्डलादिकं निर्मितमस्ति । पारम्परिकरीत्या गुरु-शिष्यपरम्परया तेषां छात्राणां प्रशिक्षणं भवति।

**(5) श्रौतयज्ञशाला-** स्मार्तयज्ञशालायाः पार्श्वे एकाः श्रौतयज्ञशालाप्यस्ति। यत्र अग्निहोत्रादयः इष्टयः भवन्ति।

**(6) वेधशाला-** विश्वविद्यालये सिद्धान्तफलित-वास्तुज्योतिषविभागीयच्छात्राणां कृते व्यावहारिकज्ञानार्थं प्रायोगिकज्ञानार्थञ्च एका विशिष्टावेधशालानिर्मिता विद्यते । अस्याः वेधशालायाः स्थापना पं. कल्याणदत्तशर्ममहोदयैः कृता । यत्र कर्कवलय- तुलावलय-मकरवलयादीनां निर्माणमस्ति येन राशिगतग्रहविषयकं ज्ञानं नाडीवलययन्त्रेण स्थानीयसमयविषयकं ज्ञानं च प्राप्तुं शक्यते, एवञ्च भारतीयतारामण्डले नतांश अक्षांश- क्रान्त्यंशादीनामन्वेषणं कर्तुं शक्यते ।

**(7) भाषाप्रयोगशाला-** शिक्षापीठस्य तत्त्वावधाने सततं प्रचलति । अस्यां प्रयोगशालायां संगणकयन्त्रस्य श्रवणयन्त्रस्य चेत्यादि अपेक्षिताधुनिकयन्त्राणां व्यवस्था विद्यते । यस्य विस्तृतं विवरणं 4/1/1 मध्ये प्रदत्तमस्ति ।

**(8) मनोविज्ञानप्रयोगशाला-** इयं प्रयोगशाला शिक्षाविभागीयाध्यापकानां छात्राणां प्रशिक्षकाणां समुपयोगार्थं शिक्षापीठस्य तत्त्वावधाने सततं प्रचलति । मनोविज्ञानमाधारिकृत्य ये छात्राः अध्ययनं कुर्वन्ति तेषां कृते विशेषतया मनोविज्ञानप्रयोगशालायाः व्यवस्था निरन्तरं प्रदीयते। इयं च प्रयोगशाला आधुनिकतकनीक्या सुसज्जिता अस्ति।

**(9) सामाजिकाध्ययनप्रयोगशाला-** भारतीयसामाजिकज्ञानविज्ञानस्य प्रयोगात्मकाध्ययनस्य सम्पादनार्थं शिक्षापीठान्तर्गतं इयं प्रयोगशाला निरन्तरं कार्यक्रमं सम्पादयति।

**(10) ध्यानकेन्द्रम्-** सारस्वतसाधनासदनस्य प्रथमतले योगकेन्द्रमस्ति । योगकेन्द्रस्य निर्देशने प्रात:काले प्रतिदिनं योगदर्शनान्तर्गत प्रशिक्षणं भवति। तदन्तर्गतत्वेन प्राणायामादिमुद्रायाः ध्यानमुद्रायाश्च प्रशिक्षणं छात्राणां कृते दीयते ।

**(11) क्रीडासौविध्यानि-** विश्वविद्यालये बहूद्देशीयक्रीडानिमित्तं स्थलं विद्यते। केन्द्रीयग्रन्थालयस्य पार्श्वे बैडमिन्टनक्रीडंनस्य स्थानं, मुख्यद्वारपार्श्वे वालीवालक्रीडनस्य स्थानं मुख्यक्रीडापरिसरे क्रिकेटक्रीडनस्य, तत्पार्श्वे च वास्केटकन्दुकक्रीडनस्य स्थानं निर्दिष्टमस्ति । प्रायशः सायं प्रातश्च छात्राणां कृते तत्तत्क्रीडनेषु विशेषज्ञैरध्यापकैः प्रशिक्षणं दीयते येन अस्माकं विश्वविद्यालयीयाः छात्राः विश्वविद्यालयान्तरेषु प्रतिभागं गृहीत्वा स्वीयं प्रातिभं प्रदर्श्य पुरस्कृताः भवन्ति ।

**(12) पाण्डुलिपिसंसाधनकेन्द्रम्-** पाण्डुलिपिसंरक्षणकेन्द्रस्य च संचालनं शोधविभागेन क्रियते । प्रायशः तत्र पाण्डुलिपयः संस्कृतपत्र-भूर्जपत्र-कर्गदपत्र- ताडपत्राणि च सन्ति। 1697 पाण्डुलिपयः संरक्षिताः सन्ति। शारदालिपि, ब्राह्मलिप्यादि सम्बद्धाः पाण्डुलिपयः विद्यन्ते। पाण्डुलिपिं स्वीकृत्य शोधच्छात्राः शोधकार्यं सम्पादयन्ति।

**(13) आभासीयकक्ष**: (Virtual Class Room Studio) **-** अस्य संगणककेन्द्रस्य तत्त्वावधाने प्रचलति विश्वविद्यालये स्वयं पटलस्य कृते पञ्चदश (15) स्थानविशिष्टः एक: आभासीयकक्ष: विद्यते। यत्र संस्कृत-हिन्दी-अंग्रेजीभाषासु ध्वन्यड्कनं विडियोनिर्माणञ्च भवति, येन छात्राणां गवेषकाणां महान् उपकारः भवति ।

**(14) योगप्रशिक्षणकेन्द्रम्- "शरीरमाद्यं खलु धर्मसाधनम्"-** इतिकालिदासोक्ते: सार्थकत्वप्रतिष्ठापनाय योगविभागस्यानुकूल्येन योगशिक्षणकेन्द्रस्य परिचालनं भवति । सारस्वतसाधनासदनस्य प्रथमतले सुयोग्यैराचार्यैः विश्वविद्यालयीयानां कर्मचारिणां, छात्राणामध्यापकानाञ्च कृते प्रतिदिनं प्रातः प्रशिक्षणं दीयते एवं छात्रावासेऽपि तादृशी व्यवस्था परिलक्ष्यते यद्यपि साक्षात् योगचिकित्साकेन्द्रं नास्ति तथापि भिन्न-भिन्नव्यायाम-प्राणायामयोगाङ्गानां अभ्यासात्मकं प्रशिक्षणं दीयते । फलतः कोरोनाकाले विश्वविद्यालयाध्यापकानां कर्मचारिणां छात्राणाञ्च तादृशी न कापि हानिः संजाता ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Videos and photographs (geotagged) स्थलनिर्देशनसहितानि चित्राणि/चित्राङ्कणम् | View Document |
| Any additional Information अतिरिक्ताः सूचनाः | View Document |

***4.1.3 The institution has adequate facilities like health centre, bank, ATM, post office, theatre, women centre, counseling centre and cultural activities centre etc.***

***संस्थायाम् आरोग्यकेन्द्रं, वित्तकोशः, स्वयंचालितधनदयन्त्रम्, पत्रालयः, रङ्गमण्डपः, महिलाकेन्द्रम्, परामर्शकेन्द्रम् सांस्कृतिककार्यक्रमकेन्द्रम् इत्यादीनि पर्याप्तरूपेण उपलभ्यन्ते।***

**Answer:**

**(1) आरोग्यकेन्द्रम्-**

विश्वविद्यालयपरिसरे एकमारोग्यकेन्द्रं विद्यते। तत्र छात्राः अध्यापकाः कर्मचारिणश्च सततमुपचारं प्राप्नुवन्ति। यत्र स्त्रीरोगविशेषज्ञः, दन्तरोगविशेषज्ञश्च दिवसद्वयमागत्य छात्राध्यापककर्मचारीणामुपचारं कुर्वन्ति। विशेषचिकित्साविशेषज्ञ: सोमवासरत: शनिवासरं यावत् आगत्य स्वीयां सेवां प्रयच्छन्ति। भारतीयपारम्परिकनिदानमनुसृत्य आयुर्विद: होम्योपैथिकाश्च चिकित्सकाः अपि स्वीयनिर्धारितसमयानुसारं समेषामुपचारं कुर्वन्ति। आपातकालीनस्थिते समाधानार्थं चिकित्सकाः स्वीयं सहयोगं सततं प्रयच्छन्ति। विस्तारकादेः (Stretcher) सुविधाऽस्ति। विश्वविद्यालयस्य पार्श्वे यानि यानि चिकित्साकेन्द्रानि मेडिओर (राकलैण्ड), सीताराम भरतिया, स्पटिक्स, एम्स आदीनि सन्ति तैः सह विश्वविद्यालयेन विशेषः अनुबन्धः विहितः, येन समेषामावश्यकतानुसारं तत्तच्चिकित्साकेन्द्रेषु उपचाराः भवन्त्येव।

(2) **वित्तकोषः स्वयंचालितधनदयन्त्रञ्च-** विश्वविद्यालयस्य अत्यन्तसन्निधौ वित्तकोष्ठः (Banks) विद्यते। विश्वविद्यालयस्य मुख्यद्वारस्य सन्निकटे "इण्डियनबैंक" विद्यते अनेन सह विश्वविद्यालयस्य कृताभिसन्धिः वर्तते। तत्सम्मुखे HDFC बैंक ICICI बैंक ATM सौविध्ययुतं वर्तते।

(3) **पत्रालयः-** विश्वविद्यालयस्य नातिदूरे NCERT एवं JNU मध्ये पत्रालयकेन्द्रं विद्यते। तत्रापि सौहार्दपूर्णवातावरणेन विश्वविद्यालयसम्बद्धकार्याणि प्रचलन्ति। विश्वविद्यालयस्य सन्निकटे हौजखासमध्ये मुख्यपत्रालयः वर्तते, स च पत्रालयः प्राथम्येन विश्वविद्यालयस्य कार्यं निर्वहति।

(4) **रङ्गमण्डपम्ः-** आवश्यकतानुरूपं स्वर्णजयन्तीभवनस्य भूतले निर्मितमण्डपस्य उपयोगं कुर्वन्ति। क्रीडाङ्गणे च रङ्गमण्डपं निर्माय स्वीयं कार्यं सम्पादयन्ति।

(5) **महिलाकेन्द्रम्-** स्वर्णजयन्तीसदनस्य अधो भागे (Basement) महिलाकेन्द्रं स्थापितं विद्यते। इदं केन्द्रं मुख्यतया विश्वविद्यालयपरिसरे महिलानां कदाचित् यदि कापि समस्या आगच्छति तस्याः समस्यायाः निवारणं सौहार्दवातावरणेन महिलाकेन्द्रं करोति। **"यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवता"** इत्यस्याः सूक्तेः सार्थकतामपि प्रतिपादयति इदं केन्द्रम्।

(6) **परामर्शकेन्द्रम्-** स्वर्णजयन्तीसदनस्य द्वितीयले एकमाधुनिकतकनीकिसंयुतं परामर्शकेन्द्रं विद्यते। इदं केन्द्रं सौहार्दपूर्णवातावरणेन शैक्षिककार्यं प्राशासनिकं कार्यं छात्रोन्मुखीकार्यं च सञ्चलेत् तदर्थं परामर्शं प्रयच्छति। छात्राणां सर्वकारीययोगदानप्रक्रियायां सर्वविधसमस्यायाः समाधानार्थं च परामर्शं प्रयच्छति इदं केन्द्रम्।

(7) **सांस्कृतिककार्यक्रमकेन्द्रम्-** सांस्कृतिककार्यक्रमसंघटनाय स्वर्णजयन्तीसदनस्य भूतलं सारस्वतसाधनासदनस्य प्रथमतलञ्च उपयुज्यन्ते विश्वविद्यालयपरिवारैः।

**अन्यातिरिक्ता सूचना-** विश्वविद्यालयपरिसरे अन्यानि साधनानि विद्यन्ते। तथाहि-

(1) **आहारसदनम् (Canteen) -** अस्मिन्नेव परिसरे आहारस्यापि व्यवस्था विद्यते। एतादृशीव्यवस्था तृतीयपक्षेण भोजनव्यवस्थापकेन क्रियते। तत्र अत्यल्पधनेन विभिन्नप्रकारकं दक्षिणोत्तरभारतीयम् भोजनम् अल्पाहारश्च प्राप्यते । आहारसदने एका विशिष्टा पाकशाला विद्यते। एतत् सौविध्यं कार्यदिवसेषु प्रातः 9.30 तः सायं 6.00 वादनपर्यन्तं समुद्घाटितं भवति।

(2) **दिव्याङ्गजनसौविध्यम्-** विश्वविद्यालये दिव्यांगजनसौविध्याय सततं नवव्यवस्थां कल्पयति। तेषां सौख्यसुलभार्थं च संचलनासन्दस्य (Wheelchair), रैम्प (Ramp), लिफ्ट (Lift), शौचालयादेः मूलभूतव्यवस्था विद्यते।

(3) **विश्रान्तिनिलयः (Guest House)-** परिसरेऽस्मिन् द्वितलविशिष्टमतिथिगृहं विद्यते। अस्मिन् अष्टौ (8) प्रकोष्ठाः आधुनिकतकनीकिसम्बद्धाः, प्रकोष्ठद्वयञ्च विशेषतकनीकिसम्बद्धं विद्यते। तत्र भोजनालयप्रकोष्ठः कार्यालयप्रकोष्ठश्च पृथग्रूपेण विद्यते।

(4) **सौर-ऊर्जा-संयन्त्रम्-** भारतसर्वकारस्य ऊर्जामन्त्रालयस्य नियमानुकूल्येन तदीय-एजेन्सी द्वारा परिसरे विद्यमानानां भवनस्योपरि सौर-ऊर्जा-यन्त्रं स्थापितमस्ति । येन विद्युतप्रवहने प्रसारणे च विश्वविद्यालयस्य कृते आनुकूल्यं भवति । पर्यावरणस्य च संरक्षणं भवति।

(5) **वर्षाजल-संचयनप्रणाली-** परिसरे चतुर्षु भिन्नस्थानेषु सप्त-वर्षाजलसञ्चयनस्थानं विद्यते येन व्यवहारानुकूल्येन सह पर्यावरणसंरक्षणोपायभूतानां वृक्षादीनां सेचनं भवति।

**(6) मनोरञ्जनकक्षः-** विश्वविद्यालयस्य महिला कार्यकर्तृभ्यः मनोरञ्जनाय मनोरंजनकक्षः निर्मितोऽस्ति। रिक्तसमये तत्र महिलानां विश्रान्तिः स्वयविषयाध्ययनम् अनौपचारिकं सम्भाषणं वार्तापत्रकादीनामध्ययनमनौपचारिकसम्भाषणञ्च कर्तुं शक्यते।

**(7) मलजलशोधनसंयन्त्रम्-** 120 कि.ली. मितं प्रतिदिनं क्षमतायुतमेकं नवीनतमं मलजलशोधनसंयन्त्रं परिसरे स्थापितमस्ति । परिसरीयपाकशालासु स्नानागारेषु शौचालयादिषु च समुत्पन्नस्य अवशिष्टस्य जलस्य उपयोगः आवासीयेतरभवनानां स्वच्छतायै नूतनभवननिर्माणाय, उद्यानकार्यार्थञ्च क्रियते।

**(8) वाई-फाई-सौविध्यम् (Wi-Fi)-** विश्वविद्यालयस्य परिसरः वाई-फाई समन्वितः विद्यते। सर्वे छात्राः अध्यापकाः कर्मचारिणश्च उपयोगं कुर्वन्ति।

**(9) शिशुकेन्द्रम्-** विश्वविद्यालयस्य आवासीयपरिसरे शिशुकेन्द्रं विद्यते। यस्य सञ्चालनं महिला करोति।

**(10) वाहनसंस्थापनस्थलम् (Parking)-** विश्वविद्यालयस्य मुख्यद्वारसमीपे वाहनसंस्थापनस्थलस्योपयोगः सर्वैः क्रियते।

**(11) वैटरीचार्ज-संयन्त्रम्-** विश्वविद्यालयस्य परिसरे अर्थात् छात्रावासे, T-3, T-4, T-5 आवासीयस्थले च इदं संयन्त्रं स्थापितं विद्यते।

**(12) PNG सौविध्यम्-** विश्वविद्यालयस्य आवासीयभोजनालये, विश्रान्तिनिलयस्य भोजनालये आहारसदने च PNG सौविध्यं विद्यते।

**(13) सबस्टेशन-सौविध्यम्-** परिसरे सबस्टेशन स्थापितं विद्यते। यत्र 11-Kb, 2 डीजलयन्त्रं विद्यते।

**(14) व्यायामशाला (Gym) -** विश्वविद्यालयस्य परिसरे आधुनिकतकनीकी सुसज्जिता एका व्यायामशाला विद्यते।

**(15) छात्रावासव्यवस्था (Boy's hostel) -** बालकानां कृते विद्यते।

**(16) आवासीयव्यवस्था-** शैक्षणिक-गैरशैक्षणिकयोः कृते उपलब्ध्यनुसारं दीयते। एवञ्च सुरक्षासुविधा, CC TV, छात्र-छात्रयोः कृते सामूहिककक्षसुविधा च अस्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information | View Document |
| link for additional information | View Document |

***4.1.4 Percentage of classrooms and seminar halls with ICT - enabled facilities such as smart class, LMS (Learning Management System), etc. (preceeding academic year data)***

***सूचनासंप्रेषणप्रविधf-स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्वलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च प्रतिशतता। (गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 20.18

4.1.4.1 Number of classrooms and seminar halls with ICT facilities

उपोद्वलितकक्ष्याणां, सड्गोष्ठीकक्ष्याणां च सङ्ख्या।

Answer: 23
4.1.4.2 Total number of classrooms and seminar halls

कक्ष्याणां सङ्गोष्ठीकक्ष्याणां सङ्ख्या

Answer: 114

| File Description | Document |
|---|---|
| Number of classrooms and seminar halls with ICT enabled facilities (Data Template) • सूचनासंप्रेषणप्रविध्या स्फूर्तकक्ष्या-अधिगमप्रबन्धप्रणालीप्रभृतिभिः उपोद्वलितकक्ष्याणां, सङ्गोष्ठीकक्ष्याणां च सङ्ख्या (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information, (Hyper linked video)• अतिरिक्तसूचनानां सन्धानम् (परिसन्धितचलनचित्राणि) | View Document |

***4.1.5 Average percentage of expenditure, excluding salary for infrastructure augmentation during the last five years (INR in Lakhs)***

***विगतेषु पञ्चसु वर्षेषु वेतनाद् ऋते मूलभूतसौविध्यसंवर्धनाय कृतस्य व्ययस्य प्रतिशततायाः साधरणमानम् (लक्षशः)***

**Answer:** 18.58

4.1.5.1 Expenditure for infrastructure augmentation, excluding salary year-wise during the last five years (INR in lakhs)

विगतेषु पञ्चसु वर्षेषु वेतनं विहाय मूलभूतसौविध्यसंवर्धनाय कृतः व्ययः वार्षिकक्रमेण। (लक्षशः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 379.04 | 396.52 | 123.82 | 173.47 | 157.54 |

| File Description | Document |
|---|---|
| Upload Details of budget allocation, excluding salary during the last five years | View Document |
| Upload audited utilization statements आयव्ययलेख-धनोपयोगपत्राणि | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

| Other Upload Files | |
|---|---|
| 1 | View Document |

**4.2 Library as a Learning Resource**

***4.2.1 Library is automated using Integrated Library Management System (ILMS)***

***ग्रन्थालयः पूर्णरूपेण स्वयंप्रवृत्तः यत्र समन्वितग्रन्थालय-प्रबन्धनप्रणाली उपयुज्यते।***

**Answer:**

**शिक्षणसंसाधनरूपेण ग्रन्थालयः:-** ग्रन्थालयस्य नाम केन्द्रीयग्रन्थागारः तस्य नामान्तरमस्ति पद्मश्री डॉ. मण्डनमिश्रकेन्द्रीयग्रन्थालयः। समग्रग्रन्थागारः आधुनिकतकनीकप्रणाल्याः सुसज्जितः वर्तते।

ग्रन्थालयः पूर्णरूपेण स्वयंप्रवृत्तः यत्र समन्वितग्रन्थालय-प्रबन्धनप्रणाली उपयुज्यते। अत्र ILMS-7 & 10, VIS, OPAC, INFLIBNET, RFID, Digitalization of Rear Books, Cyber Library, Not null Database, Delnet Membership,

Reprograpic Service, Self Kiosk System, Plagiarism, Grammarly इत्यादिनामाधुनिकतकनीकानां समुपलब्धता विद्यते।

अयं ग्रन्थालयः समन्वितग्रन्थालयप्रबन्धनप्रणाल्याः तन्त्रांशः (ILMS) उपयोगेन स्वयं चालितो विद्यते। अस्य तन्त्रांशस्य (ILMS) नाम भवति लिब्सिस् (LIBSYS)। येन सम्पूर्णग्रन्थालयः स्वयं चालितो भवति।

**स्वयंचालितप्रक्रियायाः स्वरूपम्-** अस्य लिब्सिस्-7 तन्त्रांशस्य प्रारम्भः औपचारिकरूपेण 2011 तमे ख्रीष्टाब्दे अभवत्। ILMS तन्त्रांश: अधिग्रहणेन (Acquisition) सह ग्रन्थानां सूचीबद्धं (Cataloguing) प्रसारं (Circulation) क्रमिकनियन्त्रणं (Serials control) च करोति।

ओपेक (OPAC) इत्यादे: सर्वर क्लाइण्ट मोड इत्यनेन संस्थापित: विद्यते। केन्द्रीकृतसामग्रीणां संग्रहार्थं संरक्षणार्थं च केन्द्रीयसर्वर विश्वविद्यालयस्य कम्प्यूटरकेन्द्रे संस्थापितम् अस्ति। अनेन साफ्टवेयरमाध्यमेन ग्रन्थानां पत्रिकाणां प्रबन्धानाञ्च आदानं प्रदानं च (Return- ISSU) भवति। अस्याः प्रक्रियायाः द्राढ्यतायै: **हैंड होल्डर डिवाइस** यन्त्रमपि स्थापितमस्ति। ILMS लिब्सिस् साफ्टवेयर इत्यस्य स्थापनेन पञ्चसप्ततिसहस्रपुस्तकानां सूची साफ्टवेयर सम्बन्धितकोष्ठे (Module) सन्दर्भिता अस्ति। एवञ्च अस्य साफ्टवेयर इत्यस्य संस्थापनेन तन्त्रांशे शीर्षकसूचीनिर्माणव्यवस्थायां पुस्तकवितरणविवरणे च सौकर्यं भवति। लिब्सिस् साफ्टवेयर इत्यस्य संस्थापनेन सम्प्रति समेषां कृते ग्रन्थालयागमन-परित्यागयोः (Check-out & in) एस.एम.एस, ईमेल (E-mail) आदि सौविध्यमुपलभ्यते।

ओपीएसी (ऑनलाइन पब्लिक एक्सेस कैटलॉग) साफ्टवेयर इत्यस्य उपयोगेन सह स्वयं चलितोऽयं ग्रन्थालयः। ग्रन्थसूचीप्राप्त्यर्थं छात्राणां कृते एकं पृथक् सहयोगयन्त्रं प्रयच्छति। एतादृशी व्यवस्थाऽपि ग्रन्थालये प्राप्यते। ग्रन्थालये ये पाठकाः अध्येतारः सन्ति ते स्वीयसचलदूरभाषयन्त्रेण **OPAC** पर्यन्तं गन्तुं शक्नुवन्ति। विशेषतः **OPAC** इत्याधुनिकतकनीकिसमन्वितेन ई-ग्रन्थालयस्योपयोगः भवति। येन अध्येतृणां कृते लाभः इत्थं भवति- (1) ग्रन्थानाम् अनुपलब्धपुस्तकानाञ्चान्वेषणे सौकर्यम्। (2) ई-मेल (E-mail), whatsapp च माध्यमेन पाठकानां कृते सन्देशात्मकसूचनाप्रदाने सौकर्यम्। (3) विषयसूचीनिर्माणे लेखकसूचीनिर्माणे ग्रन्थसूचीनिर्माणे च सौकर्यम्।

2020 तमे ख्रीष्टाब्दे ILMS-10 लिब्सिस् इत्यस्य नवीनं संस्करणमपि ग्रन्थालये संजातमस्ति। तेन प्रायशः 103864 पुस्तकानां 651 शोधप्रबन्धानां 124 पत्रिकाणां सूच्यः अकिताः सन्ति। तत्र क्रयात्मकपुस्तकानां संख्या- 106580, औपहारिकपुस्तकानां संख्या- 8847, वुकबैंक-अन्तर्गतं पुस्तकानां संख्या- 5814, आहत्य पुस्तकालये सम्पूर्णपुस्तकानां संख्या-121241 विद्यन्ते।

**अन्या अतिरिक्ता सूचना-** शोधगंगा-परियोजनान्तर्गत "सूचना एवं पुस्तकालयनेटवर्क" **(INFLIBNET)** इत्यनेन सह ग्रन्थालयस्य एक अनुबन्धोऽपि विद्यते तेन प्रायश: 559 शोधप्रबन्धाः शोधगंगा प्रवेशद्वारे (Portal) अंकिता: (upload) सन्ति। तेषां शोधप्रबन्धानां अध्ययनार्थं पाठकाः शोधगंगायाः संकेतमाध्यमेन सततं उपयोगं कुर्वन्ति। एवञ्चात्र ई-शोधसिन्धुः इत्यस्य व्यवस्था दीयते येन प्रबन्धानामवलोकने सुलभो भवति।

एतदतिरिच्य केन्द्रीयग्रन्थागारस्य कार्यान्वयनमाभिवृद्ध्यर्थं 2021 ख्रीष्टाब्दे **'रेडियो फ्रीक्वेंसी आइडेंटिफिकेशन डिवाइस'** इत्यस्य उपयोगोऽपि क्रियते। ग्रन्थागारस्य ग्रन्थ-शोधप्रबन्ध-पत्रिकादिसम्बन्धितं समग्रं क्रियान्वयनं स्वयंचालितो भवति।

**प्रकारः-** ग्रन्थालये सम्प्रति ILMS लिब्सिस्-10 साफ्टवेयर इत्यस्य प्रयोगो भवति।

स्वयंप्रवृत्तप्रक्रियाप्रारम्भस्य वर्षम्-

2011 तमे ख्रीष्टाब्दे ILMS लिब्सिस्-7 द्वारा पुस्तकालयस्य क्रियान्वयनं प्रारम्भोऽभूत्।

2020 तमे ख्रीष्टाब्दे ILMS लिब्सिस् 10 द्वारा पुस्तकालयस्य क्रियान्वयनं प्रचलति।

- विश्वविद्यालयस्य पुस्तकालयः अनिवार्यनिवासी (Internship) सेवया व्यक्तेः कौशलं विकासयति, एतादृशी व्यवस्थाऽत्र समुपलभ्यते। प्रायशः एकस्मिन् वर्षे दश वाह्य प्रशिक्षवः व्यवस्थायाः लाभं प्राप्नुवन्ति।
- संगणकमाध्यमेन विधिहीनकार्याणाम् अनुशासनहीनकार्यणाञ्च प्रतिरोधाय यादृशी व्यवस्थाऽपेक्षिता तादृशी सूचना प्रौद्योगिकी व्यवस्थाऽपि (Cyber) पुस्तकालये समुपलब्धाऽस्ति।

- दिव्याङ्ग (विकलाङ्ग) छात्राणाम् अध्यापकानाञ्च **(Handicaps )** कृते ग्रन्थानां श्रव्यानुकूलाभिलेखबद्धकरणार्थं (Audio recording) यन्त्रस्य व्यवस्था ग्रन्थागारे समुपलभ्यते।
- शोधप्रबन्धस्य विश्वविद्यालये समुपस्थापनात्प्राक् साहित्यिकचौर्यपरीक्षणार्थं (Plagiarism) प्रणाल्याः व्यवस्था विद्यते।
- इयं च प्रणाली शोधनीतिं कोड आफ एथिक्स नीतिं चानुसरति। एतादृशप्रणाल्यनुसारेण च साहित्यिकचौर्यस्यावरोधः कर्तुं शक्यते। पुनश्च विश्वविद्यालयस्य ग्रन्थागारे - Drill Bit साफ्टवेयर, VIS, NOT NULL Database, सुगमपुस्तकालयः, विरलपुस्तकानामाधुनिकीकरणञ्च इत्यादेः सौविध्यं विद्यते। ई-ग्रन्थालयार्थं याः सुविधाः अपेक्ष्यन्ते ताः सर्वथा विद्यन्ते। पुनश्च साम्प्रतिकीमाधुनिकप्रणालीमनुसर्तुं सततं प्रयत्नशीलः विद्यते।
- ग्रन्थालयः **Grammarly** सुविधां सर्वेषां कृते प्रयच्छति। ग्रामरलीति सुविधां स्वीकृत्य अध्यापकाः छात्राः कर्मचारिणश्च संस्कृतभाषातः आंग्लभाषायां, आंग्लभाषातः संस्कृतभाषायां भाषान्तरेषु वाऽऽनुवादयितुं समर्था भवन्ति। ग्रामरलीव्यवस्था ग्रन्थालयेन निशुल्कभावेन दीयते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***4.2.2 Collection of rare books, manuscripts, special reports or any other knowledge resource for library enrichment***

***ग्रन्थालयसंवर्धनार्थं विरलपुस्तकानां, पाण्डुलिपीनां, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च संग्रहः।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य ग्रन्थालये ग्रन्थालयसंवर्धनार्थं विरलपुस्तकानां, पाण्डुलिपीनां, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च संग्रहः सुतरां विद्यते।

संगृहीतानां विरल पुस्तकानां/दुर्लभपाण्डुलिपीनां/पुस्तकानां पाण्डुलिपीनां/ताडपत्राणां, कर्गदपत्राणां/भूर्जपत्राणाम्/ अन्यप्रकाराणां नामानि-

- ग्रन्थागारे ज्ञाननिधिभूतवेदसम्बद्धानि वेदशाखासम्बद्धानि न्याय-व्याकरणादि-शास्त्रसम्बद्धानि भारतीयदर्शनसम्बद्धानि सांस्कृतिकपुस्तकसम्बद्धानि सामाजिक-राजनैयिक-आर्थनैतिक-पुराणादिसम्बद्धानि च बहूनि प्रायशः लक्षाधिकपरिमितानि पुस्तकानि **(संस्कृतभाषायाम्, हिन्दीभाषायाम्, आंग्लभाषायाम्, क्षेत्रीयभाषायाम्)** सन्ति। तत्र पुस्तकालये यानि पुस्तकानि संरक्षितानि सन्ति तेषां पुस्तकानां संख्याः भवन्ति-121241। तत्र प्रायशः 103864 पुस्तकानां 651 शोधप्रबन्धानां 124 पत्रिकाणां सूच्यः अकिताः सन्ति। तत्र क्रयात्मकपुस्तकानां संख्या- 106580, औपहारिकपुस्तकानां संख्या- 8847, आहत्य पुस्तकालये सम्पूर्णपुस्तकानां संख्या-121241 विद्यन्ते। तेषु पुस्तकेषु प्रायशः 204 पुस्तकानि विरलानि बहूनि पुस्तकानि चितानि संरक्षितानि च सन्ति। एषु विरलपुस्तकेषु रामायणसम्बद्धानि, महाभारतसम्बद्धानि, पुराणसम्बद्धानि, तन्त्रसम्बद्धानि, संहितासम्बद्धानि, आयुर्वेदसम्बद्धानि, काव्यशास्त्रसम्बद्धानि, दर्शनशास्त्रसम्बद्धानि, व्याकरणसम्बद्धानि च वर्तन्ते । अत्र शास्त्रीयानां शास्त्रेतराणां च पुस्तकानां सूची संलग्ना अस्ति ।
- दुर्लभपाण्डुलिपीनां संग्रहस्तु शोधप्रकाशनविभागेन क्रियते । तस्मिन्नेव विभागे तासां संरक्षणं भवति। 1697 पाण्डुलिपयः सन्ति । तत्र काश्चन पाण्डुलिपयः ताडपत्रसम्बद्धाः, काश्चन कर्गदपत्रसम्बद्धाः, काश्चन भूर्जपत्रसम्बद्धाश्च सन्ति । ये दुर्लभाः पाण्डुलिपिसम्बद्धाः ग्रन्थाः विद्यन्ते तेषां ग्रन्थानां लिपि शारदालिपिसम्बद्धा, देवनागर्यादि लिपिसम्बद्धा विद्यते । दुर्लभपाण्डुलिपीनां ग्रन्थानां संरक्षणं यथोचितनियमानुसारेण शोधविभागः करोति । दुर्लभपाण्डुलिपीनां ग्रन्थानां संरक्षणार्थं पाण्डुलिपिसंरक्षणं केन्द्रं विद्यते ।
  शारदालिप्यां देवनागर्यादिलिप्यां च लिखिताः मातृकाः दुर्लभग्रन्थाः तत्र केन्द्रे संरक्षिताः सन्ति ।
  दुर्लभपाण्डुलिपिग्रन्थं समाश्रित्य शोधच्छात्राः शोधकार्यं कुर्वन्ति । प्रकाशनवर्षम् / पाण्डुलिपिसंग्रहवर्षम्- सूची अत्र संलग्ना अस्ति ।

- वुकबैंक-अन्तर्गतं पुस्तकानां संख्याः - 5814 सन्ति । एतेषां पुस्तकानाम् अध्ययनं छात्राः कुर्वन्ति।
- साहित्यं, ज्योतिषं, वास्तुशास्त्रं, वेदः, रामायणं, महाभारतं, श्रीमद्भगवद्गीता, पुराणानि, न्यायः, अद्वैतवेदान्तः, सांख्यम्, योगः, जैनदर्शनं, बौद्धदर्शनं, भारतीयदर्शनं, पाश्चात्यदर्शनं, भारतीयकाव्यशास्त्रं, भारतीयनीतिशास्त्रं, भारतीयेतिहासः, भारतीयविधिशास्त्रं, अर्थशास्त्रं, मीमांसा, धर्मशास्त्रम्, तन्त्रम्, उपनिषदः, शिक्षाशास्त्रम्, आंङ्ग्लम्, हिन्दी, राजनीतिशास्त्रं, समाजशास्त्रं, पर्यावरणविज्ञानम् कोषग्रन्थाश्च इत्यादिविषयकानि सम्पूर्णपुस्तकानां -121241 अधिकानि मुद्रितपुस्तकानि सङ्गृहीतानि सन्ति ।
- विश्वविद्यालयस्य ग्रन्थालये बहूनि ई-पुस्तकानि सन्ति । मुद्रितनियतकालिकाः पत्रिकाः सन्ति ।
- 559 तः अधिकाः शोधप्रबन्धाः शोधगङ्गामध्ये टंकिताः सन्ति ।
- विश्वविद्यालयस्य ग्रन्थालये 204 अत्यन्तं दुर्लभानि पुस्तकानि सन्ति ।
- नैकाः शोधपत्रिकाः, आधुनिकपत्रिकाः, वार्तापत्रिकाः च सन्ति ।
- विशेषतः कालिदासविरचितस्य अभिज्ञानशाकुन्तलस्य राघवभट्टीयव्याख्योपेतस्य गोडेबोले नारायण बालकृष्णद्वारा सम्पादितस्य 1926 वर्षे प्रकाशितस्य संरक्षणं कृतं विद्यते । भट्टाचार्यद्वारा सम्पादितस्य भवभूतिविरचितस्य मालतीमाधवस्य संरक्षणं कृतं विद्यते । तस्य प्रकाशनवर्षम् 1936 अस्ति । आनन्दवर्धनविरचितः ध्वन्यालोकः 1953 तमे वर्षे चौखम्बातः प्रकाशितः । तस्य ग्रन्थस्य संरक्षणं विश्वविद्यालयस्य ग्रन्थालये विद्यते । महाकविमाधविरचितं शिशुपालवधम्, देववल्लभ- मल्लिनाथयोः व्याख्याद्वयेन युक्तम्, 1985 तमे वर्षे प्रकाशितम् । एतस्य ग्रन्थस्य उपलब्धता विश्वविद्यालयस्य ग्रन्थालये विद्यते ।मम्मटभट्टविरचितस्य काव्यप्रकाशस्य गिरिधरलालव्यासद्वारा 1934 तमे वर्षे सम्पादितस्य संरक्षणं विहितम्।
- संस्कृतपत्रिकाणां, भारतीयविद्यापत्रिकाणां, प्राचीनसम्पुटानां, संस्कृतविद्यासम्बद्धपत्रिकाणां, संग्रहः विश्वविद्यालयस्य ग्रन्थालये विद्यते । तथाहि- सारस्वतसुषमा, सागरिका, परिशीलनं, भारतीय, शोधप्रभाः प्रभृतयः ।
- वैद्युतग्रन्थाः
- वेद्युताः संस्कृतभाषाकोषाः
- सस्कृतपत्रिकाः नियतकालिकसंस्कृतपत्रिकाक्ष
- वेद्युतपत्रिकाः
- वेद्युतदत्तांशनिधिः
- वेद्युत प्रदर्शनफलकम्
- भारतवाणीसंसाधनानि
- वेदग्रन्थानां पाठनाय ध्वनिमुद्रिकाः सान्द्रमुद्रिकाः च।
- छायाप्रतिसौविध्यम्
- अन्तर्जालं निस्तन्तिजालसौविध्यम्
- सङ्गणकीयगवेषणसौविध्यम्
- निर्णयसागरादिदुर्लभपुस्तकानां समुपलब्धिः पुस्तकालये प्राप्ता अस्ति ।
- अतिरिक्तसूचनायै सन्धानम्-अत्यन्तदुर्लभपुस्तकानां आधुनिकतकनीकि-सहयोगेन संरक्षणाय संर्वधनाय च केन्द्रीयपुस्तकालयेन '**ओवरहेडस्कैनर**' इत्यस्य यन्त्रस्य उपयोगः क्रियते ।

**अन्यातिरिक्ता सूचना-** साहित्यस्य संरक्षणाय भारतसर्वकारस्य कॉपीराइट अधिनियमान् अनुसृत्य विरलपुस्तकानां, पाण्डुलिपीनां, विशिष्टप्रतिवेदनानाम्, अन्यान्यशैक्षिकसंसाधनानां च संग्रहः पृथग् रूपेण सुव्यवस्थितं विद्यते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document |

***4.2.3 Does the Institution/ Library have the following:***

***1. Back Volumes of Rare Sanskrit Journals/Indological Journals/ Journals Related to Sanskrit Studies like Indian Historical Quarterly (IHQ)/ Annals of Bhandarkar Oriental Research Institute (ABORI)/ Brahmavidya/Sarasvati-sushama etc***

***2. Sanskrit magazines and Sanskrit Periodicals***

***3. e-journals***

***4. e-books***

***5. e-dictionaries of Sanskrit***

***6. Sanskrit Databases***

***7. Bharatavani Portal***

***8. CD's/DVD's/other e-materials for the study of Vedas***

***9. Electronic Display Board***

***10. Internet/ Wifi Facility***

***11. Search Facility***

***12. Reprographic facility***

***ग्रन्थालये अधोदर्शितानि कियन्ति सन्ति ?***

***1. संस्कृतपत्रिकाणां/ भारतीयविद्यापत्रिकाणां प्राचीनसम्पुटानि/ संस्कृतविद्यासम्बद्धपत्रिकाः यथा – भारतीयेतिहासत्रैमासिकी/ भण्डारकरप्राच्यविद्यापत्रिका/ ब्रह्मविद्या/ सारस्वतीसुषमाप्रभृतयः***

***2. संस्कृतपत्रिकाः नियतकालिकसंस्कृतपत्रिकाश्च***

***3. वैद्युतपत्रिकाः***

***4. वैद्युतग्रन्थाः***

***5. वैद्युताः संस्कृतभाषाकोषाः***

***6. वैद्युतदत्तांशनिधिः***

***7. भारतवाणीसंसाधनानि***

*8. वेदग्रन्थानां पाठनाय ध्वनिमुद्रिकाः सान्द्रमुद्रिकाः अन्याश्च*

*9. वैद्युतं प्रदर्शनफलकम्*

*10. अन्तर्जाल/निस्तन्त्रिजालसौविध्यम्*

*11. सङ्गणकीयगवेषणसौविध्यम्*

*12. छायाप्रतिसौविध्यम्*

**Answer:** A. Any 4 of the above (अ. उपरि निर्दिष्टेषु यानि कानिचित् चत्वारि)

| File Description | Document |
| --- | --- |
| Details of subscriptions like e-journals, e-ShodhSindhu, Shodhganga Membership etc (Data Template)• वैद्युतपत्रिकाः, वैद्युतशोधसिन्धुः, शोधगङ्गासदस्यता, वैद्युतग्रन्थाः इत्यादीनां धनांशदानस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information | View Document |

| Other Upload Files | |
| --- | --- |
| 1 | View Document |

***4.2.4 Average annual expenditure for purchase of books and journals during the last five years (INR in Lakhs)***

***पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकं मध्यमानम्। (लक्षशः)***

**Answer:** 19.15

4.2.4.1 Annual expenditure for purchase of books and journals year-wise during the last five years (INR in lakhs)

पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य वार्षिकव्ययः (लक्षशः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
| --- | --- | --- | --- | --- |
| 32.05352 | 1.52457 | 42.61208 | 5.86043 | 13.72411 |

| File Description | Document |
| --- | --- |
| Details of annual expenditure for purchase of books and journals during the last five years (Data Template) पुस्तकानां पत्रिकाणां च क्रयणाय विगतपञ्चवर्षेषु व्ययितस्य धनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Audited statements of accounts अङ्केक्षणविवरणम् | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.2.5 Availability of remote access to e-resources of the library***

***(Yes /No)***

***ग्रन्थालयस्य वैद्युतसंसाधनानां सुदूरसन्धानम् अस्ति वा ?***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Details of remote access to e-resources of the library (Data Template) ग्रन्थालयस्य वैद्युतसंसाधनानां दूरतः सन्धानस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः। | View Document |
| Provide a link of the data uploaded in the institutions website संस्थायाः जालस्थानाम् उपारोपितस्य दत्तांशस्य सन्धानं प्रयच्छतु। | View Document |

***4.2.6 Percentage per day usage of library by teachers and students (preceeding academic year data)***

***अध्यापकैः छात्रैश्च प्रतिदिनं ग्रन्थालयोपयोगस्य प्रतिशतता (गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 23.33

4.2.6.1 Number of teachers and students using library per day over last one year

गतवर्षे प्रतिदिनं ग्रन्थालयोपयोगं कृतवताम् अध्यापकानां छात्राणाञ्च सङ्ख्या।

Answer: 525

| File Description | Document |
|---|---|
| Details of library usage by teachers and students • अध्यापकैः छात्रैश्च प्रतिदिनं ग्रन्थालयोपयोगस्य विवरणम्। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide a link of the data uploaded in the institutions website संस्थायाः जालस्थाने उपारोपितस्य दत्तांशस्य सन्धानं प्रयच्छतु। | View Document |

***4.2.7 E-content is developed by teachers :***

***1. For e-PG-Pathashala***

***2. For CEC (Under Graduate)***

***3. For SWAYAM***

***4. For other MOOCs platform***

***5. For NPTEL/ NMEICT/ any other Government initiative***

***6. For institutional LMS***

***7. E-books Uploded on Website***

***अध्यापकैः विकासिताः वैद्युतीयपाठ्यांशाः-***

***1. ई-पीजी-पाठशालायाः कृते***

***2. शैक्षिक-सम्प्रेषण-सङ्घटनस्य कृते (स्नातकस्तरे)***

***3. 'स्वयम्' - कृते***

*4. 'मूक्स' - कृते*

*5. एन्-पी-टि-ई एल्/ एन् एम्-ई-ऐ-सी-टी/ अन्येषां सर्वकारीयोपक्रमाणां कृते*

*6. सांस्थानिक्याः ग्रन्थालयप्रबन्धनप्रणाल्याः कृते*

*7. सङ्ख्याद्वारा प्रवर्धितानां विविधपरियोजनानां कृते (नामोल्लेखः करणीयः)*

**Answer:** A. Any 5 of the above (अ. उपरि निर्दिष्टेषु कानिचित् पञ्च)

| File Description | Document |
|---|---|
| Details of e-content developed by teachers for e-PG-Pathshala, CEC (UG) (Data Template) एन्-पी-टि-ई एल्/एन् एम्-ई-ऐ-सी-टी इत्यादीनां कृते अध्यापकैः विकासितानां वैद्युतीयपाठ्यांशानां विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Give links or upload document of e-content developed विकासितानां वैद्युतपाठ्यांशानां सन्धानम् | View Document |

**4.3 IT Infrastructure**

***4.3.1 Institution frequently updates its IT facilities including Wi-Fi, Email and Internet Facilities are given to Faculty and Students with Institutional ID's***

***संस्था निस्तन्त्रि-अणुसङ्केत-अन्तर्जालसमेतानां सूचनाप्रविधिसौविध्यानां पौनःपुन्येन संवर्धनं करोति सांस्थिकीः परिचायिकीः प्राप्तवद्भ्यः छात्रेभ्यः अध्यापकेभ्यश्च वैद्युतपत्राङ्कान्, अन्तर्जालसौविध्यानि च संस्था ददाति। wi – fi सहितं सूचनाप्राविधिकसौविध्यानाम् अद्यतनीकरणस्य दिनाङ्कं स्वरूपञ्च विवृणोतु।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः निस्तन्त्रि-अणुसङ्केत-अन्तर्जालसमेतानां सूचनाप्रविधिसौविध्यानां पौनःपुन्येन संवर्धनं करोति सांस्थिकीः परिचायिकीः प्राप्तवद्भ्यः छात्रेभ्यः अध्यापकेभ्यश्च वैद्युतपत्राङ्कान्, अन्तर्जालसौविध्यानि च संस्था ददाति। wi – fi सहितं सूचनाप्राविधिकसौविध्यानाम् अद्यतनीकरणाय निरन्तरं प्रयत्नशीलः विद्यते।

विश्वविद्यालयस्य शैक्षणिक-निर्देशात्मक-अनुसन्धान-प्रशासनिक-क्रियाकलापानां समर्थनाय तथा च कर्मचारिणां कार्यक्षमतां उत्पादकताञ्च वर्धयितुं सूचनाप्रौद्योगिकी-सम्पदां प्रयच्छति।

- **1 GBPS (1 जीबीपीएस्) सौविध्यं विद्यते।**
- **संपूर्णविश्वविद्यालयः wi – fi इत्यनेन सम्बद्धः।** wi – fi इत्यस्य उपयोगः सर्वैः अध्यापकैः, कर्मचारिभिः, छात्रैश्च क्रियते। संगणककेन्द्रस्य आधुनिकतकनीकसम्बद्धं सर्वं कार्यं wi – fi इति सुविधामाध्यमेन प्रचलति। आवश्यकतानुसारं नवीनीकरणमपि क्रियते विश्वविद्यालयस्य संगणककेन्द्रेन।
- आन्तर्जालस्य (Internet) उपयोगः सर्म्पूणविश्वविद्यालयपरिसरे भवति। प्रत्येकस्मिन् प्रकोष्ठेऽन्तर्जालस्य सुविधा विद्यते। कार्यालयेऽपि सर्वाणि सङ्गणकयन्त्राणि आन्तर्जालसम्बद्धानि सन्ति। परीक्षाविभागोऽप्यऽऽन्तर्जालसम्बन्धेन सम्बद्धः। विश्वविद्यालये विद्यमानाः प्रकोष्ठाः आन्तरिकदूरभाषव्यवस्थया (Intercom) सम्बद्धाः सन्ति। सर्वासां व्यवस्थायाः मुख्यकार्यं MTNL सम्पादयति। तस्य कृते मासिकम् वार्षिकञ्च धनं दीयते। MTNL इति संचारस्य प्रयोगः MHRD इत्यस्य IT परियोजनामाध्यमेन 1 जीवीपीएस् आन्तर्जालिकसुविधा प्रदत्ताऽस्ति।
- विश्वविद्यालयः सर्वेषां IT संसाधनानामुपयोगाय विशिष्टानि आवश्यकतानि स्थापयति। एषा नीतिः विश्वविद्यालयप्रबन्धितस्य वा संसाधितसंसाधनानां सर्वेषामुपयोक्तृणां कृते प्रवर्तते। अनया नीत्या विश्वविद्यालयसंकायाः विभागाः कर्मचारिणः, छात्राः, पूर्वविद्यार्थिनः, अतिथयः, संस्थाः, कार्यालयाः, सम्बद्धाः विभागाः विश्वविद्यालयस्य प्रबन्धनाधीनाः वर्तन्ते।
- अस्याः नीतेः प्रयोजनार्थं **'IT संसाधनानि'** इति विश्वविद्यालयस्य स्वामित्वमनुज्ञापत्रं वा प्रबन्धितं वा सर्वं भौतिकोपकरणं (Hardware) तन्त्रांशञ्च (Software) समावेशयति, विश्वविद्यालयस्य स्वामित्वमपरित्यस्य

भौतिकम् वेतार (Wireless) संयोजनानां माध्यमेन जालपुटेन सह सम्बद्धानि सङ्गणकयन्त्राणि उपकरणानि वा सन्ति। एतेषां संसाधनानामुपयोगः मुख्यतया विश्वविद्यालयसम्बद्धेषु प्रयोजनेषु, विधिपूर्वकं नैतिकरूपेण च भविष्यतीति IT नियमस्य मुख्यमुद्देश्यमस्ति। एषा नीतिः सूचनाप्रौद्योगिक्याः संसाधनानामुपयोगं नियन्त्रयति। एषा नीतिः सर्वेषु व्यक्तिषु/उपयोक्तृषु/संस्थासु प्रयोज्याऽस्ति। अस्याः नीतेः उद्देश्यं विश्वविद्यालयस्य IT संसाधनानां समुचितं प्रवेशमुपयोगञ्च सुनिश्चित्योपयोक्तृभिः तेषां दुरुपयोगं निवारयितुं समर्थाः भविष्यन्ति।

विश्वविद्यालयस्य परिसरे स्थापितानां सूचनाप्रौद्योगिकीमूलसंरचनानां न्यायिकं समुचितमुपयोगं सम्पादयितुं सुरक्षितं कर्तुं, सुनिश्चितं कर्तुं च विश्वविद्यालयस्य सूचनाप्रौद्योगिकीनीतिः विद्यते।

1. विश्वविद्यालयः उपयोक्तृणां कृते अस्याः नीतेः अनुपालनं सुनिश्चित्य समुचितनियन्त्रणं कार्यान्वितञ्च करिष्यति। संगणककेन्द्रं प्राथमिकं कार्यान्वयनसंस्था भविष्यति, अस्मिन् विषये आवश्यकं समर्थनञ्च प्रदास्यति।
2. संगणककेन्द्रं अस्याः नीतेः सुरक्षापक्षेभ्यः सम्बद्धानां सर्वेषां घटनानां समाधानं स्वप्रयोक्तृणां कृते सुनिश्चितं करिष्यति। अस्मिन् विषये कार्यान्वयनसंस्थाऽऽवश्यकं साहाय्यं करिष्यति।
3. उपर्युक्तानां कार्याणां कृते विश्वविद्यालयस्य IT संसाधनानामुपयोगः इत्थं कर्तुं शक्यते येन विश्वविद्यालयस्य शैक्षणिकमनुसन्धानञ्चानुरूपं भवेत्।
4. सर्वे उपयोक्तारः राष्ट्रस्य राज्यस्य तदितरस्य वा न्यायिकनियमानामनुपालनं करिष्यन्ति।
5. विद्यमानदूरसञ्चारस्य संजालस्य च न्यायिकनियमानामनुपालनं कर्तव्यमस्ति।
6. संरक्षितव्यापारिकसॉफ्टवेयर बौद्धिकसम्पत्तिविषये प्रतिलिप्यधिकारनियमानामनुपालनं कर्तव्यमस्ति।
7. विश्वविद्यालयस्य उपयोक्तारः IA इत्यनेन सह परामर्शं विना संजाले किमपि संजालं सुरक्षायन्त्रं वा न स्थापने समर्थाः भविष्यन्ति।
8. सम्पूर्णविश्वविद्यालयस्य परिसरः Wi-Fi इत्यनेन सम्बद्धः।

**विशेषतः-** अधिकृतः उपयोक्ता केवलं तान् IT संसाधनं प्राप्तुं शक्नोति येषु तस्याधिकृतताऽस्ति। कोऽपि उपयोक्ताऽन्यस्य पञ्जिकायारुपयोगं कर्तुं समर्थो नैव भविष्यति।

1. यदा अन्यनीतयः अस्याः नीतेः अपेक्षया अधिकाः प्रतिबन्धकाः भवन्ति तदा अधिका प्रतिबन्धकनीतिः प्राथमिकतामवाप्नोति।

2. विश्वविद्यालयस्य सूचनाप्रौद्योगिकीसंसाधनानां सर्वेषामुपयोक्तृणामन्येषाञ्च कृते गोपनीयतायाः व्यक्तिगताधिकारस्य समादरः अपेक्षितः अस्ति।

3. सक्षमप्राधिकरणस्य (CA) प्राधिकरणमनुमोदनञ्च विनोपयोगकर्ता ईमेल-डेटा-कार्यक्रमाणां सञ्चिकान्तराणां वा प्रतिलिपिं कर्तुं समर्थो न भवति।

- वैराणुनिरोधकः सङ्गणकस्य रक्षाकवचः भवति। अतः समये-समये वैराणुनिरोधकस्य नवीकरणं क्रियते। सङ्गणकानां लघुसमीकरणकार्यं हार्डडिस्क शोधनं चेत्तत्परिसरस्तरे इत्यादिषु अवयवेषु मुख्यं शोधनमपेक्षितम् तर्हि सम्बद्धायाः संस्थायाः यन्त्रज्ञद्वारा शोधनं कार्यते। निस्तन्त्रि-अक्षरफलकं, मौस् इत्यादिकं वस्तुजातं तान्त्रिकव्यवस्थायां नवीनत्वं निरूपयति। अतः विश्वविद्यलयीय-तान्त्रिकव्यवस्थायां तादृशान्यक्षरफलकानि संयोजितानि। गुणोत्कृष्टं मुद्रणयन्त्रं (Printer) मुद्रणे उत्कर्षम् आनयति। अतः विश्वविद्यालये परिसरेषु च गुणोपेतं मुद्रणयन्त्रं व्यवस्थापितं वर्तते। अन्तर्जालस्य वेगवर्धने 'Wi-Fi साधनम्' महोपकारकं वर्तते। छात्राणाम् अध्यापकानां कर्मचारिणां च उपयोगाय परिसरेषु Wi-Fi व्यवस्था कल्पिता वर्तते। काले काले तस्याः व्यवस्थायाः संवर्धनं नवीकरणं च विधीयमानम् अस्ति। परिसरे ई-सामग्रीणां निर्माणं विहितं वर्तते। Covid 19 विषमकाले छात्र-अध्यापकयोः सम्पर्कसाधनन्तु-अन्तर्जालमेव अभवत्। विश्वविद्यालयः भारतसर्वकारस्य 'डिजिटल् इंडिया' इति योजनाम् अनुसरति। तां सफलयितुं प्रयतते। अतः विश्वविद्यालयः आत्मनः परिसरे कार्यालये च कर्गजरहितं पत्रव्यवहारं कारयति। उद्योगिनां वेतनम्, छात्राणां छात्रवृत्तिः, शोधच्छात्राणां शोधवृत्ति, अन्यानि देयानि च सद्यस्कमाध्यमेन प्रवर्तन्ते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***4.3.2 Student - Computer ratio (preceding academic year data)***

***छात्र-गणकयन्त्रानुपातः (गताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 7.49

4.3.2.1 Total number of computers in the campus for academic purpose

पठनप्रक्रियार्थं परिसरेषु वर्तमानानां गणकयन्त्राणां सङ्ख्या

Answer: 286

| File Description | Document |
|---|---|
| Student – computer ratio अतिरिक्ताः सूचनाः | View Document |
| Geotagged photo | View Document |
| any additional information अतिरिक्ताः सूचनाः | View Document |

***4.3.3 Available bandwidth of internet connection in the Institution (Leased line)***

***संस्थायाम् उपलब्धस्य अन्तर्जालस्य (साक्षाद्दीर्घकालिकस्य) वेगसामर्थ्योपलब्धिः- (परिक्रीतसम्पर्कः)***

**Answer:** A. ≥1 GBPS (अ. ≥1 जीबीपीएस्)

| File Description | Document |
|---|---|
| Details of available bandwidth of internet connection in the Institution • संस्थायाम् उपलब्धस्य अन्तर्जालस्य (साक्षाद्दीर्घकालिकस्य) वेगसामर्थ्योपलब्धिविवरणम् | View Document |
| Any additional information • अतिरिक्ताः सूचनाः | View Document |

***4.3.4 Media centre, Recording facility, Lecture Capturing System (LCS), Facilities for e-content development, and uploading the corpus (database) of sanskrit texts on the website***

***जनसम्प्रेषणकेन्द्रम्, अभिलेखनसौविध्यम्, व्याख्यानलेखाङ्कनप्रणाली (व्या-ले-प्र), वैद्युतपाठ्यांशविकासनसौविध्यञ्च जालस्थाने उपारोपितानां संस्कृतग्रन्थानां सन्धानम्।***

**Answer:**

जनसम्प्रेषणकेन्द्रम्, अभिलेखनसौविध्यम्, व्याख्यानलेखाङ्कनप्रणाली (व्या-ले-प्र), ई- पाठ्यांशविकासनसौविध्यञ्च शास्त्रीयसंस्कृतग्रन्थानां कृते विश्वविद्यालयः सततं अनुसन्दधाति।

- विश्वविद्यालये केन्द्रीकृत-रिकार्डिङ्ग-नियन्त्रणमञ्चेन सह **आभासीयकक्षः (Virtual Classroom Studio) स्टूडियो** स्थापितमस्ति यस्योपयोगः सर्वाधिकः सुलभोऽस्ति तथा च समृद्ध-माध्यम-लाइव-वेबकास्टिंग-सामग्रीप्रवन्धनस्य, वेव-मोबाइल वितरण प्रणाल्याः च कृते सर्वोत्तमः समर्थितश्चास्ति। यस्मिन् हार्डवेयरसॉफ्टवेयरसहितं पूर्णतया एकीकृतसमाधानम् अस्ति। सञ्जालीकरणं, श्रव्यदृश्यसम्मेलनं, नियन्त्रणप्रणाली केन्द्रीकृतं रिकार्डिं नियन्त्रणप्रणाली च विद्यते।

- विश्वविद्यालयस्य सारस्वतसाधनासदने आधुनिकयन्त्रैः सह सुसज्जिता दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशाला (Audio video recording studio) **VCS** विद्यते। अस्मिन् विडियो ग्रहणाय आधुनिक केमेरा-युक्तं यन्त्रं विद्यते। रेकोर्डिंग- कृतस्य दर्शनाय दूरदर्शन-यन्त्रं तथा श्रवणाय ध्वनिवर्धनाय यादृशं यन्त्रम् अपेक्षितमस्ति तदत्र आभासीयकक्षायां विद्यते। विडियो एडिटिंग कर्तुं संशोधनं च कर्तुं सापेक्षितस्य यन्त्रस्य उपयोगः क्रियते। पृष्ठभागस्य दृश्यं (Background) यथावश्यकं परिवर्तयितुं परिवर्धयितुं च यादृशी व्यवस्था अपक्षिता साऽपि सापेक्षितानुसारेण क्रियते। अत्र अध्यापकाः अध्यापनं कर्तुं समर्था भवन्ति ,अध्यापने यादृशीव्यवस्था अपेक्ष्यते साऽप्यत्र विद्यते । लेखनेन सह विडियो कर्तुं शक्नुयुः तदर्थ श्वेतफलकस्य तथा लेखसामग्रादेः व्यवस्था अस्ति। अध्यापकाः अत्र व्याख्यानानि कृत्वा तदभ्यासेन ई.पी.जी. पाठशालादिषु व्याख्यानानि कर्तुं सिद्धाः भवन्ति। अत्र विश्वविद्यालयस्य प्रायशः सर्वे आचार्याः **ई.पी.जी. पाठशालानिर्माणे** सिद्धा सन्ति । तस्य फलमित्थं भवति विश्वविद्यालयस्य आचार्यैः विश्वविद्यालयस्य नेतृत्वेन 640 Module इत्यस्य निर्माणं कृतम् । इदं निर्माणं कार्यम् अस्माकं विश्वविद्यालयस्य आभासीयकक्षायामेव अभूत् । 640 Module इत्यस्य निर्माणं तु वेदः, साहित्यम्, व्याकरणम्, वास्तुशास्त्रम्, न्यायशास्त्रम्, मीमांसाशास्त्रम्, वेदान्तशास्त्रम्, धर्मशास्त्रम् चेत्यादि शास्त्रमधिकृत्य अभूत्।
- साहित्यशास्त्रमधिकृत्य भारतीयसंस्कृतिमधिकृत्य वास्तुशास्त्रमधिकृत्य न्यायशास्त्रमधिकृत्य दर्शनशास्त्रमधिकृत्य व्याकरणशास्त्रमधिकृत्य श्रीमद्भगवद्गीतामधिकृत्य च छात्राणां विदुषां हिताय भारतीयसंस्कृतेः संरक्षणाय सम्वर्धनाय च **MOOCS** पाठ्यक्रमाणां निर्माणं विश्वविद्यालयस्य तत्तदध्यापकैः कृतम्। अनेन मन्यते अयं विश्वविद्यालयः विश्वविद्यालयस्य आचार्याश्च व्याख्यानलेखणाङ्कनप्रणालीं निरन्तरमनुसरन्ति। प्रणाल्यनुसरणे विश्वविद्यालयः सततं सौविध्यं सम्प्रयच्छति।
- अध्यापकैः विश्वविद्यालये सर्वेषां विषयाणां परिचयार्थं विशिष्टचर्चार्थञ्च व्याख्यानमालायाः आयोजनम् अस्यां दृश्यश्रव्यसामग्रीनिर्माणचित्राङ्कनशालायां क्रियते । विविधविषयाणां वैविध्यपूर्णानि व्याख्यानानि E-CONTENT रूपेण छात्राणां कृते उपलब्धानि क्रियन्ते । विविधकार्याणां कृते VIDEO गोष्ठी, GOOGLE MEET, ZOOM APP इत्यादि व्यवस्था विश्वविद्यालयेन प्रदीयते।
- विश्वविद्यालये समायोज्यामानानां सङ्गोष्ठीनां कार्यशालानां विविधानां शास्त्रीयकार्यक्रमाणां चित्राणां तथा भाषणानां सङ्ग्रहं कर्तुं यादृशम् आधुनिकचलचित्रग्राहकयन्त्रम् अपेक्षितमस्ति तदपि विश्वविद्यालयेन प्रदीयते । तेन समागन्तुकानां महानुभावानां भाषणानि, विदुषां विविधानि व्याख्यानानि च गृहीत्वा संरक्ष्यन्ते । विश्वविद्यालये विविधविषयाणां याः कार्यशालाः भवन्ति, तासां व्याख्यानानि अपि अनेन यन्त्रमाध्यमेन संगृह्यन्ते।
- विश्वविद्यालयस्य प्रिन्ट-प्रसारण- मीडियाविज्ञापनाभियानानां समन्वयस्य प्रवन्धनं करोति । समाचारविज्ञप्तिनां साप्ताहिक आन्तरिकसमाचारपत्राणां सामुहिकयोजनायाः समन्वयं करोति । परिसरेषु समुद्भावितानां घटनानामुपरि दृष्टिं स्थापयति । शोधमूलकायोजनस्य निर्वहणं करोति । एवञ्च आभ्यन्तर-बाह्यानां जनानां छात्राणां अध्यापकानां कर्मचारिणां च परस्परं सूचनायाः आदान-प्रदानाय एकं जनसूचनाकेन्द्रमपि (RTI CPIO) विश्वविद्यालये स्थापितं विद्यते। इदं केन्द्रं आवश्यकतानुसारं नियमानुसारं च सूचनायाः सम्प्रेषणं करोति।
- विश्वविद्यालयस्य सारस्वतसाधनासदनस्य द्वितीयतले एकः **अभिलेखनसौविध्यप्रकोष्ठः** विद्यते, यत्र व्याख्यानस्य **ई-पाठ्यांशनिर्माणस्य व्याख्यानलेखाङ्कनप्रणाल्याश्च** सौविध्यं विद्यते। एवञ्च विश्वविद्यालयस्य पुस्तकालये दुर्लभग्रन्थानां आधुनिकतकनीकिसौविध्येन दिव्याङ्गानां सौकर्याय ई-पाठ्यंशनिर्माणस्य व्यवस्था विद्यते। एवञ्च विश्वविद्यालयस्य समेषां कार्यक्रमाणां छायाङ्कनम् अयं प्रकोष्ठः सततं सञ्चालयति।
- विश्वविद्यालयस्य पं.मदनमोहनमालवीयकेन्द्रेण शिक्षाशास्त्रसम्बद्धानां पुस्तकानां छात्रसामग्रीणां निर्माणम् आन्तर्जालिकमाध्यमेन क्रियते । आनलाइनकार्यक्रमं समायोज्य पाठ्यसामग्रीणां निर्माणं कृत्वा पाठ्यांशविकासनसौविध्यं सततं प्रयच्छति इदं केन्द्रम् ।
- विश्वविद्यालयस्य प्रकाशनविभागोऽपि प्रकाशितानि पुस्तकानि छात्रहिताय समुपलब्धं कारयति । एवञ्च विश्वविद्यालयेन शोधपत्रिकारूपेण **शोधप्रभा, वास्तुशास्त्रविमर्शः,** सुमङ्गली, शिक्षाज्योतिः, भैषज्यज्योतिषमञ्जुषा चेति पत्रिकाणां प्रकाशनं जालमाध्यमेन प्रत्यक्षरूपेण च सततं क्रियते । अनेन विदुषां छात्राणाञ्च महान् उपकारो भवति । विद्यापीठवार्तायाः प्रकाशनमपि करोति।
- अनुपलभ्यमानानां शास्त्रीयग्रन्थानां सिद्धान्तकौमुद्यादि व्याकरणग्रन्थानां व्याप्तिपञ्चकेत्यादि न्यायग्रन्थानां जैमिनीन्यायमालेत्यादि मीमांसाग्रन्थानां वेदवेदाङ्गोन्मेषादि वैदिकग्रन्थानां योग का महत्त्व एवं सिद्धान्तादि योगग्रन्थानां शिक्षाशास्त्रीयपाठ्यग्रन्थानाम् अनुसन्धानसम्बन्धितग्रन्थानां चेत्यादि ग्रन्थानां प्रकाशनं सततं करोति कारयति च अयं विश्वविद्यालयः।
- **ई-पाठ्यांशस्य** विकासार्थं सततं प्रयत्नशीलः विद्यते अयं विश्वविद्यालयः । एवञ्च केन्द्रीयपुस्तकालयेन ई-पुस्तकाध्ययनव्यवस्थां प्रयच्छति। अनेन छात्राणाम् अध्यापकानाञ्च महान् लाभो भवत्येव ।

- **स्मार्ट-कक्षायां रिकार्डिङ्ग** आदि व्यवस्था विद्यते। येन पाठ्यांशावबोधने पाठ्यांशनिर्माणे च छात्राणाम् अध्यापकानाञ्च महान् उपकारो भवत्येव।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Facilities for e-content development such as Media Centre, Recording facility, LCS जनसम्प्रेषणकेन्द्रम्, अभिलेखनसौविध्यम्, व्याख्यानलेखाङ्कनप्रणाली (व्य-ले-प्र) वैद्युत-पाठ्यांशविकासनसौविध्यानि (दत्तांशप्रारूपम्) | View Document |
| Links of photographs छायाचित्राणां सन्धानम् | View Document |

**4.4 Maintenance of Campus Infrastructure**

***4.4.1 Average expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component, as a percentage during the last five years***

***पञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्वलनसौविध्यानां च अनुरक्षणाय कृतस्य व्ययस्य प्रतिशतता-***

**Answer:** 81.42

4.4.1.1 Expenditure incurred on maintenance of physical facilities and academic support facilities excluding salary component year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षेषु वेतनाद् ऋते भौतिकसौविध्यानां शैक्षिकप्रोद्वलनसौविध्यानां च अनुरक्षणाय कृतः वार्षिकव्ययः (लक्षशः रूप्यकेषु)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1575.15 | 1358 | 907.14 | 685.95 | 684.78 |

| File Description | Document |
|---|---|
| Details about assigned budget and expenditure on physical facilities and academic facilities (Data Templates) • भौतिक-शैक्षिकसौविध्यानाम् अनुरक्षणाय प्रदत्तः धनराशिः, कृतः व्ययश्च | View Document |
| Audited statements of accounts • अङ्केक्षणविवरणम् | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***4.4.2 Established systems and procedures for maintaining and utilizing physical, academic and support facilities - laboratory, library, sports complex, computers, classrooms etc., exists.***

***प्रयोगशाला-ग्रन्थालय-क्रीडाङ्गण-सङ्गणकयन्त्र-पठनकक्ष्या-प्रभृतीनां भौतिक-शैक्षणिक-सहायकसौविध्ययुतानां परिरक्षणार्थं समुपयोगार्थं च संस्थायां सुनिश्चिता प्रणाली कार्यपद्धतिश्च विद्यते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कतविश्वविद्यालये प्रयोगशाला-ग्रन्थालय-क्रीडाङ्गण-सङ्गणकयन्त्र-पठनकक्ष्या-प्रभृतीनां भौतिक-शैक्षणिक-सहायकसौविध्ययुतानां परिरक्षणार्थं समुपयोगार्थं च सुनिश्चिता प्रणाली कार्यपद्धतिश्च विद्यते।

संरचिताभिः परिषद्भिः समितिभिः वा निर्दिष्टानां कार्याणां निर्वाहः क्रियते। विश्वविद्यालये परिसरेषु प्रयोगशालादीनां परिरक्षणसमुपयोगार्थं च समितयः संरचिताः वर्तन्ते। विषयविशेषज्ञाः, शैक्षिकप्रमुखाः, छात्रप्रतिनिधयः च समितिषु भवन्ति। ग्रन्थालयपरामर्शसमितिः पुस्तकक्रयणसमितिश्च काले कालेऽपेक्षितानां पुस्तकानां क्रयणम् अनुशंसति। प्राचीनानां ग्रन्थानां पुस्तकानां सर्जनं जीर्णानां बैण्डिंग् कार्यं च अनुशंसति। ग्रन्थालये पुस्तकविभागः, आडियोवीडियो विभागश्च वर्तते। तत्र पुस्तकानाम्, सङ्गणकानाम्, पीठोपकरणानां च संरक्षणम्, कीटनिरोधकप्रयोगः इत्यादिकार्यं यथापेक्षं क्रियते। क्रीडासमितिः छात्राणां विविधक्रीडानां निर्वाहं करोति। अन्तःपरिसरीयाः वार्षिकस्पर्धाः राज्यस्तरीयादिस्पर्धाः इत्येतासु स्पर्धासु छात्राः प्रशिक्ष्यन्ते।

**प्रयोगशाला-**

- श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य, शिक्षासंकाये (शिक्षाशास्त्रपीठे), मनोविज्ञानप्रयोगशाला, भाषाप्रयोगशाला, सामाजिकाध्ययनप्रयोगशाला इति प्रयोगशालात्रयं विद्यते। मनोविज्ञानप्रयोगशाला, शैक्षिकप्रौद्योगिकीप्रयोगशाला च मार्च, २००७ तमे वर्षे स्थापिता विद्यते। मनोविज्ञानप्रयोगशालायां ३० छात्राणां उपवेशनक्षमता विद्यते तथा च १५ छात्राः एकस्मिन् समये परीक्षणं प्रयोगञ्च कर्तुं शक्नुवन्ति। अत्र १६९ परीक्षणानि, २५ यन्त्राणि च सन्ति। इयं प्रयोगशाला विद्यावारिधि (पीएच.डी) इति पाठ्यक्रमस्यानुसन्धनावश्यकतां सम्पोषयति। तत्र शिक्षाप्रौद्योगिकीप्रयोगशालायां ४४ छात्राणां उपवेशनक्षमताऽस्ति। छात्राः अस्याः प्रयोगशालायारुपयोगं शैक्षिकप्रौद्योगिक्याः सम्बद्धानां PPT, Net browsing इत्यादीनां व्यावहारिकविषयाणां निर्माणार्थं प्रयत्नं कुर्वन्ति । भाषाप्रयोगशाला २०१३ तमे वर्षे स्थापिता। तत्र भाषाप्रयोगशालायां ५७ छात्राणामुपवेशनक्षमता विद्यते, शिक्षाशास्त्रविभागीयपुस्तकालयस्य स्थापना 2015 तमे वर्षे अभवत्, छात्राणां संकायसदस्यानाञ्च शैक्षणिकसंशोधनक्रियाकलापानां सेवां समर्थनञ्च कुर्वन्नस्ति।
- शिक्षापाठ्यक्रमे विद्यमानानां मनोवैज्ञानिकप्रयोगाणां दर्शनाय मनोवैज्ञानिकप्रयोगशालायाः निर्वहणं क्रियते। सङ्गणकज्ञाः एतासाम् शालानां निर्वहणार्थं निर्दिष्टा भवन्ति।

**ग्रन्थालयः-**

- ग्रन्थालयस्य नाम केन्द्रीयग्रन्थागारः तस्य नामान्तरमस्ति पद्मश्री डॉ. मण्डनमिश्रकेन्द्रीयग्रन्थालयः। समग्रग्रन्थागारः आधुनिकतकनीकप्रणाल्याः सुसज्जितः वर्तते। ग्रन्थालयः पूर्णरूपेण स्वयंप्रवृत्तः यत्र समन्वितग्रन्थालय-प्रबन्धनप्रणाली उपयुज्यते।
- ग्रन्थालयः समन्वितग्रन्थालयप्रबन्धनप्रणाल्याः तन्त्रांशः (ILMS) उपयोगेन स्वयं चालितो विद्यते। अस्य तन्त्रांशस्य (ILMS) नाम भवति लिब्सिस् (LIBSYS)। येन सम्पूर्णग्रन्थालयः स्वयं चालितो भवति। अस्य लिब्सिस्-7 तन्त्रांशस्य प्रारम्भः औपचारिकरूपेण 2011 तमे ख्रीष्टाब्दे अभवत्। ILMS तन्त्रांश: अधिग्रहणेन (Acquisition) सह ग्रन्थानां सूचीबद्धं (Cataloguing) प्रसारं (Circulation) क्रमिकनियन्त्रणञ्च (Serials control) करोति।
- **शिक्षापीठे** विभागीयपुस्तकालयोऽपि वर्तते। अस्मिन् पुस्तकालये शिक्षासम्बद्धपारम्परिकपुस्तकानाम् आधुनिकचिन्तनपरकपुस्तकानाञ्च संग्रहो विद्यते। यत्र दर्शनशास्त्र-मनोविज्ञान-शिक्षाप्रौद्योगिकी-पर्यावरण-अध्ययन-मूल्य-शिक्षा-शिक्षक-शिक्षा-योग-शोधप्रबन्ध-संगोष्ठी-प्रक्रिया-पत्रिका-ई-सहायाः इत्यादयः सन्ति। पुस्तकालयः न केवलं संकायस्य, शोधकर्तृणां, शिक्षाविद्यालयस्य छात्राणां शैक्षणिकसूचनायाः, शोधस्य च आवश्यकतां पूरयति अपितु पीठप्रमुखस्य विभागाध्यक्षस्य पुस्तकालयनियन्त्रकस्य वा अनुमत्या विश्वविद्यालयान्तरस्य अनुसन्धातृणां छात्राणां च कृते स्वीयसंसाधनस्य विस्तारमपि कर्तुं प्रभवति। आवश्यकतानुसारं संसाधनानां पुस्तकानां पत्रिकाणां संग्रहार्थं पुस्तकालयस्य क्रयसमितेः अनुशंसां सम्मतिं चावाप्य क्रयमपि कर्तुं प्रभवति। शिक्षापीठे 11 कक्षाः सन्ति, 6 कक्षेषु 60 छात्राणामासनक्षमताऽस्ति, कक्षात्रयमेतादृशं विद्यते यत्र त्रिंशच्छात्राणामुपवेशनक्षमता विद्यते। कक्षाद्वयमेतादृशं विद्यते यत्र दश-दश छात्राः उपवेष्टुं समर्थाः भवन्ति। एवञ्च वृहत्कक्षद्वयं विद्यते यत्र आन्तरिकं क्रियाशीलं मञ्चं विद्यते। एवञ्चात्र PTZ Camera इत्यस्य सुविधा वर्तते।

**क्रीडाङ्गणम्-**

- क्रीडाङ्गणस्य लघुनिर्वाहः समितिसूचनानुसारं सम्पद्यते। मुख्यं निर्वहणं विश्वविद्यालयनिर्माणविभागद्वारा (UWD) क्रियमाणं वर्तते। अत्र क्रीडाङ्गणेषु अभ्यस्तक्रीडाः विश्वविद्यालयस्य छात्राः अन्यविश्वविद्यालयानां छात्रैः सह समबलेन स्पर्धितुं शक्नुवन्ति।

**सङ्गणकयन्त्रम्-**

- विश्वविद्यालये संगणकयन्त्रादीनि संगणकप्रयोगशालाश्च वर्तन्ते। तत्र प्रयोगशालायामाधुनिक-संगणकयन्त्रस्य विद्यमानता वर्तते। स्मार्टकक्षाणां संगणकप्रयोगशालानाञ्च सञ्चालनमिदं केन्द्रं करोति। क्रयणसमितिः अपेक्षिताः लेखनसामग्रीं क्रेतुमनुशंसां करोति। सामग्रीक्रयणसमितिः सङ्गणक-श्वेतफलकमित्यादेः वस्तुजातस्य काले काले क्रयणायानुशंसां ददाति।
- समीकरणनिर्वहणसमितिः भवनेषु कार्ये जीर्णानामनुपयुक्तानां वस्तूनां परिशीलनं करोति। विद्युद्दीप-सङ्गणकानि चेत्यादीनां नाशोन्मुखानां समीकरणायानुशंसां करोति।

**पठनकक्ष्या-प्रभृतीनां सुनिश्चिता प्रणाली-**

- सङ्गणकीयकक्ष्यायाः प्रायोगिककक्ष्यायाः सञ्चालनम्, छात्रैः आवेदनपत्रपूरणमित्यादीनां कार्याणां सम्पादनाय सङ्गणकशालायाः निर्वहणं करोति। छात्राणां भाषाध्ययनकौशलस्य ज्ञानाय भाषाप्रयोगशालायाः निर्वहणं क्रियमाणं वर्तते। आङ्ग्लभाषायाम् वाक्कौशलस्य सम्पादनाय सङ्गणकानि भाषाप्रयोगशालायां योजितानि वर्तन्ते।
- मुख्यभवनस्य भित्तिषु जायमानः जलस्रावः निर्मितिकेन्द्रद्वारा समीक्रियते। भवनानि परितः विद्यमानस्य प्रदेशस्य नैर्मल्यरक्षणे समितेः मुख्या दृष्टिः वर्तते। अवकराणां प्रतिदिनमन्यत्र नयनेन निर्वहणं सम्पद्यते। उद्याननिर्वहण-वाटिकानिर्वहणावान्तरमार्गाणां निर्वहणं यानमुक्तवातावरणस्य निर्वाहश्चेत्यादिषु विषयेषु परिसराः अवधानं यच्छन्ति।
- बालकानां छात्रावासः वर्तते। प्रकोष्ठेषु विद्युद्दीप-व्यजन-पर्यङ्कश्चेत्यादीनि सौविध्यानि कल्पितानि सन्ति। छात्रावासस्य निर्वहणाय छात्रावासाध्यक्षः नियुक्तो वर्तते। विकलाङ्गानां कृते आनुकूल्यं कल्पितं वर्तते। तेषां गमनागमनयोः सौविध्याय निम्नावरोही मार्गः कल्पितो वर्तते। CCTV इति प्रत्यक्षदर्शियन्त्राणि योजितानि सन्ति। शैक्षिणिकसहायकसौविध्यानां समुपयोगाय अन्याः समितयः परोक्षतया साहाय्यमाचरन्ति। केन्द्रीय स्थानीयशोधमण्डली-एंटी रैगिंग सेल-स्वस्थसंवादसमिति-छात्रकल्याणसमिति-अनुशासनसमिति-प्रकाशनसमिति-मानवाधिकार-उत्पीडनसमितिः यौन-उत्पीडननिवारणसमिति-छात्रपरामर्शनियुक्तिसमितिश्चेत्यादयः वर्तन्ते।

***The English version is available in the additional information link.***

| File Description | Document |
| --- | --- |
| additional information अतिरिक्ताः सूचनाः | View Document |
| Link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document |

**5.Student Support and Progression**

**5.1 Student Support**

***5.1.1 Average percentage of students benefited by scholarships/ freeships provided by the Government/ UGC/ Rashtriya Samskrit Sansthan/ any other body during the last five years.***

***विगतपञ्चवर्षेषु सर्वकारद्वारा/ वि.अ.आ द्वारा/ राष्ट्रियसंस्कृतसंस्थानद्वारा/ अन्यसंस्थाद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां प्रतिशततायाः मध्यमानम्।***

**Answer:** 34.63

5.1.1.1 Number of students benefited by scholarships and freeships provided by the Government year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारद्वारा प्रदत्ताभ्यः छात्रवृत्तिभ्यः शुल्कमुक्तिभ्यश्च प्राप्तलाभानां छात्राणां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
| --- | --- | --- | --- | --- |

| | | | | |
|---|---|---|---|---|
| 632 | 693 | 936 | 686 | 540 |

| File Description | Document |
|---|---|
| upload self attested letter with the list of students sanctioned scholarship | View Document |
| Upload any additional information | View Document |
| Details of students benefited by scholarships and freeships provided by the Government during the last five years | View Document |

***5.1.2 Average percentage of students benefited by scholarships, freeships, etc. provided by the institution besides government schemes during the last five years.***

***विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थया प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां प्रतिशततायाः मध्यमानम्।***

**Answer:** 26.44

5.1.2.1 Total number of students benefited by scholarships, freeships, etc provided by the institution besides government schemes year-wise during the last five years

विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थानेन प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिः लाभान्वितानां छात्राणां वार्षिकयोगः।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 381 | 447 | 640 | 655 | 528 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Details of students benefited by scholarships and freeships besides government schemes in last 5 years (विगतपञ्चवर्षेषु सर्वकारीययोजनातिरिक्तं संस्थानेन प्रदत्ताभिः छात्रवृत्ति-शुल्कमुक्तिप्रभृतिभिश्च लाभान्वितानां छात्राणां सङ्ख्या।) | View Document |

***5.1.3 Number of capability enhancement and development schemes***

***1. Guidance for competitive examinations***

***2. Career counselling***

***3. Softskill development***

***4. Remedial coaching***

***5. Language lab***

***6. Bridge courses***

***7. Yoga and Meditation***

***8. Personal counselling***

***9. Training for deciphering ancient manuscripts***

***10. Training on Composing Sanskrit Creative poetry and Dramaturgy***

*11. Shastra Vakyartha Training*

*12. Proof Reading for Devanagari Texts*

*13. Spoken Sanskrit Classes*

*14. Foreign Language Study and Training*

*15. Training on Vedic Recitation with correct Intonation*

*16. Training on Karma-Kanda*

*17. Fine Arts, Performing Arts and Theatre*

*सामर्थ्यसंवर्धनाय तद्विकासाय च सञ्चालितानां योजनानां सङ्ख्या*

*1. स्पर्धात्मकपरीक्षाणां कृते मार्गदर्शनम्*

*2. वृत्तिपरामर्शः*

*3. सूक्ष्मकौशलविकासः*

*4. उपचारात्मकम् अनुशिक्षणम्*

*5. भाषाप्रयोगशाला*

*6. सेतुपाठ्यक्रमाः*

*7. योगः ध्यानं च*

*8. वैयक्तिकपरामर्शः*

*9. प्राचीन-पाण्डुलिपि-पठनप्रशिक्षणम्*

*10. काव्यलेखन-नाट्यप्रशिक्षणम्*

*11. शास्त्रार्थ/वाक्यार्थ-प्रशिक्षणम्*

*12. देवनागरी-मुद्राक्षरशोधनप्रशिक्षणम्*

*13. संस्कृतसम्भाषणप्रशिक्षणम्*

*14. वैदेशिकभाषाध्ययनम्*

*15. वेदानां सस्वरपाठप्रशिक्षणम्*

*16. कर्मकाण्डप्रशिक्षणम्*

*17. ललितकला प्रदर्शनकला अभिनयकला वा*

**Answer:** A. 10 or more of the above (अ. उपर्युक्तेषु यानि कानिचिद् दश अथवा ततोऽप्यधिकम्)

| File Description | Document |
| --- | --- |
| Details of capability enhancement and development schemes (सामर्थ्यसंवर्धनाय तद्विकासाय च संचालितानां योजनानां विवरणम्।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |

| | |
|---|---|
| Link to Institutional website (• संस्थायाः अन्तर्जालपुटस्य सन्धानाम्।) | View Document |

***5.1.4 Average percentage of students benefited by guidance for competitive examinations and career counselling offered by the institution during the last five years.***

***विगतपञ्चवर्षेषु संस्थया प्रदत्तेन स्पर्धात्मकपरीक्षामार्गदर्शनेन, वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां प्रतिशततायाः मध्यमानम्।***

**Answer:** 15.48

5.1.4.1 Number of students benefited by guidance for competitive examinations and career counselling offered by the institution year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु संस्थया प्रस्तुतेन स्पर्धात्मकपरीक्षामार्गदर्शनेन वृत्तिपरामर्शेन च लाभान्वितानां छात्राणां वार्षिकी सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 450 | 392 | 500 | 0 | 232 |

| File Description | Document |
|---|---|
| Details of students benefited by guidance for competitive examinations and career counselling during the last five years | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.1.5 The institution has a transparent mechanism for timely redressal of student grievances including sexual harassment and ragging cases.***

***(Yes/ No)***

***लैङ्गिकोत्पीडनस्य आधर्षणस्य च झटिति दूरीकरणाय संस्थायां पारदर्शकतन्त्राणि सन्ति।***

***(सन्ति/ न सन्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः।) | View Document |
| Minutes of the meetings of student redressal committee, prevention of sexual harassment committee and Anti Ragging committee (छात्रपरिदेवनादूरीकरणसमितेः, लैङ्गिकोत्पीडनस्य दूरीकरणसमितेः, आधर्षणविरोधिसमितेश्च कार्यवृत्तानि।) | View Document |
| Details of student grievances including sexual harassment and ragging cases (लैङ्गिकोत्पीडन-आधर्षणविषये छात्रपरिदेवनस्य विवरणम्) | View Document |

***5.1.6 The University organises Inter-University Talent Festival, Vakyartha, Shastrartha, Salakapareeksha, Sanskrit elocution contest, Inter-Sanskrit-university Youth festival, Inter College Youth festival, Sanskrit Poets' Meet, special coaching or training in creative writing, Sanskrit-Poetry writing/ DTP, Copy editing, Proof reading, Cultural tourism, Hospitality, Purana pravachana, lalita-kala etc.***

***अन्तर्विश्वविद्यालयप्रातिभसमारोहं, वाक्यार्थसभां, शास्त्रार्थसभां, शलाकापरीक्षां, संस्कृतभाषणस्पर्धां, शास्त्रसभाम्, अन्तस्संस्कृत-विश्वविद्यालय-युवसमारोहम्, अन्तर्महाविद्यालय-युवसमारोहं, संस्कृत-कविसमवायादि-कार्यक्रमान् आयोजयति। विश्वविद्यालयः सर्जनात्मकलेखनस्य, संस्कृतकाव्यलेखनस्य, सङ्गणक-विज्ञान-विषयक-पुस्तकप्रकाशनस्य, प्रतिलिपिसम्पादनस्य, प्रेक्ष्यवाचनस्य (Proof Reading), सांस्कृतिकपर्यटनस्य, आतिथ्य-निर्वहणस्य, पुराण-प्रवचनस्य, ललितकलानाम् अन्येषां च विषयाणां विशिष्टम् अनुशिक्षणं/ प्रशिक्षणं च प्रददाति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य मुख्यमुद्देश्यं भवति छात्राणाम् अध्ययनकौशलविकासः, शास्त्रार्थकौशलविकासश्च। छात्राणां सर्वतोमुखाभिवृद्धये विश्वविद्यालयः बहुविधान् शैक्षिकान्, रचनात्मकान्, सर्जनात्मकान्, सांस्कृतिकान् च कार्यक्रमान् समायोजयति। अपेक्षितेषु क्रियाकलापेषु छात्रेभ्यः शिक्षणं प्रशिक्षणमनुशिक्षणञ्च दीयते। अनेनैव विश्वविद्यालयस्य छात्राः बह्वीसु स्पर्धासु सर्वप्रथमस्थानमलङ्कुर्वन्ति। विश्वविद्यालयस्य पाठ्यसहगामिनः क्रियाकलापाः अत्यन्तं विशिष्टाःव्यापकाश्च सन्ति। विश्वविद्यालयस्य शिक्षकगणेन शिक्षिताः अनुशिक्षिताः प्रशिक्षिताश्च छात्राः भारतस्य कोणे कोणे सम्पाद्यमानेषु कार्यक्रमेषु प्रतियोगितासु परीक्षासु शास्त्रार्थसभासु च भागं गृहीत्वा विजयवैजयन्त्या सहैव प्रत्यायान्ति। विश्वविद्यालयेन सङ्घठिताः विशिष्टाः क्रियाकलापाः यथा-

1. **वाक्यार्थसभा शास्त्रसभा** शास्त्रार्थ**गोष्ठी इत्यादयः**

वाक्यार्थप्रणाली पारम्परिकशास्त्रशिक्षणस्य आधारभूता प्रणाली वर्तते। अतः वाक्यार्थपरम्परायाः परिरक्षणाय वाक्यार्थसभा-शास्त्रसभा-शास्त्रार्थगोष्ठ्यश्च समायोज्यन्ते। वाक्यार्थसभासु छात्रा अपि भागं गृहीत्वा शिक्षकाणां शास्त्रज्ञानं वाग्वैखरीञ्च प्रत्यक्षीकर्तुं प्रभवन्ति। जिज्ञासूनां समाधानानि सभामुखमेव शिक्षकैः प्रदीयन्ते। शास्त्रसभासु विश्वविद्यालयस्य आचार्याः शास्त्रार्थविवेचनाय समामन्त्र्यन्ते। श्रोतारः छात्राः सोत्साहं भागं गृहीत्वा अभिप्रेरिताः भवन्ति। काशी, पुरी, तिरुपतिः, उज्जयिनि, काञ्ची, नवदेहली इत्यादिषु स्थानेष्वपि शास्त्रसभा शास्त्रगोष्ठ्यश्च समायोज्यन्ते। एतासु शास्त्रसभासु विश्वविद्यालयस्य आचार्याः छात्राश्च भागं गृह्णन्ति।

2. **संस्कृतभाषणस्पर्धा शलाकापरीक्षा च**

केन्द्रीयसंस्कृतविश्वविद्यालयेन प्रतिवर्षमखिलभारतीयशास्त्रस्पर्धा समायोज्यते। तत्र अखिलभारतस्तरे विविधेषु शास्त्रेषु शास्त्रार्थसभायाः भाषणस्पर्धायाः शलाकापरीक्षायाः, कण्ठपाठप्रतियोगितायाः श्लोकोच्चारणप्रतियोगितायाः श्लोकान्त्याकक्षर्यश्च आयोजनं क्रियते। एतासु स्पर्धासु भारतस्य प्रत्येकं राज्यतः स्पर्धालवः प्रतिभागं कुर्वन्ति। अखिलभारतस्तरे प्रतिभागग्रहणात् पूर्वं राज्यस्तरे स्पर्धालूनां परीक्षणं क्रियते। दिल्लीराज्यस्य राज्यस्तरीयशास्त्रस्पर्धायाः समायोजनं प्रतिवर्षं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन क्रियते। विश्वविद्यालयस्य प्राध्यापकैः शलाकापरीक्षादिषु प्रतिभागकर्तृभ्यः छात्रेभ्यः आवर्षं प्रशिक्षणं दीयते। एतस्यां राज्यस्तरीयशास्त्रस्पर्धायां न केवलं विश्वविद्यालयस्य विविधेभ्यः विभागेभ्यः छात्राः भागं गृह्णन्ति अपितु दिल्लीराज्यस्थविविधेभ्यः महाविद्यालयेभ्यः विश्वविद्यालयेभ्यः गुरुकुलेभ्यः संस्कृतपाठशालाभ्यश्च छात्राः प्रतिभागं कुर्वन्ति। ये छात्राः विविधासु स्पर्धासु प्रथम-द्वितीय-तृतीयस्थानञ्च प्राप्नुवन्ति तेभ्यः पुरस्काराः प्रमाणपत्राणि च दीयन्ते। ये छात्राः राज्यस्तरीयशास्त्रस्पर्धायां प्रथमस्थानर्हाः भवन्ति ते अखिलभारतस्तरे दिल्लीराज्यस्य प्रतिनिधित्वं कुर्वन्ति। प्रतिभागिछात्रैः सह विश्वविद्यालयस्य प्राध्यापकोऽपि मार्गदर्शकरूपेण अखिलभारतशास्त्रस्पर्धायां याति।

3. **संस्कृतसप्ताहकार्यक्रमः**

विश्वविद्यालये प्रतिवर्षं संस्कृतसप्ताहस्य समायोजनं सोत्साहेन क्रियते। श्रावणपूर्णिमायां संस्कृतदिनम् भवति। संस्कृतदिनमालक्ष्य विश्वविद्यालयेन संकृतसप्ताहमहोत्सवनाम्ना साप्ताहिककार्यक्रमाः समायोज्यन्ते। तदन्तर्गतं छात्रेभ्यः संस्कृतभाषणस्पर्धा-संस्कृतस्तोत्रपाठप्रतियोगिता-संस्कृतगीतप्रतियोगिता-संस्कृतपोस्टरनिर्माणप्रतियोगिता-संस्कृतस्लोगनलेखनप्रतियोगिता-गीताकण्ठपाठप्रतियोगिता-अमरकोशकण्ठपाठप्रतियोगिता-अष्टाध्यायीकण्ठपाठप्रतियोगिता-वेदमन्त्रोच्चारणप्रतियोगिता-श्लोकान्त्याक्षरीप्रतियोगिता-श्लोकोच्चारणप्रतियोगितेत्यादीनां विविधानां राज्यस्तरीयशास्त्रस्पर्धानां समायोजनं क्रियते। एवञ्च विशिष्टानां विदुषां भारतीयज्ञानपरम्परामवलम्ब्य व्याख्यानान्यपि संस्कृतसप्ताहमहोत्सवान्तर्भूतमेव समायोज्यन्ते। संस्कृतसप्ताहमहोत्सवोपलक्ष्ये विश्वविद्यालयस्य विविधैः पीठैः विविधाः संगोष्ठ्यः समायोज्यन्ते। एतासु संगोष्ठीषु वर्तमानपरिप्रेक्ष्ये संस्कृतशास्त्रेषु निहितस्य विज्ञानस्य समुपयोगविषये विद्वद्भिः स्वविचारान् प्रस्तूयन्ते।

### *4-* सांस्कृतिककार्यक्रमाः

छात्राणां सर्वाङ्गीणविकासाय शैक्षणिकगतिविधिभिः सह सांस्कृतिककार्यक्रमाणां महत्त्वपूर्णं स्थानं भवति। अत एव विश्वविद्यालयस्य छात्रकल्याणपीठेन यथाकालं छात्रेभ्यः विविधानां सांस्कृतिककार्यक्रमाणां समायोजनं क्रियते। एतेषु कार्यक्रमेषु छात्राः स्वस्याः प्रतिभायाः प्रदर्शनं कुर्वन्ति। सांस्कृतिककार्यक्रमान्तर्भूतं कल्पद्रुमनाम्ना युवमहोत्सवः समायोजितः। अस्मिन् युवमहोत्सवे विश्वविद्यालयस्य छात्रैः भारतीयसंस्कृतेरनुगुणं नृत्य-गीत-वाद्य-नाट्यादिमाध्यमेन स्वीया प्रतिभा प्रदर्शिता। योगविभागस्य छात्रैः योगकौशलस्य प्रदर्शनमपि कृतम्। विश्वविद्यालयेऽस्मिन् भारतस्य विविधेभ्यः प्रान्तेभ्यः छात्राः पठन्ति। अत एव स्वस्य राज्यस्य संस्कृतेः परिचयार्थं तत्तत्राज्यस्य छात्रेभ्यः विविधाः सास्कृतिककार्यक्रमाः समायोज्यन्ते। अनेन एकभारत-श्रेष्ठभारत इत्यस्यानुपालनं क्रियते। विश्वविद्यालयस्य छात्रैः उत्कलसंस्कृतिं प्रदर्शयितुम् उत्कलदिवसस्यायोजनं कृतम्। कार्यक्रमेऽस्मिन् छात्रैः उत्कलराज्यस्य संस्कृतिः नृत्य-गीत-वाद्य-नाट्यादिभिः प्रदर्शिता। एवमेव हिमाचलदिवसमालक्ष्य विश्वविद्यालयस्य छात्रैः विविधानां सांस्कृतिककार्यक्रमाणां समायोजनं कृतम्। कार्यक्रमेऽस्मिन् हिमाचलसंस्कृतिः  नृत्य-गीत-वाद्य-नाट्यादिभिः प्रदर्शिता। कार्यक्रमेऽस्मिन् हिमाचललोकगीतानि 'नाटी'लोकनृत्यञ्च आकर्षणस्य विशेषकेन्द्रमासीत्। विश्वविद्यालयस्य छात्रैः वैशाखीमवलम्ब्य 'विखौती' इति उत्तराखण्डराज्यस्य महोत्सवविशेषस्यायोजनं कृतम्। कार्यक्रमेऽस्मिन् उत्तराखण्डराज्यस्य संस्कृतिः नृत्य-गीत-वाद्य-नाट्यादिभिः प्रदर्शिता। एवमेव विश्वविद्यालयस्य छात्रकल्याणपीठेन काले-काले विविधानां सांस्कृतिककार्यक्रमाणां समायोजनं क्रियते यत्र विश्वविद्यालयस्य छात्राः सोत्साहेन प्रतिभागं कुर्वन्ति।

### *5*. छात्राणां सर्जनात्मकशक्तेः विकासः

छात्राणां सर्जनात्मकशक्तेः विकासाय *2* मार्च, *2024* तमे दिनांके सरलमानकसंस्कृतकार्यशाला आयोजिता। अस्यां कार्यशालायां सरलमानकसंस्कृतस्य क्रियान्वयनसम्बद्धविषयाः बोधिताः। छात्राः सद्य एव सरलवाक्येषु अनुच्छेदलेखनाय, कथालेखनाय, श्लोकरचनायै  च प्रेरिताः। अनेन छात्राणां सर्जनात्मककार्यप्रेरणं वर्धितम्। सहैव *11* तः *13* मार्च, *2024* पर्यन्तं ध्येयवाक्यविश्लेषणकार्यशालाऽपि समायोजिता। अस्यां कार्यशालायां ध्येयवाक्यानां विश्लेषणाय पञ्चगणाः निर्धारिताः। प्रत्येकं गणे निर्धारिताः सदस्याः स्वीकृतध्येयवाक्यानां संस्कृत-हिन्दी-आंग्लभाषायां विश्लेषणं कृतवन्तः। विश्लेषणेन ध्येयवाक्येषु अन्तर्निहितपदानां तार्किकचिन्तनम् अवगतवन्तः। एवञ्च तादृशानां तार्किकपदानां प्रयोगपुरस्सरं नूतनध्येयवाक्यानां रचनायै प्रेरणां प्राप्तवन्तः।

***The English version is available in the additional information link.**

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**5.2 Student Progression**

***5.2.1 Average percentage of placement of outgoing students during the last five years***

***विगतपञ्चवर्षेषु प्राप्तोद्योगानाम् अन्तिमवर्षच्छात्राणां प्रतिशततायाः मध्यमानम्***

**Answer:** 20.61

5.2.1.1 Number of outgoing students placed year-wise during the last five years

विगतपञ्चवर्षेषु प्राप्तोद्योगानां छात्राणां वार्षिकसङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 277 | 156 | 144 | 58 | 72 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Self attested list of students placed (प्राप्तोद्योगानां छात्राणां स्वयं हस्ताक्षरिता सूची) | View Document |
| Details of student placement during the last five years (विगतपञ्चवर्षेषु प्राप्तोद्योगानां छात्राणां सङ्ख्या।) | View Document |

***5.2.2 Percentage of student progression to higher education (previous graduating batch) (preceeding academic year data)***

***उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां प्रतिशतता (पूर्वतनं स्नातकवर्गम् आश्रित्य) (प्रगताध्ययनवर्षस्य दत्तांशः)।***

**Answer:** 24.28

5.2.2.1 Number of outgoing students progressing to higher education

उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां सङ्ख्या

Answer: 143

| File Description | Document |
|---|---|
| Upload supporting data for student/alumni (छात्राणां/ पूर्वच्छात्रसङ्घस्य सहायकदत्तांशः।) | View Document |
| Details of student progression to higher education (उच्चतरकक्ष्याः प्रति अग्रेसराणां छात्राणां विवरणम्।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.2.3 Average percentage of students qualifying in state/ national/ international level examinations during the last five years. (eg: NET/ SLET/ TOEFL/ Civil Services/ State government examinations)***

***विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्रस्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां मध्यमानस्य प्रतिशतता (उदा. नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)***

**Answer:** 100

5.2.3.1 Number of students qualifying in state/ national/ international level examinations (eg: NET/SLET/TOEFL/ Civil services/State government examinations) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्- टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 14 | 104 | 25 | 7 | 10 |

5.2.3.2 Number of students appearing in state/ national/ international level examinations (eg: NET/SLET/GRE/TOEFL/ Civil Services/State government examinations) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य/राष्ट्र/अन्ताराष्ट्र-स्तरीयासु परीक्षासु भागं गृहीतवतां छात्राणां वार्षिकसङ्ख्या (उदा-नेट्-स्लेट्-टोफेल्-नागरिकसेवा-राज्यसर्वकारपरीक्षाः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 14 | 104 | 25 | 7 | 10 |

| File Description | Document |
|---|---|
| Upload supporting data for the same (तेषां सहायकदत्तांशाः।) | View Document |
| Number of students qualifying in state/ national/ international level examinations during the last five years (विगतपञ्चवर्षेषु राज्य/ राष्ट्र/ अन्ताराष्ट्र-स्तरीयासु परीक्षासु समुत्तीर्णानां छात्राणां सङ्ख्या।) | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.2.4 Details of the programme for the exchange/participation of students at national/international level for academic and cultural activities with other institutions.***

***विश्वविद्यालयान्तरेण अन्यया संस्थया सह वा राष्ट्रिय-अन्ताराष्ट्रियस्तरेषु शैक्षिकसांस्कृतिकगतिविधीनां कृते छात्राणां विनिमयाय सञ्चालितस्य कार्यक्रमस्य विवरणम्।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य विविधैः विश्वविद्यालयमहाविद्यालयाभ्यां सह सहमतिज्ञापनं (**MOU**) वर्तते। तदन्तर्गतं विविधाः कार्यक्रमाः आयोज्यन्ते। यथा- विश्वविद्यालयस्य वास्तुशास्त्रविभागस्य योजना एवं वास्तुकलाविद्यालयेन (**SPA**) सह सहमतिज्ञापनं वर्तते। तदन्तर्गतमेव प्रतिवर्षं प्राचीनवास्तुशास्त्रमाधुनिकवास्तुकला च विषयमवलम्ब्य राष्ट्रिया अन्तर्राष्ट्रियाश्च कार्यशालाः संगोष्ठ्यश्च समायोज्यन्ते। एतेषु शैक्षणिककार्यक्रमेषु न केवलं विश्वविद्यालयवास्तुकलाविद्यालयोः छात्राः प्रतिभागं कुर्वन्ति अपितु अन्येषां विश्वविद्यालयानां शोधच्छात्राऽपि भागं गृहित्वा प्राचीनवास्तुशास्त्रस्य विविधानां सिद्धान्तानामाधुनिकपरिप्रेक्ष्ये समुपयोगविषये स्वीयानि शोधपत्राणि प्रस्तुवन्ति। एतेषु चितानां शोधपत्राणां विश्वविद्यालयस्य शोधपत्रिकासु प्रकाशनमपि क्रियते। एतदतिरिच्य वास्तुशास्त्रविभागस्य सहमतिज्ञापनं (**MOU**) महर्षियूनिवर्सिटि-वर्ल्ड-वाइड (**Maharshi University World Wide**) इत्यनया संस्थया सह वर्तते। तदन्तर्गतमेव अन्तर्राष्ट्रियसंगोष्ठ्यः समायोज्यन्ते। एतासु वैदेशिकाः विद्वांसः शोधार्थिनोऽपि भागं गृह्णन्ति स्वकीयानि शोधपत्राणि च प्रस्तुवन्ति।

संसद अधिनियमेन 2020 तमे वर्षे त्रयः केन्द्रीयसंस्कृतविश्वविद्यालयाः संस्थापिताः। तदारभ्य प्रतिवर्षं त्रिभिः विश्वविद्यालयैः सम्भूय उत्कर्षमहोत्सवं महता उत्साहेन आयोज्यते। महोत्सवेऽस्मिन् त्रयाणां केन्द्रीयसंस्कृतविश्वविद्यालयानां प्राध्यापकाः, कर्मचारिणः, छात्राश्च सम्भूय विविधानां शैक्षिकानां, सांस्कृतीनां कार्यक्रमाणाञ्च आयोजनं कुर्वन्ति। उत्कर्षमहोत्सवाङ्गभूतेषु शैक्षणिकसांस्कृतिककार्यक्रमेषु च भारतस्य विविधानां विश्वविद्यालयानां कुलपतयः, प्राध्यापकाः, शोधार्थिनः, छात्राश्च प्रतिभागं कुर्वन्ति।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः विश्वबन्धुत्वभावनया कार्यं करोति। अतः सर्वाभिः शैक्षणिकसंस्थाभिः सह मधुरसम्बन्धं वहति। अस्माकं विश्वविद्यालयस्य छात्राः केन्द्रीयविश्वविद्यालयेनायोजितेषु शैक्षिकसांस्कृतिककार्यक्रमेषु प्रतिवर्षं सोत्साहेन भागं गृह्णन्ति। यथा 2024 तमे वर्षे केन्द्रीयविश्वविद्यालयस्य जयपुरपरिसरे समायोजिते रूपकमहोत्सवे अस्माकं छात्रैः **पलाण्डुमण्डनम्** इति नाटकमभिनीतम्। छात्रेषु अभिनये श्रीशिवमः प्रथमपुरस्कारम्, धीरजसुयालः द्वितीयपुरस्कारम्, शोभा तृतीयपुरस्कारम्, कोमलयादवश्च चतुर्थपुरस्कारं प्राप्तवन्तः। 2024 वर्षे केन्द्रीयविश्वविद्यालयेन यस्य तत्त्वावधाने अयोध्यायाम् आयोजिते शैक्षणिककार्यक्रमे ... तथैव च राष्ट्रियसंस्कृतविश्वविद्यालयेन तिरुपतिना आयोजितेषु युवादिमहोत्सवेषु प्रतिभागं कुर्वन्ति। यथा 2024 तमे वर्षे आयोजिते द्वितीये अखिलभारतीयसंस्कृतच्छात्रप्रातिभसमारोहे (**AISSFT**-2024) श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य अद्भुतप्रदर्शनम् आसीत् । योगासनस्पर्धायामेते छात्राः द्वितीयपुरस्कारं प्राप्तवन्तः – राजेशकुमारः, आनंदकुमारदुबे, प्रियांशी। शुभम् नैलवालः, दानेशकुमारौ च रसप्रश्नस्पर्धायां सान्वनापुरस्कारं प्राप्तवन्तौ। शुभम् नैलवालः संस्कृतप्राविधिकस्पर्धायां सान्वनापुरस्कारं प्राप्तवान्।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये राष्ट्रिय कैडेट कोर (NCC) इत्यस्य यूनिटतः अपि छात्राः (Boys & Girls) राष्ट्रिय-एकताशिविरे जम्मू-काकिनाडादि स्थानेषु भागं गृहीतवन्तः। प्रतिवर्षं अगस्तमासस्य पञ्चदशदिनाङ्के माननीयप्रधानमन्त्रिमहोदयानां भाषणं श्रोतुं देहलीस्थ लालकिला इत्याख्यात्मके स्थाने गच्छन्ति । जनवरीमासस्य 26 दिनाङ्के माननीयप्रधानमन्त्रिमहोदयानां भाषणं श्रोतुं करिअप्पा क्रीडांगडे गच्छन्ति। तथैव च गणतन्त्रदिवसस्य पूर्वप्रदर्शनप्रस्तुतिकरणे भागं गृहीतवन्तः। एवञ्च अवसरं प्राप्ते सति गणतन्त्रदिवसस्य मुख्यप्रदर्शने अपि सम्मिलिताः अभवन् । देशस्य विविधराज्येषु अस्माकं छात्राः शौर्यप्रदर्शनाय यथाकालं गच्छन्ति, पदकानि विजित्य विश्वविद्यालयस्य ख्यातिं वर्धयन्ति ।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य दृष्टिः वैश्विकी वर्तते। अयं सर्वाभिः संस्कृतोच्चसंस्थाभिः सह मधुरसम्बन्धं वहति। अस्य विश्वविद्यालयस्य छात्राः इतरैः संस्कृतविश्वविद्यालयैः आयोजितेषु कार्यक्रमेषु भागं गृह्णन्ति। त्रयः केन्द्रीयाः संस्कृतविश्वविद्यालयाः भारते सन्ति। त्रयः अपि सम्भूय उत्कर्षमहोत्सवं महता वैभवेन प्रतिवर्षं समाचरन्ति। एतादृशेषु कार्यक्रमेषु त्रयाणां विश्वविद्यालयानां शिक्षकाः, कर्मचारिणः छात्राः च सम्भूय संस्कृतकार्यक्रमान् सञ्चालयन्ति। समग्रभारतस्य संस्कृतविश्वविद्यालयानां प्रतिनिधयः अत्र उपस्थिताः भवन्ति। अग्रिमेषु दिवसेषु अध्ययनार्थम् अपि छात्राणां विनिमयः भवत्विति चिन्तनं प्रवर्तते। अस्मिन्नेव क्रमे 07 तः 09 मई, 2022 पर्यन्तं प्रथम-उत्कर्षमहोत्सवस्य संयोजनं केन्द्रीयसंस्कृतविश्वविद्यालयेन कृतम्। अस्माकं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयतः सर्वे छात्राः, आचार्याः, कर्मचारिणश्च भागं गृहीतवन्तः। तथैव च 03 तः 05 मई, 2023 द्वितीय-उत्कर्षमहोत्सवस्य संयोजनं राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिना कृतम्। तत्रापि अस्माकं विश्वविद्यालयतः पञ्चदशाधिकाः अध्यापकाः सम्मिलिताः अभवन् ।

अधुना स्नातकोत्तरशिक्षाम् सम्प्राप्य अग्रे अनुसन्धानकार्यसम्पादनाय विश्वविद्यालयान्तरं गच्छन्ति पुनः अन्यस्मात् विश्वविद्यालयात् स्नातकशिक्षामवाप्य उच्चशिक्षां प्राप्तुम् अत्र आयान्ति। यद्यपि एतद्विषये विनिमयानुबन्धः नैव कृतः तथापि प्राकृतिकरूपेण एव छात्राणां अध्ययनार्थं गमनागमनं वर्तते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information (अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**5.3 Student Participation and Activities**

***5.3.1 Number of awards/ medals for outstanding performance in sports/ cultural activities at State/ national/ international level (award for a team event should be counted as one) during the last five years.***

***विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्ट-योग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां सङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)***

**Answer:** 40

5.3.1.1 Number of awards/medals for outstanding performance in sports/cultural activities at State/ national/ international level (award for a team event should be counted as one) year-wise during the last five years

विगतपञ्चवर्षेषु राज्य-राष्ट्र-अन्ताराष्ट्र-स्तरीयासु क्रीडा-सांस्कृतिकचर्यासु अत्युत्कृष्टयोग्यताम् अभिलक्ष्य प्राप्तानां पुरस्काराणां/पदकानां वार्षिकसङ्ख्या। (गणस्य पुरस्कारः एकपुरस्कारत्वेन गण्यते)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|

13 14 11 0 2

| File Description | Document |
|---|---|
| e-copies of award letters and certificates (अनुमतिपत्राणां प्रमाणपत्राणां च वैद्युतप्रतिलिपिः।) | View Document |
| Details of awards/medals for outstanding performance in sports/cultural activities at national/international level during the last five year | View Document |
| Any additional information (अतिरिक्ताः सूचनाः।) | View Document |

***5.3.2 Presence of an active Student council/ Chatra-parishat/ Chatra-mandal and representation of students on academic and administrative bodies/committees of the institution.***

### *संस्थायाः प्राशासनिकशैक्षिकसमितिषु छात्राणां प्रतिनिधित्वं तथा सक्रियायाः छात्रपरिषदः विद्यमानता।*

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये विगतेभ्यः बहुभ्यः वर्षेभ्यः छात्रकल्याणपरिषद् नाम्ना समितिः कार्यं करोति। अस्यां परिषदि प्रतिवर्षं नूतनानां सदस्यानां चयनं भवति। अस्याः परिषदः कार्यकालः शैक्षणिकवर्षात्मको भवति। प्रत्येकं शैक्षणिकवर्षे छात्रकल्याणपिरषदसदस्यानां यथाकालमुपवेशनं भवति।
प्रशासनिकासु शैक्षिकासु च समितिषु छात्राः नियमितरूपेण प्रतिनिधयः भवन्ति। विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनकेन्द्रे अपि छात्राणां प्रतिनिधयः सन्ति। छात्रसभा, छात्रसङ्घः , युवसभा इत्यादीनि नामानि अस्याः परिषदः सन्ति। सामान्यतः छात्राणां परिषदः कार्यदर्शिनः कार्यदर्शिन्यः अन्येषां प्रतिनिधीनां च चयनं निर्वाचनमुखेन अपि भवति। ये वरिष्ठाः शोधाध्येतारः सन्ति ते एव छात्राणां प्रतिनिधयः भूत्वा आन्तरिकगुणवत्ताश्वासनकेन्द्रादिषु सन्तिष्ठन्ते । पूर्वतनकक्ष्यासु ये छात्राः अधिकान् अङ्कान् प्राप्नुवन्ति ते एव कक्ष्याप्रतिनिधिरूपेण चिताः भवन्ति। विविधानां कार्यक्रमाणाम् आयोजनावसरे अध्यापकानां आवल्यां छात्रप्रतिनिधीनाम् अपि समावेशः क्रियते। चयनप्रक्रिया विश्वविद्यालये छात्राणां प्रवेशादेव आरभ्यते, यथा-
1. शास्त्री प्रथमवर्षम् - छात्रप्रतिनिधिः - बालकानां पक्षतः एकः यश्च द्वादशम्यां सर्वाधिकान् अङ्कान् अवाप्नोति सः। बालिकानां पक्षतः एका प्रतिनिधिः या सर्वाधिकाङ्कैः उत्तीर्णा। क्वचित् द्वौ बालकौ द्वे बालिके इति प्रतिनिधिचतुष्टयस्य नियोजनम् अपि क्रियते। द्वितीये वर्षे अपि प्रतिनिधयः भवन्ति। एवमेव तृतीये वर्षे अपि प्रतिनिधयः भवन्ति। आहत्य शास्त्रीस्तरे प्रथमे द्वितीये तृतीये च वर्षे कक्ष्यानुगुणं षट् सङ्ख्याकाः अधिकाधिकरूपेण द्वादशः छात्राः प्रतिनिधयः भवन्ति।
3.शिक्षाशास्त्रीस्तरे प्रथमे द्वितीये च वर्षे त्रिषु वर्गेषु कक्ष्यानुगुणं षट् सङ्ख्याकाः अधिकाधिकरूपेण द्वादशः छात्राः प्रतिनिधयः भवन्ति।
4. आचार्यस्तरे प्रथमे द्वितीये च वर्षे मिलित्वा षट् सङ्ख्याकाः छात्राः प्रतिनिधयः भवन्ति। छात्रसभायाः अथवा छात्रसङ्घस्य कार्यदर्शिस्थाने/अध्यक्षस्थाने वरिष्ठः छात्रः चितः भवति। अत्र अपि सर्वाधिकाङ्कान् प्राप्तवताम् एव अर्हता भवति। उपाध्यक्षस्य स्थाने शिक्षाचार्यस्तरीयस्य अपि अवसरः कल्प्यते। एते छात्राः शैक्षिकेषु प्राशासनिकेषु कार्येषु आवश्यकतायां सत्यां साहाय्यं कुर्वन्ति। विश्वविद्यालये छात्राणां भूमिका प्रशासनिकासु शैक्षिकासु च समितिषु भवति। यथा -
1. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठ:
2. छात्रावाससमिति:
3. छात्रोत्पीडनसमिति:
4. पत्रिकासम्पादकमण्डलसदस्याः
5. वेदिकासज्जतायाः कार्यदर्शिनः कार्यदर्शिन्यः च।
6. देवालयप्रसादवितरकाः
7. कक्ष्याप्रतिनिधयः च।
2019 तः 2024 ई. यावत् अध्यक्ष-उपाध्यक्ष-महामन्त्रिद्वयं पञ्चसदस्याश्च स्वकीयान् दायित्वान् निभालयन्ति। इयं परिषद् सर्वेषां छात्राणां प्रतिनिधिरूपेण कार्यं करोति। छात्राणां या का च समस्या भवति तां समस्यां छात्रशिकायतनिवारणप्रकोष्ठमाध्यमेन छात्रकल्याणपीठप्रमुखस्य पुरत उपस्थापयति। इयं परिषद् विश्वविद्यालयस्य छात्रान् अनुशासनपालनाय विविधेषु शैक्षणिक-सांस्कृतिकगतिविधिषु प्रतिभागार्थं च प्रेरयति।
2023-2024 तमे वर्षे छात्रकल्याणपरिषदः अध्यक्षत्वेन नव्यव्याकरणविभागस्य शोधच्छात्र कु. नितिका जिन्दल दायित्वं निभालयति। उपाध्यक्षरूपेण शिक्षाशास्त्रविभागस्य शिक्षाचार्यकक्षायाः छात्रः शक्तिशुक्लः दायित्वं निर्वहति।

आचार्यद्वितीयवर्षस्य पुराणेतिहासविभागस्य छात्रः प्रदीपः, सांख्ययोगविभागस्य छात्रा संजूमिश्रा च महामन्त्रिपदस्य दायित्वं निर्वहति। परिषदि पञ्चसदस्याः भवन्ति। ते च- शास्त्रीतृतीयवर्षस्य समीरकुमारः अंशुश्च, शिक्षाशास्त्रीद्वितीयवर्षस्य जागृतिगुप्ता अपूर्वगुप्ता च, शिक्षाचार्यद्वितीयवर्षस्य स्वप्ना राणीदास च। इयं परिषद् सक्रियरूपेण विश्वविद्यालयस्य छात्राणां हितरक्षणाय तेषां शैक्षणिकोन्नतये च प्राध्यापकैः सह सम्भूय विविधशैक्षणिकसांस्कृतिकगतिविधीनामायोजनाय कार्यं करोति। परिषदः प्रमुखदायित्वमस्ति यत् विश्वविद्यालयस्य सर्वे छात्राः विश्वविद्यालयपरिसरस्य गरिमानुगुणं कार्यं कुर्युः। तेषां प्रतिभागः अवाञ्छितगतिविधिषु न भवेत्। छात्रकल्याणपरिषदः गठनसंचालनादिविषये कुलपतेः निर्णयः सर्वमान्यो भवति।
2021-22 तमे वर्षे छात्रकल्याणपरिषदः अध्यक्षत्वेन ज्योतिषविभागस्य शोधच्छात्रेण श्रीब्रजेशपाठकेन दायित्वं निर्व्यूढम्। उपाध्यक्षरूपेण शिक्षाशास्त्रविभागस्य शिक्षाचार्यकक्षायाः छात्रा कविता आर्या दायित्वस्य परिपालनं कृतवती। आचार्यद्वितीयवर्षस्य पुराणेतिहासविभागस्य छात्रः राजेशकुमारमिश्रः व्याकरणविभागस्य छात्रा कु. नितिका जिन्दल च महामन्त्रिपदस्य दायित्वं संचालितवती। परिषदि पञ्चसदस्याः आसन्। ते च- शिक्षाशास्त्रीद्वितीयवर्षस्य आशुतोषचन्द्रझा याचना च शिक्षाचार्यद्वितीयवर्षस्य अरुणा जुगराण च, शास्त्रीतृतीयवर्षस्य नेहा उपाध्याय अभिषेकबहुखण्डी च।
2019-20 तमे वर्षे छात्रकल्याणपरिषद अध्यक्षत्वेन नव्यव्याकरणविभास्य शोधच्छात्रेण किशोरश्यामकौशिकेन दायित्वं निर्व्यूढम्। उपाध्यक्षरूपेण विशिष्टाचार्यस्य छात्रा सुश्री मधुस्मिता डेका दायित्वस्य परिपालनं कृतवती। आचार्यद्वितीयवर्षस्य छात्रः श्रीमोहितकुमारः छात्रा सुश्री चाँदनी शर्मा च महामन्त्रिपदस्य दायित्वं संचालितवती। परिषदि षट्सदस्याः आसन्। ते च- शास्त्रीतृतीयवर्षस्य श्रीशिवाकान्तझा, कु. नितिका जिन्दल च, शिक्षाशास्त्रीद्वितीयवर्षस्य श्रीमोहितगौडः एवञ्च सुश्री प्रेरणा रस्तोगी, शिक्षाचार्यद्वितीयवर्षस्य श्री असीमकुमारपाठकः, श्रीअतुलकुमारशुक्लश्च।

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***5.3.3 Average number of sports and cultural activities / competitions organised at the institution level per year.***

### *प्रतिवर्षं संस्थया आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां / स्पर्धानां सङ्ख्यायाः मध्यमानम्*

**Answer:** 12.8

5.3.3.1 Number of sports and cultural activities / competitions organised at the institution level year-wise during the last five years

विगतेषु पञ्चसु वर्षेषु आयोजितानां क्रीडा-सांस्कृतिकगतिविधीनां/ स्पर्धानां वार्षिकी सङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 14 | 21 | 09 | 09 | 11 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Report of the event (for ex. Sanskrit Pratibha Samaroha, Koumudi Mohotsava etc..) (कार्यक्रमस्य प्रतिवेदनम्। (संस्कृतप्रातिभसमारोहः, कौमुदीमहोत्सवः इत्यादयः)) | View Document |
| Number of sports and cultural activities / competitions organised per year (प्रतिवर्षं संस्थया आयोजितानां क्रीडा- | View Document |

| | |
|---|---|
| सांस्कृतिकगतिविधीनां/ स्पर्धानां सङ्ख्या) | |

***5.3.4 The university involves and encourages its students to publish materials like catalogues, wall magazines, university magazine, and other materials. List the major publications/ materials brought out by the students during the last four academic sessions.***

***विश्वविद्यालयेन संग्रहसूचीनां, भित्तिपत्रिकाणां, विश्वविद्यालयपत्रिकाणां तदितरसामग्रीणां च प्रकाशनाय छात्राः समावेश्यन्ते प्रोत्साह्यन्ते च। विगतशैक्षिकवर्षचतुष्टये/अर्धसत्रचतुष्टये छात्रैः प्रकाशितानां प्रमुखप्रकाशनानां/ सामग्रीणां च सूची दीयताम्।***

**Answer:**

विश्वविद्यालयस्यास्य स्थापना संस्कृतभाषायाः प्रचाराय प्रसाराय च जाता। तदर्थमेव शिक्षणमाध्यमेन शोधमाध्यमेन च अस्य उद्देश्यस्य पूर्तिः क्रियते। क्रमेऽस्मिन् शास्त्ररम्परायाः संरक्षणं विविधानां शास्त्राणां व्याख्या मूलग्रन्थानामनुवादः साहित्यस्य प्रकाशनं शोधपत्रिकाणां प्रकाशनादिकञ्च अनवरतरूपेण भवति। विश्वविद्यालयस्य विविधैर्विभागैः विषयानुगुणं वर्तमानकाले प्रसंगानुगुणञ्च विविधाः शोधपत्रिकाः प्रकाश्यन्ते। सर्वासां पत्रिकाणां प्रकाशनावसरे विश्वविद्यालय: छात्राणां साहाय्यं स्वीकरोति। पत्रिकायां लेखाः भवन्ति चेत्तर्हि तेषां लेखानां सङ्ग्रहणे त्रुटिनिष्कासने मुद्रणे च छात्राणां सहयोगं स्वीकरोति प्रकाशनसमितिः। प्रकाशनसमितौ छात्राणां प्रतिनिधयः अपि भवन्ति। यथा-

1. वास्तुशास्त्रविभागेन वास्तुशास्त्रस्य विविधान् शोधविषयान् अवलम्ब्य **वास्तुशास्त्रविमर्शः** (*UGC CARE Listed*) इति मूल्याङ्कितशोधपत्रिकायाः प्रकाशनं *20*07 ई. तः प्रतिवर्षं भवति। *2019* वर्षस्य द्वादशपुष्पे छात्राणां अष्टौ लेखाः प्रकाशिताः। *2020* वर्षस्य त्रयोदशपुष्पे अष्टछात्राणां शोधपत्राणि प्रकाशितानि। *2021* वर्षस्य चतुर्दशपुष्पे छात्राणां षड्शोधपत्राणि प्रकाशितानि। *2022* वर्षस्य पञ्चदशपुष्पे छात्राणां षड्शोधपत्राणि प्रकाशितानि। *2023* वर्षस्य षोडशपुष्पे छात्राणां षड्शोधपत्राणि प्रकाशितानि।

2. ज्योतिषविभागेनापि **भैषज्यज्योतिषमंजूषा** पत्रिकेयं प्रकाश्यते। अस्यां पत्रिकायां चिकित्साज्योतिषमवलम्ब्य (*Medical Astrology*) शोधपत्राणि प्रकाश्यन्ते।

3. विश्वविद्यालयस्य शोधविभागेन *1978* ई. तः अनवरतरूपेण **शोधप्रभा** (*UGC CARE Listed*) इति त्रैमासिकी मूल्याङ्कितशोधपत्रिका प्रकाश्यते। अस्यां शोधपत्रिकायां संस्कृतभाषायां निबद्धविविधशोधपत्राणां प्रकाशनं भवति। एतासु पत्रिकासु विश्वविद्यालयस्य शोधच्छात्राणां शोधपत्राणि तेषां मार्गनिर्देशकानां निर्देशनानुगुणं प्रकाश्यन्ते। *2019* वर्षस्य अंकचतुष्टयेषु छात्राणाम् अष्टौ लेखाः प्रकाशिताः। *2020* वर्षस्य अंकचतुष्टयेषु चतुर्णां छात्राणां लेखाः प्रकाशिताः। *2021* वर्षे कोरोनाकारणतः पत्रिकायाः प्रकाशनं स्थगितम्। *2022* वर्षस्य अंकचतुष्टयेषु द्वयोः छात्रयोः लेखौ प्रकाशितौ।

4. शिक्षाशास्त्रविभागेन **शिक्षाज्योति** इति पत्रिकायाः प्रकाशनं क्रियते। अस्यां पत्रिकायां केवलं छात्राणां लेखाः प्रकाश्यन्ते। अनेन छात्राणां लेखनकौशलस्य विकासो जायते। *2019-20* वर्षयोः संयुक्ताङ्के चतुःषष्टिछात्राणां लेखाः प्रकाशिताः। *2021-24* वर्षाणां संयुक्ताङ्के एकोनचत्वारिंशत् छात्राणां लेखाः प्रकाश्यमानाः सन्ति। एवमेव शिक्षाशास्त्रविभागेन राष्ट्रियसंगोष्ठ्यः क्रियन्ते, तदा तत्र मण्डितान् शोधलेखान् सङ्कलय्य प्रकाशनमपि क्रियते। अस्यां शिक्षकाणां छात्राणां च चिताः विशिष्टाः लेखाः भवन्ति। यथा- **द्विवर्षीय अध्यापक शिक्षा कार्यक्रम: समीक्षात्मक विश्लेषण** इति पत्रिका शिक्षाविभागेन प्रकाशिता। अस्यां छात्राणां त्रीणिशोधपत्राणि प्रकाशितानि।

5. विश्वविद्यालयस्य महिला-अध्ययन-केन्द्रद्वारा **सुमंगली** पत्रिकेयं प्रकाश्यते। अस्यां पत्रिकायां भारतीयपरम्परायां संस्कृतग्रन्थेषु च नारी’विषयकशोधपत्राणि प्रकाश्यन्ते। विश्वविद्यालयस्य शोधच्छात्रैः सम्बन्धितपत्रिकायां शोधपत्राणि प्रकाश्यन्ते। विश्वविद्यालयस्य एतासु सर्वासु पत्रिकासु भाषायाः बन्धनं नास्ति। लेखकाः संस्कृत-हिन्दी-आंग्लादिभाषासु स्वकीयान् लेखान् प्रकाशनार्थमर्हाः सन्ति। विश्वविद्यालयस्य केन्द्रीयपुस्तकालये बह्व्यः शोधपत्रिकाः सन्ति। याः पठित्वा प्रेरितो भूत्वा छात्राः विविधासु शोधपत्रिकासु स्वीयान् लेखान् प्रकाश्यन्ते।

| File Description | Document |
|---|---|
| Data Provide the list of Published Materials (प्रमुखप्रकाशनानां/सामग्रीणां च सूची प्रददत।) | View Document |

## 5.4 Alumni Engagement

***5.4.1 The Alumni Association/Chapters (registered and functional) contributes significantly to the development of the institution through financial and non financial means during the last five years***

***पूर्वच्छात्रसङ्घः (पञ्जीकृतः कार्यं कुर्वन् च) विगतपञ्चवर्षेषु आर्थिकयोगदानेन अन्यैः उपायैश्च संस्थायाः उन्नत्यर्थं सार्थकतया प्रयतमानः विद्यते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये पूर्वछात्रपरिषद्/ छात्रचरसङ्घः (*Alumni Association*) नाम्ना एकः संघः कार्यं करोति। छात्रचरसङ्घाः छात्रचरेभ्यः स्वाधीतसंस्थया सह सर्वदा सम्पर्के भवितुम् अवसरं कल्पयति। छात्राः अध्ययनोत्तरमपि स्वाधीतेन विश्वविद्यालयेन संलग्नाः भवन्ति चेत्तर्हि ते विश्वविद्यालयस्य परम्परया विश्वविद्यालयस्य च प्रगतिं विज्ञातुं प्रभवन्ति। स्वीयं योगदानं व्यक्तिशः दातुम् अपि छात्रचरसङ्घेषु व्यवस्थाः वर्तन्ते। वित्तकोषेषु छात्रचरसङ्घस्य कोषाः अपि भवन्ति। अतः यत्र क्वापि स्थित्वा यदा कदापि धनं संस्थापयितुं शक्नुवन्ति छात्रचराः। सामान्यतः अध्ययनोत्तरं छात्राः छात्रचरसङ्घस्य सदस्यतां स्वीकुर्वन्ति। सदस्यतायाः शुल्कम् अपि सामान्यमेव भवति। केचन छात्राः निर्दिष्टस्य धनस्य अपेक्षया अधिकं धनम् अपि समर्पयन्ति। मिनाक्षीमिश्रा इत्येका छात्रचरा 21000 रूप्यकाणि कोषे स्थापितवती। अद्यावधि यावत् छात्रचरसङ्घस्य कोषे 2024 जूनपर्यन्तं 1,54,625 रूप्यकाणि सन्ति। यथाशीघ्रम् द्विलक्षात्मकधनराशेः सङ्ग्रहणाय सङ्घः क्रियाशीलः वर्तते। अनेन अधिकृतरूपेण अस्य पञ्जीकरणं शक्यते। विश्वविद्यालये यदा यदा विशिष्टाः कार्यक्रमाः सञ्चाल्यन्ते तदा तदा स्थानीयाः छात्रचराः स्वप्रेरणया आगत्य स्वीयं योगदानं यच्छन्ति। रजतोत्सवे, अमृतमहोत्सवे, उत्कर्षमहोत्सवे अन्येषु सन्दर्भेषु छात्रचराणां मुख्यभूमिकाः भवन्ति।

संघस्यास्य संरचनार्थं *2019* तमे वर्षे जनवरीमासस्य द्वाविंशे दिनांके एका समितिः रचिता। अस्याः समितेः अध्यक्षः प्रो. नागेन्द्रझा संयोजकः श्रीसुच्चासिंहश्च आसीत्। प्रो. रमेशप्रसादपाठक प्रो. हरिहरत्रिवेदी. प्रो. देवीप्रसादत्रिपाठी. प्रो. बिहारीलालशर्मा. प्रो. महेशप्रसादसिलोडी. प्रो. भागीरथिनन्द. डॉ. अलकाराय. डॉ. एन.पी.सिंहादयश्च अस्याः समितेः सदस्याः आसन्। *2021* तमे वर्षे सितम्बरमासस्य त्रयोदशे दिनांके पूर्व-उपाधिप्राप्तछात्राणां संघस्य संगठनार्थम् एका समितिः विरचिता। यस्याः अध्यक्षः प्रो. महानन्दझा संयोजकः श्रीसुच्चासिंहश्च आसीत्। अस्यां समितौ प्रो. बिहारीलालशर्मा. प्रो. भागीरथिनन्द. प्रो. महेशप्रसादसिलोडी. प्रो. मार्कण्डेयनाथतिवारी. प्रो. रामानुज उपाध्याय. प्रो. एम.जयकृष्णन्. डॉ. अलकाराय. डॉ. एन.पी.सिंहादयः सदस्याः आसन्। *2022* तमे वर्षे मईमासस्य चतुर्विंशे दिनांके पूर्व-उपाधिप्राप्तछात्राणां संघस्य संगठनार्थम् एका समितिः विरचिता। यस्याः अध्यक्षः प्रो. महानन्दझा संयोजकः श्रीसुच्चासिंहश्च आसीत्। अस्यां समितौ प्रो. बिहारीलालशर्मा प्रो. भागीरथिनन्द प्रो. महेशप्रसादसिलोडी प्रो. मारकण्डेयनाथतिवारी प्रो. रामानुज उपाध्याय प्रो. एम.जयकृष्णन् डॉ. अलकाराय डॉ. एन.पी.सिंहादयः सदस्याः, प्रो. के.भरतभूषण प्रो. शिवशंकरमिश्र श्रीराजेशकुमारादयः विशेषामन्त्रितसदस्याः आसन्। *2022* तमे वर्षे अगस्तमासस्य त्रिंशद्दिनांके ऑनलाइन/ऑफलाइनमाध्यमेन समितेः उपवेशनं जातम्। अस्मिन् उपवेशने समितेः सदस्याः षोडशभूतपूर्वछात्राश्च उपस्थिताः आसन्। ते च प्रो. कमलाभारद्वाज डॉ. नरेशबैरवा प्रो. महानन्दझा प्रो. प्रेमकुमारशर्मा प्रो. फणीन्द्रचौधरी प्रो. एस.सुदर्शन डॉ. सूर्यमणिभण्डारी डॉ. प्रदीपकुमारझा डॉ. कुलदीपकुमार प्रो. यशवीरसिंह प्रो. जयकान्तसिंहशर्मा प्रो. विनोदकुमारशर्मा डॉ. चंचलकुमारी डॉ. संतोषकुमारमिश्र डॉ. कृष्णकान्तठाकुर प्रो. नागेन्द्रझा। अस्मिन् उपवेशने सदस्यैः विश्वविद्यालयस्य सर्वविधोन्नतये बहुप्रकारकोपायाः चिन्तिताः। पूर्वछात्रपरिषदः सदस्याः छात्रचरेभ्यः स्वाधीतसंस्थया सह सर्वदा सम्पर्के भवितुम् अवसरं कल्पयन्ति। विश्वविद्यालयस्य दीक्षान्त-संगोष्ठी-सम्मेलन-कार्यशालादिकार्यक्रमेषु वर्षे द्वि-त्रिवारं मेलनं कुर्वन्ति एवञ्च विश्वविद्यालयस्य प्रगतिं विज्ञातुं समुत्सुकाः भवन्ति उपायानपि परिकल्पयन्ति। तैः परिकल्पितैः उपायैः छात्राः लाभान्विताः भवन्ति, स्वलक्ष्यनिर्धारणे सहयोगमपि प्राप्नुवन्ति। *2023* तमे वर्षे दिसम्बरमासस्य विंशे दिनांके पूर्वछात्रपरिषदः तत्त्वावधाने विश्वविद्यालयस्य वाचस्पतिसभागारे विकसितभारत*@2047* इति विषयककार्यशाला समायोजिता। अस्याः कार्यशालायाः अध्यक्षता विश्वविद्यालयस्य कुलपतिना प्रो. मुरलीमनोहरपाठकमहोदयेन कृता। कार्यशालायामस्यां ऑफलाइनमाध्यमेन पञ्चत्रिंशत् ऑनलाइनमाध्यमेन त्रिषष्ठिछात्राः पूर्वछात्राश्च संयुक्ताः आसन्।

| File Description | Document |
| --- | --- |
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |

| | |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***5.4.2 Alumni contribution during the last five years (Amount in Rupees)***

***विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घेन प्रदत्तम् वित्तीयं योगदानम्- (रूप्यकेषु)***

**Answer:** A. ≥ 1.00 Lakhs (अ. ≥ 1.00 लक्षाः)

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Alumni association audited statements (पूर्वछात्रसंङ्घस्य अंङ्केक्षितलेखापत्रम्।) | View Document |

***5.4.3 Number of Alumni Association/ Chapters meetings held during the last five years.***

***विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य उपवेशनानां सङ्ख्या-***

**Answer:** 7

5.4.3.1 Number of Alumni Association/ Chapters meetings held year-wise during the last five years

विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 02 | 02 | 02 | 0 | 01 |

| File Description | Document |
|---|---|
| Upload any additional information (अतिरिक्ताः सूचनाः।) | View Document |
| Report of the event (कार्यक्रमस्य प्रतिवेदनम्) | View Document |
| Number of Alumni Association / Chapters meetings conducted during the last five years (विगतपञ्चवर्षेषु पूर्वच्छात्रसङ्घस्य समावेशानां सङ्ख्या) | View Document |

**6.Governance, Leadership and Management**

**6.1 Institutional Vision and Leadership**

***6.1.1 The governance of the institution is reflective of an effective leadership in tune with the vision and mission of the University***

***विश्वविद्यालयस्य दूरदृष्टिध्येयानुसारेण प्रवर्तमानस्य कार्यदक्षस्य नेतृत्वस्य प्रतिफलनं संस्थायाः प्रशासने भवति।***

**Answer:**

श्रीलालबहादुरशास्त्री राष्ट्रीयसंस्कृतविश्वविद्यालयस्य प्रशासनं पारम्परिकसंस्कृतविद्वत्ताम् आधुनिकशिक्षणप्रथाभिः सह एकीकृत्य नेतृत्वसंरचनायाः माध्यमेन तस्य दृष्ट्या लक्ष्येण च सङ्गतम् अस्ति। विश्वविद्यालयः ध्येयं ध्येयंदृष्टिं च मनसि निधाय पारदर्शकप्रशासनप्रणाल्याः क्रियान्वयनाय सततं कार्यरतं भवति। स्त्रीयपरम्पराणां संरक्षणाय, समकालीनविषयेषु प्रासंगिकतां च कर्तुं विश्वविद्यालयस्य नेतृत्वस्य महत्त्वपूर्णा भूमिका अस्ति । एतत् रणनीतिकनियोजनेन, संरचितशासनेन, संस्थायाः उद्देश्यैः सह प्रतिध्वनितैः सहकारिप्रयत्नैः च प्राप्यते । विश्वविद्यालयस्य दृष्टिः, ध्येयः च यथा--

**दृष्टिः-**

शास्त्रीयसमृद्धज्ञानपरम्परायाः संरक्षणमभिवर्धनञ्च, आधुनिकसमस्यानां सन्दर्भे प्राचीनज्ञानस्य व्याख्याकरणम्, एतस्य निरन्तरप्रासङ्गिकतां महत्त्वञ्च सुनिश्चितीकरणम्।

## उद्देश्यम्-

1. उन्नतविषयेषु विशेषावधानं दत्वा पारम्परिकसंस्कृताध्ययने व्यापकं शिक्षणम् ।
2. संस्कृतशिक्षायां भारतीयज्ञानप्रणाल्याञ्च अत्याधुनिकानुसन्धानाय प्रोत्साहनम् ।
3. शास्त्रीयसमकालीनसंस्कृतसाहित्ययो: गहनमध्ययनम् ।
4. गहनशोधमाध्यमेन संस्कृतपरम्परागतदायादावबोधस्य समृद्धीकरणम् ।
5. पारम्परिकसमकालीनदृष्टिकोणानाम् एकीकरणं कृत्वा शास्त्राणां गहनतम-व्याख्याप्रस्तुतीकरणम् ।
6. संस्कृते निहितज्ञानप्रबोधस्य घटकशास्त्राणानाञ्चोन्नतप्रशिक्षणम् यथा -ज्योतिषवास्तुयोगादिशास्त्राणाम् ।
7. प्राचीनपाण्डुलिपीनां संरक्षणं समीक्षात्मकविश्लेषणञ्च ।
8. विद्यालयेभ्य: सक्षमसंस्कृतशिक्षकाणां प्रशिक्षणमुन्नतीकरणञ्च ।
9. उच्चशिक्षणसंस्थानेभ्यः सक्षमोन्नतशिक्षकाणां प्रशिक्षकाणाञ्च प्रशिक्षणं तत्सम्पादनञ्च ।
10. संस्कृतशिक्षायामनुसन्धाने चोत्कृष्टताप्राप्तये एकं विशिष्टं सम्मानितञ्च प्रतिष्ठापनम् ।

उपर्युक्तदृष्टिम्, लक्ष्यं च साधयितुं शासनसंरचना सुनिश्चितं करोति यत् विशेषतया ज्योतिषशास्त्रम्, वास्तुशास्त्रम्, शिक्षाशास्त्रम् इत्यादिभ्यः अत्यन्तं विशेषशाखाभ्यः संस्कृतशिक्षायाः प्रवर्धनं प्रति निर्देशः अनुसन्धानं च केन्द्रितं भवति। नेतृत्वम् अन्तरविषयसंशोधनं संस्कृतज्ञानव्यवस्थानाम् उन्नतये च प्राथमिकताम् अददात्, प्राचीनग्रन्थान् आधुनिककालस्य आह्वानैः सह सम्बद्ध्य विद्वत्कार्यं कर्तुं संकायस्य प्रोत्साहनं करोति। एवं कृत्वा नेतृत्वं संस्थायाः दृष्टेः अनुरूपं समकालीनसमस्यानां समाधानार्थं शास्त्रज्ञानस्य प्रासंगिकतां रेखांकयति।

अपि च, शासनं शिक्षाशास्त्रे, अनुसन्धानशास्त्रे च उत्कृष्टतां प्रवर्धयति । सक्षमसंस्कृतविदुषां शिक्षकशिक्षकाणां च उत्पादनलक्ष्यस्य संकायविकासस्य, उन्नतसंशोधनपरिकल्पनानां, विभिन्नविषयेषु एकीकृतपाठ्यक्रमस्य निर्माणस्य च समर्थनं कुर्वन्ति, नीतयः प्रतिबिम्बिताः सन्ति । एतत् न केवलं शिक्षण-अध्ययन-प्रक्रियायां नवीनतां प्रवर्धयति अपितु पारम्परिकसंस्कृतशिक्षायाः पूरकत्वेन आधुनिकशिक्षणपद्धतीनाम् अवसरान् अपि सृजति । अन्तरविषयाध्ययनं शिक्षणपद्धतिषु च नवीनतां प्रोत्साह्य विश्वविद्यालयप्रशासनं सुनिश्चितं करोति यत् आधुनिकशैक्षिकावश्यकतानां कृते प्रासंगिकं भवति, उच्चस्तरीयशिक्षाप्रदानस्य स्वस्य लक्ष्यं प्रति सच्च भवति।

समीक्षात्मकविश्लेषणार्थं पाण्डुलिपीनां संरक्षणाय, अनुसन्धानस्य प्रवर्धनाय च विश्वविद्यालयस्य प्रतिबद्धता अपि प्रभाविनेतृत्वं प्रदर्शयति । सर्वकारस्य उपक्रमाः शैक्षणिक-अध्ययनद्वारा एतासां पाण्डुलिपीनां रक्षणं व्याख्यानं च केन्द्रीकृत्य संस्कृत-धरोहरस्य समृद्धीकरणस्य व्यापक-लक्ष्ये योगदानं ददति । अस्य प्रयासस्य समन्वयः सुनिर्दिष्टशोधकार्यक्रमस्य माध्यमेन भवति तथा च राष्ट्रिय-अन्ताराष्ट्रीय-विश्वविद्यालयैः संस्थाभिः सह सहकार्यं च भवति ।

प्रशासनस्य दृष्ट्या नेतृत्वं सुनिश्चितं करोति यत् संस्थायाः शैक्षणिकलक्ष्याणि सशक्तसंघटनसंरचनायाः समर्थनं कुर्वन्ति । प्रभाविशासनं निर्णयप्रक्रियासु प्रतिबिम्बितं भवति यत् शैक्षणिकोत्कृष्टतां, संकायसशक्तिकरणं, छात्रसफलतां च प्राथमिकताम् अददात् । नियमितमूल्यांकनस्य प्रतिक्रियातन्त्रस्य च माध्यमेन नेतृत्वं संस्थायाः प्रगतेः मूल्याङ्कनं करोति यत् तस्याः दृष्टिम्, लक्ष्यं च पूरयति, येन निरन्तरपरिष्कारः, सामरिकलक्ष्यैः सह संरेखणं च सुनिश्चितं भवति।

तदतिरिक्तं विश्वविद्यालयप्रशासनं संस्कृतविद्वत्समुदायस्य अन्तः बहिश्च प्रसारणं सहकार्यं च बोधयति । अन्याभिः शैक्षणिकसंस्थाभिः, शोधसंस्थाभिः, सांस्कृतिकसङ्घटनैः च सह समञ्जनं स्थापयित्वा नेतृत्वं विश्वविद्यालयस्य प्रभावं वर्धयति तथा च वैश्विकसन्दर्भे संस्कृतशिक्षा प्रासंगिका एव तिष्ठति इति सुनिश्चितं करोति।

संक्षेपेण संस्कृतविश्वविद्यालयस्य प्रशासनं संस्थायाः दृष्ट्या लक्ष्येण च गभीरं सङ्गतं प्रभाविनेतृत्वं प्रतिबिम्बयति। शैक्षणिक-उत्कृष्टतायाः, अनुसन्धानस्य, अन्तरविषय-अध्ययनस्य, आधुनिक-शिक्षण-दृष्टिकोणानां च प्रतिबद्धतायाः माध्यमेन नेतृत्वं सुनिश्चितं करोति यत् विश्वविद्यालयः पारम्परिक-समकालीन-सन्दर्भेषु संस्कृत-शिक्षायाः, शास्त्र-ज्ञानस्य प्रवर्धनस्य च अग्रणीकेन्द्रं भवेत्।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.1.2 The institution practices decentralization and participative management***

***संस्था सहभागिप्रबन्धनव्यवस्थां विकेन्द्रीकरणप्रक्रियां च अनुसरति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन वैधानिकप्रावधानानामनुसारेण शैक्षणिकसमितीनां घटनपुरस्सरं शासनस्य विकेन्द्रीकृतसहभागितापूर्णशैलीं समाश्रित्य वर्तते।

विश्वविद्यालये पीठेषु विभागेषु अनुभागेषु प्रकोष्ठेषु केन्द्रेषु अन्यत्र सर्वत्रापि विकेन्द्रीकरणं समर्थं प्रभाविनेतृत्वं च वर्तते। कार्यकारिपरिषत् विश्वविद्यालयस्य प्रमुखकार्यकारिनिर्णयस्वीकर्तृनिकायः वर्तते। विद्यापरिषद् विश्वविद्यालयस्य प्रमुखः शैक्षणिकनिकायः वर्तते। सहभागितापूर्णप्रबन्धनस्य माध्यमेन सर्वसम्मत्या निर्णयः स्वीक्रियते। विकेन्द्रीकरणाय सहभागितापूर्ण प्रबन्धनाय विश्वविद्यालयस्तरे विविधनिकायस्तरे यथा कार्यकारिपरिषद्, विद्यापरिषद्, वित्तसमितिः, भवनसमितिः, अध्ययनमण्डलं, योजनानियोजनमण्डलम्, अनुसंधानमण्डलं, प्रवेशसमितिः, छात्रावाससमितिः, पुस्तकालयसमितिः, अभियाचनासमितिः, आन्तरिकाभियाचनासमितिः, स्क्रिनिंगसमितिः, विशेषज्ञसमितिः चेत्यादयः कार्यं विदधति। एतासु समितिषु पीठानां प्रमुखाणां, विभागाध्यक्षाणां, छात्राणां विश्वविद्यालस्य अधिकारिणां च सक्रियसहभागिता भवति। शिक्षकाणां छात्राणाम् अन्याधिकारिणां प्रातिनिध्येन उचितपरामर्शेन आवश्यकसम्बद्धप्रक्रिया जायते। विश्वविद्यालयस्य नेतृत्वं यथाकालं समितीनां कार्यसमीक्षां कुरुते। येन आवश्यकपरिष्कारः उचितप्रक्रिया च भवेत्।

प्रत्येकं निकायसमितीनां शक्तिकार्यनियमाः स्पष्टरूपेण उल्लिखिताः सन्ति। ये च वैधानिकसमन्वयात्मकरूपेण प्रभावितया कार्यकरणस्य सहयोगं कुर्वन्ति। आन्तरिकसमितीनां प्रतिवेदनानि क्रियान्वयितुम् अधिकारि-कार्यकारि-विद्यापरिषद्भिः निकायः नियमितरूपेण विचारः क्रियते। एवंभूतानि कार्याणि विश्वविद्यालयशासनं गतिशीलं कुर्वन्ति। नियमितपरिष्कारः च जायते। विकेन्द्रीकरणाय सहभागिप्रबन्धनं च हितकारकं वर्तते। मिलित्वा कार्यकरणं कुशलसंचालनाय महत्त्वभूतं भवति। अनेन विश्वविद्यालयनेतृत्वं लक्ष्यं प्रति अग्रे गच्छति।
केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः २०२० अध्यादेशेन विश्वविद्यालयस्य वित्तीयशक्तीनां प्रत्यायोजने विश्वविद्यालयस्य अधिकारिभ्यः कुलपतये कुलसचिवाय वित्ताधिकारिणे परिक्षानियन्त्रकाय विभिन्नशक्तयः प्रदताः। **एकमुदाहरणमत्र समुपस्थाप्यते** -

केन्द्रीयसंस्कृतविश्वविद्यालयस्य अधिनियमः, 2020  इत्यस्य अधिनियमस्य खंडस्य -43 तमानुसारेण विश्वविद्यालयस्य शैक्षिक-शैक्षिकेतरकर्मचारिणां विभिन्नप्रकारकावकाशानां अनुमोदनसम्बद्धाधिकाराः तत्सम्बद्धाधिकारिभ्य प्रदत्ताः सन्ति। तदनुसारं पीठानां प्रमुखा विभागाध्यक्षाणां विश्वविद्यालयस्य अधिकारिणः शैक्षिकेतरकर्मचारिणां च कृते शक्तीनां प्रत्यायोजनं प्रदर्शयितुं शक्नुवन्ति तदर्थं कार्यालयादेशः एफ.1 (48) एलबीएनएसयू/प्रशासन/स्था/एनटी/2022/883 दिनांकः 07.01.2022 इति माध्यमेन अधिसूचना परिपालनाय अणुसंकेते संसूचिता । सहभागिप्रबन्धव्यवस्था विश्वविद्यालये सहजतया जायते तत्र समेषां प्रशासनिकाधिकारिणां कर्मचारिणां सहभागः भवति। प्रशासनिकस्तरे, शैक्षिकस्तरे, निर्णयस्तरे च पूर्णव्यवस्था सहभागिता विकेन्द्रीकरणप्रक्रियया भवति। उदाहरणरूपेण कुलसचिवस्य अधीने उपकुलसचिवाः च कार्यं विदधति तत्र तेषाम् अधीने उपकुलसचिवाः, सहायककुलसचिवाः च कार्यं विदधति। तत्र तेषाम् अधीने यत्किमपि कार्यं प्रशासनिकं जायते तत्सर्वं विकेन्द्रीकरणप्रक्रियाम् आश्रित्य सहभागिप्रक्रियाम् आश्रित्य च जायते। तथैव कुलपतीनाम् अधीने पीठप्रमुखाः विभागाध्यक्षाः अन्यप्राध्यापकाः च कार्यं कुर्वन्ति। तदुदाहारणमत्र उपस्थाप्यते। यथा अवकाशप्रदानस्य स्वीकृतिविषये विश्वविद्यालयेन विकेन्द्रीकरणस्य व्यवस्था एवमाचरिताऽऽस्ति। आकस्मिकावकाशस्य विशेषाकस्मिकावकाशस्य प्रतिबन्धितावकाशस्य अन्यावकाशानां च स्वीकृतिं प्रदातुं शैक्षणिकसदस्येभ्यः पीठप्रमुखाय, विभागाध्यक्षाय अपि सामर्थ्यं प्रदत्तम्। तथैव शिक्षणेतरकर्मचारिणाम् अवकाशप्रदानाय कुलसचिवाय, वित्तविभागप्रमुखाय, परीक्षाविभागप्रमुखाय च सामर्थ्यं प्रदत्तमस्ति। तत्तद्विभागस्य प्रमुखाः अपि अवकाशप्रदानाय सामर्थ्यवन्तः सन्ति। सर्वेषाम् अवकाशानां प्रदाने निरस्तीकरणे कुलपतिः सर्वथा सामर्थ्यवान् भवति। परन्तु तत्तद्विभागीयप्रमुखाः अपि अवकाशानां प्रदाने निरस्तीकरणे

कुलपतिं परामृशन्ति। एवं प्रकारेण अवकाशप्रदाने विश्वविद्यालयः विकेन्द्रीकरणप्रक्रियायाः अनुपालनं करोति। कुलपतिः स्वयमेव सर्वान् अवकाशसंबंधिनिर्णयान् न स्वीकरोति अपितु पीठप्रमुखेभ्यः, विभागाध्यक्षेभ्यः, कुलसचिवात्, वित्तप्रमुखात्, तत्तद्विभागीयप्रमुखेभ्यश्च परामर्शान् स्वीकृत्य कार्यविधिं सम्पादयति। एवमेव शैक्षिकशिक्षणेतरप्रशासनादिषु समेषु कार्येषु विकेन्द्रीकृतव्यवस्थया सहभागिकृतव्यवस्थया च कार्याणि जायन्ते। अन्यदुदाहारणम् अवलोक्यते चेत् पाठ्यक्रमनिर्माणादिप्रक्रियावित्तसंबद्धप्रक्रिया सामूहिकनिर्णयपुरस्सरमेव साध्यन्ते। एतदाधारेण एव विश्वविद्यालयः पुस्तकादिप्रकाशनसन्दर्भे सहभागिप्रक्रियाम् आश्रित्य एव कार्याणि विदधाति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.1.3 Sanskrit-Version of vision, mission statement of the university, the Act, Statute, MoA and Rules, Official notification/information, Regulations are available in institutional website.***

## *विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां, विनियमानाञ्च संस्कृतरूपान्तरणम् उपलभ्यते।*

**Answer:**

विश्वविद्यालयः अस्माकं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयाभिधः दूरदृष्ट्या उन्नतैर्लक्ष्यैः बहुभिर्गुणैः राजते। अथ संस्कृतभाषायाः सर्वतोमुखविकासाय संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण १९६२ तमस्य अक्टोबरमासस्य 08 दिनाङ्के विजयादशम्यां प्रतिष्ठापितम् । यदा केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः -२०२० इत्येषः अधिनियमः लोकसभायां पारितोऽभूत् तदा विद्यापीठमिदं केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन परिवर्तनात् परं नूतनानाम् अधिनियमादीनां परिपालनपुरस्सरं विश्वविद्यालयीयं सर्वविधं कार्यविधिं संस्कृतेन समारब्धुं तत्परमभवत्। तद्भावेन एव औद्योगिकसूचनानां विनियमानाञ्च संस्कृतरूपान्तरणं जालपुटे उपलभ्यते। अस्मिन् विश्वविद्यालये दूरदृष्टिपत्रस्य, ध्येयपत्रस्य, अधिनियमानाम्, संवैधानिकनिकायानाम्, विश्वविद्यालयस्य लिखितनियमानाम्, औद्योगिकसूचनानां विनियमानाञ्च अधिकाधिकानि संस्कृतरूपान्तराणि सम्पादितानि । तेषु कानिचन जालपुटे आरोपितानि सन्ति। विश्वविद्यालयस्य जालपुटे एतद्विषयकं विवरणमपि अस्ति। एवं प्रशासने, प्रबन्धने, सञ्चिकानामुपरि टिप्पणीलेखने, सूचनाफलकस्योपरि, कार्यालयीयसूचनासु, शिक्षकविषयकसूचनाप्रदाने अन्येषु कार्येषु च मुख्यमाध्यमरूपेण संस्कृतभाषा स्वीकृता वर्तते। विविधपीठेषु संस्कृतमाध्यमेन अधिकाधिकाः सूचनाः प्रसार्यन्ते। पीठाध्यक्षाः सर्वे संस्कृतज्ञाः विद्वांसः प्रशासकाः एव। छात्रसम्बद्धाः शैक्षकक्रियाकलापानां सम्बद्धाः सूचनाः अधिकाधिकाः संस्कृतेन सह हिन्द्याम् , आङ्ग्लभाषायां भारतीयभाषासु वा प्रसार्यन्ते। विश्वविद्यालयः सर्वपीठानां प्रबन्धनार्थं केन्द्रीयप्राशासनिकसमन्वयरूपेण कार्यं करोति । विश्वविद्यालयस्य प्रवेशद्वारे संस्कृतेन सह हिन्द्याम् आंग्लभाषायाञ्च प्राशासनिकशब्दानां संस्कृतसूक्तीनाञ्च दर्शनाय अनुसरणाय च योग्यं फलकं निक्षिप्तं वर्तते। विश्वविद्यालयपरिसरे अपि सूचनाप्रसाराय शब्दपरिचयाय पञ्चाङ्गपठनाय योग्यानि फलकानि तत्र तत्र सन्ति। स्वोद्देश्यस्य प्राप्त्यर्थं भारतसर्वकारस्य विभिन्नयोजनानाम्/कार्यक्रमाणां निष्पादनाय विश्वविद्यालयः अधोलिखितगतिविधीन् संचालयति।

1. दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने दृश्यते
2. अधिकाधिकानां प्रलेखानां संस्कृतरूपान्तरणस्य कार्यम् अद्यावधि सम्पादितमस्ति । लक्ष्यम् उद्देश्यानि च संस्कृतभाषायाम् अनूद्य जालपुटे स्थापितानि सन्ति ।
3. देशे संस्कृतस्य पारंपरिकतत्त्वानां विनिमयनिमित्तं MOA इति सप्तभिः संस्थाभिः सह कृतमस्ति तत्प्रमाणम् अणुसंकेते परिलक्षितमस्ति ।
4. विश्वविद्यालयस्य नियमाः परिनियमाः च अणुसंकेते परिप्रकाशिताः सन्ति ।
5. स्नातक-स्नातकोत्तर-विद्यावारिधिस्तरेषु पारम्परिकपद्धत्या संस्कृतशिक्षणम्।
6. स्नातक-(शिक्षाशास्त्रम्/बी.एड़) स्नातकोत्तर-(शिक्षाचार्य/एम.एड़) स्तरयोः संस्कृतशिक्षणप्रशिक्षणम्।
7. संस्कृतस्य विभिन्नविषयेषु शोधकार्यार्थं प्रोत्साहनम्।

8. संस्कृतपुस्तकालयानां दुर्लभपाण्डुलिपीनां महत्त्वपूर्णयोग्यपुस्तकानां च संरक्षणप्रकाशनम्।

विश्वविद्यालये विभागाः विलसन्ति यथा – साहित्यविभागः, न्यायविभागः, व्याकरणविभागः, धर्मशास्त्रविभागः, पुराणेतिहासविभागः, अद्वैतवेदान्तविभागः, जैनदर्शनविभागः, नव्यन्यायविभागः, साङ्ख्ययोगविभागः, मीमांसाविभागः, वेदविभागः, वास्तुशास्त्रविभागः ज्योतिषविभागश्च सन्ति । विभागीयसूचनाः अधिकाधिकाः संस्कृतेन निर्गच्छन्ति। अस्मिन् विश्वविद्यालयः बहवः छात्राः "विद्यावारिधिः" इत्युपाधिं प्राप्तुं शोधकार्ये प्रवेशं लभन्ते। सर्वाणि अनुसन्धानकार्याणि संस्कृतमाध्यमेन एव जायन्ते। बृहत्पुस्तकालयोऽपि वर्तते यत्र सर्वशास्त्रसम्बद्धानि पुस्तकानि तथैव पाण्डुलिपयः विद्यन्ते।

1. स्नातकस्तरे शिक्षाशास्त्रिस्तरे प्रवेशपरीक्षा- प्रतिवर्षं शिक्षाशास्त्रिकक्ष्यायां प्रवेशाय अखिलभारतस्तरे संस्कृतेन प्रवेशपरीक्षां निर्वर्तयति, तत्रापि वरीयताक्रमेण छात्राणां चयनं भवति। विश्वविद्यालये अध्यापकप्रशिक्षणम् आधुनिकतन्त्राणि आश्रित्य संस्कृतमाध्यमेन प्रवर्त्यते। प्रत्येकं वर्षे बहवः योग्याश्च संस्कृताध्यापकाः विश्वविद्यालयेन निर्मीयन्ते, ते च अध्यापकाः सम्पूर्णभारते माध्यमिकस्तरे प्रभावपूर्णया शैल्या पाठयन्ति ।
2. विभिन्नस्तरेषु संस्कृताध्ययनविषयकप्रोत्साहनकार्याणां व्यवस्थापनम्- बहवः छात्राः शोधकार्यं कुर्वन्ति, तत्प्रोत्साहनाय विश्वविद्यालयेन शोधच्छात्रेभ्यः उत्तमशोधवृत्तिः प्रदीयते तथा विद्यावारिधिः इति उपाधिना च योग्याः सम्मान्यन्ते । शोधच्छात्राणां रुचेः वर्धनाय समये समये सुप्रसिद्धानां विदुषां व्याख्यानानि च समायोज्यन्ते सर्वेषु पीठेषु ।
3. विशिष्टग्रन्थानां शोधग्रन्थानाञ्च प्रकाशनम्- विश्वविद्यालयः विभिन्नैः विद्वद्भिः सुष्ठुसम्पादितानां विविधानां ग्रन्थानाम्, शोधग्रन्थानां मानकसंस्कृतग्रन्थानां च प्रकाशनं करोति ।
4. एवमेव विद्यावारिधेः नियमावलिः , परामर्शप्रक्रियाः सम्भूयकारिता इत्येतासां नीतिः , छात्रार्था आचारसंहिता ,शिक्षकार्था आचारसंहिता इत्यादीनां परिपालनं विश्वविद्यालये सादरं जायते ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Sanskrit-Version of vision, mission statement documents on the website(दूरदृष्टिपत्रस्य ध्येयपत्रस्य संस्कृतरूपान्तरणम् संस्थायाः जालस्थाने उपलभ्यते) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |
| Provide the weblink of the Sanskrit version of all documents(सर्वेषां प्रलेखानां संस्कृतरुपान्तरणस्य जालसन्धानं प्रयच्छतु) | View Document |

**6.2 Strategy Development and Deployment**

***6.2.1 Perspective/Strategic plan and deployment documents are available in the institution***

***संस्थायां भविष्यद्योजनायाः/व्यूहात्मकयोजनायाः नियोजनप्रलेखा उपलभ्यन्ते क्रियान्वयनसम्बद्धानि प्रमाणानि वा उपलभ्यन्ते।***

**Answer:**

विश्वविद्यालयः निरन्तरम् उन्नतये विविधयोजनाः निर्मान्ति, तासां योजनानां क्रियान्वयनं च करोति । विश्वविद्यालयस्य प्रमुखयोजनासु एताः योजनाः प्रमुखाः सन्ति –

१. विद्यापीठस्य केन्द्रीयविश्वविद्यालयरूपेण प्रतिष्ठापनं करणीयम् । एतदर्थं २०१७ तमे वर्षे एतत्संबांधितः निर्णयः स्वीकृतः तथा च विस्तृतप्रयासानन्तरं विद्यापीठं २०२० तमे वर्षे केन्द्रीयसंस्कृतविश्वविद्यालयत्वेन परिणतमभवत् ।

२. NEP-2020 विश्वविद्यालये स्वीकरणम् ।

३. नवीनशिक्षानीत्यनुसारं पाठ्यक्रमेषु परिवर्तनम् ।

४. नूतननियमानामाधारेण नवीनाध्यादेशानां निर्माणञ्च ।

५. पुराणविद्यायाः नवपीठस्य स्थापनप्रस्तावः विश्वविद्यालयस्य सक्षमाधिकारिभिः अनुमोदितः, तस्यारम्भाय योजना करणीया ।

६. 'E-office' इत्यस्य निमित्तं डिजिटलतकनीकेः समारम्भः कृतः ।

७. विश्वविद्यालयस्य छात्राणां लाभाय अकादमिकबैंकक्रेडीट इति प्रणाली समारब्धा ।

**एतेषु कृतेषु निर्णयेषु मानितविश्वविद्यालयात् केन्द्रीयविश्वविद्यालयरूपेण प्रतिष्ठापयितुं कृतस्य निर्णयस्य उदाहरणमत्र प्रस्तूयते -**

मानितविश्वविद्यालयात् केन्द्रीयविश्वविद्यालयरूपेण प्रतिष्ठापयितुम् अनेकाः समितयः महत्त्वपूर्णां भूमिकां निर्व्यूढवत्यः तद्विस्तृततया अत्र प्रस्तूयते -

विद्यापीठस्य कार्यकारिपरिषद् सूचितवती यत् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठं यत् प्रारम्भे भारतसर्वकारेण १९८७ तमे वर्षे विश्वविद्यालयत्वेन गण्यते इति घोषितम् आसीत् तथा च तदनन्तरं 1 नवम्बर, 1991 तः प्रभाविरूपेण पूर्णतया कार्यरतं जातम्, अधुना च भारतसर्वकारेण केन्द्रीयविश्वविद्यालयरूपेण परिणमय्य 30.04.2020 तः "श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली" इति नामाङ्कितः अस्ति। भारतस्य पूर्वमाननीयप्रधानमन्त्रिणः स्वर्गीयस्य श्रीलालबहादुरशास्त्रिणः अध्यक्षतायां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य स्थापना अभवत्, तस्य स्वप्नः अपि आसीत् एतां संस्थां केन्द्रीयसंस्थारूपेण कर्तुं, यत्र न केवलं भारतात् अपितु विश्वस्य अपि विद्वांसः आगत्य संस्कृतम् अधीत्य अध्यापनं कुर्वन्तः जीवयेयुः। यत् शोधकार्यम् अत्र क्रियते तत् अवलोक्य स्वयमेव अत्र निवसन्तः संस्कृते कार्यं कुर्युः येन विद्यापीठं स्वाभाविकतया भारतस्य राजधान्यां काचित् एका आदर्शसंस्था भवेत् तथा च देशे सर्वत्र संस्कृत-आकाङ्क्षिणां दीर्घकालं यावत् लम्बिताभियाचनानां पूरणाय, राष्ट्रिय-अन्ताराष्ट्रीय-संस्कृत-विदुषां कृते विशिष्टस्थलप्रदानेन सर्वकारेण स्थापितः केन्द्रीयसंस्कृतविश्वविद्यालयः भवितुमर्हति इति अनुभूतम्। यथा भारतस्य अन्यभाषासु विश्वविद्यालयाः निर्मिताः सन्ति, तदनुसारं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली केन्द्रीयविश्वविद्यालयरूपेण परिवर्तनस्य विषयः शैक्षणिकपरिषदः समक्षं 03.04.2017 तमे दिनाङ्के आयोजितायां सप्तमसभायां विचारार्थं स्थापितः। शैक्षणिकपरिषद् अस्य विषयस्य परीक्षणार्थं तथा च विद्यापीठं केन्द्रीयविश्वविद्यालयरूपेण परिवर्तनसंबद्धप्रतिवेदनं निर्मातुम् एकस्याः उच्चस्तरीयसमितेः घटनार्थं कुलपतिम् अधिकारान् प्रदातुं संकल्पं कृतवती।

शैक्षणिकपरिषदः अनुशंसाः प्रबन्धनमण्डलेन अनुमोदिताः तथा च 07.04.2017 दिनाङ्कस्य संकल्पसंख्या 16.4 (III) द्वारा एकेन निर्देशेन सह मानवसंसाधनविकासमन्त्रालयं प्रति भारतसर्वकारस्य विचारार्थम् एकः प्रस्तावः प्रेषितः।

**उपर्युक्तप्रस्तावं मनसि निधाय कुलपतिः निम्नलिखितसदस्यानां समितिं संघटितवान्, यथा :**

1. प्रो. कपिलकपूरः, कुलपतिः, महात्मागांधी-अंतरराष्ट्रीयहिन्दीविश्वविद्यालयः, वर्धा।

2. प्रो. टी.वी.कट्टीमणि, कुलपतिः, इंदिरागांधीराष्ट्रीयआदिवासीविश्वविद्यालयः, अमरकण्टकः, मध्य प्रदेशः।

3. प्रो. सी.एस.राधाकृष्णन्, पूर्वविभागाध्यक्षः, संस्कृतविभागः, पांडिचेरीविश्वविद्यालयः, पांडिचेरी

4. प्रो. वसंत के.एम.भट्टः, पूर्वनिदेशकः एवं विभागाध्यक्षः, संस्कृतविभागः, गुजरातविश्वविद्यालयः, अहमदाबादः।

5. प्रो. संतोषकुमारशुक्लः, संस्कृताध्ययनविशेषकेन्द्रम्, जे.एन.यू., नवदेहली ।

समितिं प्रति प्रदत्तम् अधिदेशं दृष्ट्वा समितिद्वारा १०.०७.२०१७, ०३.०८.२०१७, २२.०८.२०१७ तथा ०८.०९.२०१७ दिनाङ्केषु उपवेशनं कृत्वा गहनविमर्शानन्तरं ०४.१०.२०१७ दिनाङ्के निम्नलिखितानुमोदनैः सह स्वप्रतिवेदनमेवं प्रदत्तम् -

**“श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य प्रोत्साहनं भवेत् तथा च देशस्य राजधानीनगरे केन्द्रीयसंस्कृतविश्वविद्यालयरूपेण प्रतिष्ठापितं भवेत्।“**

तदनुसारं प्रबन्धमण्डलस्य (BoM) निर्णयानुसारं कुलपतिः समितेः प्रतिवेदनं माननीयमानवसंसाधनमन्त्रिणं प्रतिं 27.12.2017 दिनाङ्के प्रस्तुतवान्। तत्कालीनः माननीयः मानवसंसाधनमन्त्री समितिद्वारा कृतेषु अनुशंसेषु सिद्धान्ततः सम्मतः अभवत्। मानवसंसाधनमन्त्रालयस्य भाषाविभागेन 14.08.2018 दिनाङ्कस्य पत्रानुरूपं विद्यापीठस्य केन्द्रीयविश्वविद्यालयरूपेण परिवर्तनार्थं प्रारूपस्य विधेः च निर्माणाय निर्देशः प्रदत्तः। केन्द्रीयविश्वविद्यालयस्य, मन्त्रिमण्डलटिप्पण्याः उपनियमानाम् च प्रारूपं २०.०८.२०१८ तमे दिनाङ्के मानवसंसाधनमन्त्रालयाय प्रस्तुतम्। एतन्मध्ये, सामान्यनिर्वाचनानन्तरं डॉ. रमेशपोखरियालनिशङ्कः भारतस्य मानवसंसाधनविकासमन्त्रिरूपेण प्रभारं स्वीकृतवान् तथा च मन्त्रालयस्य संबद्धविभागाय 100 दिवसीयकार्ययोजनान्तर्गतम् अमुं विषयं चर्चार्थं निर्दिष्टवान्। यत् भारतस्य माननीयप्रधानमन्त्रिणा सर्वेभ्यः मन्त्रालयेभ्यः प्रदत्तम्। भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयेन, विधिन्यायमन्त्रालयेन, विधायिविभागेन च केन्द्रीयविश्वविद्यालयस्य अधिनियमे विधाने च कतिपयपरिवर्तनैः सह प्रस्तावस्य अनुमोदनं कृतम्। तदनन्तरं 04.11.2019 दिनाङ्के मन्त्रिमण्डलेन विधेयकस्य अनुमोदनं कृतम् यत् 11.12.2019 दिनाङ्के माननीयमानवसंसाधनमन्त्रिद्वारा लोकसभायाः समक्षं प्रस्तुतम्। संसदि विस्तृतविमर्शानन्तरं १२.१२.२०१९ दिनाङ्के लोकसभायां विधेयकं पारितम्। फलतः भारतस्य माननीयराष्ट्रपतेः अनुमोदनेन पुनः केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः 02.03.2020 तमे दिनाङ्के राज्यसभायाः समक्षं स्थापितं यत् 16.03.2020 दिनाङ्के पारितञ्च अभवत्। भारतसर्वकारस्य विधिन्यायमन्त्रालयेन राजपत्रे विधिपत्रके केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः, २०२० प्रकाशितः। तदनुसारं विश्वविद्यालयस्य भारतसर्वकारस्य विधायीविभागे राजपत्राधिसूचना (F.No.4-4/2018-Skt-II दिनांक 17.04.2020) प्रकाशिता। एवञ्च 22.04.2020 तमे दिनांके सूचना संप्रेषिता यत् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम् केन्द्रीयविश्वविद्यालयरूपेण स्थापितः। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली – ११०१६, अयं विश्वविद्यालयः ३०.०४.२०२० तमात् दिनांकात् प्रभाविरूपेण कार्यादिकं विधास्यति। अस्मिन् सन्दर्भे विश्वविद्यालयेन सम्बद्धानां सर्वेषां सूचनायै F.No.1(149)/LBSV/Admn./2019-20/20 दिनांकः 30.04.2020 द्वारा अधिसूचना परिप्रकाशिता। कार्यकारिपरिषद् भारतसर्वकारस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य

(Deemed University) श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य (केन्द्रीयविश्वविद्यालयस्य) रूपेण स्थापनायाः निर्णयं स्वागतीकरोति, यत् ३०.०४.२०२० तः प्रभावी भविष्यति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Strategic Plan and deployment documents on the website(• व्यूहात्मकयोजनायाः नियोजनप्रलेखाः जालस्थाने उपलभ्यन्ते।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.2.2 Organizational structure of the University including governing body, administrative setup, and functions of various bodies, service rules, procedures, recruitment, promotional policies as well as grievance redressal mechanism.***

***संस्थायां सर्वविधाः प्रबन्धनव्यवस्थासंरचनाः यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था, विविधनिकायानां कार्याणि, सेवानियमाः, प्रक्रियाः, नियुक्तयः, पदोन्नतिनियमाः, परिदेवनानिवारणकार्यप्रणाल्यश्च उपलभ्यन्ते।***

**Answer:**

अथ संस्कृतभाषायाः सर्वाङ्गीणविकासाय आभारतं संस्कृतस्य प्रचाराय प्रसाराय च स्वायत्तसंस्थारूपेण प्रतिष्ठापितम् । यदा केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमः - २०२० इत्येषः अधिनियमः लोकसभायां पारितोऽभूत् तदा संस्थानमिदं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयनाम्ना प्रथितमभूत्।

1. **कुलाध्यक्षः-** भारतस्य राष्ट्रपतिः विश्वविद्यालयस्य परिदर्शकस्थाने अर्थात् कुलाध्यक्षस्थाने विलसति। कुलाध्यक्षः विश्वविद्यालयस्य कार्यस्य प्रगतेश्च काले काले अवलोकनाय मूल्याङ्कनाय च व्यक्तिविशेषान् नियोज्य ततः प्राप्तप्रतिवेदनं कुलाधिपतेः कुलपतेश्च माध्यमेन व्यवस्थापनपरिषदि मण्डयितुं सूचयति ।
2. **कुलाधिपतिः-** भारतस्य सर्वकारेण नियुक्तः कश्चन प्रतिष्ठितः विद्वान् भवति। डॉ . हरिगौतमःविश्वविद्यालयस्य कुलाधिपतिः अस्ति। कुलाधिपतेः चयनं कुलाध्यक्षः परिनियमानाम् आधारेण करोति।
3. **कुलपतिः**- कुलपतेः नियुक्त्यर्थं कुलाधिपतिना संरचिता एका चयनसमितिः तदर्थम् अर्हाणाम् एकां तालिकां निर्माति। तालिकातः कुलाध्यक्षः एकं व्यक्तिविशेषं कुलपतित्वेन नियोजयितुम् अनुज्ञां ददाति।

**कुलपतेः अधीने कुलसचिवः, परीक्षानियन्त्रकः, वित्ताधिकारी, ग्रन्थपालकः, पीठप्रमुखाः, विभागाध्यक्षाः, मालवीयमिशनशिक्षणाधिगमकेन्द्रनिदेशकः च कार्यं कुर्वन्ति।**

विश्वविद्यालयस्य विविधप्राधिकरणानि प्रबन्धनव्यवस्थां निर्वहन्ति। यथा –

1. **सभा (कोर्ट)** – केन्द्रीयसंस्कृतविश्वविद्यालयाधिनियमस्य, 2020 अनुपालनेन विश्वविद्यालयः भविष्ये निर्मीयमाणन्यायालयावधारणायाम् अवधानतया कार्यं कुरुते। वैधानिकप्रावधानानानुसारेण अधिनियमस्य दिशानिर्देशानुरूपं भविष्यमानन्यायलयसंरचनायाः सदस्यसत्त्वस्य च सावधानेन विचारः क्रियते। भारतसर्वकारस्य शिक्षामन्त्रालयः सम्प्रति प्रस्तावितस्य घटनस्य समीक्षां करोति।
2. **कार्यकारिपरिषत्** - विश्वविद्यालयस्य प्रमुखकार्यकारिसंस्था कार्यकारिपरिषद् सावधानेन परिभाषितविधानैः निर्दिष्ट- स्पष्टतया अधिकारेण संचाल्यते। इयं परिषद् निपुणान् जनान् संयोज्य संस्थानस्य कार्यपरां दृष्टिं स्पष्टयति। कार्यकारिपरिषत् विश्वविद्यालयसमितिः भविष्यति।
3. **विद्यापरिषत्** – विद्यापरिषत्, प्रमुखशैक्षणिकनिकायोऽस्ति। या अधिनियमस्य, विधानस्य, अध्यादेशस्य च परिधौ कार्यं करोति। इयं विश्वविद्यालयस्य शैक्षणिकनीतीः परिश्रमपूर्वकं समन्वयति, निरीक्षणं च करोति, उत्कृष्टतायाः प्रतिबद्धतां निश्चिनोति। विश्वविद्यालयीयशिक्षायाः , शिक्षणप्रक्रियायाः, प्रशिक्षणस्य, परीक्षायाः, अनुसन्धानकार्यक्रमाणां च स्तरपरिरक्षणकर्मणि विद्वत्परिषत् मुख्यं स्थानं भजते।परिषदः अध्यक्षः विश्वविद्यालयस्य कुलपतिः, त्रयः बाह्याः सदस्याः, विश्वविद्यालयस्य विभिन्नाः आचार्याः च भवन्ति। 50% जनाः उपवेशनादिषु उपस्थिताः भवेयुः चेत् सभायाः कृते कोरम इति निर्मान्ति तथा च वर्षे न्यूनातिन्यूनं त्रिवारं समागमः भविष्यति।
4. **अध्ययनमण्डलम्** – अध्ययनमण्डलं संविधिना अधिकाराणां, कार्याणां च विधानैः मार्गं दर्शयति। प्रत्येकम् विभागः पीठानुसारं कार्यं करोति, तदनुरूपं शैक्षणिकशासनं सुनिश्चितं करोति। विभिन्नपीठानुसारेण अध्ययनमण्डलं कार्यं करोति ।
5. **वित्तसमितिः**- नियन्त्रितायाः वित्तसमित्याः सावधानेन परिभाषितसंविधानं, अधिकाराः, कार्याणि च महत्त्वपूर्णां भूमिकां निर्वहन्ति। अध्यक्षः कुलपतिः भवति, त्रयः बाह्य सदस्याः विश्वविद्यालयस्य वित्ताधिकारिपदेन सचिवः भवति। वित्तसमितिः विश्वविद्यालयस्य आयस्य संसाधनस्य च आधारेण सन्दर्भे ऋणस्य आयं समावेशयितुं शक्नोति।
6. **योजनापर्यवेक्षणमण्डलम्** – आदेशात्मकनियमानाम् अनुपालने योजना-निरीक्षण-मण्डलं सामरिकप्रवीणतायाः दीपरूपेण उद्भवति। अध्यक्षः कुलपति मण्डलससदस्याः च भवन्ति। विश्वविद्यालयस्य विकासाय अपेक्षितानां योजनानां निर्माणम् अस्य मण्डलस्य कार्यं वर्तते।
7. **उत्पीडनावरोधकसमितिः** – विश्वविद्यालयः सर्वकारस्य यू/जी/सी इत्यस्याः नियामां विनियमानां च अधीने शिक्षण-शिक्षणेतरकर्मचारिणां समस्याः समाधातुम् आन्तरिकपरिवेधनानिवारणसमितिं संरचितवान्।
8. **आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः-** विश्वविद्यालयस्य गुणवत्तामानकानाम् परिशीलनाय प्रकोष्ठोऽयं कार्यं विदधाति। अत्र अनसन्धानकार्यान्वयनं प्रभाविमूल्यांकनम् अन्यगुणवत्ताकार्याणि च भवन्ति।

विश्वविद्यालयस्य विविधमण्डलानि **अनुसंधानमण्डलम्** अनुसंधानम्, **परीक्षामण्डलम्** परीक्षाम्, **सम्पादनमण्डलम्** सम्पादनकार्यम्, **कुलानुशासकमण्डलम्** अनुशासनम्, च विविधशास्त्रागुणम् अध्ययनव्यवस्थादिकं निर्वहन्ति।

**विश्वविद्यालयस्य पीठप्रमुखाः-**

1. **वेदवेदांगपीठं पीठप्रमुखाः** - वेदविभागः, पौरोहित्यविभागः, धर्मशास्त्रविभागः, व्याकरणविभागः, ज्योतिषविभागः, वास्तुशास्त्रविभागः च अस्मिन् पीठे तत्तद्विभागाध्यक्षाणां मार्गदर्शने कार्यं कुर्वन्ति।
2. **दर्शनशास्त्रपीठं पीठप्रमुखाः -** न्यायविभागः, सांख्ययोगविभागः, योगविभागः, जैनदर्शनविभागः, सर्वदर्शनविभागः, मीमांसाविभागः, विशिष्टाद्वैतवेदान्तविभागः, अद्वैतवेदान्तविभागः च अस्मिन् पीठे

तत्तद्विभागाध्यक्षाणां मार्गदर्शने कार्यं कुर्वन्ति।

3. **साहित्यम-एवं-संस्कृतिपीठं पीठप्रमुखाः** - साहित्यविभागः, पुराणेतिहासविभागः, प्राकृतविभागः च अस्मिन् पीठे तत्तद्विभागाध्यक्षाणां मार्गदर्शने कार्यं कुर्वन्ति।
4. **आधुनिकविषयपीठं पीठप्रमुखाः**- मानविकीविभागः, आधनिकज्ञानम्विभागः, शोधविभागः, हिन्दु-अध्ययनविभागः च अस्मिन् पीठे तत्तद्विभागाध्यक्षाणां मार्गदर्शने कार्यं कुर्वन्ति।
5. **शिक्षाशास्त्रपीठं पीठप्रमुखाः**– शिक्षाशास्त्रविभागः विशिष्य कार्यं विदधाति।

**विश्वविद्यालयस्य अनुभागाः**

विश्वविद्यालयस्य प्रशासनिकविभागाः शैक्षणिक-लेखा-नियम-वित्त-विकास-परीक्षा-निर्माणादिकार्याणि साधुतया संचालयितुं योगदानं विदधति। तत्र क्रमेण

1. प्रशासनं विश्वविद्यालये त्रिषु विभागेषु विभक्तं वर्तते। प्रथमं तावत् प्रशासनं I शैक्षणिकम्, प्रशासनानुभागः II, प्रशासनं III (सामान्यखण्डः) च सन्ति।
2. द्वितीयं तावत् शैक्षणिकविभागः असौ सर्वविधशैक्षणिकानुभागस्य उद्देश्यानि शैक्षणिकगतिविधीन् च पालयति।
3. तृतीयन्तावत् लेखाविभागः वित्ताधिकारपर्यवेक्षणार्थं कार्यं विदधाति।
4. चतुर्थन्तावत् विकासः कार्यक्रमादीनां क्रियान्वयनाय वार्षिकनीतिः निर्धारयति।
5. पञ्चमन्तावत् परीक्षाविभागः नियमितांशकालिकपाठ्यक्रमच्छात्राणां परिक्षादि-आयोजनेन उपकरोति।
6. षष्ठन्तावत् विश्वविद्यालयनिर्माणविभागः सर्वप्रकारनिर्माणादिकार्याणि पश्यति।

एतदतिरिच्य विश्वविद्यालये पञ्चकेन्द्राणि कार्यं विदधति।

1. केन्द्रीयग्रन्थागारः
2. शिक्षण -अधिगमकेन्द्रम्
3. महिला –अध्ययनकेन्द्रम्
4. सङ्गणककेन्द्रम्
5. स्वास्थ्यकेन्द्रम्

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload the document of functions of the University and policies. (विश्वविद्यालयस्य एवं तन्नियमानां च कार्यप्रणाल्याः प्रलेखाः उपारोपणीयाः।) | View Document |
| Upload document depicting the organizational structure including, governing body and administrative setup. (सर्वविधानां प्रबन्धनव्यवस्थासंरचनानां विवरणं प्रयच्छतु- यथा प्रबन्धनसमितिः, प्रशासनव्यवस्था च।) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.2.3 Implementation of e-governance in areas of operation***

***1. Planning and Development***

***2. Administration***

***3. Finance and Accounts***

***4. Student Admission and Support***

*5. Examination*

### *क्रियान्वयनक्षेत्रेषु वैद्युतप्रशासनस्य नियोजनम्*

### *1. योजना, विकासश्च*

### *2. प्रशासनम्*

### *3. वित्तं, लेखाश्च*

### *4. छात्राणां प्रवेशः, प्रोद्बलनं च*

### *5. परीक्षा*

**Answer:** A. All 5 of the above (अ. उपर्युक्ताः सर्वे पञ्च)

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Screen shots of user interfaces(प्रयोक्तुः अन्तःपृष्ठानां फलकचित्राणि) | View Document |
| ERP (Enterprise Resource Planning) Document(उपक्रमसंसाधनयोजनाप्रपत्राणि) | View Document |
| Details of implementation of e-governance in areas of operation Planning and Development, Administration etc (Data Template)(उपर्युक्तक्षेत्रेषु वैद्युतप्रशासनस्य क्रियान्वयनस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |

***6.2.4 Effectiveness of various bodies/ cells/ committees is evident through minutes of meetings and implementation of their resolutions.***

### *विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयनात् च ज्ञायते यत् संस्थायाः विविधनिकायाः/ विभागाः/ समितयः प्रभावितया फलोन्मुखतया च कार्यतत्पराः सन्ति इति।*

**Answer:**

सर्वाणि पीठानि  विभागाः समितयश्च समग्रस्य विश्वविद्यालयस्य दूरदृष्टेः अनुरूपमुद्देश्यानाम् आपूर्तये च संस्थिताः सन्ति। विविध-पीठ-विभाग-समितीनां सुचारुरूपेण सङ्घटननेन विश्वविद्यालयः शोभते। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः अमीषां सक्रियतायाः विषये विशिष्टं ध्यानं वहति। विशिष्य विकेन्द्रीकरणप्रशासनप्रणाली वर्तते इत्यतः अमीषां मध्ये सामञ्जस्यम् अपि संस्थापयति। विकेन्द्रीकरणप्रशासनप्रणालीं समाश्रित्य संरचितस्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य विविधपीठानि, विभागाः समितयश्च क्रियाशीलाः सन्तः विश्वविद्यालयस्य अभिवृद्धये सततं चेष्टन्ते। विश्वविद्यालयस्य व्यवस्थापनव्यवस्थायै कार्यकारिपरिषदः नियतरूपेण प्रतिवर्षं जायन्ते यत्र हि विकासपरनीतयः निर्णीयन्ते। निर्धारितनिर्णयक्रियान्वयनदृष्ट्या अपि इयं परिषत् प्रधानभूमिकां निर्वहति। विद्वत्परिषत् विश्वविद्यालयीयशिक्षा-शिक्षणप्रक्रिया-प्रशिक्षण-परीक्षानुसन्धानकार्यक्रमाणां स्तरपरिरक्षणकर्मणि कार्यरता भवति। अस्याः संसूचनाः विभागमुखेन समितिमुखेन च क्रियान्विताः भवन्ति। अध्ययनमण्डलं विश्वविद्यालयस्य विभिन्नपाठ्यक्रमनिर्माणं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठानां विविधसमितीनां माध्यमेन च पाठ्यक्रमाणां प्रवर्तनाय मार्गदर्शनं लभ्यते। योजना तथा योजनापर्यवेक्षणमण्डलं विश्वविद्यालयस्य विकासाय अपेक्षितानां योजनानां निर्माणकार्यं करोति। अस्य मण्डलस्य निर्णयाः विकासदृष्ट्या प्रधानाः भवन्ति। पीठानि विश्वविद्यालयस्य दर्शनशिक्षादीनि द्योतयन्ति। एतानि विविधतायाम् एकतायाः द्योतकानि सन्ति। विश्वविद्यालयस्य विविधयोजनानां क्रियान्वयनाय अपेक्षितस्य अनुदानस्य निर्धारणनिर्वहणादीनि कार्याणि अनुदानसमितिः करोति। पुनः विश्वविद्यालयस्य आन्तरिकगुणवत्ताश्वासनप्रकोष्ठः शैक्षिकेषु प्राशासनिकेषु च क्रियाकलापेषु गतिशीलतायाः गुणवत्तायाः च संवर्धनाय एकस्याः प्रणाल्याः विकासं करोति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्राथमिकोद्देश्येषु संस्थायाः गुणवत्तासंवर्धनाय विश्वविद्यालयेन अनुसर्तव्याः मार्गोपायाः प्रमुखाः सन्ति। सभासम्मलेनकार्यशालासङ्गोष्ठ्यादीनाम् आयोजनेन आर्थिकसहयोगादीनां प्रदानेन च विश्वविद्यालयविकासाय प्रयतते । तदीयप्रतिवेदनेषु

विश्वविद्यालयगुणवत्तानिर्धारकमानकानां क्रियान्वयनेन प्राप्तफलस्य विवरणम् उल्लिखितं वर्तते। विश्वविद्यालयस्य क्रियाकलापाः छात्राणां विकासपूरकाः स्युरिति सङ्कल्पेन आन्तरिकगुणवत्ताश्वासनप्रकोष्ठस्य प्रतिष्ठापनं विहितम् अस्ति। आन्तरिकगुणवत्ताश्वासनप्रकोष्ठसंसूचनाः आश्रित्य सक्रियाणां विभागसमित्यादीनां कार्येषु सञ्जाताः प्रगतयः यथा –

1. विश्वविद्यालये छात्रकेन्द्रितवातावरणं विद्यते येन शिक्षणाधिगमप्रक्रियायां शैक्षिकप्रौद्योगिक्याः समावेशः क्रमशः जायमानः वर्तते।
2. गुणवत्तासम्बद्धेषु तत्त्वेषु छात्राणाम् अभिभावकानां सामाजिकानां च प्रतिक्रियाः स्वीकृत्य शिक्षणाधिगमप्रक्रियायाः संवर्धनदिशि विश्वविद्यालयः अग्रेसरः वर्तते।
3. उच्चशिक्षायाः विशिष्य शास्त्रशिक्षणस्य परम्परागतपाठ्यक्रमाणां च अभिवर्धने विद्यमानान् मानकान् विनिश्चित्य तेषां पूर्णशः क्रियान्वयनाय यत्नः विधीयते।
4. विश्वविद्यालयस्य गुणवत्तायाः संवर्धनाय कार्यशाला-सङ्गोष्ठी-सभासमारोहाणाम् आयोजनं क्रियते।
5. विश्वविद्यालयस्य विभागाः फलोन्मुखतया उत्तमपरिणामाय कार्यतत्पराः भवितुम् अपेक्षितानां भौतिकसंसाधनानां व्यवस्थापनं कुर्वन्ति।
6. NCTE अभिप्रेरणेन शिक्षाशास्त्रविभागीयग्रन्थालयः समारब्धः। पुनः बहूनि पुस्तकानि क्रीत्वा संस्थापितानि इत्यतः विभागः सर्वे स्तरोन्नतिं प्राप्तुं शक्नोति ।
7. नियतरूपेण विभागानां पर्यवेक्षणं प्रकोष्ठेन विधीयते इत्यतः विभागानां कार्यतत्परतायाः मूल्याङ्कनं जायमानं वर्तते। परीक्षासमिति-विभागीयशोधसमिति-ग्रन्थालयसमिति-वित्तसमिति-छात्रावाससमिति-क्रीडासमिति-सम्बद्धसमितयः सदा सक्रियाः एव सन्तिष्ठन्ते। आसां निर्णयाः पीठप्रमुखैः मालवीयमिशनटीचरट्रेनिंगसेन्टर-निदेशकेन ससूक्ष्मम् अवलोक्य अन्तिमनिर्णयाः स्वीक्रियन्ते। छात्रकल्याणप्रकोष्ठः, महिलाकक्षः इत्यादयः अपि स्थानीयस्तरे समस्यानां निवारणाय कार्यं कुर्वन्ति। केन्द्रीयानुसन्धानमण्डल्याः निर्णयानां यथावत् परिपालनं विभागीया स्थानीयशोधसमितिः करोति। एवं सर्वे विभागसमितिनिकायाः फलदाः क्रियापराश्च सन्ति। सामान्यतः प्रतिवर्षं शैक्षिकसत्रारम्भात् आसत्रान्तं कार्यक्रमाणां सञ्चालनाय विविधाः समितयः संरच्यन्ते। वार्षिकोत्सवस्य संस्कृतोत्सवस्य वाग्वर्धिनीमहोत्सवस्य राष्ट्रियसङ्गोष्ठ्याः क्रीडाप्रतियोगितादीनां च आयोजनाय पार्थक्येन समितयः रच्यन्ते। कार्यक्रमसमितिः प्रमुखकार्यक्रमाणां निर्वहणाय कार्यं करोति। एषा समितिः कार्यक्रमाणां प्रतिवेदनमपि पीठप्रमुखाय समर्पयति। एवमेव अनुशासनसमितिः अनुशासनपरिरक्षणकर्मणि साहाय्यं विदधाति। स्वच्छतासमितिः विश्वविद्यालयस्य स्वच्छतापरिरक्षणे प्रतिपदं मार्गदर्शनं करोति। एवं विंशत्यधिकाः समितयः प्रत्येकम् अपि विश्वविद्यालये सक्रियाः सन्ति। 22 शास्त्रविभागाः विश्वविद्यालये भवन्ति। एतेषां विभागानां विभागाध्यक्षाः विभागीयप्रतिवेदनं पीठप्रमुखेभ्यः सज्जीकृत्य समर्पयन्ति। विविधसमितीनां प्रधानसंयोजकाः अपि विभागाध्यक्षाः एव भवन्ति। विभागाध्यक्षाः एव उत्तरदायिनः अपि भवन्ति। विश्वविद्यालयस्य पीठप्रमुखाः विभागाध्यक्षाश्च सम्बद्धपीठानां विभागानां कार्यनिर्वहणादिकम् अवलोकयन्ति।

उदाहरणमेकम् अत्र योगविषयकं समुपस्थायते-

## योगविषये विद्यावारिधिपाठ्यक्रमक्रियान्वयनम्

विविधसमितीनां कार्यविवरणेभ्यः, निर्णयानां क्रियान्वयात् च ज्ञायते यत् संस्थायाः विविधविभागाः समितयः च प्रभावितया फलोन्मुखतया कार्यतत्पराः सत्यः कार्यविधिम् आश्रित्य कार्यं कुर्वन्ति। उदाहरणरूपेण विश्वविद्यालये अष्टादशोत्तरद्विसहस्रतमे वर्षे योगविभागे MA, BA योगपाठ्यक्रमः समारब्धः । तत्र इतरविभागेषु इव योगविभागे विद्यावारिधिः इति समारम्भणीयः । राष्ट्रियशिक्षानीतिः 2020 इत्यस्याः प्रभाविक्रियान्वयनाय योगक्षेत्रे शोधकार्यारम्भाय सर्वादौ योगविभागीयाचार्याणां समितिः उपवेशनं कृतवती । तदनु विभागीयाध्ययनमण्डलं बाह्य- आन्तरिकविशेषज्ञानां समुपस्थितौ समागतपूर्वप्रस्तावस्य अवलोकनं कृतम् । तदनुसारं स्वीया संस्तुतिः च प्रकटीकृता । विद्यावारिधि-उपाधये निर्धारितनियमानां पर्यवेक्षणपुरस्सरं संबद्धप्राध्यापकानाम् अर्हतादिपरिशील्य विद्यापरिषदं प्रति प्रस्तावः प्रेषितः । विद्यापरिषदः चतुर्थोपवेशने 4.16(5) इत्यनुसारेण शैक्षणिकसत्रं 2022-23 तमे वर्षे विद्यावारिधेः योगपाठ्यक्रमसञ्चालनानुमतिः प्रदत्ताः। तदनु विश्वविद्यालयेन निर्धारितप्रक्रियानुसारं निर्धारितस्थानानुसारं योगावेदकानां प्रवेशाय प्रवेशसमित्या संख्यादीनां निर्धारणं कृतम् । तदनु विश्वविद्यालयानुदानायोगानुसारं विश्वविद्यालयानुसारं च निर्मितसत्रीयपाठ्यक्रमाध्ययनाध्यापनं सञ्चालितम् । तदनु सत्रीयपाठ्यक्रमपरीक्षोत्तीर्णच्छात्राणां विभागीयशोधसमित्या संबद्धच्छात्राणां शोधशीर्षकस्य शोधनिर्देशकानां मनोनयनाय निर्देशाः प्रदत्ताः ।

शोधमण्डलस्य उपवेशने विभागीयशोधसमितीनां द्वारा स्वीकृतविचाराणामनुसारेण शोधच्छात्राणां स्थायिपञ्जीकरणाय स्वीकृतिः प्रदत्ता। पञ्जीकृतशोधच्छात्राः निर्धारितनियमानां पालनेन स्वस्वशोधकार्याणि कुर्वन्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**6.3 Faculty Empowerment Strategies**

***6.3.1 The institution has effective welfare measures for teaching and non-teaching staff.***

***संस्थया अध्यापकेभ्यः अध्यापकेतरकर्मचारिभ्यश्च प्रभाविसंक्षेमोपायाः अनुस्रियन्ते।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः अध्यापकानाम् अध्यापकेतरकर्मचारिणां च कृते शैक्षिकोत्कर्षाय शारीरिकोत्कर्षाय, पारिवारिकोत्कर्षाय च सततं प्रयतते। विश्वविद्यालयेन शैक्षिकोत्कर्षाय विवधकक्षाः, शारीरिकोत्कर्षाय, योगव्यायामशालाचिकित्सादिकं पारिवारिकोत्कर्षाय बालानाम् शिक्षास्वास्थ्यधनव्यवस्था क्रियते। तद्यथा- श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च तदीयाः मानवीयसम्पदः सन्ति। अतः एतेषां क्षेमाय विश्वविद्यालयः सर्वदा कटिबद्धः वर्तते। न केवलं कार्यरतस्य कर्मचारिणः अपि तु तस्य सम्पूर्णविश्वविद्यालयपरिवारस्यापि क्षेमचिन्तनं विश्वविद्यालयः करोति। शारीरिक-मानसिक-पारिवारिकार्थिक-सामाजिकादिरूपेण  कर्मचारी सन्तृप्तः चेत्तर्हि सः विगतक्लेशः  विश्वविद्यालये स्वीयं कर्तव्योत्तरदायित्वादिकं सम्यक् निर्वोढुं प्रभवति न अन्यथा। अतः एव समेषाम् अध्यापकानाम् अध्यापकेतरकर्मचारिणां क्षेमाय नैके मार्गोपायाः विश्वविद्यालयेन अनुस्रियन्ते ।

1. **वैद्यकीयौषधोपचारसौकर्यम्-** वैद्यकीयविरमादयः संक्षेमोपायाः समेषां कर्मचारिणां स्वास्थ्यपरिरक्षणाय विश्वविद्यालयेन नानाविधानि सौकर्याणि प्रकल्पितानि सन्ति। विश्वविद्यालयेन प्राथमिकोपचारव्यवस्था सर्वेभ्यः विश्वविद्यालयीयेभ्यः निःशुल्कं परिकल्पिता अस्ति।
2. **शैक्षिकपरिकरसौकर्याणि विश्वविद्यालयभौतिकसौविध्यानि-**शैक्षिकपरिकरसौकर्याणि अध्यापकानाम् अध्यापकेतरकर्मचारिणां सन्ततयः सुशिक्षिताः भवेयुः इति कृत्वा ताभ्यः वार्षिकशैक्षिकपरिकराणां व्यवस्थापनाय शैक्षिकसौकर्यवेतनम् अतिरिक्तरूपेण दीयते। कर्मचारिणां सन्ततेः प्रवेशशुल्कम्, समवस्त्रशुल्कम्, वाहनशुल्कम्, पुस्तकशुल्कम् इत्यादीनि शुल्कानि दातुम् अपेक्षितः निर्दिष्टधनराशिः नियमानुगुणं दीयते। अतः कर्मचारिणां परिवारोऽपि लाभान्वितः भवति। सन्ततेः शैक्षिकार्थिकभारं विश्वविद्यालयः एव निर्वहति इत्यपि विशेषः।
3. **भाटकगृहवेतनम् (HRA)**-अध्यापकानाम् अध्यापकेतरकर्मचारिणां कृते भ्रमणवेतनम्, महार्घतावेतनम्, भाटकगृहवेतनम् इत्यादीनि विशिष्टानि वेतनसौकर्याणि विश्वविद्यालयेन दीयन्ते। मूलवेतनेन सह महर्घतावेतनं देशस्य आर्थिकमहार्घतां संवीक्ष्य सर्वकारेण निर्धार्यते।
4. **अवकाशः-** सामान्यावकाशः, प्रसवावकाशः, प्रसवित्र्याः पोषणावकाशः, शैक्षिकावकाशः, अध्ययनावकाशः अतिरिक्तविशेषावकाशः इत्यादयः। विश्वविद्यालयस्य कर्मचारिणः तस्य मूलसम्पदः सन्ति इत्यतः तेभ्यः विविधसन्दर्भेषु अपेक्षितानाम् अवकाशानां प्रदाने विश्वविद्यालयः सर्वदा उत्सुकोऽस्ति। प्रसवावकाशः, प्रसवित्र्याः पोषणावकाशः इत्यादयः अवकाशाः अवश्यं प्रदीयन्ते।
5. **गृहनिर्माणार्थं धनराशिः (HBA)**-पदयोग्यतानुरूपं गृहनिर्माणाय निर्मितगृहस्वीकरणाय च अधिकाधिकम् स्वीकृत-अग्रिमधनराशिरूपेण गुणितः धनराशिः अग्रिमधनराशिरूपेण कर्मचारी स्वीकर्तुं शक्नोति। सप्तमस्य वेतनायोगस्य क्रियान्वयनात् पूर्वं वाहनक्रयणाय द्विचक्रिकाक्रयणाय च अग्रिमधनराशिरूपेण विश्वविद्यालयः बहुभ्यः कर्मचारिभ्यः व्यवस्थाम् अकरोत्।
6. **यात्रासौकर्याणि**-यात्रासौकर्याणि विमानयात्रा, समुद्रमार्गयात्रा, स्थानीययात्रा, भारतदर्शनहेतुकी सविरामयात्रा, गृहगमनार्थकसविरामयात्रा, सेवानिवृत्तियात्रा, अग्रिमयात्रा इत्यादिषु यात्राप्रसङ्गेषु कर्मचारिभ्यः विशिष्टानि सौकर्याणि विश्वविद्यालयः प्रकल्पयति। भारतदर्शनादिषु सविरामयात्राप्रसङ्गेषु अर्जितविरामदिवसान् वेतनत्वेन परिवर्त्य सुखेन सपरिवारं यात्रां कर्तुम् अपि अवसरः वर्तते।

7. **स्वैच्छिकनिवृत्तिः-** समयपूर्वनिवृत्तिः, चिकित्साधारितनिवृत्तिः, असाधारणनिवृत्तिः इत्यादिषु प्रसङ्गेषु सौकर्याणि। सेवात्यागप्रसङ्गेषु श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य अध्यापकाः अध्यापकेतरकर्मचारिणश्च विशिष्टानि सौकर्याणि प्राप्स्यन्ति।
8. **सेवानिवृत्तेः सौकर्याणि**-सेवानिवृत्तेः सौकर्याणि संस्कृतविश्वविद्यालयस्य अध्यापकानाम् अध्यापकेतरकर्मचारिणां स्वाभाविकनिवृत्तिसन्दर्भे विशिष्टानि सौकर्याणि कल्पितानि सन्ति। स्वाभाविकनिवृत्तेः परमपि कार्यं कर्तुं निवृत्तिधनेन सह विशिष्टवेतनं दातुमपि अत्र अवसरः वर्तते। सेवावधौ अर्जितविरामानां धनत्वेन परिवर्तनाय अपि अवसरः अस्ति। निवृत्तस्य देहावसनात् परमपि विश्वविद्यालयः नियमानुगुणं व्यवस्थां करोति।
9. **आवासीयभवनानि-** विश्वविद्यालये शैक्षणिकशैक्षणिकेतरकर्मचारिणां कृते 48 आवासीयभवनानि निर्मितानि सन्ति । तेषु 7 आवासीय भवनानि वर्ग-V इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-IV इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-III इत्यस्य कृते, 8 आवासीयभवनानि वर्ग-II इत्यस्य कृते, 15 आवासीयभवनानि वर्ग-1 इत्यस्य कृते च सन्ति। एतदतिरिक्तं कुलपत्यावासभवनं निर्मितमस्ति।
10. **एतदतिरिच्य अन्यानि आरक्षितानां कृते नियुक्तौ सौकर्याणि सन्ति।**

- **विश्वविद्यालये अन्तर्जाल-वाईफाई** इति सौविध्यं समुपलब्धम् अस्ति। विश्वविद्यालये शिक्षामन्त्रालयस्य दिशानिर्देशानाम् अनुसारेण जियो-नेटवर्क-माध्यमेन सर्वे वाईफाई-सौविध्यं प्राप्नुवन्ति। विश्वविद्यालये इण्टरनेट-सेवा नेटवर्कमूलसंरचना च उपलभ्यते।
- **पुस्तकालयः-** ग्रन्थालयः प्राध्यापकानां, छात्राणां, शिक्षणेतरकर्मचारिणां च कृते पुस्तकसौविध्यं कल्पयति।
- **आहारसदनम्**- विश्वविद्यालयस्य परिसरे आहारसदनस्य व्यवस्थाऽस्ति, यस्य प्रवन्धनं तृत्तीयपक्षस्य भोजनदातृणा भवति। विश्वविद्यालयस्य छात्राणां कर्मचारिणाञ्च कृते उत्तमगुणवत्तायुक्तानि विविधप्रकारकभारतीयव्यञ्जनानि, अल्पाहारव्यञ्जनानि च अतिन्यूनशुल्केन दीयन्ते।
- **अतिथिगृहम्-** अतिथिगृहं विश्रान्तिनिलयमिति नाम्ना विश्वविद्यालयस्य एका अव्यावसायिकान्वितिरस्ति। एवञ्च अस्योपयोगः शैक्षिकोद्देश्यानां पूर्त्यर्थं क्रियते। विश्वविद्यालयपरिसरे द्वितलयुक्तम् अतिथिगृहभवनमस्ति।
- **व्यायामशाला**- विश्वविद्यालये सर्वेषाम् अध्यापकानाम्, अध्यापकेतरकर्मचारिणां, छात्राणां च कृते अत्युत्कृष्टव्यायामशालायाः सौविध्यमुपलव्धमस्ति। परिसरे पूर्णतया वातानुकूलिता आन्तरिकगुणवत्तायुक्ता व्यायामशाला अस्ति, या छात्राणां सर्वाङ्गीणविकासस्य लक्ष्यं मनसि निधाय निर्मिताऽस्ति।
- **शिशुसदनम्**- विश्वविद्यालयस्य शिशुसदनस्योद्देश्यं विश्वविद्यालयस्य कर्मचारिणीनां (शैक्षणिक गैरशैक्षणिककर्मचारिणीनां) बालानां कृते विश्रान्तियुक्तं सुरक्षितञ्च वातावरणं प्रददाति।
- **मनोरञ्जनकक्षः** -विश्वविद्यालयस्य महिलाकार्यकर्त्रीभ्यः मनोरञ्जनार्थं परस्परमेलनार्थञ्च विश्वविद्यालये मनोरञ्जनप्रकोष्ठः निर्मितोऽस्ति। महिलाभ्यः तासां रिक्तसमये विश्रान्तिम्, अध्ययनम् अनौपचारिकसम्भाषणञ्च कर्तुं प्रकोष्ठः निर्मितः।

एवं बहुविधानि सौकर्याणि विश्वविद्यालयेन कल्पितानि सन्ति। विश्वविद्यालयः केन्द्रसर्वकारस्य कर्मचारिणां संक्षेमोपायनिमित्तं विद्यमान-सर्वकारीयान् अध्यादेशान् यथावत् परिपालयति। वेतनायोगप्रतिवेदनं प्रतिवर्षं परिशील्य नवीनादेशान् यथावत् परिपालयन्तः अध्यापकाः अध्यापकेतरकर्मचारिणश्च यथा ससुखं सक्षेमं च जीवनं यापयेयुः तथा व्यवस्थां कल्पयति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.3.2 Average percentage of teachers provided with financial support to attend conferences / workshops and towards membership fee of professional bodies during the last five years***

***विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां सामान्या प्रतिशतता।***

**Answer:** 17.05

6.3.2.1 Number of teachers provided with financial support to attend conferences/ workshops and towards membership fee of professional bodies year-wise during the last five years

विगतपञ्चवर्षेषु सङ्गोष्ठीषु/ कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवताम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 36 | 34 | 14 | 5 | 1 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Details of teachers provided with financial support to attend conferences, workshops etc. during the last five years (Data Template)(विगतपञ्चवर्षेषु सङ्गोष्ठीषु/कार्यशालासु भागग्रहणाय, व्यावसायिकनिकायेषु, सदस्यताशुल्कनिमित्तञ्च आर्थिकसहायतां प्राप्तवता) | View Document |

***6.3.3 Average number of professional development / administrative training Programmes organized by the university for teaching and non teaching staff during the last five years.***

***विगतेषु पञ्चसु वर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च संस्थया समायोजितानां कार्यक्रमाणां वार्षिकी सम्पूर्णा सङ्ख्या।***

**Answer:** 65.4

6.3.3.1 Total number of professional development / administrative training Programmes organized by the Institution for teaching and non teaching staff year-wise during the last five years

विगतपञ्चवर्षेषु शिक्षकाणां वृत्तिविकासार्थं, शिक्षकेतरकर्मचारिणां प्राशासनिकप्रशिक्षणार्थञ्च विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां वार्षिकयोगः।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 97 | 62 | 122 | 17 | 29 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centres) (मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य अकादमिकस्टाफ-महाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/प्रतिवेदनानि।) | View Document |
| Reports of Academic Staff College or similar centers(शैक्षणिकमहाविद्यालयानां प्रतिवेदनम्) | View Document |

| | |
|---|---|
| Details of professional development / administrative training Programmes organized by the University for teaching and non teaching staff (Data Template)(शैक्षणिक-अशैक्षणिक-कर्मचारिणां व्यावसायिक-विकासार्थं / प्राशासनिक-प्रशिक्षणार्थं विश्वविद्यालयेन समायोजितानां कार्यक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document |

***6.3.4 Average percentage of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes during the last five years***

***विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां मध्यमानस्य प्रतिशतता।***

**Answer:** 41.26

6.3.4.1 Total number of teachers attending professional development Programmes, viz., Orientation Programme, Refresher Course, Short Term Course, Faculty Development Programmes year-wise during the last five years

विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासकार्यक्रमादिवृत्तिविकासकार्यक्रमेषु भागग्राहिणाम् अध्यापकानां वार्षिकसङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 44 | 29 | 25 | 25 | 98 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Reports of the Human Resource Development Centres (UGC ASC or other relevant centers).(मानवसंसाधनविकासकेन्द्रेभ्यः (विश्वविद्यालयानुदानायोगस्य शैक्षिककर्मचारिमहाविद्यालयेभ्यः अथवा तदन्यसदृशकेन्द्रेभ्यः) प्राप्तप्रमाणपत्राणि/ प्रतिवेदनानि।) | View Document |
| IQAC report summary(आन्तरिकगुणवत्ताऽश्वासनकेन्द्रस्य प्रतिवेदनसारांशः।) | View Document |
| Details of teachers attending professional development Programmes during the last five years (Data Template)(विगतपञ्चवर्षेषु अभिविन्यासपाठ्यक्रम-पुनश्चर्यापाठ्यक्रम-स्वल्पकालिकपाठ्यक्रम-अध्यापकविकासपाठ्यक्रमादि वृत्तिविकासपाठ्यक्रमेषु भागग्राहिणाम् अध्) | View Document |

***6.3.5 Institution has Performance Appraisal System for teaching and non-teaching staff***

***संस्थायां शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली वर्तते।***

**Answer:**

विश्वविद्यालयः केन्द्रीय-संस्कृत-विश्वविद्यालय-अधिनियम-2020, विश्वविद्यालयेषु महाविद्यालयेषु च शिक्षकाणां अन्यैः अकादमिक-कर्मचारिणां च नियुक्तये न्यूनतम-योग्यता-संबन्धीनि यूजीसी-विनियमानि, उच्च-शिक्षायां मानकानां संरक्षणाय उपायाः-2018, कैडर-भर्ती-नियमाः (सीआरआर), च समये समये संशोधितानि भारतसर्वकारस्य सीसीएस-आचरण-नियमाः इत्यादीनां यथानियमम् अनुपालनं करोति, शिक्षकीय-अशिक्षकीय-कर्मचारिणां कृते। अस्य लक्ष्यं केवलं

संस्थापित-मानदण्डानुसारं निष्पक्षं मूल्यांकनं न, अपि तु सम्भावित-परिष्कारस्य बिन्दूनां च अन्वेषणं भवति, यत् अन्ते कर्मचारिणः प्रगति-विकासयोः कारणं भविष्यति।

**निष्पादनमूल्यांकन-प्रणाल्याः मुख्यविशेषताः इमे सन्ति -**

1. प्रत्येकं पीठ-सदस्यस्य प्रदर्शनस्य मूल्यांकनं, वार्षिकं स्वमूल्यांकनस्य अनुसारेण प्रदर्शन-आधारित-मूल्यांकन-प्रणाल्याः (PBAS) अनुरूपेण भवति।
2. पदोन्नतिः यूजीसी-कैरियर-उन्नयन-योजना (CAS) अंतर्गत पीबीएएस प्रोफार्मा तथा च एपीआई इत्यंकानाम् आधारेण भवति।
3. पीठ-सदस्येभ्यः तेषाम् उचिता पदोन्नतिः पूर्वमेव सूच्यते।
4. पीठ -सदस्येन यत् पीबीएएस प्रोफार्मा पूरितं भवति, तत् विभागाध्यक्षैः निरीक्षितं सत्यापितं च भवति, ततः प्रमुखेण ।
5. पीठ-सदस्याः येषां पदोन्नतिः देया अस्ति, तेषां एपीआई इत्यंकानाम् आधारेण परामर्शाः दीयन्ते, तैः च स्क्रीनिंग-सह-चयन-समित्याः पुरतः उपस्थितिः आवश्यकी भवति।

**सर्वेषां शिक्षणेत्तर-कर्मचारिणां कार्यनिष्पादनमपि वार्षिक-निष्पादन-मूल्यांकन-प्रतिवेदन मूल्यते।**

कर्मचारिणां मूल्यांकनं विभिन्नेषु श्रेणिषु सम्पन्नं भवति, यथा – चारित्रं, स्वभावः, विभागीयक्षमताः, कष्टेन कार्यं कर्तुं सामर्थ्यम्, अनुशासनम्, विश्वासार्हता, वरिष्ठैः अधीनस्थैः सहकर्मिभिः च सह सम्बन्धाः इत्यादयः।

सर्वकारस्य नियमानुसारं सर्वेषां समूह- 'A', 'B', 'C' कर्मचारिणां कृते न्यूनतम-बेंचमार्क "अतिवरिष्ठः" (अर्थात् न्यूनतमाः अंकाः 7) निर्धारिताः सन्ति। सन्तोषजनकं निष्पादनं च बेंचमार्क-अनुरक्षणं कृत्वा सर्वे कर्मचारिणः एमएसीपी-योजनायाः अन्तर्गतं पदोन्नतिं वित्तीयोन्नतिं च प्राप्नुवन्ति।

निष्पादनमूल्यांकन-प्रणाल्या कर्मचारिणां मूल्यांकनं, तेषां प्रेरणां, तेषां शक्तीनां दुर्बलतायाः च विश्लेषणं कर्तुं साहाय्यं करोति तथा च उत्तमं प्रदर्शनं सुनिश्चितं करोति। एतानि प्रतिवेदनानि विश्वविद्यालयस्य सर्वेषां कर्मचारिणां जनेषु तेषां सूचनायै प्रकट्यन्ते।

सर्वेषां शैक्षिक-प्रशासनिककर्मचारिणां कार्यनिष्पादनप्रणाली, गोपनीयविवरणं च संस्कृतविश्वविद्यालयस्य तथा केन्द्रसर्वकारस्य नियमानुगुणं सम्पाद्यते । सर्वविधप्रक्रियाः विश्वविद्यालय-अनुदान-आयोगस्य मानकमवलम्ब्य आन्तरिकगुणवत्ताप्रकोष्ठेन क्रियते। प्रपत्राणाम् आधारेण योग्यकर्मचारिभ्यश्च पदोन्नतिः अन्ये लाभाश्च दीयन्ते।

यथा –

1. सर्वेषां नियमितशैक्षिककर्मचारिणाम् ।
2. नियमितप्रशासनिककर्मचारिणाम् ।

सर्वेषां कर्मचारिणां नाम, अर्हता, परिचायकपत्रम्, विभागः, कार्यस्थानम्, शैक्षिकसत्रम् इत्यादीनाम् उल्लेखः प्रपत्रे क्रियते। सर्वेषां नियमितशैक्षिककर्मचारिणाम् आत्ममूल्याङ्कलनेन सम्बद्धं विवरणं प्रपत्रस्य प्रथमभागे वर्तते। तत्र एते अंशाः पूरणीयाः भवन्ति। यथा –

1. नाम, पदवी, सङ्केतः, स्तरः
2. प्रथमनियुक्तेः विवरणम्, नियुक्तेः निवृत्तेश्च तिथिः
3. शैक्षिकयोग्यताः
4. पदस्य उल्लेखः।

ततः स्नातकस्नातकोत्तरस्तरीयाणां शिक्षकाणां कक्ष्याकार्यादीनाम् उल्लेखः वर्तते। यथा-

1. सत्रे निधारिताः कालांशाः
2. सत्रे स्वीकृताः कालांशाः
3. प्रायोगिककार्यार्थं वितीर्णाः कालांशाः
4. प्रायोगिककार्यार्थं स्वीकृताः कालांशाः
5. कक्ष्यादीनाम् अस्वीकरणे हेतवः शिक्षकाणां शोधप्रवृत्तेः मूल्यांकलनव्यवस्था अपि विश्वविद्यालयेन क्रियते। यथा –

1. वर्षेऽस्मिन् मार्गदर्शकत्वेन स्वीकृतानां शोधच्छात्राणां सङ्ख्या ।
2. उपाधिप्राप्तवतां शोधच्छात्राणां सङ्ख्या ।
3. शोधपरियोजनानां विवरणं - कृतानां करिष्यमाणानां च सङ्ख्या ।
4. धनदायिनी संस्था ।
5. मुख्यः गवेषकः ।
6. प्राप्यपरिणामाः ।
7. राष्ट्रिये अन्ताराष्ट्रिये च स्तरे शोधपत्राणि प्रस्तुतीकृतं चेत्तर्हि तद्विषये विवरणम् ।
8. शोधकेन्द्रितसङ्गोष्ठ्यादिषु भागग्रहणस्य उल्लेखः।
9. पुस्तकप्रकाशनादीनि कार्याणि ।
10. रचनात्मकसर्जनात्मकगतिविधीनाम् उल्लेखः ।
11. सभायाः कार्यशालायाः राष्ट्रियसङ्गोष्ठ्याः तदितरेषां कार्यक्रमाणां संयोजकत्वेन कृतकार्यस्य विवरणम् ।
12. विश्वविद्यालयस्य परीक्षाकार्येषु सर्वेषां नियमितशैक्षिककर्मचारिणां नियमितप्रशासनिककर्मचारिणां परीक्षणं विधीयते।
13. पाठ्यसहगामिक्रियासु, सामाजिकेषु सांस्कृतिकेषु च क्रियाकलापेषु कर्मचारिणां भूमिकायाः परिगणनं विधीयते।
14. एकस्मिन् वर्षे पीठप्रमुखेण विभागाध्यक्षेण च तदितरप्रशासकैः प्रदत्तानां दायित्वानां विवरणम् ।
15. शिक्षकैः प्रयुज्यमानानां प्राविधिकोपकरणानां पुनः शिक्षणार्थं गवेषितानां च नूतनोपकरणानाम् उल्लेखः।

एतत्सम्बद्धानि अधिकविवरणानि कृतकार्याणां प्रमाणैः सह प्रपूर्य कर्मचारिणा दीयते। प्रतिवेदनाधिकारी पुनः प्रमाणीकरणं करोति। प्रतिवेदनाधिकारी अधोलिखितानां विवरणं पूरयति । यथा –

विषयज्ञानम्, विषयज्ञानवर्धनाय शिक्षकेण कृताः प्रयासाः, शिक्षणसामर्थ्यम्, नियमितता, शिक्षायाः गुणवत्ता, छात्रैः सह सम्बन्धः, सहोद्योगिभिः सह सम्बन्धः, योजनानिर्माणक्षमता, साधनसम्पन्नता, भागग्राहिता इत्यादीनि।

समीक्षकाधिकारिणा अधोलिखिताः सारांशरूपेण लिख्यन्ते। यथा –

शिक्षकाणां शिक्षकेतरकर्मचारिणां च कार्याणि अत्युत्तमानि, उत्तमानि, तृप्तिकराणि, अतृप्तिकराणि सन्ति। अत्र सर्वत्रापि अधिकारी प्रत्येकमपि शिक्षकस्य कार्यनिष्पादनस्य विवरणं व्यक्तिशः वस्तुनिष्ठरूपेण च पूरयति।

तत्प्रतिवेदनम् अतीवमहत्त्वपूर्णं भवति।

शिक्षकस्य शिक्षकेतरकर्मचारिणः चरित्रम् अत्युत्तमम्, समन्वयः अत्युत्तमः; प्रतिपुष्टिः अत्युत्तमा, अन्यः कोऽपि विशेषांशः च अस्ति, चेत्तर्हि तस्य उल्लेखः। एतस्य समीक्षणं सम्यक् विहाय पीठप्रमुखः अग्रे सारयति। एवं विश्वविद्यालयस्य शिक्षकाणां शिक्षकेतरकर्मचारिणां कार्यनिष्पादनज्ञापनप्रणाली व्यवस्थिता वस्तुनिष्ठा च भवति। विश्वविद्यालयेन समर्थपरियोजनायाः माध्यमेन CAS कार्यान्वयनस्य प्रक्रिया आरब्धा अस्ति

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**6.4 Financial Management and Resource Mobilization**

***6.4.1 Institution conducts internal and external financial audits regularly***

***संस्था नियमितम् आन्तरं बाह्यं च वित्तलेखाङ्केक्षणं करोति।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य लेखापरीक्षणं भारतस्य नियन्त्रकमहालेखापरीक्षकेन (C&AG) क्रियते। सीएण्डएजी प्रतिवर्षं विश्वविद्यालयस्य वार्षिकलेखानां लेखापरीक्षां करोति तथा च विश्वविद्यालयाय मन्त्रालयाय च स्वप्रतिवेदनं प्रस्तौति। विश्वविद्यालयस्य वार्षिकलेखापरीक्षातिरिक्तं सीएण्डएजी विश्वविद्यालयस्य वितीयलेखापरीक्षामपि करोति यस्मिन् विश्वविद्यालयस्य वित्तीयप्रशासनिकनिर्णयः, वृत्तिः, क्रयणं, निविदाः, सेवाविषयादीनां विस्तरेण परीक्षणं भवति। सीएण्डएजीकार्यालयात् लेखापरीक्षाप्रतिवेदनं प्राप्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः सीएण्डएजी-इत्यस्य लेखापरीक्षाप्रतिवेदने सूचितानाम् अभावानां निवारणाय स्वस्य वरिष्ठाधिकारिभिः सह समीक्षासमागमं करोति। तदतिरिक्तं विश्वविद्यालयस्य आन्तरिकनियन्त्रणव्यवस्थां सुदृढकर्तुं रजिस्ट्रार/वित्तपदाधिकारिणः पर्यवेक्षणे समये समये समीक्षासमागमाः अपि क्रियन्ते। विश्वविद्यालयस्य लेखापरीक्षाप्रतिवेदनं संसदस्य द्वयोः सदनयोः समक्षं स्थापितं भवति । विश्वविद्यालयस्य वित्तीयलेखापरीक्षाप्रतिवेदनानां समीक्षा अपि शिक्षामन्त्रालयेन क्रियते। विश्वविद्यालयः लेखापरीक्षापरिच्छेदानां सामाधाने महत् बलं ददाति तथा च विश्वविद्यालयस्य सर्वदा एव प्रयासः भवेत् येन लेखापरीक्षापरिच्छेदाः न्यूनाः कर्तुं शक्यन्ते।

विश्वविद्यालयस्य आन्तरिकवित्तीयलेखापरीक्षायाः संचालनं कर्तुं विश्वविद्यालयेन अनुबन्धाधारेण लेखापरीक्षापरामर्शदाता नियुक्तः अस्ति। विश्वविद्यालयेन नियुक्तः लेखापरीक्षापरामर्शदाता विश्वविद्यालयस्य वित्तीयव्यवहारस्य पूर्वं पश्चात् च लेखापरीक्षणं करोति। परामर्शदाता विश्वविद्यालयस्य विभिन्नविभागेषु क्रियाकलापानाम्/व्यवहारानाम् अवलोकनानन्तरं लेखापरीक्षाकार्यक्रमं सज्जीकरोति। विश्वविद्यालयस्य आन्तरिकलेखापरीक्षा प्रारम्भिकपदे न्यूनतानां संज्ञाने सहायकं भवति । इदं विश्वविद्यालयस्य उत्तमवित्तीयप्रशासनिकप्रथानां स्वीकरणे अपि सहायकं भवति येन यदा विश्वविद्यालयस्य बाह्यलेखापरीक्षा C&AG द्वारा क्रियते तदा विश्वविद्यालयः वित्तीयादिविषयाणां निबन्धनस्य विषये आदर्शसंस्थारूपेण उद्भवितुं शक्नोति। परामर्शदाता लेखापरीक्षानिर्णयनिर्माणे अपि स्वस्य निवेशं प्रदाति यतः महत्त्वपूर्णसञ्चिकाः/पत्राणि तस्य परामर्शार्थम् आन्तरिकलेखापरीक्षायै प्रेष्यन्ते । एषा प्रणाली प्रारम्भिकपदे प्रक्रियात्मकदोषाणां संज्ञाने सहायकं भवति । विश्वविद्यालयस्य वित्तीयप्रशासनिक-अभिलेखानां सम्यक् परीक्षणानन्तरम् आन्तरिकलेखापरीक्षाप्रतिवेदनं गोपनीयरूपेण निर्मितं भवति। लेखापरीक्षाप्रतिवेदनं कुलपति/रजिस्ट्रारस्य समक्षं तस्य पठनार्थं प्रस्तुतं भवति।

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः वित्तीयप्रकरणेषु पारदर्शितायै प्रतिबद्धोऽस्ति। अस्याः प्रतिबद्धतायाः पारदर्शितायाः क्रमे विश्वविद्यालयः स्वसमस्तवित्तीयनीतीः सार्वजनिकरूपेण प्रसारयति तथा च एतासां नीतीनां परिपालने स्वीय-आन्तरिकबाह्यलेखापरीक्षणं कारयति। आन्तरिकलेखापरीक्षणं विश्वविद्यालयः यथासमयं वित्तीयनियमपरिपालनाय प्रेरयन्ति। एवं प्रकारकं लेखापरीक्षणं यत्र विश्वविद्यालयीयविभागेषु परस्परं समञ्जनं स्थापयितुं साहाय्यं करोति तत्रैव अन्यत्र विश्वविद्यालयीयविभागेषु वित्तीयनियमानुरूपं कारणाय प्रेरयति। एवं प्रकारेण बाह्यलेखापरीक्षणं विश्वविद्यालय”खाता” इत्यादीनां भारतसर्वकारद्वारा अधिकृतनिकायेन परीक्षणं (एजेन्सीद्वारा) परीक्षणं भवति। अमुं लेखापरीक्षणं सर्वकारीयनिकायानां, विश्वविद्यालयस्य हितधारक - (‘स्टेकहोल्डर’) निमित्तं विश्वविद्यालये सुनिश्चितवित्तीयनियमानाम् अनुसारेण व्ययस्य प्रमाणं प्रददाति। एवं प्रकारेण बाह्य-आन्तरिकलेखापरीक्षणं शासकीयनियमानां प्रक्रियायाः च अनुसारम् आवश्यकं भवति। तथा विश्वविद्यालयेन यथानियमं प्रतिवर्षम् अस्य अनुपालनं सुनिश्चीयते। आन्तरिकलेखापरीक्षणं नाम आन्तरिकवित्तीयविद्भिः यथासमयं वित्तीयशुचितानिर्माणाय आन्तरिकं परीक्षणं विधाय वित्तसंबद्धानि कार्याणि क्रियन्ते तदुच्यते आन्तरिकलेखापरीक्षणम् इति। बाह्यलेखापरीक्षणं नाम बाह्यसर्वकारीयनिकायेन महालेखापरिक्षकस्य नियन्त्रणे विश्वविद्यालयीयं समये समये समागत्य वित्तशुद्धिविषये परीक्षणम् इति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.4.2 Funds/ Grants received from non-government bodies, individuals, philanthropers during the last five years (not covered in Criterion III) (INR in Lakhs)***

***विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्राप्तम् आर्थिकं साहाय्यम् अनुदानं वा (यदि***

*तृतीयनिकषे न निर्दिष्टम्) (लक्षशः रूप्यकेषु)*

**Answer:** 3.51

6.4.2.1 Total Grants received from non-government bodies, individuals, philanthropers year-wise during the last five years (INR in Lakhs)

विगतपञ्चवर्षेषु सर्वकारीयेतरनिकायेभ्यः, व्यक्तिभ्यः, दातृभ्यश्च प्रतिवर्षं प्राप्तस्य आर्थिकसाहाय्यानुदानस्य वार्षिकयोगः (लक्षशः रूप्यकेषु)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1.51 | 0 | 2.0 | 0 | 0 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Details of Funds / Grants received from non-government bodies during the last five years (Data Template) | View Document |
| Annual statements of accounts(अङ्केक्षितस्य वार्षिकलेखापत्रस्य प्रतिकृतिः ) | View Document |

***6.4.3 Institutional strategies for mobilisation of funds and the optimal utilisation of resources***

***विविधसंसाधनानां सर्वाधिकसमुपयोगार्थं, वित्तराशिसङ्ग्रहार्थञ्च संस्थायाः व्यूहाः।***

**Answer:**

वित्तराशिसङ्ग्रहार्थं विश्वविद्यालयस्य व्यूहः- विश्वविद्यालयः यद्यपि स्वस्य व्ययनिर्वहणाय पूर्णशः केन्द्रसर्वकारावलम्बितः वर्तते। श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः स्वसंसाधनानां सर्वोत्तमप्रयोगाय कटिबद्धः वर्तते। विश्वविद्यालयः अयं व्यक्तिशः स्वसंसाधनैः इष्टतमप्रयोगेण आयस्य स्रोतांसि, वित्तराशिसङ्ग्रहार्थं नैकान् व्यूहान् च उत्पादयति। विश्वविद्यालये अधोलिखितसंसाधनैः आयस्य स्रोतांसि उत्पाद्यन्ते।

क्रमशः यथा –

1. **सभागारसमितिकक्षभाटकम्**- चत्वारः सभागाराः निर्धारितराशिमाध्यमेन अन्यसंस्थाभ्यः शैक्षिकगतिविधिनिमित्तं प्रदीयन्ते । यथा संगोष्ठी, कार्यशाला, उपवेशनमादिकार्यक्रमाः भवन्ति, ततः भाटकं स्वीक्रियते।
2. **विश्रान्तिगृहम्** विश्रान्तिगृहस्य प्रकोष्ठाः निर्धारितराशिमाध्यमेन विविधसर्वकारीव्यक्तिगतसंस्थाभ्यः निर्धारितभाटकेन प्रदीयन्ते।
3. **ई-चार्जिंग-पॉइंट इति**- विश्वविद्यालये विविधस्थलेषु यानविद्युत्कोषाः स्थापिताः वर्तन्ते। येषां निर्धारितराशिमाध्यमेन यानविद्युत् पूरणाय निर्धारितराशिः स्वीक्रियते।
4. **प्रकाशनविक्रयकेन्द्रम्** - विश्वविद्यालयस्य प्रकाशनविक्रयकेन्द्रं स्थिरविक्रयकेन्द्रं वर्तते। अत्र विश्वविद्यालयस्य अनेकप्रकाशनानि क्रयणाय उपलभ्यन्ते। पुस्तकानां विक्रयणेन अद्यावधि सहस्रशः रूप्यकाणि विश्वविद्यालयेन अर्जितानि सन्ति।
5. **परीक्षाकेन्द्ररूपेण स्थापनाय धनसङ्ग्रहव्यूहः** - केन्द्ररूपेण स्थापनाय धनसङ्ग्रहव्यूहः विश्वविद्यालये परीक्षादियोजनाय विश्वविद्यालयः तेभ्यः निकायेभ्यः धनादिकम् स्वीकरोति।
6. **प्रांगणनिमितं धनम्** – विश्वविद्यालयः प्रांगणे कार्यक्रमावसराय धनं स्वीकरोति तेनापि विश्वविद्यालयस्य धनसंग्रहः जायते ।
7. **नेटवर्कटॉवर इति**- विश्वविद्यालयः मोबाइलटावर इति प्रतिष्ठापनाय मेसर्स इंडस टॉवर लिमिटेड इत्यस्यै विश्वविद्यालयीयं स्थानं प्रदत्तवान्। संस्था विश्वविद्यालयाय वास्तविकाधारेण मासिकवेतनं विद्युत्शुल्कं निश्चितराशिं

च प्रददाति। विश्वविद्यालयेन स्तंभस्य स्थापनायै स्वस्य भूमिस्थानं कम्पनी विश्वविद्यालयाय वास्तविकरूपेण मासिकभाटकस्य विद्युत्शुल्कस्य च निमित्तं नियतराशिं ददाति ।

8. **वर्चुअलस्टूडियो इति**- विश्वविद्यालये कश्चन प्रतिष्ठितः हाई-टेक-विजुअल-स्टूडियो इति स्थापितः। यः रिकॉर्डिंग-साउण्डसिस्टम इत्यनेन सुसज्जितः वर्तते। विश्वविद्यालयः परस्परंसहमतसच्वेषु अन्यसंघटनसंस्थानेभ्यः सौविध्यं प्रददाति। विश्वविद्यालये आधुनिक-रिकार्डिङ्ग-ध्वनि-प्रणाल्याः च सुसज्जितः उच्च-प्रौद्योगिकी-दृश्य-स्टूडियो अस्ति । विश्वविद्यालयः अन्येभ्यः संस्थाभ्यः/संस्थाभ्यः परस्परं सहमतसत्त्वैः एतत् सौविध्यं प्रदीयते।

9. **प्रबंधनकोषः**- विश्वविद्यालयेन एण्डोवमेण्ट् कोषस्य अन्तर्गतं पर्याप्तं योगदानं प्राप्तम् अस्ति। एतेन विश्वविद्यालयः धनस्य अभावसमये आधारभूतसंरचनाविकासस्य अन्येषां उपायानां च आवश्यकतानां पूर्तये सहायतां स्वीकरोति ।

10. **कॉर्पस फण्ड्**- विश्वविद्यालयस्य वर्षेषु उत्पन्नस्य अधिशेषस्य/IRG इत्यस्य कोर्पस फंड इति निर्माणस्य तन्त्रम् अस्ति। सम्प्रति विश्वविद्यालयस्य कोर्पस् 1000 रूप्यकात् अधिकः अस्ति। १ कोटिः एतत् आरक्षितनिधिं धनस्य अल्पतायाः समये विश्वविद्यालयस्य सहायतां कर्तुं शक्नोति।

11. **छात्रकल्याणकोषः**- विश्वविद्यालयः प्रत्येकस्मात् छात्रात् वार्षिकप्रवेशशुल्केन सह छात्रकल्याणकोषं संग्रहयति। संगृहीतस्य धनस्य उपयोगः विश्वविद्यालयस्य छात्राणां कल्याणाय भवति।

12. **छायाप्रतिः** - विश्वविद्यालयेन एकस्मै आउटसोर्सड् एजेन्सी इत्यस्मै लघुस्थानं प्रदत्तम् यत् सुविधाकेन्द्ररूपेण कार्यं करोति यत्र छात्राः/अन्ये नाममात्रेण फोटोकॉपी / सर्पिल बाइण्डिंग् इत्यादीनि प्राप्तुं शक्नुवन्ति। विश्वविद्यालयस्य एषः प्रयासः संसाधनानाम् इष्टतम-उपयोगस्य दिशि एकं सोपानम् अस्ति ।

13. **छात्राणां भोजनाल**यः- विश्वविद्यालये छात्राणां अन्येषां च हितधारकाणां कृते अभिप्रेतः भोजनालयः अस्ति। भोजनालये छात्राणां हितधारकाणां च कृते अत्यन्तं अल्पधनेन भोजनं प्रदत्तं भवति ।

    उपर्युक्तानाम् आलोके स्पष्टं भवति यत् श्रीलालबहादुरशास्त्री राष्ट्रियसंस्कृतविश्वविद्यालये संसाधनानाम् इष्टतमोपयोगाय पर्याप्तः सहजः च अस्ति। धनसङ्ग्रहार्थम्

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**6.5 Internal Quality Assurance System**

***6.5.1 Internal Quality Assurance Cell (IQAC) has contributed significantly for institutionalizing the quality assurance strategies and processes***

***गुणवत्ताश्वासनव्यूहानां प्रक्रियाणां च संस्थानीकरणाय आन्तरिकगुणवत्ताश्वासनकेन्द्रं विशेषतः योगदानं करोति।***

**Answer:**

आन्तरिकगुणवत्ताश्वासनप्रकोष्ठेन निरन्तरं गुणवत्तावर्धनाय विविधव्यूहानां निर्माणपुरस्सरम् शैक्षिकप्रशासनिकसौविध्यजन्यकार्यक्रमाः आयोज्यन्ते तदानुरोधेन एव विविधव्यूहाः विनिर्मिताः सन्ति तेषु उदाहरणद्वयमत्र उपस्थाप्यते यथा-

1. **संस्कृतभाषाकौशलविकासकेन्द्रम्** (Sanskrit Language Skills Development Centre)**-**

1. आन्तरिकगुणवत्ताश्वासनप्रकोष्ठेन “संस्कृतभाषाकौशलविकासकेन्द्रस्य” सञ्चालनं क्रियते। एतस्य प्रकोष्ठस्य मुख्योद्देश्यं छात्रेषु संस्कृतभाषां प्रति अभिरुचिमुत्पाद्य संस्कृतसम्भाषणे लेखने च कौशलाभिवर्धनम्। प्रकोष्ठद्वारा निःशुल्करूपेण प्रतिदिनं प्रातः 9 वादनतः 10 वादनपर्यन्तं कक्षाणां सञ्चालनं क्रियते । ये नूतनच्छात्राः संस्कृतलेखने सम्भाषणे च समर्थाः न भवन्ति, अपि चान्ये विश्वविद्यालयं निकषा कटवारियासरायग्रामात् किशनगढग्रामाच्च समागताः जिज्ञासवः पठितुमागच्छन्ति, तेषां संस्कृतभाषाकौशले विशेषलाभो भवति। अस्य पाठ्यक्रमस्य प्रथमचक्रे 360 छात्राः पञ्जीकरणं कृतवन्तः । विश्वविद्यालस्य प्राध्यापकाः एतासु कक्ष्यासु दत्तचित्तेन पाठयन्ति । छात्राः एताभिः कक्ष्याभिः भाषायां प्रावीण्यं प्राप्नुवन्ति । येषां छात्राणां संस्कृतभाषया भाषितुम् अभ्यासो न भवति, तेषां कृते इयं प्रक्रिया महत्त्वपूर्णा वर्तते ।
2. विश्वविद्यालयस्य छात्राः विविधासु प्रतियोगितासु भागं गृह्णन्ति, यथा - शलाकास्पर्धा, शास्त्रार्थस्पर्धा, नाटकप्रतियोगिता, काव्यरचना, भाषणस्पर्धा च । अपि च आजीविकाप्राप्त्यर्थमपि छात्राः विविधासु प्रतियोगिपरीक्षासु भागं गृह्णन्ति । शास्त्रीयस्पर्धासु विविधप्रतियोगिपरीक्षासु च संस्कृतच्छात्राणां साफल्यं भवेदेतदर्थम् आन्तरिकगुणवत्ताश्वासनप्रकोष्ठद्वारा छात्राणां निःशुल्ककक्षाणां प्रतिदिनं सायं 5 तः 6 वादनपर्यन्तं सञ्चालनं क्रियते । विश्वविद्यालयस्य विविधविषयेषु निष्णाताः विद्वान्सः निःस्वार्थं कक्षाः स्वीकुर्वन्ति । छात्रोन्नयकक्षार्थं विविधकार्यक्रमाणां माध्यमेन चयनप्रक्रियासंचालिता भवति तेन माध्यमेन अत्यन्तं गौरवभावेन छात्राः भागग्रहणं कुर्वन्ति । तेषां सर्वविधसमस्यानासमाधानाय प्रयत्नः प्रवर्तते । अनया कक्षया छात्राणां गौरववर्धनं कार्यविधिचिन्तनं शास्त्राध्यायनप्रवृत्तिः च ज्ञायते । छात्राः एतद्व्याजेन आत्मनः विकासदृष्टिं प्राप्य अग्रिमकक्षादिप्रवेशादिषु अग्रिमपरीक्षासु च चयनाय दृष्टिम् अभिलषन्ति तेषां गभीरप्रक्रियां ज्ञातुं च सामर्थ्यं प्राप्नुवन्ति । तेन तेषां परिज्ञानं सुष्ठुतया भवति, तेषां पूर्णविकासाय काचित् योग्या दृष्टिः परिज्ञाता भवति । अस्य कार्यक्रमस्योद्देश्यमस्ति यत् विश्वविद्यालयस्य छात्राः संस्कृतविषयं स्वीकृत्य विविधासु प्रतियोगितापरीक्षासु सफलाः भवेयुः।

2. ‘**ई.वी.चार्जिंग**’ **इत्यस्य विद्युत्कोषस्थानस्य स्थापनम्-**

विश्वविद्यालयस्य आन्तरिक-गुणवत्ता-आश्वासन-प्रकोष्ठस्य निर्णयेन तस्य च निर्देशने 19.05.2024 तमे दिनांके सामाजिकाङ्केक्षणसमितेः उपवेशनमभूत्। सामाजिकलेखापरीक्षासमितिः स्वसङ्कल्पसंख्यायाः अष्टमे क्रमाङ्के विश्वविद्यालये ई.वी. चार्जिंग इत्यस्य स्थापनायाः संदर्भेऽवधानं दत्तवती। विश्वविद्यालयस्य पार्किङ्गस्थले क्षेत्रे च विश्वविद्यालयस्य कर्मचारीणां वाहनानि विद्युत्पूरितानि भवेयुः, एतदर्थं सा.ले.प. समित्या कार्यवृत्तस्य अग्रे क्रियान्वयनाय विश्वविद्यालयस्य कार्यविभागाय संस्तुतिः सम्प्रेषिता। तदनु परिसरे ‘ई.वी.चार्जिंग’ इत्यस्य विद्युत्कोषस्थानकस्य स्थापनाविषयकचर्चा वी.एस.ई.एस राजधान्यापावर लिमिटेड इत्यनेन सह कृता। पुनरेकवारं 5.7.2024 तमे दिनाङ्के विद्युन्नियन्त्रकप्रभागेन सूचीबद्धनिकायस्य एमएस इत्यस्य माध्यमेन 3.3 किलोवाट इत्यस्य पञ्चसंख्यामितम् (5नग) एलईवीएस चार्जर इत्यस्य स्थापनायाः आवश्यकानुमतिः प्रदत्ता। तदा सी नम्बर- 150539502 एवञ्च 1000002018 इत्यनुसारेण समारम्भणानुरोधः कृतः। एतदर्थं वी.एस.ई.एस. राजधानी पावर लिमिटेड इत्यस्य ईवीप्रभागस्य महाप्रबन्धकं विनिवेद्य स्थानानि च संसूचितानि –

**1.** मुख्यद्वारस्य समीपे -**01**

**2.** स्टाफक्वाटरसमीपे - **03**

**3.** छात्रावासस्य पार्श्वे - **01**

तदर्थं भारतसर्वकारस्य नीत्यनुसारेण 3.3 किलोवाट एलईवीएस चार्जर इत्यस्य स्थापना सञ्जाता। अनेन विश्वविद्यालयः पर्यावरणसंरक्षणदृष्ट्या सौविध्यप्रकल्पनमार्गे अग्रेसरो जातः। अस्मात् एतानि उद्देश्यानि पूरितानि-

**1.** पर्यावरणसंरक्षणाय, प्रदूषणदूरीकरणाय, इलेक्ट्रिकवाहनानां वर्धनाय, भारतसर्वकारस्य नीतिप्रवर्तनाय च महत्त्वपूर्णं कार्यमिदं जातम्।

**2.** इलेक्ट्रिकवाहनानां परिचालनार्थं प्रोत्साहनम्। विद्युत्पोषिद्वाहनानां चालनम् अल्पधनेन भवितुं शक्यते।

**3.** विश्वविद्यालये जीवाश्म-ईंधन इत्यस्य अल्पप्रयोगाय, विद्युतः अधिकोपयोगाय प्रोत्साहनम्।

**4.** अल्पव्ययेन अधिकलाभः इत्यस्य प्रचारेण विद्युत्पोषिद्वाहनानां प्रोत्साहनम् ।

**5.** सौरोर्जादिप्रयोगयुक्तानां वाहनानां बाहुल्येन सञ्चालनाय प्रोत्साहनम् ।

**6.** इलेक्ट्रिकवाहनानां स्थापनं सञ्चालनं वार्षिकव्ययः च न्यूनः भवतीति प्रसारः ।

एवं रीत्या समेकितप्रयत्नेन विश्वविद्यालयः भारतसर्वकारस्य नीत्यादीनां परिपालनपुरस्सरं निरन्तरं सामूहिकनिर्णयेन नूतनकार्याणि विदधाति ।

***The English version is available in the additional information link.**

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.5.2 The institution reviews its teaching learning process, structures & methodologies of operations and learning outcomes at periodic intervals through IQAC set up as per norms***

***संस्था आन्तरिकगुणवत्ताश्वासनकेन्द्रद्वारा निर्धारितनियमानुरूपं नियतकालेषु अध्यापनाधिगमप्रक्रियायाः, तत्र उपयुज्यमानायाः पद्धतेः, अधिगमपरिणामस्य च समीक्षां करोति।***

**Answer:**

विश्वविद्यालये यथाविधि स्थापितः आन्तरिकगुणवत्ताप्रकोष्ठः (IQAC) समये समये आवश्यकतानुगुणं विश्वविद्यालयस्य शिक्षणाधिगमप्रक्रियान्तर्गतं सर्वेषां कार्यक्रमाणां पाठ्यक्रमाणाञ्च संशोधनं परिवर्धनं समीक्षणञ्च करोति। यथा-

1- आन्तरिकगुणवत्ताश्वासानकेन्द्रेण(IQAC) राष्ट्रियशिक्षानीतिः (NEP-2020) एवञ्च विश्वविद्यालयानुदानायोगः (UGC) इत्यनयोः समस्तदिशानिर्देशानाम् अनुसारेण पाठ्यक्रमाणां निमित्तं निर्धारितानां POs, PSOs, COs इत्यादीनां निर्धारणपुरस्सरं पाठ्यक्रमाणां स्वरूपं निर्धारितम् । POs, PSOs, COs इत्यादीनाम् अनुसारेण शिक्षणाधिगमस्य विधेः च निर्धारणं कृतम् । उद्देश्यानुगुणम् आकलनायापि बलं प्रदत्तं तदनुरोधेनैव प्राध्यापकेभ्यः सूचनाः प्रदत्ताः।

2- नूतनप्रविष्टानां छात्राणां संस्कृतविषयककाठिन्यनिवारणाय कक्षादीनां समारम्भः कृतः। एकत्र नूतनच्छात्राणां भाषाविकासाय प्रयत्नः विधीयते यत्र ज्येष्ठच्छात्राणां विभागदृष्ट्या अवधानं लेखनभाषणादिषु जायते।

3- नवशिक्षानीतेरनुगुणं POs, PSOs, COs इत्यादीनां निर्धारणाय कौशलविकासाय पण्डितमदनमोहनमालवीय-राष्ट्रियशिक्षणप्रशिक्षणकेन्द्रस्य अन्तर्गतत्वेन आचार्याणां शिक्षकाणां प्रशिक्षणं विहितम् ।

4- नवीनपाठ्यक्रमानुसारेण आकलनप्रक्रियाम् आश्रित्य अङ्कपत्रप्रमाणादिषु परिवर्तनं कृतम् । येन विद्यार्थिनां ज्ञान-कौशल-अनुभवाधारितगतिविधीनाम् उचितप्रकारेण ग्रेडींग इति प्रदातुं शक्यते। नवशिक्षानीत्यनुगुणं कार्याणि विधातुं पाठ्यक्रमादिसमुचितसंचालनाय क्रियान्वयनाय च IQAC द्वारा समस्तप्राध्यापकानां प्रशिक्षणं विहितम् । 5- क्रेडीट-आधारेण समस्तपाठ्यक्रमाणां संशोधनं नवीनीकरणं च कारितम् ।

6- विद्यावारिधिः इत्यादिपाठ्यक्रमाणाम् अपि परिशोधनाय पद्धतेः परिवर्तनाय क्रेडीटद्वयस्य पाठ्यक्रमसमायोजनप्रतिवेदनं प्रदत्तम् । तत्रापि आकलनादिपरिष्काराय संगणकपाठ्यक्रमस्य सममेव संगणकस्य पाठ्यक्रमस्य समेकितसञ्चालनाय कार्यं विहितम् ।

7- प्री-पीएचडी इत्यत्र “रिसर्च एण्ड पब्लिकेशन एथिक्स” (RPE) इति शीर्षकेण प्रकाशनेन नैतिकतायाः, प्रकाशनकदाचारस्य च विषये जागरूकतायै क्रेडीटद्वयस्य पाठ्यक्रमसमायोजनाय प्रतिवेदनं प्रदत्तम्। यूजीसी द्वारा समारब्धः पाठ्यक्रमः (कोर्स वर्क) विश्वविद्यालयेन सञ्चालितः।

8. प्री-पीएचडीनिमित्तं यूजीसी इत्यनया संस्थया क्रेडीटद्वयस्य पाठ्यक्रमः (शोधप्रकाशननैतिकता) समारब्धः। उपवेशने पाठ्यक्रमसन्दर्भे विस्तृता चर्चा कृता। एवञ्च समित्या विश्वविद्यालयस्य उचितप्रक्रियाणां पालनाय प्री-पीएचडीपाठ्यक्रमस्य पाठ्यक्रमे योजनाय सैद्धान्तिकरूपेण सहमतिः अभिव्यक्ता।

9. विश्वविद्यालयस्य शैक्षणिककार्यक्रमाणां विषयाणां पाठ्यक्रमाणां संहिताकरणस्य आरम्भप्रतिवेदनज्ञापनम् – एनएएसी, यूजीसी इत्यनयोः दिशानिर्देशानां परिज्ञानाय पूर्त्तिकरणाय च विश्वविद्यालयस्यान्तरिकगुणवत्ताप्रकोष्ठेन स्वसमस्तपाठ्यक्रमाणां प्रत्येकं पाठ्यक्रमस्य विषयेभ्यः सांकेतिककोड इति आवण्टयितुं सूचना समितये प्रदत्ता। समितिः संहिताकरणस्य स्वीकरणाय विश्वविद्यालयेन कृतप्रक्रियायाः प्रशंसनं कृतम्। येन शैक्षिकप्रदत्तस्य संगणकीयकरणे, उचितप्रकारेण प्रमाणपत्रप्रकटीकरणे साहाय्यं प्रदत्तम्।

10. विश्वविद्यालयस्यान्तरिकगुणवत्ताप्रकोष्ठस्य परामर्शानुसारेण विश्वविद्यालयस्यास्य समग्रकार्यक्रमेषु संलग्नानां प्राध्यापकानां कृते शिक्षणाधिगमकेन्द्रेण समायोजितविभिन्नप्रशिक्षणकार्यक्रमाणां सञ्चालनं भवति। समित्या एम.एच.आर.डी. इत्यस्य पण्डितमदनमोहनमालवीय-राष्ट्रियशिक्षकप्रशिक्षणमिशन (PMMNMTT) योजनायाः अन्तर्गतम् 2017 ईसवीयाब्दस्य अक्टूबरमासात् शिक्षणाधिगमकेन्द्रेण (TLC) आयोजितप्रशिक्षणकार्यक्रमाणां विवरणात् परं विभिन्नविश्वविद्यालयानां महाविद्यालयानां 659 संस्कृतशिक्षकाणां प्रशिक्षणं विहितम्। एतत् पूरयितुं विश्वविद्यालयस्य शिक्षणाधिगमकेन्द्रस्य (TLC) सदस्यानां प्रयासानां प्रंशसनं कृतम्। समितिमुल्लिख्य एतत्सम्बद्धविश्वविद्यालयीयकार्याणि प्राशंसत्।

11. श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये प्रवर्तमानपाठ्यक्रमाणां पुनर्निर्माणाय विचारार्थं समित्या गतकार्यसूच्यां परामृष्टं यत् विश्वविद्यालयस्य विभिन्नविभागैः निर्मितानां POs, PSOs, COs इत्यादीनां समीक्षा कार्या। येन विश्वविद्यालये तत्क्रियान्वयनं समस्तपाठ्यक्रमेषु राष्ट्रियशिक्षानीतिः 2020 इत्यनुसारेण पुनर्निर्मितं भवेत्। तस्मात् पाठ्यक्रमे राष्ट्रियशिक्षानीतेः 2020 इत्यनुसारेण अपेक्षितसंशोधनानि स्यात्। विश्वविद्यालयस्य निर्मिता समितिः प्रस्तावमिमं स्वीकृतवती। तदनुसारं माननीयकुलपतिमहोदयानाम् आध्यक्षे उपवेशनं समायोज्य निर्णयो विहितः।

12. विश्वविद्यालयानुदानायोगेन प्रदत्तस्य Transformation Reforms for Strengthening Assessment & Accreditation of Higher Education Institutions in India इति प्रपत्रं IQAC इत्यस्य अवलोकनार्थं सादरं प्रस्तुतम्। विश्वविद्यालयस्य सत्रीयकक्षाणां पाठ्यक्रमाणां पाठ्यक्रमविषये संशोधनं विहितम्। शोधकक्षाणां निमित्तं शोधस्तरीयपाठ्यक्रमः निर्मितः। समितिसदस्यस्य प्रो.शिवशङ्करमिश्रस्य परामर्शानुसारेण संगणकस्य पाठ्यक्रमः शोधकक्षायै शिक्षाशास्त्रच्छात्राणां परम्परागतच्छात्राणां च कृते समानः कृतः । अस्य कार्यस्य सम्यक् संचालनदायित्वं शोधविभागाध्यक्षाय प्रदत्तम्। विश्वविद्यालयानुदानायोगेन प्रदत्तदिशानिर्देशानुसारेण स्नातकोत्तरकार्यक्रमस्य पाठ्यक्रमः क्रेडीटसिस्टम (CBCS) इत्यनुसारेण IQAC निदेशकेन उचितप्रक्रियावलम्बनाय पीठाध्यक्षाणां विभागाध्यक्षाणाम् उच्चाधिकारिणां चोपवेशनेन विश्वविद्यालये समारब्धः पाठ्यक्रमः। पुनश्च IQAC निदेशकेन राष्ट्रियशिक्षानीतिः 2020 इत्यनुपालने विद्यावारिधेः सत्रीयपाठ्यक्रमे संशोधनाय नवीनीकरणाय च विचारार्थं प्रस्तुतम्। विश्वविद्यालये विद्यावारिधेः सत्रीयकक्षाणां पाठ्यक्रमविषये शिक्षाशास्त्रविभागस्य आचार्यया प्रो. अमितापाण्डेयभारद्वाजया सूचनायाः परम् विद्यावारिधिकक्षासु संगणकस्य सामान्यस्तरीयः पाठ्यक्रमः प्रदत्तः। शोधकक्षायै शोधस्तरीयः पाठ्यक्रमः स्यात्। एतदर्थं समितिसदस्यस्य प्रो.शिवशङ्करमिश्रवर्यस्य परामर्शः आसीत् यत् शोधाय शिक्षाशास्त्रच्छात्राणां परम्परागतच्छात्राणां च पाठ्यक्रमः समानः स्यात्। एतदवलम्बनाय दायित्वं शोधविभागाध्यक्षाय प्रदत्तम् । विश्वविद्यालयस्य IQAC इत्यनेन NEP-2020 इत्यनुसारेण स्नातककक्षाणां निर्धारितपाठ्यक्रमाणां समीक्षा कृता वर्तते। संशोधनाय नवीनीकरणाय विचारार्थं IQAC निदेशकः समितिं सूचितवान् यत् विश्वविद्यालयस्य स्नातककक्षाणां पाठ्यक्रमाः विश्वविद्यालयानुदानायोगस्य मानकानुसारं भवेयुः। तदनुसारं पाठ्यक्रमे वाञ्छितसंशोधनं कृतं विद्यते।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |

| | |
|---|---|
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

***6.5.3 Number of quality initiatives by IQAC for promoting quality culture per year***

***प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थम् आयोजितानां गुणवत्तोपक्रमाणां सङ्ख्या।***

**Answer:** 11

6.5.3.1 Number of quality initiatives by IQAC for promoting quality year-wise for the last five years

प्रतिवर्षम् आन्तरिकगुणवत्ताश्वासनकेन्द्रेण (आ. गु. आ. के.) गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां विगतपञ्चवर्षाणां सङ्ख्या।

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 3 | 3 | 3 | 1 | 1 |

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Number of quality initiatives by IQAC per year for promoting quality culture (Data Template) (आन्तरिकगुणवत्ताश्वासनकेन्द्रेण गुणवत्तासंस्कृतिविकासार्थमायोजितानां गुणवत्तोपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्)) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |
| IQAC link(आ.गु.आ.के.द्वारा आयोजितस्य गुणवत्तोपक्रमस्य सन्धानम्।) | View Document |

***6.5.4 Quality assurance initiatives of the institution include:***

***1. Regular meeting of Internal Quality Assurance Cell (IQAC);***

***2. Timely submission of Annual Quality Assurance Report (AQAR) to NAAC***

***3. Academic Administrative Audit (AAA) and initiation of follow up action***

***4. Participation in NIRF***

***5. UGC Recognition for any other Academic Excellence or any other quality audit recognized by state, national agencies.***

***संस्थायाः गुणवत्ताश्वासनोपक्रमेषु अन्तर्भूताः सन्ति -***

***1. आ.गु.आ.केन्द्रस्य नियमितमुपवेशनम्,***

***2. रा.मू.प्र.परिषदे समयेन वार्षिकगुणवत्ताश्वासनप्रतिवेदनसमर्पणम् ।***

***3. शैक्षिकं प्राशासनिकं लेखापत्रम्, अनुगतक्रियाणामुपक्रमणम् ।***

***4. राष्ट्रियसांस्थिकश्रेणिकरूपरेखायां भागग्रहणम् ।***

*5. विश्वविद्यालयानुदानायोगेन मान्यताप्राप्तः यः कश्चन शैक्षिकोत्कर्षः अथवा राष्ट्र/राज्य अभिकरणैः मान्यताप्राप्तं किमपि गुणावत्ताङ्केक्षणम्।*

**Answer:** A. Any 4 of the above (अ. उपर्युक्तेषु केचन चत्वारः)

| File Description | Document |
| --- | --- |
| Upload e-copies of the accreditations and certifications(प्रत्यायनानां, प्रमाणपत्राणां च वैद्युतप्रमाणपत्रम् उपारोपयतु।) | View Document |
| Upload details of Quality assurance initiatives of the institution (Data Template)(संस्थायाः गुणवत्तोपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्)) | View Document |
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Paste web link of Annual reports of University(विश्वविद्यालयस्य वार्षिकं प्रतिवेदनस्य सन्धानं प्रयच्छतु।) | View Document |

***6.5.5 Incremental improvements made during the preceding five years (in case of first cycle)***

***Post accreditation quality initiatives (second and subsequent cycles)***

***गतपञ्चवर्षेषु सम्पादिताः क्रमविकासाः (प्रथमचक्रसन्दर्भे)***

***प्रत्यायनोत्तरं कृताः गुणवत्तोपक्रमाः (द्वितीयादिचक्रेषु)***

**Answer:**

1. विश्वविद्यालयेन उपाधिप्रदानार्थं यूजीसी नियमान्/मार्गदर्शिकाम् कार्यान्वितुं शैक्षणिकपरिषदः निर्णयः कार्यान्वितः अस्ति। विश्वविद्यालयेन अन्यविश्वविद्यालयैः/संस्थाभिः सह समानरूपेण आनेतुं यूजीसी-मार्गदर्शिकानुसारं चॉइस बेस्ड क्रेडिट् सिस्टम् (CBCS) अपि कार्यान्वित: अस्ति ।

2. सीओई पदं विश्वविद्यालयेन स्वीकृतं पूरितं च भवति। अस्य कारणात् विश्वविद्यालयस्य परीक्षाव्यवस्थायां विविधाः अद्यतनाः विषयाः कार्यान्विताः भवन्ति ।

3. बालिकाछात्रावासस्य निर्माणं हेफा तथा शिक्षामन्त्रालयस्य (MOE) सह विंडो पंचमस्य अन्तर्गतं लम्बितम् अस्ति। बालिकाछात्रावासस्य निर्माणार्थं सर्वकाराद् शतप्रतिशतराशिः याचिता अस्ति। डीपीआर इत्यादीनि औपचारिकतानि कार्यकारीपरिषद् (EC) इत्यनेन पूर्वमेव अनुमोदितानि सन्ति ।

4. पुस्तकालयस्य पदं अद्यापि मन्त्रालयेन अनुमोदितं न जातम्। यूजीसी-मार्गेण शिक्षामन्त्रालयाय (एमओई) अनेके प्रस्तावाः प्रस्तूयन्ते चेदपि अद्यापि अनुमोदनं लम्बितम् अस्ति।

5. विश्वविद्यालयेन  अध्ययनात् परं नूतनाः पाठ्यक्रमाः आरब्धाः, यथा बी.ए. (योग) प्लस् ५ एम.ए. (हिन्दी), एम.ए. (अङ्ग्रेजी) तथा एम.ए (योग)। राजनीतिशास्त्रम्, समाजशास्त्रम् इत्यादिषु सम्बद्धविषयेषु अन्तरविषयकार्यक्रमेषु अपि विचारः क्रियते ।

6. विश्वविद्यालयेन आङ्ग्ल, हिन्दी, राजनीति विज्ञान, समाजशास्त्र इत्यादीनां संबद्धविषयाणां कृते "Humanities" इति नामक: पृथक् विभाग: स्थापित: अस्ति।

7. विश्वविद्यालयेन स्वस्य रणनीतिकयोजनां NEP 2020 इत्यनेन सह संरेखितम् अस्ति। नूतनपाठ्यक्रमानाम् आरम्भे केन्द्रबिन्दुः अस्ति ये कार्योन्मुखाः, पाठ्यक्रमस्य पुनर्निर्माणं, शोधनवाचारः, आधारभूतसंरचनात्मकविकासः च सन्ति।

8. विश्वविद्यालयेन ज्योतिषशास्त्रं, वास्तुशास्त्रं, योगं, व्याकरणं च इत्यादिषु क्षेत्रेषु डिप्लोमा/प्रमाणपत्रपाठ्यक्रमरूपेण विज्ञापनस्य अल्पकालिकव्यावसायिकप्रधानपाठ्यक्रमाणाम् आरम्भः कृतः अस्ति। एते पाठ्यक्रमाः छात्राणां व्यावहारिककौशलं व्यावसायिकसज्जतां च वर्धयितुं निर्मिताः सन्ति।

9. सर्वसामान्यजनेषु संस्कृतभाषायाः सुगमरूपेण प्रचारार्थं विश्वविद्यालयेन “संस्कृतसम्भाषणशिविर” इति प्रारब्धम्। तथैव पङ्क्तौ "संस्कृतभाषाकौशलविकासकेन्द्रम्" अपि स्थापितं अस्ति । एतयोः द्वयोः उपाययोः विश्वविद्यालयः समुदायेन सह सक्रियरूपेण संलग्नः भवितुम् अर्हति । योजनाय निर्देशितः अस्ति। तदतिरिक्तं विश्वविद्यालयेन एनएसएस (राष्ट्रीयसेवायोजना) इत्यस्य माध्यमेन स्वस्य छात्रान् विभिन्नेषु सामाजिकसेवासु जागरूकताकार्यक्रमेषु च सम्मिलितं कृतम् अस्ति ।

10. प्रो. मुरली मनोहर पाठकः २९.१०.२०२१ दिनाङ्के पूर्णकालिककुलपतिरूपेण प्रभारं स्वीकृतवान् अस्ति। अधिकांशतः रिक्तानि शिक्षणपदानि पूर्वमेव पूरितानि सन्ति।

11. पूर्णतया कार्यशीलः करियरपरामर्शकोष्ठकः स्थापितः, अधुना नियुक्तिकोशः पूर्णतया कार्यरतः अस्ति। उभयत्र यूनिट् नियमितरूपेण कार्यशालाः, संगोष्ठीः, करियरपरामर्शसत्रं च आयोजयन्ति । छात्राणां सहायार्थं परामर्शव्यवस्था आरब्धा अस्ति, विशेषतः येषां अतिरिक्तशैक्षणिकसमर्थनस्य आवश्यकता वर्तते।

12. विश्वविद्यालयेन अन्ययोः संस्कृतविश्वविद्यालययोः अर्थात् केन्द्रीयसंस्कृतविश्वविद्यालयेन, नवदिल्ली-राष्ट्रीयसंस्कृतविश्वविद्यालयेन, तिरुपतिना च सह ज्ञापनपत्रे हस्ताक्षरं कृतम् अस्ति। हस्ताक्षरिते ज्ञापनपत्रानुसारं त्रयः अपि विश्वविद्यालयाः संयुक्तरूपेण प्रतिवर्षं सहकारात्मकशैक्षणिकचर्चा, संगोष्ठी, विशेषव्याख्यानवार्ता इत्यादीनां आयोजनस्य आयोजनं करिष्यन्ति। अद्यपर्यन्तम् त्रिषु विश्वविद्यालयेषु प्रत्येकं वर्षे एतादृशः एकः कार्यक्रमः आयोजितः अस्ति । एतदतिरिक्तं एसएलबीएनएस विश्वविद्यालयेन कविकुलगुरुसंस्कृतविश्वविद्यालयेन, रामटेकेन, श्रीमद्जगद्गुरु शारदासर्वज्ञपीठमेण च सह ज्ञापनपत्रे हस्ताक्षरं कृतम् अस्ति। एते प्रयासाः शैक्षणिकसहकार्यं वर्धयितुं संयुक्तकार्यक्रमाणां प्रचारार्थं च सततं प्रतिबद्धतायाः भागाः सन्ति।

13. विश्वविद्यालयेन पूर्वमेव सामाजिकलेखापरीक्षा कृता यस्मिन् लैङ्गिकसमावेशसम्बद्धाः पक्षाः समाविष्टाः आसन्।

14. विश्वविद्यालयेन विश्वविद्यालयस्य क्रीडाप्रभारिरूपेण सहायकप्रोफेसर-शारीरिकशिक्षा नियुक्तः अस्ति। विश्वविद्यालयस्य छात्राः पर्याप्तं आधारभूतसंरचनात्मकं वित्तीयं च समर्थनं दत्वा अन्तरविश्वविद्यालय-राज्य-राष्ट्रीय-अन्तर्राष्ट्रीय-स्तरस्य आयोजनेषु भागं गृह्णन्ति इति सुनिश्चितं भवति। विश्वविद्यालयस्य अस्य प्रयासस्य फलस्वरूपं विश्वविद्यालयस्य बहवः छात्राः राज्य/राष्ट्रीय/अन्तर्राष्ट्रीयस्तरीयक्रीडास्पर्धासु विजयं प्राप्तवन्तः। एकः छात्रः श्री. शास्त्री प्रथमवर्षस्य रूपिन् किर्गिस्तानदेशे आयोजिते “सीनियर एशियाई चॅम्पियनशिप-२०२३” इत्यस्मिन् रजतपदकं प्राप्तवान् अस्ति।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information(अतिरिक्ताः सूचनाः) | View Document |
| Provide link for additional information (अतिरिक्तसूचनानां सन्धानम्।) | View Document |

**7.Institutional Values and Best Practices**

**7.1 Institutional Values and Social Responsibilities**

***7.1.1 Number of gender equity promotion Programmes organized by the institution during the last five years.***

***विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां सङ्ख्या।***

**Answer:** 39

7.1.1.1 Number of gender equity promotion Programmes organized by the institution year-wise during the last five years

विगतपञ्चवर्षेषु संस्थया लैङ्गिकसमतायाः संवर्धनाय निर्वर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या।

Answer:

| | | | | |
|---|---|---|---|---|
| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
| 11 | 8 | 5 | 7 | 8 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Report of the event कार्यक्रमस्य प्रतिवेदनम् | View Document |
| List of gender equity promotion Programmes organized by the institution (Data Template) संस्थया लैङ्गिकसमतायाः संवर्धनार्थं निर्वर्तितानां कार्यक्रमाणां सूची। (दत्तांशप्रारूपम्) | View Document |

***7.1.2 Institution shows gender sensitivity in providing facilities such as:***

***1. Safety and Security***

***2. Counselling***

***3. Common Room***

***संस्था अधोलिखितसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति।***

***1. निरुपद्रवता सुरक्षा च***

***2. परामर्शः***

***3. समानप्रकोष्ठः***

**Answer:**

**संस्था अधोलिखितसौविध्यानि  प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय: स्त्री-पुंसयोः बालक-बालिकयोः छात्र-छात्र्योश्च शिक्षणाधिगमप्रक्रियायां साम्यत्वव्यवस्थापनाय सततं समानावसरं प्रयच्छति। शिक्षणाधिगमप्रक्रियामतिरिच्य पाठ्यसहगामिक्रियाकलापेषु विविधेषु उत्सवेषु राष्ट्रियान्ताराष्ट्रियकार्यक्रमेषु सर्वविधोपक्रमेषु च समानावसरः प्रदीयते विश्वविद्यालयेन। विश्वविद्यालयः पुरुष-स्त्रीभेदं परित्यज्य सर्वविधक्रियाकलापेषु ताः संयोजयति। स्त्री-पुंसयोः साम्यत्वव्यवस्थापनाय सम्वर्द्धनाय च यो हि उपक्रमः विश्वविद्यालयेन व्यवस्थापितः तस्य विवरणमित्थं भवति-

1. न्यायपूर्णसमाजव्यवस्थायाः समुन्नयनार्थं समानाधिकारे अवसरप्रदानाय च  लैङ्गिकसमानतायाः प्रोन्नयनम् अत्यन्तम् आवश्यकम् । बालिकानां विषये विशेषावधानं प्रदाय सर्वेभ्यः शैक्षणिकसन्दर्भे अवसरदानाय च श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः कृतसङ्कल्पो विद्यते। एतदर्थं 2006 तमे वर्षे विश्वविद्यालयानुदानायोगस्य दशमयोजनायां महिलाध्ययनकेन्द्रस्य स्थापनाऽऽभवत्। प्राक्तनकालीनमहिलानां तत्तत्क्षेत्रविशिष्टं महनीयम् अवदानं विज्ञाय अनुकर्तव्यमातृकारूपेण तासां स्वीकरणाय प्राचीनभारतीयकृतीनां महिलाध्ययनदृशा व्याख्यानाय च केन्द्रमिदं दत्तावधानं वर्तते, बालिकानां सबलीकरणाय सततं क्रियाशीलमस्ति इदं केन्द्रम् ।
2. विश्वविद्यालयानुदानायोगनिर्देशानुगुणम् अध्यापन-अनुसन्धान-प्रशिक्षण-विपुलीकरणकार्येषु २००६ तः केन्द्रं प्रवर्तमानमस्ति। **“ऋग्वेदे ऋषिकाः”**, **“याज्ञवल्क्यस्मृतौ बिम्बितमहिलाः”** प्रभृतयः नैके स्वल्पावधिकपरियोजना अपि स्वीकृताः पूरिताश्च सन्ति।
3. जेण्डर् संवेदीकरणस्य पाठ्यचर्याविकासस्य च विविधकार्यशालाः, पाठ्यक्रमे 'जेण्डर' विषयं संयोज्य स्नातक - स्नातकोत्तरशोधच्छात्राणां कृते कक्ष्याः केन्द्रद्वारा समायोजिताः वर्तन्ते।
4. शैक्षणिक-शैक्षणिकेतरवृत्तिपरककार्येषु महिलाप्रातिनिध्यप्रोत्साहनाय केन्द्रं संगोष्ठीं कार्यशालाञ्च भिन्न-भिन्नवर्षेषु आयोजयति। दशदिनात्मिकाः जेन्डर् संवेदिकरण - अवबोध कक्ष्याः, अध्यापकशिक्षाविषयच्छात्राणां निमित्तं

प्रतिवर्षं सञ्चाल्यन्ते। रूढिमातृकाणां प्रत्याह्वानाय समावेशिसंस्कृतेः पोषणाय च केन्द्रं सततं प्रवर्तमानम् अस्ति। विश्वविद्यालयस्य शिक्षाशास्त्री-कक्षाया: कृते जेण्डर् तथा विद्यालय: इति पाठ्यक्रमं तत्सम्बद्धान् गतिविधीन् च लैङ्गिकसमानतायै चाल्यते।

5. प्रत्येकं वर्षे अन्ताराष्ट्रियमहिलादिवसस्य आयोजनं भवति। महिलाधिकारप्रज्ञापनाय तासां समस्यानाम् अवबोधनाय परिहारनिर्देशाय च दिवसोऽयं स्वीकृतः। छात्रहिताय अनेकाः स्पर्धाः, आहूतविद्वद्उत्तमानां विदुषीनां भाषणानि च सन्दर्भेऽस्मिन् वैशिष्ट्यं भजन्ते।
6. **'सुमङ्गली'** इत्याख्यायाः शोधपत्रिकायाः महिलाध्ययन केन्द्रद्वारा प्रकाशिता। समशीर्षैरवलोकिता, बहुभाषापत्रयुता अन्ताराष्ट्रियसूचिकासंख्याङ्किता चेयं वि.वि. अनुदानाऽयोगशोधपत्रसूच्यामपि आरूढा। केन्द्रे सञ्जातसङ्गोष्ठीनाम् इतिवृत्तसमाहारात्मकाः ग्रन्था अपि सन्ति। अस्य ग्रन्थस्य उद्देश: महिलाभ्य: अपि पुरुषैः समनावसरान् कल्पयितुमेव।
7. प्रतिवर्षं अन्ताराष्ट्रियमहिलादिवसः मातृभाषादिवसः, हिन्दीपखवाड़ा चेत्यादयः उत्सवाः महता वैभवेन समाचर्यन्ते।
8. **“सह नाववतु सह नौ भुनक्तु”** इति वेदमन्त्रस्य स्वारस्यमवगत्य कक्ष्यासु, प्रतियोगितासु, स्पर्धासु, कार्यक्रमेषु, संगोष्ठीषु, कार्यशालासु, क्रीडासु, विशिष्टसमारोहेषु. ग्रन्थालये च समानावसरः युव-युवतीनां कृते प्रदीयते। अपि च श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये अस्मिन् परस्परं समभावनाय छात्रा: विविधेषु भागं स्वीकुर्वन्तीति मुदवहो विषय: वर्तते ।
9. महिलोत्पीडनावरोधकप्रकोष्ठः स्थापितः विद्यते, तस्य सञ्चालनं महिलाध्ययनकेन्द्रं करोति। अनेन केन्द्रेण नैका: कार्यक्राम: समनतायै सञ्चाल्यन्ते ।
10. स्त्रीणां सबलीकरणाय मूलभूताधिकारज्ञापनाय च महिलाध्ययनकेन्द्रेण सङ्गोष्ठ्याः कार्यशालायाश्च समायोजनं क्रियते।

**अपि च विश्वविद्यलय: कतिचन भौतिकसौविध्यानि प्रदाय लैङ्गिकसंवेदनशीलतां व्यवस्थापयति यथा -**

**1. निरुपद्रवता सुरक्षा च (Safety and Security) -**

11. विश्वविद्यालयप्राङ्गणे तत्तद्स्थलेषु **छायाग्राहियन्त्राणि** निकटवर्तिक्षेत्रविषयदर्शनसमर्थानि संस्थापितानि येषां साहाय्येन सुरक्षापूर्वकसुगमाधीतियोग्यं वातावरणं निर्मितम्। सुरक्षाकर्मचारिण्यश्च सेवारताः अत्र याः प्रदास्यन्ति छात्रेभ्यः छात्राभ्यश्च सुखदं विश्वासवर्धकञ्च अधिगमान्तरिक्षम्।

अपि च सुरक्षाकर्मचारिण्यश्च विश्वविद्यालयात् बहिः ये च आगच्छन्ति तान् सर्वान् परिशील्य Outers Record इति अभिलेखे हस्ताक्षरं कार्यते । एवं प्रकारेण छात्रावासेऽपि एतादृशी एव व्यवस्था कल्पिता वर्तते श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन । विश्वविद्यालये बालानां बालिकानां च सुरक्षाया: व्यवस्था महिलसुरक्षागणेन पुरुषसुरक्षागणेन च परिकल्पिता वर्तते । प्रधानस्थानेषु C.C.TV माध्यमेनापि निरुपद्रवता सुरक्षा च कल्पिता वर्तते ।

**2. परामर्शः (Counselling)**

12. पुनश्च परिदेवनपरिहारकोश:, आन्तरिक - परिवादपर्यालोचनासमितिश्च विश्वविद्यालये वर्तेते याभ्यां तत्संघटनोद्देश्यं निरुह्यते । श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन कश्चन विशिष्ट: परामर्श: प्रकोष्ठ: व्यवस्थापित: तत: विश्वविद्यालये जायमानाया: विभिन्ना: घटना: परिवादपर्यालोचनासमित्या पारिहार्यते । बालिकानां बालकनां च या कापि समस्या वर्तते यथा शैक्षणिक समस्या -वृत्तिसंबद्धासमस्या वा परामर्शमण्डल्या परिष्क्रियते ।

**3. समानाप्रकोष्ठः (Common Room)**

छात्रासमूहप्रकोष्ठस्यापि व्यवस्था विश्वविद्यालयेन छात्रीणां कृते कृताऽस्ति। छात्र्यः कक्षाविरतकाले तत्र उपविश्य स्वाध्ययनकार्यं सम्पादयन्ति। अपि च शिक्षशास्त्रविभागे छात्रीणां कृते समानप्रकोष्ठव्यवस्था वर्तते तत्र छात्र्यः कक्षाविरतकाले तत्र उपविश्य स्वाध्ययनकार्यं सम्पादयन्ति। । विद्यावारिधे: छात्रा: अस्य समानप्रकोष्ठे उपविश्य स्वीयम् अध्ययनं संपादयन्ति । अध्यापका: च स्वीयेभ्य: विद्यावारिधे: छात्रेभ्य: इत: मार्गदर्शनं कुर्वन्ति ।

13. छात्र-छात्रीणां कृते विश्वविद्यालये N.C.C. व्यवस्था अस्ति यस्यां सुप्रशिक्षिते **द्वे सैन्यविशिष्टपदवीयुते अध्यापिके सेवां** प्रदीयमाने विराजेते। एतद्व्यवस्थानुसारं प्रमाणपत्र प्राप्त्यनन्तरं भिन्नेषु क्षेत्रेषु छात्राः उद्योगार्हाः भवन्ति राष्ट्रविकासाय स्वीयमवदानं च कुर्वन्ति।

14. उत्तमरीत्या स्वास्थ्यसेवानिमित्तं स्त्रीरोगविशेषज्ञा, महिला 'होमियो' चिकित्सिका, आयुर्वेदचिकित्सक: च कार्यं कुर्वन्ति।

15. महिलाध्ययनकेन्द्रस्य पुस्तकालये महिलाविषये विशिष्टचिन्तकानां ग्रन्थाः पत्रिकाश्च समुपलभ्यन्ते। मनोरञ्जनप्रकोष्ठः परामर्शदातृप्रकोष्ठश्च केन्द्रस्य अस्ति।

16. पुस्तकालये छात्रीणामुपवेशनाय स्वाध्ययनाय च विशिष्टव्यवस्था प्रदीयते विश्वविद्यालयस्य पुस्तकालयेन ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***7.1.3 Alternate Energy initiatives such as:***

***Percentage of power requirement of the university met by the renewable energy sources (preceding academic year data)***

***वैकल्पिकस्य ऊर्जसः उपक्रमाः यथा-***

***विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः प्रतिशतता- (प्रगताध्ययनवर्षस्य दत्तांशः)***

**Answer:** 26.61

7.1.3.1 Annual power requirement met by renewable energy sources (in KWH)

आवश्यक्याः वार्षिकविद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तिः।

Answer: 149.464
7.1.3.2 Annual power requirement of the institution (in KWH)

संस्थायाः वार्षिकविद्युच्छक्तेः आवश्यकता।

Answer: 561.763

| File Description | Document |
|---|---|
| Upload details of power requirement of the university met by renewable energy sources (Data Template) विश्वविद्यालयेन उपयुज्यमानायाः विद्युच्छक्तेः पुनर्नवीकरणयोग्येभ्यः ऊर्जस्स्रोतोभ्यः आपूर्तेः विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Upload any additional information अतिरिक्ताः सूचना | View Document |

***7.1.4 Waste Management steps including:***

***1. Solid waste management***

***2. Liquid waste management***

***3. E-waste management***

***व्यर्थवस्तुप्रबन्धनप्रक्रिया यथा***

***1. घनव्यर्थवस्तुप्रबन्धनम्***

***2. तरलव्यर्थवस्तुप्रबन्धनम्***

***3. वैद्युतव्यर्थवस्तुप्रबन्धनम्***

**Answer:**

श्रीलालबहादुरशास्त्रीयराष्ट्रियसंस्कृतविश्वविद्यालयः अपशिष्टप्रबन्धननीतेः रूपरेखा कृता अस्ति । अस्मिन् विश्वविद्यालयस्य अपशिष्टप्रबन्धननीतेः विवरणं भवति यत् घन-द्रव-. वैद्युत- अपशिष्टस्य उत्पादनं न्यूनीकर्तुं, तेषां संग्रहणं कर्तुं विकासयितुं च व्यवस्थाः , पृथक्करणं, परिवहनं, पुनःप्रयोगः, अपशिष्टजलशुद्धीकरणम् अस्याः नीतेः परमोद्देस्यं वर्तते । यानि अपशिष्टानि गृहस्य संस्थायाः अन्तर्भवन्ति तानि (कागज, प्लास्टिक, पुनःप्रयोगयोग्यसामग्री, गत्ता, खाद्यकचरा, काचः, धातुः) पर्णानि, निर्माणव्यर्थानि, प्लास्टिकानि अपशिष्टजलं च । नीतिः अन्येषां मध्ये अपशिष्टस्य खाद्यस्य अपशिष्टस्य ऊर्जायाः च प्रौद्योगिकीविकल्पाः समाविष्टाः भविष्यन्ति पर्यावरणस्य यथायोग्यं विचारं कृत्वा विश्वविद्यालयः परिसरे उत्पादितस्य अपशिष्टस्य पर्यावरणीयरूपेण प्रबन्धनाय प्रतिबद्धः अस्ति वर्तमान पर्यावरणविधानस्य अनुरूपं सुरक्षित-व्यय-प्रभाव-समस्यानां च अनुरूपं कार्यं करोति विश्वविद्यालयः । विश्वविद्यालयः सर्वकारेण निर्धारितस्य अपशिष्टप्रबन्धननियमस्य अनुपालनं करोति । भारतस्य शासनं तथा एनसीटी दिल्ली इत्यस्य अपि च दिल्लीनगरपालिकायाः (एमसीडी) मार्गदर्शिकाः च अनुपाल्यन्ते काले काले । प्रतिदिनं देहली-नगरपलकसंस्थया द्वरा घनव्यर्थवस्तुपदार्थान् भारवाहनमाध्यमेन विश्वविद्यलयस्य अवकरेभ्यः नयन्ति ।

**1. घनव्यर्थवस्तुप्रबन्धनम् (Solid waste management)**

विश्वविद्यालये अपशिष्टस्य स्रोतपृथक्करणस्य नियमः अस्ति। अपशिष्टप्रबन्धनस्य मार्गाः यथा पुनर्प्राप्तिः, पुनः उत्पत्तेः विधिना, पुनःप्रयोगेन च धनस्य कालस्य च व्ययः न भवति । परिसरस्य प्रत्येकं द्वारे घनव्यर्थवस्तुसंग्रहणाय अवकरकण्डोलाः पृथक् स्थापिताः वर्तन्ते स्वच्छतां ये कुर्वन्ति ते सर्वाणि घनव्यर्थवस्तूनि आनीय अवकरकण्डोले स्थाप्यन्ते । तत्र हरित-अपशिष्टानि, शुष्क-अपशिशिष्टानि तथा अन्य-अपशिष्टानि च उपलभ्यन्ते । तत् अपशिष्टं पृथक् कृत्वा विश्वविद्यालये जैव-अपघटनीय घनव्यर्थपदार्थस्य संग्रहणार्थं प्रयुक्तः विभागः अस्य घनव्यर्थपदार्थस्य उपयोगं करोति । उद्याने गोबर इत्यस्य शेषोपशिष्टं च नगरनिगमस्य-डम्प-यार्ड प्रति दिल्लीनगरपालिकायाः वाहन- द्वारा प्रेष्यते । विश्वविद्यालयः पर्यावरणस्य 3**Rs** अपि अभ्यासं करोति अर्थात् घनव्यर्थवस्तुन्यूनीकरणं, पुनः उत्पत्तिः, पुनः उपयोगः च । अस्य अनुसारं विश्वविद्यालयः सर्वन्यपि घनव्यर्थवस्तूनि यथा नियमं प्रबन्धनस्य अनुपालनं क्रियते । अस्मिन् विश्वविद्यालये घनव्यर्थवस्तुप्रबन्धनस्य कारणेन परिसरः स्वच्छः सुन्दरः च दृश्यते । छात्रा अध्यापकाः कर्मचारिणः च घनव्यर्थवस्तुप्रबन्धनाय सहकुर्वन्ति अपि च नियमान् च पालयन्ति । अस्य सम्बद्धानि चित्राणि अतिरिक्तसूचनायां द्रष्टुं शक्यन्ते ।

2. **तरलव्यर्थवस्तुप्रबन्धनम् (Liquid waste management)**

श्रीलालबहादुरशास्त्रीयराष्ट्रियसंस्कृतविश्वविद्यालयस्य एकम् अन्यदपि उद्देश्यं विद्यते- जलमेव जीवनं भवतीति "**आपो अस्मान्मातरः शुन्धयन्तु द्‍यृतेन नो द्‍यृप्तव पुनन्तु**" शुक्लयजेर्वेदः 4/02 वैदिकसिद्धान्तमुररीकृत्य जलस्य संरक्षणं दूषितजलस्य संरक्षणसहकारेण स्वच्छतां सम्पाद्य उपयोगाय कथमानेतुं शक्यते एतदर्थं विश्वविद्यालयेन **2006-07** तमे वर्षे फिल्टर प्रेस इत्यनेन सह **120** कि.ली. प्रतिदिनं क्षमताविशिष्टम् एकं नवीनतमं एफ.ए.बी प्रकारकं सीवेज ट्रीटमेंट प्लांट इति स्थापितम् । विश्वविद्यालयपरिसरस्य पाकशालासु, स्नानागारेषु, शौचालयादिषु उत्पन्नस्य उच्छिष्टस्य जलस्य उपयोगः विश्वविद्यालयपरिसरे आवासेतरभवनानां शौचालयेषु शुद्ध्यर्थं उद्यानकार्यार्थञ्च पुनरुपयोगस्य उद्देश्येन स्थापितमस्ति । विश्वविद्यालयः पूर्णरूपेण अशुद्धापशिष्टजलस्य उपयोगं एस.टी.पी इति माध्यमेन करोति तथा च प्रभाविरूपेण अस्य उपयोगः आवर्षं विश्वविद्यालयस्य वाटिका-उद्यानादीनां सुव्यवस्थायै विकासाय वर्षतौ आवासेतरभवनानां शौचालयस्वच्छतायै च क्रियते। एवञ्च विश्वविद्यालस्य मार्गनिर्माणे भवननिर्माणे च एतादृशस्य जलस्य उपयोगः क्रियते । अपशिष्टजलस्य उपचारानन्तरमुत्पन्नस्य स्थूलापशिष्टस्य फिल्टर-प्रेस इत्यनेन उर्वरकरूपेण परिवर्तनं क्रियते । यस्योपयोगः उद्यानकार्येषु भवति । एवं प्रकारेण विश्वविद्यालयः सम्पूर्णवर्षम् उपचारितापशिष्टजलस्य उपयोगं करोति । सीवेज ट्रीटमेंट प्लांट इति अहर्निशं कार्यं करोति।

एवञ्च अशुद्धजले मिश्रतस्यापशिष्टस्य पदार्थस्य वृक्षाणां सम्बर्द्धनाय उर्वरकपदार्थरूपेण व्यवहारः विद्यते । येन विश्वविद्यालयः स्वीयं परिसरं हरिताकृतिं लक्षयति व्यवस्थापयति । आधुनिकतकनीकिमाध्यमेन मलजलं संशोध्य तस्य जलस्य व्यवहारोन्मुखीकरणं यदि भवेत् तर्हि अनेन व्याजेन जलस्य संरक्षणमपि भवत्येव । अतः विश्वविद्यालयः व्यर्थवस्तुप्रबन्धनप्रक्रियासु घनव्यर्थवस्तुप्रबन्धनं तरलव्यर्थवस्तुप्रबन्धनञ्चेति प्रक्रिययोः मलजलसंशोधनयन्त्रमाध्यमेन अवलम्बनं व्यवहारं च करोति ।

**3. वैद्युतव्यर्थवस्तुप्रबन्धनम् (E-waste management)**

अपशिष्टम् उत्पादनस्य वा पदार्थस्य वा परिणामः भवति यः तस्य अभिप्रेतप्रयोगाय न उपयुक्तः भवति । इलेक्ट्रॉनिक अपशिष्टं **E-Waste** अथवा **WEEE (Waste electrical and electronic equipment)** इति नाम्ना अपि ज्ञायते । इलेक्ट्रॉनिकयन्त्राणां विस्तृतवर्धमानां च श्रेणीं समावेशयति, यथा बृहत्यन्त्राणि आरभ्य यथा रेफ्रिजरेटर्, विद्युत्मोटर्, वोल्टेजस्टेबलाइजर्, वातानुकूलकः, सेलफोन्, व्यक्तिगतानि **stereos, Televisions, LED's, CRT's, Computer systems,** लैपटॉप्स्, प्रिंटर्, प्रोजेक्टर्, मोबाईल-दूरभाषाणि अन्ये च उपभोक्तृविद्युत्सामग्रीः ये स्वजीवनात् अधिकं जीवितानि सन्ति तथा च अभवन् उपयोक्तृभिः परित्यक्ताः। अस्माकं विश्वविद्यालये एतेषाम् अपशिष्टानां प्रबन्धनं कर्तुं विश्वविद्यालय: अनुकूलं चिन्तयन् नीतिनियमावली रचिता वर्तते । अधुना नियमावली-योजनायां वर्तते । तथापि अस्माभि: उपर्युक्तानां वैद्युतव्यर्थवस्तुप्रबन्धनम् अत्र अनुपाल्यते । छात्राः अध्यापका: कर्मचारिण: च स्वीयवैद्युतव्यर्थवस्तुबन्धनं स्वयमेव कुर्वन्ति । अपि च विश्वविद्यालय: वैद्युतव्यर्थवस्तुप्रबन्धनं यथा नियमं कुर्वन् अस्ति ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम् | View Document |

***7.1.5 Rain water harvesting structures and utilization in the campus***

## *वृष्टिजलसङ्ग्रहणसंरचना, परिसरे वृष्टिजलोपयोगश्च*

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य परिसरे वृष्टिजलस्य उपयोगार्थम् एका विशिष्टा वृष्टिजलसङ्ग्रहसंरचना विद्यते। वृष्टिजलसंग्रहरचनापि वेदमूला भवति। तथाहि-

**अपामहं दिव्यानामयां स्रोतस्यानाम्।**

**ऊपामह प्रण्जेनेदश्वा भवयः वाजिनः।** अर्थव. 19/1/4

जलसंरक्षणार्थं वेदेषु वर्षाजलं प्रवहमानजलञ्च नदी-कूप-तडागादौ सम्मिल्य यथा पोषणं करोति तथैव पोषणात्मकेन जलपानेन जीवः वेगवान् शक्तिमांश्च भवति । वर्षाजलसंग्रहणस्य महत्त्वं संस्कृतवाङ्मये स्पष्टं व्याख्यातम् । वर्षाजलसंग्रहणं पर्यावरणसंग्रहणे महत्त्वपूर्णः उपायः अस्ति । प्राचीनकालात् आरभ्य मानवाः वर्षाजलं संग्रहयित्वा उपयोगं कुर्वन्ति । वर्षायाः जलं प्राकृतिकं शुद्धं च जलं अस्ति, यत् कृषि, गृहकार्येषु च बहुविधोपयोगाय योज्यते । आधुनिककाले जलस्रोताः अल्पीकृताः, तथा अपघातकद्रव्यानां प्रदूषणं जलस्रोतानां नाशं करोति । अतः वर्षाजलसंग्रहणं आवश्यकं भविष्यति । वर्षाकाले वर्षाजलं सङ्ग्रहीतुं गृहाणां छत्रभागात् नालिकाद्वारा निचोलब्धं जलं संचयः क्रियते । वर्षाजलसंग्रहणं केवलं गृहकार्येषु जलस्य उपयोजनाय न केवलं महत्त्वं, अपि तु भूम्याः अन्तर्जलस्रोतस्य पुनर्भरणाय अपि अतिमहत्त्वं प्राप्नोति । भूमौ स्थितमन्तर्जलं यदा लुप्तं वा न्यूनं भवति, तदा कूपाः, नद्यः च शुष्यन्ति । तस्य पुनः संवर्धनं वर्षाजलसंग्रहणेन साध्यते । वर्षाजलसंग्रहणस्य प्रक्रिया सरलः अस्ति। यदा जलं नालिकया भूतले सङ्ग्रहीते, तत् जलं न केवलं गृहविभागेषु, अपि तु पिण्डीकरणप्रक्रियायाः साहाय्येन शुद्धीकृत्य पेयजलरूपेण स्वीकर्तुं शक्यते । इदं जलं सिंचनाय, स्नानाय, शुद्धीकरणाय च उपयोग: भवति । ग्रामेषु कृषिकार्येषु वर्षाजलं महती उपयोगिता योज्यते । सिंचनाय वर्षाजलं प्रयोगं कृत्वा कृषकाः जलस्रोतानां न्यूनतायाः समस्याम् उत्तमरीत्या परिष्कुर्वन्ति । वर्तमानकाले

जलविप्रतिपत्तेः समस्याः विकटाः जाताः । विश्वे बहवः जनाः जलसंकटेन पीडिताः सन्ति । एतत् संकटनिवारणाय वर्षाजलसंग्रहणं प्रभावकारी उपायः भवति । यथा वर्षाजलं सम्यक् प्रकारेण सङ्ग्रहीते, तदा जलवितरणप्रणाल्या जनेभ्यः शुद्धं जलं दातुं शक्यते । वर्षाजलस्य उपयोगेन भूम्याः शोषणं न्यूनं भविष्यति, तथा भूमिगतजलस्य स्तरः वर्धते । वर्षाजलसंग्रहणं सम्पूर्णस्य समाजस्य स्थायित्वयुक्ते विकासे महत्त्वपूर्णयोगदानं करिष्यति । अपघातकद्रव्यानां प्रदूषणं प्रतिरोद्धुं, अन्तर्जलस्रोतस्य पुनर्भरणं कर्तुं, अपि च जलसङ्कटस्य निराकरणाय अयं उपायः अनिवार्यः अस्ति । समुचितयोजनया वर्षाजलसंग्रहणं राष्ट्रस्य जलसंकटं सम्यक् प्रकारेण समाधानं करिष्यति। **"शिवा नः सन्तु वार्षिकीः"** । जलं यथा प्रदूषितं न स्यात् तदर्थं प्रयासः विधेयः। **"मा आपो हिंसी"** । वर्षाजलं शुद्धं परमं पवित्रं च भवति। वर्षाजलं सर्वदा कल्याणकारकं भवति। **"वर्ष्या आपः"** इति वचनमनुसृत्य आधुनिके काले अपि वृष्टिजलस्य संरक्षणं क्रियते । श्रीलालबहादुरशास्त्रीयराष्ट्रियसंस्कृतविश्वविद्यालयेन अपि वृष्टिजलस्य संरक्षणं क्रियते।

**वृष्टिजलसङ्ग्रहणसंरचना (Rain water harvesting structures in university)**

**छादसंग्रहणम् -**

भवनानां उपरितलेभ्यः जलसंग्रहणम् , नालीभिः जलस्य नयनम्, भूमिगतजलाशये संग्रहणम्

**भूजलपुनर्भरणम् -**

अवशोषणकूपाः , जलावशोषणगर्ताः, भूजलस्तरस्य वर्धनम् इति प्रकाराः सन्ति । विश्वविद्यालयेनापि 2004-2005 तमे वर्षे केन्द्रीयभूमिगतजलपरिषदः जलसंसाधनमन्त्रालयस्य भारतसर्वकारस्य च वरिष्ठवैज्ञानिकानां मार्गदर्शने C.G.W.B. इत्यस्य प्रस्तावानुसारं परिसरे चतुर्षु भिन्नभिन्नस्थानेषु आहत्य श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य सप्तवर्षाजलसंचयनगर्तान् (बोर) निर्मीय वर्षाजलसञ्चयस्य समुचिता व्यवस्था कृता । विश्वविद्यालये अस्मिन् वृष्टिजलस्य संरक्षणं कुपमध्यमेन वा कूपीमध्यमेन वा न क्रियते अपि च साक्षात् भूमौ एव अस्य जलस्य संरक्षणं क्रियते । आहत्य विश्वविद्यालयः 10.65 एकडा इति अस्ति अस्य विश्वविद्यालयस्य चतुर्षु भागेषु बोर्वेल् माध्यमेन सप्तस्थानेषु वृष्टिजलस्य संरक्षणं कृतं इति कारणेन समृद्धं जलं भूमौ सुरक्षितं वर्तते । अनेन कदापि गतेषु पञ्चषु वर्षेषु जलस्य समस्या न सञ्जाता आसीत् । एवं संरक्षितस्य वृष्टिजलस्य उपयोगः अपि विश्वविद्यलयेन नियमिततया क्रियते । **लाभाः**

जलसंरक्षणम्, व्ययन्यूनीकरणम्, भूजलस्तरवृद्धिः, पर्यावरणसंरक्षणम्, छात्राणां जागरूकता च अनुभूताः वर्तन्ते । तश्च यथा -

**परिसरे वृष्टिजलोपयोगः (Rain water utilization in the campus)**

**पुनरुपयोगविधयः**

उद्यानसेचनम्, शौचालयोपयोगः, प्रयोगशालाकार्येषु इति विधिभिः जलस्यास्य प्रयोगः क्रियते । अनेनापि विश्वविद्यालयेनापि वृष्टिजलस्य संरक्षणेन आवासीयस्तरे तदितरविद्याभवनादौ च तस्य सञ्चितजलस्य उपयोगः क्रियते । भूमौ सञ्चितजलस्य वृष्टिजलस्य उपयोगः विश्वविद्यालयस्य विभिन्नकार्यक्रमेषु क्रियते यथा वृक्षेभ्यः , शौचालयव्यवस्थाभ्यः, हस्तप्रक्षलनाय, पात्रप्रक्षलनाय च उपयुज्यते । तश्च वृष्टिजलम् अपि विश्वविद्यालयस्य विभिन्नेभ्यः विभागेभ्यः यथा आवाससमुदाय-शैक्षणिक-छात्रावस-प्रशासन-उद्यानवानादिविभागेषु विभिन्नकार्येभ्यः वृष्टिजलमिदम् उपयुज्यते । अपि च वृष्टिजलमिदम् विश्वविद्यालस्य छात्राः , आचार्याः, कर्मचारिणः , आवासजनाः च नियमिततया प्रयोगं कुर्वन्ति । अपि च जलस्य दुरुपयोगः अस्य विश्वविद्यालयेन न क्रियते । यद्यपि अस्माकं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः भौतिकरूपेण देहल्यां वर्तते तथापि अस्मिन् विश्वविद्यालये वृष्टिजलसङ्ग्रहणसंरचनयाः कारणेन कदापि भुमिगतजलस्य समस्या न अनुभूता आसीत् । अतः एव वैदिकरीतिमनुसृत्य विश्वविद्यालयेनापि वृष्टिजलसञ्चयनकेन्द्रं स्थापितम्।

**"अप्स्वडन्तरमृतम्प्सु भेषजमपामुत प्रशस्तये देवा भक्त वाजिनः"**

***The English version is available in the additional information link.***

| File Description | Document |
| --- | --- |

| | |
|---|---|
| Upload any additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |
| Provide link for additional information अतिरिक्ताः सूचनाः | View Document |

*7.1.6 Green Practices*

***1. Students, staff using***

***a) Bicycles***

***b) Public Transport***

***c) Pedestrian Friendly Roads***

***2. Plastic free campus***

***3. Paperless office***

***4. Green landscaping with trees and plants***

***हारित्यपरिपाटयः***

***1. छात्राः, अध्यापकाः, अध्यापकेतरकर्मचारिणश्च उपयुञ्जन्ति -***

***(क) द्विचक्रयानम्***

***(ख) सार्वजनिकपरिवहणम्***

***(ग) पादयात्र्यनुकूलमार्गान्***

***2. प्लास्टिक्मुक्तपरिसरः***

***3. कर्गदरहितकार्यालयः***

***4. वृक्षैः पादपैश्च हरितः परिसरः***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य हरित्यपरिपाटेः संरक्षणाय सम्बर्द्धनाय च प्रयत्नशीलः विद्यते। हारित्यपाटेः संरक्षणार्थं ज्ञानमूला-व्यवहारमूला च शिक्षायाः सम्पादनं करोति विश्वविद्यालयः। पर्यावरणसंरक्षणस्य आवश्यकताम् अभ्युपेत्य शास्त्रीपाठ्यक्रमे अनिवार्यरूपेण पर्यावरणशिक्षा इति पत्रमेकं स्थापितं विद्यते । शिक्षाशास्त्रिपाठ्यक्रमे , शिक्षाचार्यपाठ्यक्रमेऽपि पर्यावरणविषयकं पत्रमभ्युपेत्य पर्यावरणशिक्षायाः पर्यावरणसंरक्षणेन हारित्यपरिपाटेः सुदृढत्वं समागच्छति। अस्य पर्यावरणस्य पाठ्यक्रमस्य उद्देश्यं भवति राष्ट्रस्य समाजस्य च सुरक्षायै हरितप्रौद्योगिकीनां जागरुकता आवश्यकी। पर्यावरणसंरक्षणाय हरितपरिपाटेः अनुसरणं परमावश्यकम्। विश्वविद्यालयपरिसरे एतासां प्रथानाम् अनुपालनेन पर्यावरणस्य रक्षणं भवति। पर्यावरणसंरक्षणाय हारित्यपरिपाटयः *1.* छात्राः, अध्यापकाः, अध्यापकेतरकर्मचारिणश्च उपयुञ्जन्ति - (क) द्विचक्रयानम् (ख) सार्वजनिकपरिवहणम् (ग) पादयात्र्यनुकूलमार्गान् *2.* प्लास्टिक्मुक्तपरिसरः *3.* कर्गदरहितकार्यालयः *4.* वृक्षैः पादपैश्च हरितः परिसरः इत्यदीनां परिपाटीनाम् अनुपालनं क्रियते विश्वविद्यलयेन । अयं विश्वविद्यालय: सुन्दर: , हरितमयं वातावरणम् अत्र दरिदृश्यते । तदत्र दिग्मात्रं विव्रीयते ।

**1. छात्राः, अध्यापकाः, अध्यापकेतरकर्मचारिणश्च उपयुञ्जन्ति -**

**( क ) द्विचक्रयानम्**

प्रदूषणमुक्तपरिसरस्य प्रचारस्य अभियानस्य च भागरूपेण व्यवस्थापनाय द्विचक्रिकां व्यवहरन्ति केचन छात्राः कर्मचारिणः अध्यापकाश्च । परिसरे परिसरसमीपे वा ये उपवसन्ति ते प्रायशः द्विचक्रिकायाः उपयोगं कुर्वन्ति । अपि च

विश्वविद्यालयस्य नीति-नियमवल्यां प्रत्येकं बुधवासरे विना यानमागन्तव्यमिति नियम: स्वीकृत: वर्तते । अत: छात्राः कर्मचारिणः अध्यापकाश्च सर्वेऽपि नियमरूपेण द्विचक्रिकया पद्भ्यां वा विश्वविद्यालयं प्रति आगच्छन्ति । अनेन हरित्परिपाटे: विकास: जायमान: वर्तते ।

**( ख ) सार्वजनिकपरिवहणम्**

वायुप्रदूषितकाले पर्यावरणस्य संरक्षणाय यानानाम् न्यूनातिन्यूनमुपयोगः भवेत् एतदर्थं बहवः छात्राः अध्यापकाः कर्मचारिणश्च सार्वजनिकपरिवहनमङ्गीकृत्य गमनागमनव्यवहारं समाचरन्ति। अनेन व्याजेन पर्यावरणस्य संरक्षणं भवति । एतदर्थं विश्वविद्यालयः सर्वदा उन्मुक्तरूपेण संस्तुतिं प्रयच्छति । अपि च विश्वविद्यालयस्य नीति-नियमवल्यां प्रत्येकं बुधवासरे विना यानमागन्तव्यमिति नियम: स्वीकृत: वर्तते । अत: छात्राः कर्मचारिणः अध्यापकाश्च सर्वेऽपि नियमरूपेण पद्भ्यां वा सार्वजनिकपरिवहणस्य साहाय्येन वा गृहात् विश्वविद्यालयं प्रति आगच्छन्ति । अनेन हरित्परिपाटे: विकास: जायमान: वर्तते ।

**( ग ) पादयात्र्यनुकूलमार्गान् -**

स्वस्थजीवनस्य संरक्षणार्थं विशेषतः विश्वविद्यालयस्य आवासीयपरिसरे ये तिष्ठन्ति ते सर्वदा विश्वविद्यालये पद्भ्यां समागच्छन्ति। छात्रावासीयाः छात्राः सर्वदा कक्ष्यायां समीपस्थापणे पद्भ्यामेव गमनागमनं कुर्वन्ति। विश्वविद्यालयस्य समीपे ये छात्राः, अध्यापकाः कर्मचारिणश्च तिष्ठन्ति ते पादयात्र्यनुकूलमार्गम् अवलम्व्य पद्भ्यां विश्वविद्यालये समागच्छन्ति। पादयानस्य पादमार्गस्य च अवलम्बनेन अनुकूलस्वास्थ्यमवाप्नुवन्ति। न केवलं शरीरानुकूल्यमवाप्नुवन्ति अपि च वायुप्रदूषणात् ध्वनिप्रदूषणात् च स्वान् संरक्षन्ति, पर्यावरणस्य च संरक्षणं कुर्वन्ति ।

**2. प्लास्टिक्मुक्तपरिसरः -**

विश्वविद्यालयस्य परिसरे 'प्लाष्टिक' इत्यस्य उपयोगः सर्वथा निषिद्धोऽस्ति। छात्रावासीयभोजनालये 'प्लाष्टिक' इत्यस्य प्रतिबन्धो विद्यते । अध्यापकाः छात्राः कर्मचारिणश्च अस्य उपयोगविषये हानिविषये च संवेदनशीलाः सन्ति। 'प्लाष्टिक' इत्यस्य हानिविषये कार्यक्रमाः सञ्चालिताः भवन्ति । विश्वविद्यालयस्य पर्यावरणपाठ्यक्रमेण, राष्ट्रीय-सेवा-समित्या च छात्रा: अध्यापका:, कर्मचारिणश्च प्लास्टिक्मुक्तसमाजस्य विषये अभिप्रेर्यन्ते । प्लास्टिक्मुक्तपरिसराय विश्वविद्यालयेन नैका: कार्यक्रमा: आचार्यन्ते स्वच्छताभियानम्, स्वच्छपरिसर: इत्यादि कार्यक्रमा: चाल्यन्ते । प्लास्टिक्मुक्तपरिसरः इति घोषणानि च लेपितानि घोषितानि च वर्तन्ते ।

**3. कर्गदरहितकार्यालयः -**

कर्गदस्य अपेक्षानुगुणमनुपयोगो भवेत् एतदर्थं प्राशासनिकस्तरीयः निर्देशः प्राप्यते। कर्गदरहितसूचनासम्प्रेषणाय, तत्सम्बन्धिनिर्देशनिर्माणाय निर्देशपरिपालनाय च प्राशासनिकस्तरेषु विभागस्तरेषु संकायस्तरेषु च बहूपायः कृतोऽस्ति। सूचनासम्प्रेषणाय प्रचाराय प्रसाराय च ***WhatsApp, Email, Website*** इत्याधुनिकतकनीक्याः उपयोगः क्रियते। एतेन कर्गदस्य स्वल्पव्यवहारेण सह पर्यावरणस्यापि संरक्षणं भवति । अपि च प्रवेशपरीक्षा: , प्रवेश-अभ्यर्थनानि च अन्तर्जालमध्यमेन प्रक्रिया: जायमाना: सन्ति । प्राय: कोरोना19 त: कर्गदस्य उपयोग: न्यूना जायमाना वर्ततेति नातिशयोक्ति: । सूचना:, कर्यक्रमाणां पोस्टर्, अधिसूचना:, विभगीयसुचना:, समयसारिण्य: च ९०% अन्तर्जालमध्येन प्रचलतीति पर्यावरणसंरक्षणाय शुभसूचक: वर्तते ।

**4. वृक्षैः पादपैश्च हरितः परिसरः** –

वृक्षाः पादपाश्च परिसरस्य प्राणाः सन्ति । तेषां संवर्धनेन परिसरः सुन्दरः स्वास्थ्यप्रदश्च भवति। वृक्षाणां पादपानां च संवर्धनेन परिसरः न केवलं हरितः भवति, अपि तु ज्ञानार्जनाय उत्तमं वातावरणमपि सृजति। एतेन छात्राः पर्यावरणसंरक्षणस्य महत्त्वं जानन्ति प्रकृतिप्रेम च वर्धयन्ति।

**वार्षिककार्यक्रमाः**

वृक्षारोपणम्, वर्षाकाले रोपणम्, छात्राणां सहभागिता, वृक्षमित्रकार्यक्रमः इत्यादि कार्यक्रमा: च आचार्यन्ते ।

**संरक्षणम्**

नियमितनिरीक्षणम्, वृक्षसंरक्षणसमितिः, छात्रसहयोगः इत्यनेकै: हरितपरिपाटेः अनुपालनं क्रियते ।

वृक्षारोपणं,परिपालनं, संरक्षणञ्च विश्वविद्यालयस्य अबाधिता क्रिया अस्ति। वृक्षाणां संरक्षणार्थं यानि यानि विधेयानि सन्ति तेषां परिपालनाय उद्यानपालकः कर्मचारिणः अंशकालिकरूपेण नियुक्ताः सन्ति। ते विश्वविद्यालयस्य हारित्यव्यवस्थां संरक्षन्ति सम्वर्द्धयन्ति संचालयन्ति च। पर्यावरणदिवसे वृक्षारोपणव्यवस्था अनिवार्यरूपेण प्रचलति ।

***Green audit***

विश्वविद्यालयस्य अभियान्त्रिकिविभागः ***Green audit*** इति ***G.G.C. Pvt.Let.*** इति संस्थाद्वारा कारयति। अस्य ***Green audit*** इतिविषये पारदर्शिता निरूपिता वर्तते ।

****The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

***7.1.7 Average percentage of expenditure on green initiatives and waste management excluding salary component during the last five years.***

***विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य प्रतिशततायाः मध्यमानम्-***

**Answer:** 1.99

7.1.7.1 Total expenditure on green initiatives and waste management excluding salary component year-wise during the last five years (INR in lakhs)

विगतपञ्चवर्षेषु वेतनाद् ऋते हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च आहत्य कृतः वार्षिकव्ययः (लक्षशः)

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 26.41 | 40.81 | 22.27 | 21.09 | 14.11 |

| File Description | Document |
|---|---|
| Green audit report हारित्योपक्रमस्य अङ्केक्षणप्रतिवेदनम्। | View Document |
| Details of expenditure on green initiatives and waste management during the last five years (Data Template) विगतपञ्चवर्षेषु हारित्योपक्रमे, व्यर्थवस्तुप्रबन्धने च कृतस्य व्ययस्य विवरणम्। (दत्तांशप्रारूपम्) | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***7.1.8 Differently abled (Divyangjan) Friendliness Resources available in the institution***

***1. Physical facilities***

***2. Provision for lift***

***3. Ramp / Rails***

*4. Braille Software/facilities*

*5. Rest Rooms*

*6. Scribes for examination*

*7. Special skill development for differently abled students*

*8. Any other similar facility (Specify)*

***संस्थायाम् अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् उपलब्धिः।***

*1. भौतिकसौविध्यानि*

*2. उत्तोलनफलकव्यवस्था*

*3. समतलोद्गमनी/ हस्तालम्बदण्डाः*

*4. अन्धसहकृतितन्त्रांशः/सुविधाः*

*5. विश्रान्तिप्रकोष्ठः*

*6. परीक्षायाम् अनुलेखकः*

*7. अन्यथाशक्तच्छात्रेषु विशिष्टकौशलस्य विकासः*

*8. अन्याः समरूपाः सुविधाः (नामसहितो निर्देशः)*

**Answer:** A. 5 and more of the above (अ. उपर्युक्तेषु पञ्च, ततोऽधिकानि वा)

| File Description | Document |
|---|---|
| Upload resources available in the institution for Divyangjan (Data Template) संस्थायाम् अन्यथाशक्तजने (दिव्याङ्गजने) साहाय्यकारि-साधनसम्पदाम् उपलब्धिसूचकं सन्धानम्। (दत्तांशप्रारूपम्) | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Link to photos and videos of facilities for divyangjan अन्यथाशक्तजनानाम् (दिव्याङ्गानाम्) अनुकूलसंसाधनानाम् चित्राणां चलनचित्राणां च सन्धानं दीयताम् | View Document |

***7.1.9 Number of specific initiatives to address locational advantages and disadvantages during the last five years***

***विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या***

**Answer:** 28

7.1.9.1 Number of specific initiatives to address locational advantages and disadvantages year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां वार्षिकसङ्ख्या -

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 5 | 6 | 7 | 5 | 5 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Number of Specific initiatives to address locational advantages and disadvantages (Data Template) स्थानिकानि आनुकूल्यानि प्रातिकूल्यानि च मनसि निधाय प्रवर्तितानाम् उपक्रमाणां सङ्ख्या। (दत्तांशप्रारूपम्) | View Document |

***7.1.10 Number of initiatives taken to engage with and contribute to local community during the last five years (Not mentioned elsewhere)***

***विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां सङ्ख्या (अन्यत्र अनुल्लिखितानाम्)***

**Answer:** 31

7.1.10.1 Number of initiatives taken to engage with and contribute to local community year-wise during the last five years

विगतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं, योगदानं कर्तुं च उपक्रान्तानाम् उपक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 11 | 5 | 5 | 5 | 5 |

| File Description | Document |
|---|---|
| Upload the report of the event कार्यक्रमस्य प्रतिवेदनम्। | View Document |
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Details of initiatives taken to engage with local community during the last five years (Data Template) गतपञ्चवर्षेषु स्थानिकसमुदायेन सम्बन्धमनुवर्तयितुं योगदानाय च कृतानाम् उपक्रमाणां विवरणम्। (दत्तांशप्रारूपम्) | View Document |

***7.1.11 Existence code of Conduct Handbook exists for students, teachers, governing body, administration including Vice Chancellor / Director / Principal /Officials and support staff***

***(Yes/No)***

***कुलपति-निदेशक-प्राचार्य-अधिकारिप्रभृतीनां प्रशासनाधिकारिणां सह-कार्यकर्तृगणानां, छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय संस्थित-नीतिनियमावलीयुता करदीपिका वर्तते।***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| URL to Handbook on code of conduct for students and teachers , manuals and brochures on human values and professional ethics छात्राणाम् अध्यापकानां, शासिपरिषन्निकायानां च मार्गदर्शनाय नीतिनियमावलीयुतायाः करदीपिकायाः सन्धानम्। | View Document |

| | |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |

*7.1.12 Display of core values in the institution and on its website*

*(Yes/No)*

***संस्थायां, संस्थायाः जालस्थाने प्रधानमूल्यानां प्रदर्शनम्***

***(अस्ति/नास्ति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचना | View Document |
| Provide URL of website that displays core values जालस्थानस्य सन्धानं यत्र प्रधानमूल्यानां प्रकाशनं विद्यते। | View Document |

*7.1.13 The institution plans and organizes appropriate activities to increase consciousness about national identities and symbols; Fundamental Duties and Rights of Indian citizens and other constitutional obligations*

*(Yes/No)*

***भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयितुं संस्था योग्यकार्यक्रमाणां योजनां निर्वर्तनञ्च करोति।***

***(आम् / न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Details of activities organized to increase consciousness about national identities and symbols (Data Template) भारतीयनागरिकेषु राष्ट्रियाणाम् अभिज्ञानानां, प्रतीकानां, मूलकर्तव्याधिकारयोः, अन्येषाञ्च संवैधानिकोत्तरदायित्वानां विषये संवेदनाम् अभिवर्धयित | View Document |

*7.1.14 Does the institution offer a course on Human Values and professional ethics on the basis of Vedic and Sanskrit literature.*

*(Yes/No)*

***संस्था वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्रं प्रवर्तयति किम्।***

***(प्रवर्तयति/न प्रवर्तयति)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Provide link to Courses on Human Values and professional ethics on Institutional website वैदिकवाङ्मयं संस्कृतसाहित्यञ्च | View Document |

| | |
|---|---|
| आधृत्य मानवीयमूल्यानि वृत्तिनीतिं चाधिकृत्य पाठ्यपत्राणां प्रवर्तनस्य संस्थायाः जालपुटस्य सन्धानम्। | |

***7.1.15 The institutional functioning is as per professional code prescribed / suggested by statutory bodies / regulatory authorities for different professions.***

***(Yes/No)***

***विविधवृत्तिप्राधिकाराणां परिनियमानुसारेण / संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयति।***

***(आम्/न)***

**Answer:** Yes

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Institutional data as per Data Template(सांस्थानिकदत्तांशः।) | View Document |
| Provide URL of supporting documents to prove institution functions as per professional code विविधवृत्तिप्राधिकाराणां परिनियमानुसारेण/ संवैधानिकनिकायसंस्तुत्यनुसारेण संस्था कार्यं निर्वर्तयतीत्युपस्थापयितुं सहायकाभिलेखानां सन्धानम्। | View Document |

***7.1.16 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion on the basis of Vedic and Sanskrit literature as well as for observance of fundamental duties during the last five years***

***विगतपञ्चवर्षेषु वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिकसमरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां सङ्ख्या***

**Answer:** 35

7.1.16.1 Number of activities conducted for promotion of universal values (Truth, Righteous conduct, Love, Non-Violence and peace); national values, human values, national integration, communal harmony and social cohesion as well as for observance of fundamental duties year-wise during the last five years

विगतपञ्चवर्षेषु, वैदिकवाङ्मयं संस्कृतसाहित्यञ्च आधृत्य वैश्विकमूल्यानां (सत्यं, चारित्र्यं, प्रेम, अहिंसा, शान्तिश्च) राष्ट्रियमूल्यानां, मानवीयमूल्यानां, राष्ट्रियैकतायाः, नानासमुदायसहभावस्य, सामाजिक-समरसतायाः, मूलकर्तव्यानामनुपालनस्य च प्रोत्साहनाय प्रवर्तितानां कार्यक्रमाणां वार्षिकसङ्ख्या

Answer:

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 10 | 9 | 6 | 5 | 5 |

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| University code of conduct for teachersअध्यापकानां कृते विश्वविद्यालयस्य आचारसंहिता | View Document |
| University code of conduct for students छात्राणां कृते विश्वविद्यालयस्य आचारसंहिता | View Document |

| | |
|---|---|
| Report on the student attributes facilitated by the University छात्राणां गुणार्जनाय विश्वविद्यालयस्य सहकारिताविषयकं प्रतिवेदनम्। | View Document |
| List of activities conducted for promotion of universal value (Data Template) वैश्विकमूल्यानां संवर्धनाय आयोजितानां गतिविधीनां सूची। | View Document |
| Handbooks, manuals and brochures on human values and professional ethics मानवीयमूल्यानि, वृत्तिनीतिं च अधिकृत्य प्रकाशिता हस्तपुस्तिका, दिग्दर्शिका, परिपत्रिका च | View Document |

***7.1.17 Institution conducts Value based Moral Education Programmes based upon Ancient Indian Texts like Bhagavadgeeta, Ramayana etc, and organizes national festivals and birth / death anniversaries of the great Indian personalities.***

***संस्था रामायण-भगवद्गीताप्रभृतीन् प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापाठ्यक्रमान् चालयति । राष्ट्रियमहोत्सवान्, विशिष्टानां गण्यानां भारतीयव्यक्तीनां वार्षिकं जन्मदिनं/पुण्यतिथिं च समायोजयति।***

**Answer:**

विश्वविद्यालयः भारतीयशास्त्रपरम्परायाः भारतीयसंस्कृतेश्च संरक्षणाय सम्बर्द्धनाय च प्रतिबद्धोऽस्ति । अतः शास्त्रिपाठ्यक्रमे, आचार्यपाठ्यक्रमे च नैतिकशिक्षायाः समावेशः विद्यते। उदाहरणरूपेण इत्थं वक्तुं शक्यते यत शास्त्रिपाठ्यक्रमे यद्रुपकम् अभिज्ञानशाकुन्तलं विद्यते तत्सर्वथा नैतिकशिक्षामादधाति, व्याकरणशिक्षाकौशलपत्रे व्याकरणेन सह हितोपदेशस्य श्रीमद्भगवद्गीतायाश्च अध्यापनं भवति। वेदे वैदिकोपदेशानां वाक्यानामध्यापनं भवति। धर्मशास्त्रे मनुस्मृति-याज्ञवल्क्यस्मृत्यादौ प्रतिपादितनैतिकशिक्षाया अध्यापनं प्रचलति। अत्रैव आचार्यचाणक्यस्यार्थशास्त्रस्यापि अध्यापनं भवति। दर्शनशास्त्रे मानवीयमूल्यपरकाणां योगादिदर्शनानाम् अध्यापनं भवति। भारतीयसंस्कृतौ श्रीमद्भगवद्गीता' इति सर्वश्रेष्ठग्रन्थो विद्यते। तस्य ग्रन्थस्य अद्वैतवेदान्तस्य, विशिष्टाद्वैतवेदान्तस्य पुराणेतिहासस्य च पाठ्यक्रमे निहितोऽस्ति । भारतीयदर्शनस्य मुख्यं लक्ष्यं भवति मोक्षः, मोक्षस्तु मानवीयमूल्यस्य श्रेष्ठम् निदर्शनं वर्तते। साहित्ये कुमारसम्भवम्, रघुवंशादि-काव्यग्रन्थानामध्यापनं भवति एते ग्रन्थाः मस्माकं संस्कृतेरुन्नायकाः भवति। रामायणं महाभारतञ्चेत्यादयः भारतीयनैतिकशिक्षायाः आदर्शभूतमहाकाव्यानि सन्ति। श्रीमद्भागवतपुराणमपि पाठ्यक्रमे निहितमस्ति। भारतीयविद्यापरम्परायां यानि अष्टादशविद्यास्थानानि विद्यन्ते तानि सर्वाणि ज्ञानविज्ञानेन सह नैतिकशिक्षां प्रयच्छन्ति । एतदतिरिच्य शास्त्रिपाठ्यक्रमे अनिवार्यरूपेण मूल्यशिक्षायाः मानाधिकारस्य चेति पत्रयोः अध्यापनं प्रचलति। अपि च शिक्षाशास्त्री-पाठ्यक्रमे , शिक्षाचार्यपाठ्यक्रमे च मूल्यशिक्षायाः पत्राणि वर्तन्ते । अपि च एम्.ए हिन्दू-अध्ययनमित्यस्य पाठ्यक्रमे भारतीय-नीतिशास्त्रम् इति पाठ्यपत्रं वर्तते ।

अयं विश्वविद्यालयः रामायण-भगवद्गीताप्रभृतीन् प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापाठ्यक्रमान् चालयति । राष्ट्रियमहोत्सवान्, विशिष्टानां गण्यानां भारतीयव्यक्तीनां वार्षिकं जन्मदिनं/पुण्यतिथिं च समायोजयति । तथाहि-

1. उत्कर्षमहोत्सवः (2) अन्ताराष्ट्रिययोगदिवसः (3) आजादेः अमृतमहोत्सवः (प्रतिगृहं त्रिवर्णध्वजः) (4) विभाजनविभीषिकास्मृतिदिवसः (5) स्वतन्त्रतादिवसः (6) शिक्षकदिवसः (7) हिन्दीसप्ताहः (8) दीक्षारम्भविद्यार्थिप्रेरणासमारोहः (9) श्रीलालबहादुरशास्त्री-श्रीमहात्मागांधीजयन्युत्सवः (10) स्वच्छताभियानदिवसः (11) राष्ट्रिय-एकतादिवसः (12) संविधानदिवसः (13) वीरबालदिवसः (14) राष्ट्रिययुवदिवसः (15) गणतन्त्रदिवसः (16) सरस्वतीपूजनमहोत्सवः (17) संस्कृतदिवसः / संस्कृतसप्ताहमहोत्सवः (18) मातृभाषादिवसः (19) विवेकानन्दजयन्त्युत्सवः (20) नेताजी सुभाषचन्द्रबोस-जयन्त्युत्सवश्चेत्यादयः ।

येषां नाम्ना विश्वविद्यालयोऽयं संस्थापितः तत्र उत्साहेन **श्री लाल बहादुरःशास्त्री स्मृतिदिवसः** राष्ट्रपिता **महात्मा गान्धी, नेताजी** इत्येषां जन्मोत्सवस्य स्मरणेन सह कर्मचारीणां छात्राणाञ्च च कृते तेषां निर्धारितमार्गस्य अनुसरणं कर्तुं तेषां त्यागस्य साक्षात्कारस्य च स्मरणं कुर्वन् विलसति अयं विश्वविद्यालयः।

**उत्कर्षमहोत्सवः** 07-05-2022 तः 09-05-2022 दिनाङ्कं यावत् त्रयाणां केन्द्रीयविश्वविद्यालयानां संयुक्ततत्त्वावधानेन केन्द्रीयसंस्कृतविश्वविद्यालयस्य नेतृत्वेन प्रथमोत्कर्षमहोत्सवः नवदेहलीस्थ डॉ. भीमराव अम्बेडकरइन्टरनेश्नलसेन्टर इति प्रेक्षागृहे समायोजितः। उत्कर्षमहोत्सवः 03-05-2023 तः 05-05-2023 दिनाङ्कं यावत् त्रयाणां केन्द्रीयविश्वविद्यालयानां

संयुक्ततत्त्वावधानेन तिरुपतिस्थराष्ट्रियसंस्कृतविश्वविद्यालयस्य नेतृत्वेन द्वितीयोत्कर्षमहोत्सवः नवदेहलीस्थ तिरुपतौ तिरुमालादेवस्थानस्य प्रेक्षागृहे समायोजितः।

**स्वातन्त्र्यदिवसः** , **गणतन्त्रदिवसः** , **संविधानदिवसः राष्ट्रीयसाम्प्रदायिकसौहार्ददिवसस्य तथा ध्वजदिवसस्य राष्ट्रियशिक्षादिवसस्य, राष्ट्रियमतदातादिवसस्य, साइबरजागरूकतादिवस इत्यादीनि** राष्ट्रियदिनानि विश्वविद्यालयस्य माननीयकुलपतीनां नेतृत्वे अस्माकं वंशजानां रक्ते देशभक्तिं पूरयितुं समाचर्यन्ते । **शहीददिवसः**, **बालवीरदिवसः बलिदानदिवसः विभाजनविभीषिकास्मृतिदिवसश्च** भारतीयनागरिकेषु दयालुमानवताभावना प्रवर्तयितुं आयोजनानि आयोजितानि भवन्ति।

**"एक भारतश्रेष्ठ भारत"** उत्सवस्य, '**आजादी का अमृतमहोत्सव**', **"सतर्कताजागरूकतासप्ताहस्य, स्वच्छभारताभियानसप्ताहस्य च"** आयोजनं करोति अयं विश्वविद्यालयः।

संस्कृतदिवसः, मातृभाषादिवसेत्यादयः विविधाः भाषाविषयकाः दिवसाः समायोज्यन्ते। महात्मागान्धी-विवेकानन्द-नेताजीसुभाषचन्द्रबोसेत्यादीनां समाजसुधारकाणां महापुरुषाणां जन्मदिवसमुपलक्ष्य एभिः सह **स्वातन्त्र्यदिवसः गणतन्त्रदिवसः संविधानदिवसः राष्ट्रियसमायोजनदिवसश्च** छात्रान् साम्प्रदायिकसौहार्दस्य महत्त्वं प्रतिबोधयितुं महता समुत्साहेन कार्यक्रमाः आयोजिताः भवन्ति। २०२२ तमे वर्षे **"भारतस्य स्वतन्त्रता"** इति पञ्चसप्तति (75) वर्षस्य स्वातन्त्र्यपूर्त्यवसरे **"आजादी का अमृत महोत्सव, हर घर तिरंगा"** इत्यस्य समायोजनमभूत्।

सुस्वास्थ्यस्य प्रवर्धनार्थं **क्रीडादिवसः, योगदिवसः, फिट् इण्डिया** कार्यक्रमश्चेति विभिन्नमुपक्रममभिलक्ष्य कार्यक्रमान् समायोजयति।

विश्वविद्यालये **राष्ट्रिययुवदिवसः युवमहोत्सवः, शिक्षकदिवसश्च** समायोज्यन्ते। जनानां स्वाधिकाराणां विषये जागरूकतां प्रवर्धयितुं तेषां विषये सूचनां दातुं च राष्ट्रिययुवदिवसः परिपाल्यते। **स्वामी विवेकानन्दस्य** आदर्शान् पुनः पुनरज्जीवनाय प्रतिष्ठापयितुं युवानां प्रेरणा च उत्सवस्य मुख्यं उद्देश्यम् अस्ति। परीक्षामधिकृत्य एकः अद्वितीयः लोकप्रियः उपक्रमः **"परीक्षा पे चर्चा"** प्रधानमन्त्रिणः श्रीनरेन्द्रमोदीमहोदयस्य छात्राणां कृते आत्मविश्वासं सततं वर्धयति, मानसिकदुःश्चिन्ताप्रबन्धने मानसिकशारीरिकस्वास्थ्यं प्रदातुं च साहाय्यं कृतमस्ति।

सरस्वत्याः स्मरणम् इव सांस्कृतिकप्रशंसायाः प्रवर्तनार्थं प्रचुराः अवसराः प्रदत्ताः सन्ति, 'पूजन-महोत्सवः' दीपावल्यां लक्ष्मीपूजा च प्रसिद्धा। एतदतिरिक्तं 'A Sanskrit Delhi Prant' 'दिल्ली प्रान्ते संस्कृतम्' विषयं स्वीकृत्य विश्वविद्यालये अपि शास्त्रं, भाषां, शास्त्रेषु वैज्ञानिकं तत्त्वमित्यादिविषयमधिकृत्य सम्मेलनस्य आयोजनं भवति।

सर्वे छात्राः अध्यापकाश्च समुत्तरदायित्वं परिपालयन्तु तदर्थं विश्वविद्यालयः सततं चिन्तयति कार्यञ्च सम्पादयति। अस्मिन् विषये विविधसामाजिक-सांस्कृतिक-भाषिक-क्षेत्रीय-साम्प्रदायिक-कार्यक्रमानाम् आयोजनेन अस्माकं राष्ट्रस्य सर्वेषां नागरिकानां मध्ये एकतां सहृदयतां भ्रातृत्वं च सञ्चरिष्यति। येन समाजस्य सम्पूर्णं वातावरणं सर्वदा आह्लादकारकः भवेदिति।

इत्येवं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय: प्रतिवर्षं रामायण - भगवद्गीताप्रभृतीन् प्राचीनभारतीयग्रन्थान् आश्रित्य नैतिकशिक्षापाठ्यक्रमान् चालयति । राष्ट्रियमहोत्सवान्, विशिष्टानां गण्यानां भारतीयव्यक्तीनां वार्षिकं जन्मदिनं/पुण्यतिथिं च समायोजयति । एतेषु कार्यक्रमेषु छात्रा:, आचार्या:, कर्मचारिण: च भागं गृह्णन्ति ।

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |
| Any additional information अतिरिक्ताः सूचनाः | View Document |

***7.1.18 The institution maintains complete transparency in its financial, academic, administrative and auxiliary functions***

***संस्था स्वकीयेषु आर्थिक-शैक्षिक-प्राशासनिकेषु इतरेषु च कार्यक्रमेषु सम्पूर्णरूपेण पारदर्शिताम् अवलम्बते।***
**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविधालयः स्वकीयेषु आर्थिक-शैक्षिक-प्राशासनिकेषु इतरेषु च कार्यक्रमेषु सम्पूर्णरूपेण पारदर्शितामवलम्बते ।

**वित्तीयकार्यम्-**

कार्यालये अस्माकं सङ्गणकीकृतं वित्तीयलेखस्वचालनसाफ्ट्वेयरप्रणालीं समाश्रित्य वित्तीयकार्येषु पारदर्शितां प्रदर्शयति । लेखाविभागः वित्तपदाधिकारिणः अधीनं कार्यं सम्पादयति। विश्वविद्यालयः विश्वविद्यालयानुदानायोगाद् अनुदानं प्राप्नोति । विश्वविद्यालयस्य दैनन्दिनकार्ये लेखाविभागस्य महती भूमिका वर्तते। विश्वविद्यालयानुदानायोगेन सामान्यतया (1) वेतनम् (2) आवर्ती (3) मूलधनञ्चेति अनुदानत्रयं विश्वविद्यालयाय स्वीकृतं भवति। अत्र महत्त्वपूर्णं समितिद्वयं विद्यते- वित्तसमितिः निवेशसमितिश्च।

विश्वविद्यालयस्य लेखाविभाग: संगणकाधारितः प्रगतिशीलश्च विद्यते। क्रयणादिक्रियायां पारदर्शित्वव्यवस्थापनाय क्रयसमितेः निर्माणं विधाय क्रयसमितिद्वारैव क्रयणादिकं सम्पाद्यते। वित्तीयव्यवहारः चेक्स-आरटीजीएस आदि सुविधामाध्यमेन भवति। दैनिकशुल्कसंग्रहणं तु नियमितरूपेण आनलाईन क्वचित् आफलाईन माध्यमेन भवति। नगदपुस्तिका, लेजरपुस्तकं वाउचरसञ्चिका च परिपाल्यते।

**शैक्षणिककार्यम् -**

विश्वविद्यालयस्य शैक्षणिकविभागस्य उद्देश्यं भवति शैक्षणिकक्रियाकलापानां सौविध्यकरणम्। विश्वविद्यालयस्य विविधपाठ्यक्रमेषु कार्यक्रमेषु सम्बद्धेषु विषयेषु छात्राणाम् नामाङ्कनस्य सौविध्यं विद्यते। अयं शैक्षणिकविभागः अध्ययनस्य नानाक्षेत्रेषु छात्रपरामर्शदानेन संकायस्य पीठस्य सहायतां कर्तुं समर्थो भवति। शैक्षणिकविभागः स्वीयकार्येषु पारदर्शित्वव्यवस्थापनाय आधुनीकितकनीकसौविध्यस्य उपयोगं करोति। येन उपस्थिति- छात्रविवरणादीनां सङ्केतः झटिति प्राप्तुं शक्यते। शैक्षणिककार्यं समीचीनं भवेत् तदर्थं प्रवेशसमितिः समयसारणीसमितिः पाठ्यक्रमसमितिः इत्यादीनां समितीनां संगठनं विद्यते । समितीनां मुख्यं दायित्वं संकायविभागप्रमुखाणामतिरिक्तं शैक्षणिककार्यक्रमेषु पारदर्शिता सुनिश्चिता भवेत् । प्रवेशादिप्रक्रिया पूर्णतया पारदर्शी भवति। प्रवेशपरीक्षायां अधिकाङ्काधारेण नामाङ्कनं भवति। आरक्षणनीतिः सर्वकारीयनियमानुसारं पाल्यते। समयेन छात्राणां प्रवेशः समयेन अध्ययनमध्यापनञ्च समयेन परीक्षां समयेन परीक्षाफलोद्घोषणम् सम्मिल्य स्वस्वदायित्वं निर्वहति ।

**प्राशासनिककार्यम्**

प्रशासनम्- (*1)* शैक्षणिकम्

प्रशासनम्- (*1) (*शैक्षणिकम्) विश्वविद्यालयस्य महत्त्वपूर्णः उपविभाग: विद्यते। स च कुलसचिवस्य निर्देशने प्रचलति। अयमुपविभागः मुख्यतया विश्वविद्यालयानुदानायोगस्य केन्द्रीयसंस्कृतविश्वविद्यालय: २०२० इत्यस्य च नियमविनियमानाम् अनुपालनेन विश्वविद्यालयशिक्षकप्रशिक्षकाणां नियुक्तिसम्बद्धानां कार्याणामुत्तरदायित्वं सम्पादयति ।

**प्रशासनम्-(2) *(*शैक्षणिकेतरम्)**

प्रशासनानुभागः (2) कुलसचिवं कुलपतिं च प्रति प्रतिवेदनं प्रददाति। अयमनुभागः विश्वविद्यालये सेवानिवृत्तवेतनधारकसहितानां शिक्षणेतरकर्मचारिसम्बद्धानां सर्वविषयकं कार्यं निर्वहति। संस्कृतविश्वविधालयस्य ***2020*** तमवर्षस्य अधिनियमानुसारं विश्वविद्यालयस्य नियमानुसारं च यू.जी.सी. भारतसर्वकारस्य च नियमान् नीतिश्च प्रकाशयति निर्वहति च।

**सामान्यप्रशासनम्**

सामान्यप्रशासनानुभागः स्वकर्तव्यमुररीकृत्य सम्पूर्णविश्वविद्यालयाय प्राशासनिकं तार्किकञ्च साहाय्यं प्रयच्छति। अयमनुभागः कुलसचिवस्य मार्गनिर्देशने पर्यवेक्षणे च कार्यं सम्पादयति। समेषां शैक्षणिक-शैक्षणिकेतरकर्मचारिणां दैनन्दिन- आवश्यकताः पूरयति । अयमनुभागः सामान्यप्रशासन-सुरक्षासेवाः भण्डारस्य क्रमणं, भारतसर्वकारस्य विभिन्नसामुदायिकमुख्यकार्यक्रमाणां क्रियान्वयनं करोति। उत्सव- वैधानिकविषय-आवासविनियोग-

चिकित्साप्रतिपूर्त्यादिषु विषयेषु विविधसर्वकारीयसंस्थानां समन्वये अपि महत्वपूर्णां भूमिकां निर्वहति। सामान्यप्रशासनानुभागस्य नेतृत्वं सहायककुलसचिवः करोति, यः अनुभागाय समर्पितानां कर्तव्यानां दायित्वानाञ्च निरीक्षणं करोति। अयमनुभागः समेषां शैक्षणिक-शैक्षणिकेतरसमुदायानां कृते समग्रसेवा-सौविध्यसमन्वयान्वितिरूपेण कार्यं करोति।

## विकासानुभागः

विकासानुभागस्य स्थापना विश्वविद्यालयस्य सर्वेषां प्रस्तावानां, कार्यक्रमाणाम् उपक्रमाणां च आयोजनस्योद्देश्येन कृता। विकासानुभागाय समग्रविकासस्य विश्वविद्यालयवार्षिकरणनीतिसञ्चालनयोजनानां प्रभाविकार्यनीतीनां परिचालनयोजनानाञ्च, प्रभाविकार्यान्वयनस्य कार्यं प्रदत्तम्। येन विश्वविद्यालयस्य दीर्घकालीना दृष्टिः परिभाषिता भवेत्। अयमनुभागः विविधनिर्णयस्वीकरण-प्रक्रियायां साहाय्यं करोति येन शैक्षणिकक्षेत्रैः सहैव प्रशासनिकक्षेत्रेष्वपि उपलब्धयः प्राप्येरन् तद्दृढाश्च भवेयुः। अस्मै अनुभागाय आन्तरिकगुणवत्ताऽऽश्वासनप्रकोष्ठ (आईक्यूएसी) सचिवालयनिबन्धनस्य, विश्वविद्यालयानुदानायोगविशेषसहायताकार्यक्रमस्य (एसएपी) क्रियान्वितिकरणनिरीक्षणयोः, विविधस्ववित्तपाठ्यक्रमेषु धनप्रबन्धनस्य, विश्वविद्यालयेषु संगोष्ठीनां सम्मेलनानां आयोजनस्य अन्येषां प्रमुखाणां कार्यक्रमाणां वार्षिकप्रतिवेदनसज्जीकरणस्य च विविधदायित्वानि प्रदत्तानि। विकासानुभागः कर्मचारिभ्यः छात्रेभ्यश्च चिकित्सासौविध्यानां, भोजनशालासौविध्यानां, राष्ट्रियसेवायोजनायाः (एनएसएस), विश्वविद्यालयस्य अन्यासां संस्थानाम् (ऐजेंसी) संस्थानानां विश्वविद्यालयस्य भूमिगतस्थानस्य, संगोष्ठीभवनानां व्याख्यानप्रकोष्ठानाञ्च वितरणस्य, स्वास्थ्यरक्षणान्वितेः कार्याणामपि संरक्षणं करोति। विकासानुभागः कुलसचिवस्य पर्यवेक्षणे मार्गदर्शने च कार्यं करोति। विकासानुभागस्य नेतृत्वम् उपकुलसचिवः (लेखा विकासश्च) करोति, यः अनुभागाय वितरितानां कर्तव्यानां दायित्वानाञ्च निरीक्षणं करोति।

## परीक्षानुभागः

परीक्षाविभागेन सत्रीयपरीक्षाप्रणाल्याः माध्यमेन नियमितकक्षाणाम् अंशकालिकपाठ्यक्रमाणाञ्च वर्षे द्विवारं परीक्षाः आयोज्यन्ते। छात्राणाम् आवेदनपत्रपूरणादारभ्य परीक्षापरिणामस्य घोषणां यावत्, सर्वाणि कार्याणि क्रियन्ते, अंकपत्रवितरणम्, अस्थायिप्रमाणपत्रवितरणं, दीक्षान्तसमारोहे उपाधिवितरणं चेत्यादीनां कार्याणाम् उत्तरदायित्वम् अस्ति। कोविड-19 महामार्याः कारणेन सर्वेषां नियमितानाम् अंशकालिकानाञ्च परीक्षाणानाम् आयोजनं सद्यस्क (ऑनलाइन) विधिनैव कृतम्।

## विश्वविद्यालयकार्यानुभागः (यू.डब्ल्यू.डी.)

## भूमिः एवं भवनम्

विश्वविद्यालयनिर्माणविभागेन विश्वविद्यालयस्य भूमेः भवनस्य च रक्षणं क्रियते। विश्वविद्यालयः दक्षिण्यां देहल्यां शहीदजीतसिंहमार्गे कुतुबसांस्थानिकक्षेत्रे 10.65 एकड़मिते क्षेत्रे स्थितोऽस्ति। अयं विश्वविद्यालयः भारतीयप्रौद्योगिकिसंस्थानस्य, राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषदः राष्ट्रियशैक्षिक-योजनाप्रशासनविश्वविद्यालयस्य, भारतीयविदेशव्यापारसंस्थानस्य, आईएमआई इत्यस्य जवाहरलालनेहरूविश्वविद्यालयस्य, आईएसआई इत्यस्य, केन्द्रीयविद्यालयसंघटनस्य चेत्यादीनाम् अन्येषां राष्ट्रियान्ता-राष्ट्रियशैक्षणिकसंस्थानानां समीपे स्थितोऽस्ति ।

अयं विश्वविद्यालयः सौविध्यजनकस्थाने सम्यग्रूपेण प्रबन्धितोऽस्ति। अष्टावासीयभवनेषु एकः, अतिथिनिवासः एकः, छात्रावासः विद्यते, विश्वविद्यालये चत्वारि शैक्षणिकभवनानि च सन्ति। सर्वाणि भवनानि राजमार्गेण सह सम्यक्तया संयुक्तानि सन्ति। परिसरे अनेकानि लघूनि उद्यानानि यथा विश्रान्तिवाटिका स्वर्णजयन्ती-उद्यानञ्चेति। उपयुक्तबाह्यप्रकाशव्यवस्थां सुनिश्चेतुं विश्वविद्यालयपरिसरे उच्चद्रव्यमानप्रकाशप्रणालीनामुपयोगः क्रियते ।

एतेषां सर्वेषां ***transparency audit*** प्रतिवर्षं विश्वविद्यालयेन कार्यते अस्य प्रतिवेदनं विश्वविद्यालयस्य अन्तर्जाले प्रदर्शनं विहितं वर्तते ।

***The English version is available in the additional information link.***

| File Description | Document |
| --- | --- |
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

**7.2 Best Practices**

***7.2.1 State at least two institutional best practices (as per NAAC format)***

***रा. मू. प्र. परिषदः प्रपत्रानुसारेण संस्थायाः सर्वोत्तमं परिपाटिद्वयम् उल्लिख्यताम्।***

**Answer:**

### 1. सर्वोत्तमपरिपाटेः शीर्षकम्-

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयेन भारतीयज्ञानपरम्परां रक्षितुं, परिपालयितुं, संवर्धयितुं, औन्नत्यञ्च नेतुं विविधविद्यामयाः वैशिष्ट्ययुक्ताः क्रियाकलापाः सञ्चाल्यन्ते। तेषु क्रियाकलापेषु प्रधानतया योगशिक्षा, प्राकृतिकचिकित्सा, इष्टियागः वास्तुविद्या, भैषज्यज्योतिषम्, व्याकरणम् दर्शन साहित्यादयो विषयाश्च। एषु क्रियाकलापेषु **"वास्तुविद्याभ्यासः"** अन्यतमो नूतनप्रकल्पो वर्तते। अस्माकं विश्वविद्यालयस्य सर्वोत्तमपरिपाटिः **"वास्तुविद्याऽभ्यासः।"**

### 2. सर्वोत्तमपरिपाटेः उद्देश्यानि-

वास्तुशास्त्रं प्राचीनभारतीयवास्तुशिल्पप्रणाली अस्ति, अस्याः उद्देश्यानि बहुविधानि सन्ति, तेषु मुख्यानि अत्र उल्लिख्यन्ते-

1. वास्तुसिद्धान्तस्य ज्ञानविज्ञानस्य च प्रचारः प्रसारश्च, भारतीयज्ञानपरम्परायाः विकासः स्थापनञ्च।
2. पारम्परिकवास्तुशास्त्रस्य आधुनिकवास्तुविद्यया समन्वयः।
3. वास्तुशास्त्रसम्बन्धिक्रियाकलापानाम् आयोजनपुरस्सरं प्राचीनवास्तुशास्त्रपरम्परायाः संरक्षणं, हस्तान्तरणं, संवर्धनञ्चेति।
4. वास्तुविद्यायाः प्रायोगिकरूपेण शिक्षणं भवति ।
5. प्राचीनभारतीयवास्तुशिल्पकलायाः परिज्ञानं सर्वेभ्यो नागरिकेभ्यो यथा स्यात्।
6. गृहेषु मन्दिरेषु सामान्यभवनेषु व्यावसायिकभवनेषु सकारात्मकः ऊर्जाप्रवाहो भवेत् ।
7. संस्कृतच्छात्रेभ्यः तदितरेभ्यः छात्रेभ्यः वास्तुविद्यायाः प्रशिक्षणं प्रदाय जीविकावसरप्रदानम्।
8. वास्तुकलायाः शास्त्रीय-कलात्मक-वैज्ञानिकपक्षाणाम् उपस्थापनम्।
9. वास्तुशास्त्रस्य मानकग्रन्थेषु यथा- समराङ्गणसूत्रधारे विश्वकर्मवास्तुशास्त्रे शिल्पशास्त्रेत्यादिषु च वास्तुशास्त्रस्य त्रयो भेदाः उपलभ्यन्ते। ते च त्रयो भेदाः- 1. स्थापत्यम्, 2. शिल्पम्, 3. चित्रम्। वास्तुशास्त्रस्य त्रिविधभेदानां शिक्षण-प्रशिक्षणम्, प्राचीनस्थापत्य-चित्र-शिल्पकलानाम् आधुनिकवास्तुविज्ञानेन सह सुतरां समन्वयो भवेत्।

### 3. सन्दर्भः

विश्वविद्यालयः प्रसङ्गेऽस्मिन् पारम्परिकवास्तुविद्यायाः पठन-पाठनम्, शिक्षण-प्रशिक्षणम्, संरक्षणम्, संवर्धनम्, हस्तान्तरणादीनि क्रियाकलापानि सञ्चालयति, इति सर्वं समूलं सप्रमाणञ्च प्रस्तूयते।

### परिपाटिः

श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः भारतीयज्ञानपरम्परायाः भारतीयसंस्कृतेः आधारभूतसिद्धान्तानां च प्रचाराय -प्रसाराय संरक्षणाय, संवर्धनाय च सर्वदा प्रयतमानो वर्तते। एतदर्थं वैदिकवाङ्मयादारभ्य लौकिकसंस्कृतसाहित्यं यावत् यत्प्रतिनिधिभूतसाहित्यम्, तत्सहायकं वाङ्मयञ्च विश्वविद्यालये पाठ्यक्रमादिरूपेण पाठ्यते तद्यथा- वैदिकसाहित्यम्, पुराणानि, व्याकरणम्, ज्योतिषम्, वास्तुः, शिक्षादयश्च।

उपर्युक्तेषु भारतीयसंस्कृतिसंवर्धकेषु प्रकल्पेषु वास्तुशास्त्रम् अन्यतमं वर्तते। अस्यशास्त्रस्यापरनाम स्थापत्यमपि वर्तते । अथर्ववेदस्य उपवेदत्वेन स्थापत्यवेदः स्मर्यते। यथोक्तं श्रीमद्भागवतमहापुराणे

**आयुर्वेदं धनुर्वेदं गान्धर्ववेदमात्मनः।**

**स्थापत्यं चासृजद्वेदं क्रमात्पूर्वादिभिर्मुखैः ।।**

एवमेव कात्यायनचरणव्यूहेऽपि स्पष्टं निगदितं वर्तते, यथा – **अथर्वेदस्य स्थापत्यवेद उपवेद इत्याह भगवान् कात्यायनः ।** अनेन वास्तुशास्त्रस्य वेदशास्त्रेण साक्षात् सम्बन्धः सुस्पष्टो भवति ।

“वसन्ति यस्मिन्निति वास्तुः”। अर्थात् यत्र प्राणिनो वसन्ति। “वास्तुशास्त्रं प्रवक्ष्यामि लोकानां हितकाम्यया” इति आचार्यविश्वकर्मा लोकहिताय वास्तुशास्त्रविद्याम् उपदिशति। लोकोऽपि स्व-स्व-आवश्यकतानुगुणं निवासादीनां निर्मितिं विदधाति। जनाः सर्वदा सुखपूर्वकं जिजीविषन्ति। अत एव जनाः आवश्यकतानुगुणं प्रकृतौ भयरहितं स्थानं मनसि निधाय उषितुं प्रवर्तन्ते। निर्माणादौ वास्तुशास्त्रस्य उपादेयता सुतरां जेगीयते। वास्तुनिर्माणविद्यायाः ज्ञानं विना समीचीनं गृहभवनं देवसदनादिकं नैव निर्मातुं शक्यते। वास्तौ यदि दोषो भवेच्चेत् तादृग्वास्तौ कदापि मन्दिरभवनादिकं नैव निर्मातुं शक्यते। अतः पारम्परिकभारतीयवास्तुज्ञानं कथं साम्प्रतिककाले समाजाय महदुपयोगि भवेदेतदर्थं वास्तुशास्त्रविभागेन नैके प्रकल्पाः समायोज्यन्ते, अस्मिन् क्रमे-

वास्तुविभागः भूमेः गुणवत्तां दोषं च शास्त्रानुमतं विज्ञाय परीक्षणार्थमभ्यासं कारयति। कूपखननस्य भवनद्वारस्य प्रवेशद्वारस्य च विधिं शास्त्रानुसारं छात्रान् शिक्षयति अभ्यासं च कारयति।

चतुःषष्टि- एकाशीतिप्रभृतिपदवास्तुस्वरूपस्य ज्ञानं विधाय वास्तुचक्रनिर्माणप्रक्रियाया अभ्यासं कारयति। आवासीयभवने कक्षनिर्माणप्रकियायां पूजागृह-स्नानगृह-शौचालय-पाकशाला-शयनकक्ष-भोजनकक्ष-भण्डागार-शस्त्रगृह-रतिकक्ष-औषधकक्षादीनां निर्माणविधौ वास्तुशास्त्रीयपद्धतिमनुसृत्य शिक्षयति अभ्यासं च कारयति। एवञ्च एतेषां गृहाणां कक्षाणां निर्माणे कालस्य मुहूर्त्तस्य निर्णयं कर्तुं कालमुहूर्तादिविषयाणां परिज्ञानं कारयति। ग्रामेषु नगरेषु च कथं भवनं निर्मातुं शक्यते इति जिज्ञासायाः समाधानाय वास्तुशास्त्रीयं सिद्धान्तं विज्ञाप्य अभ्यासप्रकारं शिक्षयति। भवननिर्माणे भूखण्डस्य दैर्घ्यविस्तारौ क्षेत्रफलं च ज्ञापयति। अध्ययनकक्ष-अतिथिगृह-कार्यालयीयकक्ष-उपवेशनकक्ष-सोपानादीनां निर्माणं कथं कर्तव्यम् इति सैद्धान्तिकरीतिं विज्ञाप्य तन्निर्माव्यवस्थायाः अभ्यासं कारयति। गृहसमीपे वृक्षारोपणस्य उद्याननिर्माणस्य पुष्पवाटिकानिर्माणस्य च प्रक्रियां विज्ञाप्य तेषां शुभाशुभफलं ज्ञापयति शिक्षयति च। ज्योतिषशास्त्रानुसारं गृहारम्भयोगानां शुभाशुभमुहूर्तानां परिज्ञानमूलकमभ्यासं च कारयति।

भारतीयसंस्कृतौ मन्दिरस्य प्राधान्यं सर्वथा विद्यते, परन्तु मन्दिरनिर्माणे आदौ वास्तुनिर्णयः अवश्यं कर्तव्यः। पुनश्च मन्दिराङ्गत्वेन मण्डप-गर्भगृह-देवमूर्ति-आयुध-वाहनादीनां निर्माणं स्थापनञ्च आवश्यकम् इत्यत वास्तुशास्त्रविभागः सैद्धान्तिकज्ञानं शिक्षयति, तदङ्गत्वेन प्रायोगिकपक्षमपि सूचयति अभ्यासञ्च कारयति। एतद्विषयम् उररीकृत्य मध्ये मध्ये संगोष्ठीमाध्यमेन, कार्यशालामाध्यमेन च छात्रान् बोधयति शिक्षयति च। सङ्गोष्ठ्यां कार्याशालायाञ्च विभिन्नेभ्यः विश्वविद्यालयेभ्यः आचार्याः छात्राश्च भागं गृहीत्वा वास्तुविषये प्रशिक्षिताः भवन्ति। न केवलम् अस्माकं विश्वविद्यालयातः अपितु अन्येभ्यः विश्वविद्यालयेभ्यश्च विशिष्टव्याख्यानमालासु व्याख्यातृरूपेण विद्वांसः आयान्ति व्याख्यानानि च प्रददति। अनेन छात्राः लाभान्विताः भवन्ति, वास्तुरहस्यञ्च अधिगच्छन्ति।

वास्तुशास्त्रविभागः देवप्रतिष्ठामुहूर्तस्य अन्यवास्तुविषयकमुहूर्तानाञ्च पञ्चाङ्गशुद्धि- लग्नशुद्ध्यादि प्रक्रियां विज्ञाप्य प्रायोगिकरूपेण शिक्षणं कारयति। आयज्ञानं, शल्यज्ञानं, नक्षत्र-राश्यादीनां परिचयं च सैद्धान्तिकरूपेण प्रायोगिकरूपेण च कारयति। वैदिकविधिमनुसृत्य कर्मकाण्डविधिञ्चानुसृत्य शिलान्यास-वास्तुशान्त्यादिविधिं प्रबोधयति, अभ्यासं च कारयति। चिकित्सकीयव्यवस्थायां औषधकक्षादिनिर्माणस्य विधिं मुहूर्तं कालं च ज्ञापयति। अनेन प्रकारेण वास्तुशास्त्रविभागः वास्तुशास्त्रीयविधीनां परिज्ञानं प्रशिक्षणं सामाजिकोपादेयतां च शिक्षयति। प्राच्यनव्ययोर्मध्ये पारम्परिकं मूल्याङ्कनं तुलनं च विधाय भारतीयज्ञानपरम्परायाः वैशिष्ट्यं स्थापयति।

वास्तुशास्त्रविभागः पारम्परिकवास्तुशास्त्रस्य ज्ञाननिधिं छात्रेषु संक्रमितार्थं प्राच्य-नव्ययोः रीतिमनुसृत्य काले काले औपचारिक-अनौपचारिकव्याख्यानस्य आयोजनं करोति। विभागः वैदिककाले पौराणिककाले वा वास्तुशास्त्रस्य या दृष्टिः आसीत् तस्याः दृष्टेः परिशीलनं कृत्वा वर्तमानसमाजानुगुणम् अभ्यासं कारयति।

वास्तुशास्त्रविद्याऽभ्यासपरिपाटेः परिपालनाय सञ्चालनाय च विश्वविद्यालयस्य वास्तुशास्त्रविभागः सर्वदा कटिबद्धोऽस्ति, परिपालनक्रमे विभागेन बहुविधोपक्रमाः सञ्चाल्यन्ते। यथा- अपि च सम्पूर्णे भारते वस्तुशास्त्रविभाग: संस्कृतविश्वविद्यालयेषु अतिविरलतया वर्तते । अयं विभाग: श्रीलालबहादुरशास्त्रीराष्ट्रिसंस्कृतविश्वविद्यालयेन विगतेभ्य: नैकेभ्य: वर्षेभ्य: संचाल्यते । श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालयस्य वस्तुशास्त्रविभागेन अधो सूचितकार्यक्रमा: संचाल्यन्ते । ते यथा-

1. शास्त्री-पाठ्यक्रमः।
2. आचार्य-पाठ्यक्रमः।
3. विशिष्टाचार्य (M.Phil) 2020-2021सत्रपर्यन्तम् ।
4. विद्यावारिधिः (Ph.D)।
5. षाण्मासिकवास्तुशास्त्रीयप्रमाणपत्रीयपाठ्यक्रमः।
6. एकवर्षीयवास्तुशास्त्रीयडिप्लोमा इति कार्यक्रमः।
7. विश्वविद्यालयानुदानायोगस्य नवीकरणकार्यक्रमः (Innovative Programe) इत्यस्य कार्यक्रमस्यान्तर्गते सञ्चाल्यमानाः कार्यक्रमाः-

(अ). पी.जी.डिप्लोमा इति

(ब). अभिनवव्याख्यानमाला

1. द्विवर्षीयवास्तुशास्त्रीय-एडवांस्ड डिप्लोमा इति।
2. "वास्तुशास्त्रविमर्शः" इति शोधपत्रिका- वास्तुशास्त्रविभागेन विश्वविद्यालयानुदानायोगस्य केयरलिस्ट इत्यत्र सम्मिलिता वार्षिकी समकक्षसमीक्षिता मूल्याङ्किता च शोधपत्रिका निरन्तरं प्रकाश्यते।
3. नैसर्गिकपञ्चाङ्गम- केतकीगणिताधारितम् इदं दृक्तुल्यं पञ्चाङ्गमस्ति। नैसर्गिकशोधसंस्थया सह मिलित्वा पञ्चाङ्गमिदं 2021 ईसवीयाब्दे वास्तुशास्त्रविभागेन प्रकाशितम् । सम्प्रति अस्य निःशुल्कसम्पादनं गणितञ्च विभागीयाचार्यैः क्रियते ।
4. "वास्तुशास्त्रविभागः" "योजना एवं वास्तुकला विद्यालय नई दिल्ली (SPA) इत्यनयोः मध्ये पारस्परिकं सहमतिपत्रं (MOU) 16 दिसम्बर 2022 दिनाङ्के हस्ताक्षरितम् । अनयोः संयुक्ततत्त्वाधाने प्राचीनवास्तुकला -आधुनिकवास्तुकलयोः वैचित्र्यं सामञ्जस्यं च व्यवस्थापयितुं कार्यशालादिमाध्यमेन चिन्तनं मननं निधिध्यासनञ्च प्रचलति।
5. वास्तुशास्त्रविभाग-वैश्विकमहर्षिविश्वविद्यालययोः मध्ये अन्ताराष्ट्रियस्तरे 27.12.2023 दिनाङ्के पारस्परिकं सहमतिपत्रं (MOU) हस्ताक्षरितम् ।
6. संगोष्ठ्यः - वास्तुशास्त्रविभागेन स्वाधीनतया संयुक्ततत्त्वावधाने च राष्ट्रियान्ताराष्ट्रियसंगोष्ठीनाम् आयोजनं क्रियते।
7. कार्यशालाः - प्रतिवर्षं विभागेन वास्तुविषयोपेताः कार्यशालाः आयोज्यन्ते।
8. व्याख्यानमाला- वास्तुशास्त्रविभागेन परिपाटिपालनाय व्याख्यानमालाः अपि आयोज्यन्ते। यथा- प्रो.शुकदेवचतुर्वेदी-स्मारकव्याख्यानमाला। व्याख्यानमालायां विभिन्नवास्तुविषयाणां चर्चा क्रियते।
9. वास्तुशास्त्रीयप्राध्यापकैः वैक्तिकस्तरेऽपि विभिन्नशोधपरियोजनादिसु कार्यं क्रियते ।

**5. सर्वोत्तमपरिपाटेः साफल्यस्य प्रमाणम्-**

1. प्रामाणिकवास्तुविद्याप्रशिक्षणम् - विश्वविद्यालयस्य वास्तुशास्त्रविभागः प्राचीनग्रन्थेषु शास्त्रेषु निहितं परमगूढं, पारम्परिकं च दृष्टिकोणं प्रददाति, तच्च छात्राणां लाभाय भवति।
2. छात्राः वास्तुशास्त्रविषये अन्तर्दृष्टिं मार्गदर्शनञ्च प्राप्नुवन्ति।
3. छात्राः अनुसन्धानपरियोजनासु संलग्नाः भवन्ति।
4. छात्राः वास्तुसम्बन्धितसांस्कृतिकपक्षान् दार्शनिकपक्षान् च समृद्धान् कुर्वन्ति।
5. पठितविषयस्य व्यावहारिकानुप्रयोगः।
6. छात्राणां "वास्तुकला" "इंटीरियर डिजाइन" "परामर्शः" "रियल स्टेट" इत्यादिषु क्षेत्रेषु मार्गः प्रशस्तो भवति।
7. वास्तुज्ञानान्तरं पर्यावरणानुकूलाः प्रथाः संरक्षिताः भवन्ति।
8. परिपाटेः विशिष्टाभ्यासानाम् अनुष्ठानवशात् अस्मद्विद्यार्थिनः विविधासु प्रतियोगिपरीक्षासु (TGT, PGT, प्राध्यापकः, सहायक-आचार्यः, धर्मगुरुः इत्यादयः), शास्त्रीयस्पर्धासु औद्योगिकक्षेत्रे च विजयान्विताः भवन्ति।
9. छात्राः गृह-ग्राम-नगर-महानगर-राजधानी-राजमार्ग-देवसदन-स्नानागार - उद्यानादीनां कृतनिमार्णम् अवगन्तुं, भविष्ये तन्निर्माणं कर्तुं समर्थाः भवन्ति। एवं स्थापत्यकलाविषये छात्रा प्रवीणाः भवन्ति।
10. शिल्पकलान्तर्गते मृण्मयशिल्पम्, काष्ठशिल्पम्, धातुशिल्पम् (लौहशिल्पम्, ताम्रशिल्पम्, स्वर्णशिल्पम्, रत्नशिल्पम्) इत्यादीनां शिल्पकलानां ज्ञानं छात्राः सम्यक् कुर्वन्ति।
11. वास्तुनिर्माणयोजनाय गृहादीनां चित्रनिर्माणे छात्राः निपुणाः भवन्ति ।
12. चित्रकलायाः विषये छात्राः दक्षाः भवन्ति।
13. भारतीयज्ञानपरम्परायाः भारतीयसंस्कृतेश्च संरक्षणम्।
14. भारतीयपञ्चाङ्गस्य संरक्षणम् ।

**6. अभिमुखीकृताः समस्याः आवश्यकसंसाधनानि च-**

**समस्या-** इदं स्वाभाविकमस्ति यत् कस्याप्युपक्रमस्य आरम्भावसरे क्रियान्वयनावसरे च विविधसमस्याः अनुभूयन्ते। वास्तुशास्त्रस्य विद्याभ्यासक्रियान्वयनावसरेऽपि विभागेन समस्याः अनुभूताः। शास्त्री-आचार्यकक्षापाठ्यक्रमेषु वास्तुशास्त्रविद्या संस्कृतमाध्यमेनैव पाठ्यते। छात्राः सामान्यविद्यालयेभ्यः महाविद्यालयेभ्यः विश्वविद्यालयेभ्यश्च समायान्ति। प्रथमदृष्ट्या तेषां पुरतः, संस्कृतमाध्यमेन वास्तुशास्त्रस्य अवगमनम्, एका समस्या अनुभूयते।

**समाधानाम्-** उपर्युक्तां समस्यां समाधातुं विश्वविद्यालयस्तरे शास्त्री-कक्षायां संस्कृतशिक्षणावसरः छात्रेभ्यः प्रदीयते, तस्मात् छात्राणां वास्तुविद्यायां सुगतिः भवति। अनौपचारिकसंस्कृतशिक्षणशिविराणि चाल्यन्ते, तेन छात्राः संस्कृतभाषायां दक्षाः भवन्ति।

**समस्या-** अखिलेऽपि भारते वास्तुशास्त्रम् अवलम्ब्य न काचित् संस्था कार्यं करोति, न हि कश्चन महाविद्यालयः विश्वविद्यालयश्च। अतः आदौ क्रियान्वनावसरे परिपाटिं स्थापयितुं विभागं संस्थापयितु च आदर्शक्रियाकलापाः क्रियान्वयनसहायकविचाराश्च उपलब्धाः नाभवन् इति काचित् अन्यतमा समस्या। छात्राः अपि संस्थायां न्यूनाः आसन्, प्रचार-प्रसाराभावात्। इति काचन अन्या समस्या।

**समाधानम्-** विश्वविद्यालयस्य विभागीयाचार्यैः सुदीर्घवास्तुविद्यायाः वैदिकपरम्परायाः अध्ययनं विधाय आवश्यकसामग्रीः संकलय्य वास्तुशास्त्रविभागस्य स्थापना कृता। अभिनवकार्यक्रमाः ''Innovative Programmes'' इति पाठ्यक्रमेषु स्थापिताः सन्ति । तेन छात्राः अपि समागच्छन् विपुलसंख्यायाम्।

**समस्याः-** आधुनिकपरिप्रेक्ष्ये ''वास्तुशास्त्रम्'' ''वास्तुकला'' (Indian Architecture) इत्यनयोः समन्वयः कथं स्यात् इति महती समस्या। यतोहि पारम्परिकाधुनिकवास्तुशास्त्रवेतृषु महान् मतभेदो दृश्यते। पारम्परिकाः पृथक् मतं स्वीकुर्वन्ति, आधुनिकाश्च पृथक् आमनन्ति।

**समाधानम्-** अस्याः समस्याः समाधानप्रसङ्गे विभागेन, अभिनवकार्यक्रमाः, व्याख्यानमालाः, संगोष्ठ्यः, शोधपत्रिका, नैसर्गिकपञ्चाङ्गम् इत्यादयः उपक्रमाः क्रियन्ते। आधुनिकसंस्थाभिः सह विभागेन पारम्परिकाधुनिकवास्तुविद्याविषयकं सहमतिपत्रं हस्ताक्षरितम्। तेन विचारविनियमो भवति, समन्वयश्च।

**समस्या – 01.** वास्तुशास्त्रीयप्रयोगशाला, चित्रप्रदर्शनशाला, वास्तुसंग्रहालय इत्यादीनामभावः ।

02. वास्तुशास्त्रविभागे प्राध्यापकानां कृते कक्षव्यवस्था न्यूना, शिक्षणकक्षव्यवस्था अपि न्यूना

03 वास्तुशास्त्रीयनूतनोपस्करणानामपि अल्पता

समाधानम् – प्रसङ्गेऽस्मिन् विश्वविद्यालयेन अनवरतं प्रयसः क्रियमाणो वर्तते ।

**वेदविभागीय-इष्टियागविहारः**

**वेदविभागीय इष्टियागविहारस्य शिलान्यासकार्यक्रमः-**

वेदस्तु भरतीयज्ञानपरम्परायाः मुलमस्ति इति सर्वै: विदितो विषय: तदनुसारं श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविश्वविद्यालय: शास्त्रीयसमृद्धज्ञानपरम्परायाः संरक्षणमभिवर्धनञ्च, आधुनिकसमस्यानां सन्दर्भे प्राचीनज्ञानस्य व्याख्याकरणम्, एतस्य निरन्तरप्रासङ्गिकतां महत्त्वञ्च सुनिश्चितीकरणं कृत्वा ध्येयं मनसिनिधाय श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयेन विगतेभ्य: नैकेभ्य: वर्षेभ्य: वेदविभाग: संचाल्यते । अस्य विभागस्य अतिमुख्य: विषय: वर्तते यत् यज्ञ-यागादि कर्माणि तदन्तर्गततया -

विक्रमसंवत् २०८० मार्गशुक्लपंचम्यां गुरुवासरे तदनुसारं फरवरी २८, २०२४ ख्रिस्ताब्दे शुभदिने श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालस्य प्राङ्गणे विश्वविद्यालयस्य यशस्विना कुलपतिना **प्रो. मुरलीमनोहरपाठकमहोदयेन** पारम्पारिकरीत्या वैदिकविधानेन पौरोहित्यविभागीयवरिष्ठाचार्याणां प्रो. रामराज उपाध्यायमहोदयानां आचार्यत्वे समुपस्थितैः सर्वैरपि वेदपौरोहित्यविभागीयाध्यापकैः सह सोत्साहेन **वेदविभागीय इष्टियागविहारस्य शिलान्यासकार्यक्रमः** समनुष्ठितः ।

**वेदविभागीय इष्टियागविहारस्य समुद्घाटनम्-**

विक्रमसंवत् २०८१ चैत्रशुक्लपौर्णमास्यां तदनुसारेण २३ अप्रैल २०२४ ख्रिष्टाब्दे मङ्गलवासरे श्रीहनुमज्जयन्त्यवसरे मान्यमान्यानां श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतीनां प्रो.मुरलीमनोहरपाठकमहोदयानां करकमलाभ्यां वेदविभागीय इष्टियागविहारस्य समुद्घाटनं जातम्। तस्मिन्नवसरे विश्वविद्यालयस्य कुलसचिवाः श्रीसंतोषकुमारश्रीवास्तवमहोदयाः, वरिष्ठाचार्याः दैवज्ञप्रवराः वास्तुविभागाध्यक्षाः कुलानुशासकाश्च प्रो. देवीप्रसादत्रिपाठिमहोदयाः, वेदविभागाध्यक्षाः प्रो. देवेन्द्रप्रसादमिश्रमहोदयाः, वेदविभागीयाचार्याः वेदमूर्तयः प्रो. गोपालप्रसादशर्माणः, वेदविभागाध्यक्षचराः प्रो. रामानुज उपाध्यायमहोदयाः, विद्यावाचस्पतयः प्रो. सुन्दरनारायणझामहाभागाः, प्रो. हनुमानमिश्रमहाभागाः, आहिताग्निः डा. ओंकारयशवन्तसेलूकरः, पौरोहित्यविभागाध्यक्षाः प्रो. वृन्दावनदाशमहाभागाः, तथा परीक्षानियंत्रकमहोदयाः, ज्योतिषविभागाध्यक्षचराः प्रो. विनोदकुमारशर्ममहाभागाः, श्रीअंजनीरायमहाभागाः, श्रीरमाकान्त उपाध्यायमहाभागाः अन्ये चाध्यापकाः छात्राश्च समुपस्थिता आसन्।

**परिपाटेः उद्देश्यानि, आधारभूतसिद्धान्ताः, सन्दर्भः, संचाल्यमानाः प्रयोगाश्च।**

पुरुषार्थचतुष्टयसाध्यमेव मानवजन्मस्यास्य सार्थकता। स पुरुषार्थः धर्मपूर्वकमेव साधनीयः। 'धर्मेण हीनः पशुभिः समानः' इत्यादिवचनान्यपि मानवानां धर्ममार्गे एव प्रवृत्तिं जनयन्ति। धारणाद्धर्म इति निर्वचनधर्मोऽयमाचरणस्य विषयः न तु केवलं चर्चायाः विषयः। तर्हि कोऽयं धर्म इति जिज्ञासायां 'वेदोऽखिलो धर्ममूलम्" इत्यादीनि वचनानि वेदस्यैव सर्वधर्ममूलत्वं प्रतिपाद्य वैदिकमार्ग एव धर्मत्वेनानुसरणीय इति निर्दिशन्ति। वेदविज्ञानवेत्तार ऋषयो वैदिकं विज्ञानं प्रकारद्वयेनास्माकं समक्षं समुपस्थापितवन्तः। तत्रैकः साक्षाच्छब्दविन्यासमाध्यमेन संहिता-ब्राह्मण-श्रौतसूत्रादिरूपेण द्वितीयश्च वैदिकयज्ञीयकर्मकाण्डमाध्यमेन। समस्तेऽपि भारतवर्षे संस्कृतविश्वविद्यालयेषु प्रायः शब्दार्थप्रधानवेदाध्ययनस्य परम्परा दरीदृश्यते। किन्तु ' **वेदा हि यज्ञार्थमभिप्रवृत्ताः**' इति वाक्यानुसारं तथा वैदिकसाहित्यस्यावलोकनेन च एतत् स्पष्टं भवति यत् वेदस्य प्रायः ९०% वेदभागः साक्षात् श्रौतकर्मकाण्डस्यैव प्रतिपादनाय प्रवृत्तः। अर्थात् वैदिककर्मकाण्डमाध्यमेनैव ऋषयो वैदिकविज्ञानं अस्मभ्यमुपदिष्टवन्तः। दुर्भाग्यवशात् यज्ञप्रक्रियानां जटिलताकारणात् आलस्यवशात् आजीवनं पालनं कर्तुमशक्यत्वात् च वेदस्यास्य पूर्वार्धं विहाय अन्तिमवेदान्ताख्ये भागे एव प्रायः जनाः प्रवृत्ताः सन्ति। जनेषु प्रायः ''**ऋते ज्ञानान्न मुक्तिः**'' इति वचनप्राचुर्यत्वेन श्रुतत्वात् ज्ञानमार्गेनैवास्माकं मुक्तिरिति अव्याप्तदोषयुक्तो विचारः प्रचलितः। परिणामतः वेदस्य आदौ प्रतिपादितस्य मार्गस्य अनुसरणं विहाय जनाः वेदान्तमार्ग एव रताः अभवन्निति दरीदृश्यते।

लोके एको बृहत् भ्रमः प्रचलितो वर्तते यत् यज्ञमार्गस्य फलं भिन्नमस्ति ज्ञानमार्गस्य च फलं भिन्नमिति। अतो ज्ञानं विना मुक्तेरभावात् ज्ञानमार्ग एवास्माकं गतिः स्युरिति। ऋषय अपि मनुष्यस्य बिद्धिं ज्ञात्वा प्रश्नोऽयमुपस्थापितवन्तः यथा-

**अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः। इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे** " इति।

ये जनाः एवं प्रकारेण मात्र विद्यामार्ग एव रताः सन्ति ऋष्यनुसारं ते तु घोरतम अज्ञानरूप्यन्धकारे प्रविशन्ति। उक्तं यथा ईशावास्योपनिषदि

"**अन्धन्तमः प्रविशन्ति येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्याया□ रताः**" इति।

अतोऽत्र ध्यातव्यमस्ति यत् ब्रह्मविषयो अस्माकं कृते सर्वथा परोक्षविषयः। प्रत्यक्षभूतानां तत्त्वानामाधारेण साहाय्येन वा परोक्षत्तत्वानां ज्ञानं प्राप्तुं सौकर्यमनुभवामः। ऋषय अपि प्रत्यक्षयज्ञीयप्रयोगानां माध्यमेन परोक्षदेवताविज्ञानं प्रतिपादयितुं यतन्ति स्म। अत एव परोक्षदेवताज्ञानाय प्रथमं प्रत्यक्षयज्ञप्रक्रियाणाम् उपदेशः वेदे आदौ ऋषयः कृतवन्तः। एतेषां यज्ञीयप्रक्रियाणां प्रयोजनमेव देवताज्ञानं (ब्रह्मज्ञानं) अस्तीत्यत्र न संशयः। अत एव यज्ञीयप्रयोगानां ब्रह्मज्ञानेन सह एकत्वं श्रुतं यथा -

" **तस्मात् सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम्**" इति।

अत उभयोः कर्मज्ञानमार्गयोः जीवने अनुष्ठानं अनिवार्यमस्तीति कारणादेव वेदे ईशावस्योपनिषदि स्पष्टतया उक्तमस्ति यत् -

"**विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते**" इति।

अतो भारतवर्षे सर्वत्र विदेशे च वेदोक्तविद्यायाः (ज्ञानमार्गस्य) प्रचारः प्रचुरतया अभवत् किन्तु कर्मकाण्डविज्ञानस्य सर्वथैव लोपो जातः। अतो यावत् श्रौतकर्मणामाधारेण ब्रह्मज्ञानाय मोक्षाय वा प्रयत्नो न विधीयते तावत् जनाः अन्धकार एव

प्रविशन्ति इति श्रुतिवचनमेव प्रमाणम्। अतः श्रौतयज्ञानां ज्ञानं विना देवताज्ञानाभावात् वेदविज्ञानस्य स्वरूपं पूर्णरूपेण ज्ञातुं न शक्यते। तस्मात् वेदस्यादौ प्रतिपादितत्वात् कर्ममार्गस्यैव अध्ययनं अनुष्ठानं च प्रथमतया अनिवार्यमस्ति।

यज्ञीयकर्मणां जीवने अनिवार्यतया अनुष्ठानस्य महत्वं प्रतिपादयन् ऋषिः उपदिशति यत् -

**" कुर्वन्नेवह कर्माणि जिजीवेषेत् शतं समाः"** इति।

अर्थात् मनुष्यैः आजीवनं कर्ममार्गमेवानुसरेयुः इति। किं कर्म इति जिज्ञासायां **"यज्ञो वै श्रेष्ठतमं कर्म"** इति कथनानुसारं वेदोक्तयज्ञकर्म एव श्रेष्ठतमत्वादनुष्ठेय इति भाति। स यज्ञकर्ममार्ग एव वेदोक्तः प्रथमो धर्मः इत्यत्र न संदेहः। उक्तं यथा -

**" यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्"** इति।

देवताज्ञानाय मोक्षप्राप्तुं वा **"नान्यः पन्था विद्यतेऽयनाय"** इत्यपि निर्दिशति श्रुतिः।

वेदान्ते उपनिषद्द्वारा प्रतिपादित: ज्ञानात्मकधर्मविषय: समेषां कृते परोक्षः। किन्तु यज्ञा: वेदविज्ञानस्य मूर्त्तस्वरूपाः सन्ति। अतो वैदिकविज्ञानस्य अध्ययनाय यज्ञा: साक्षात् प्रत्यक्षरूपेण उपकारका: सन्तीत्यत्र न संदेह:।

इष्टियागः समेषां श्रौतकर्मणां मध्ये प्रकृतियागो वर्तते। अतः शुक्लयजुर्वेदस्य संहितायाः ब्राह्मणभागस्य चादौ अस्यैव यागस्य प्रथमतया अनुष्ठानं विहितम्। आहिताग्निना आजीवनं अग्निहोत्रं इष्टियागश्च अनिवार्यतया कर्तव्यमिति विधानं श्रुत्या कृतं वर्तते। आधानप्रयोगः स्याद्, चातुर्मास्ययागः स्याद्, निरूढपशुबन्धयागो वा स्याद् अथवा साक्षात् सोमयागो भवेत् सर्वत्र दर्शपौर्णमासयागज्ञानं अनिवार्यत्वेन भवेदेव। अत एव प्रायः भारतवर्षे संस्कृतविश्वविद्यालयेऽपि सर्वत्र अस्य प्रयोगस्य अध्ययनं प्रचलति। किन्तु सर्वत्र साक्षात् प्रयोगं विनैव ग्रन्थमात्रं पठित्वा अध्ययनं प्रचलति। वयं सर्वे जानीमः यत् यज्ञाः वेदस्य प्रायोगिकज्ञानविषयाः सन्ति। अतो ग्रन्थमात्रावलोकनेन यज्ञीयविद्यायाः ज्ञानं न कदापि भवितुं शक्यते। यथा सैनिकानां कृते शस्त्रस्य प्रयोगज्ञानस्य साक्षात् प्रयोगकरणेनैव सिद्धिर्भवति न तु केवलशस्त्रविषयकज्ञानमात्रेण तस्य शस्त्रस्य प्रयोगं कर्तुं सैनिकाः समर्थाः भवितुं शक्नुवन्ति। तथैव वेदाध्ययने प्रवृत्ताः छात्राः अपि न केवलं यज्ञीयप्रयोगग्रन्थज्ञानेनैव प्रयोगविज्ञानं कर्तुं प्रभवन्ति। अतो यज्ञीयप्रयोगानां साक्षात् प्रयोगज्ञानेनैव तस्य वास्तविकं विज्ञानं अवगन्तुं पारयामः। अतो यज्ञविज्ञानं विना वैदिकविज्ञानाध्ययनस्य कल्पनाऽपि वयं नैव कर्तुं शक्नुमः। किन्तु वर्तमानसमये भारतवर्षे कुत्रापि श्रौतकर्मकाण्डस्य साक्षात् प्रायोगिकमध्ययनं न प्रचलति। अत एव यथार्थवेदाध्ययनाय यज्ञीयप्रयोगविज्ञानस्य अनिवार्यतया अध्ययनस्य महत्त्वं मनसि निधाय दिल्लीस्थस्य श्रीलालबहादुदुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य माननीयकुलपतिमहाभागाः श्रीमन्तः मुरलीमनोहरपाठकमहाभागाः अस्याः इष्टियागशालायाः निर्माणं कर्तुं कृतसंकल्पाः अभूवन्। माननीयानां कुलपतिवर्याणामनेन संकल्पेन समस्तभारतवर्षे विद्यमानेषु विश्वविद्यालयेषु अस्माकं विश्वविद्यालयोऽद्वितीयो विश्वविद्यालयो जातो यत्र सप्रायोगिकं वेदाध्ययनं प्रचलति।

उक्तमपि नीतौ "ज्ञानं भारः क्रियां विना" इति। वस्तुतः ज्ञानस्य साफल्यं तदैव सिद्ध्यति यदा तस्य ज्ञानस्य प्रयोगोऽपि भवेत्। यदि प्रयोगो न भवति चेत्तादृशं ज्ञानं भारस्वरूपमिवैव भवतीति धिया अस्य विश्वविद्यालयस्य वेदविभागो भुवि प्रथमस्थाने सन्तिष्ठतीति कथने न कस्यापि विप्रतिपत्तिरिति शम्।

**इष्टियागविहारे अनुष्ठीयमानाः नित्यकर्मानुष्ठानविषयाः ईदृशाः सन्ति-**

1. प्रतिदिनं नित्यं सायं-प्रातः अग्निहोत्रहोमः अनुष्ठीयते।
2. प्रतिशुक्लप्रतिपत्तिथौ पौर्णमासेष्टियागः अनुष्ठीयते।
3. अमावास्यायां शाखाच्छेदनं दधिनिष्पत्त्यर्थं च गोदोहनविधिर्भवति।
4. प्रतिकृष्णप्रतिपत्तिथौ दर्शेष्टियागस्यानुष्ठानं विधीयते।
5. षण्मासाभ्यन्तरे वसन्ते शरदि च पौर्णिमायाम् आग्रायणेष्टियागस्य आयोजनं क्रियते।
6. विद्यार्थिनां कृते विकृतीष्टीनां प्रयोगज्ञानाय मित्रविन्देष्टिः, आग्नेयेष्टिः इत्यादि विकृतियागानामपि यथासमयमनुष्ठानं विधास्यते।
7. प्रतिपक्षे (शुक्लपक्षे कृष्णपक्षे च ) आवसथ्याग्नौ दर्शपौर्णमासस्थालीपाकप्रयोगद्वारा स्मार्तेष्टेः अनुष्ठानं क्रियते।

**परिपाटेः वैशिष्ट्यं साफल्यं च** –

1. विदितमेवास्ति यत् श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य वेदविभागे सांप्रतं शुक्लयजुर्वेदस्याध्ययनमध्यापनं प्रचलति। शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायां, शतपथब्राह्मणे, कात्यायनश्रौतसूत्रे च सर्वादौ दर्शपूर्णमासयागयोरेव वर्णनमस्ति। वेदविभागीय शास्त्रि-आचार्यकक्षासु उपर्युक्ताः ग्रन्थाः पाठ्यक्रमे संलग्नाः सन्ति। यद्यपि पाठ्यक्रमे दर्शपूर्णमासादारभ्य सोमाङ्गभूताग्निचयनयागपर्यन्ताः विषयाः संलग्नाः सन्ति। तत्र इष्टियागः सर्वेषां यागानां प्रकृतिभूतत्वात् मौलिको वर्तत इति सर्वैरपि विद्वद्भिरङ्गीक्रियते। अत एव विश्वविद्यालयप्रशासनद्वारा वेदविभागीयच्छात्रान् मूलभूतस्य दर्शपूर्णमासयागस्य प्रायोगिकैः स्वरूपैः परिचायनाय एषः प्रकल्पः समारब्धः।
2. यस्य ग्रन्थस्य येषां विषयाणां वा अध्ययनमस्माभिः क्रियते तेषां प्रायोगिकपक्षानामवगमनमपि अनिवार्यमेव भवति। अधीतविषयाणामुपयोगिता प्रायोगिकपक्षमुपर्येव समाश्रिता भवति तदनु अस्माकं छात्राः अधीतविषयाणां प्रयोगं कृत्वा पूर्णरूपेण स्वविषये कुशलाः भविष्यन्तीत्येवास्य यागविहारप्रकल्पस्योपयोगितेति कथने नास्ति काचित् विप्रतिपत्तिः।

आधुनिकवैज्ञानिकाः समाजोपकाराय यथा वैज्ञानिकसिद्धान्तान् साक्षात् प्रयोगमाध्यमेन प्रदर्शयन्ति तथैव प्राचिनर्षिवैज्ञानिकैः प्रतिपादितान् वेदोक्तसिद्धान्तान्  वैज्ञानिकश्रौतप्रयोगानां समनुष्ठानेनैव साक्षात् कर्तुं शक्नुमः। अर्थात् मात्र अर्थज्ञानापेक्षया साक्षात् श्रौतयज्ञप्रयोगज्ञानं वैदिकविज्ञानावगमनाय श्रेष्ठतमोपायः इत्यत्र न कश्चित् संदेहः।

1. **यज्ञाः वेदस्य मूर्तविज्ञानपरकाः सन्ति-**

अपौरुषेयस्य वेदस्य परोक्षविषयप्रतिपादकत्वं लोके सर्वे जानन्ति एव। उच्यते यथा वैदिकसाहित्यविषये-

प्रत्यक्षेनानुमित्या वा यस्तूपायो न विद्यते।

एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता इति।

एवं परोक्षविद्यायुक्तानां वेदानां प्रत्यक्षीकर्तुं यज्ञाः एव वैदिकविद्यायाः वैदिकविज्ञानस्य वा मूर्तविद्यारूपाः सन्ति। पत्यक्षप्रिया वै मनुष्याः अतः प्रत्यक्षयज्ञविद्यामाध्यमेन परोक्षवैदिकविज्ञानं वयं सहजतया ज्ञातुं शक्नुमः।

1. **सर्वं यज्ञात् प्रसिद्ध्यति-**

वैदिककालिनसामाजे देवताकाले वा देवताः यत्किमपि प्राप्तुमिच्छन्ति तत् सर्वं यज्ञेनैव प्राप्नुवन्ति स्म। साक्षात् प्रजापतिरपि इमां सृष्टिं जनयितुं यागानुष्ठानमेव चकार इति वैदिकसाहित्ये इतस्ततः प्रतिपादितम् गीतायां च भगवताऽप्युक्तमस्ति यत्-

"सहयज्ञाः प्रजाः सृष्टा पुरोवाचः प्रजापतिः" इति।

यथा देवतानामाचरणं तथाऽनु मनुष्याणामिति वचनबलात् देवतावदेव वयमपि अस्माकं समस्तकामनाः इष्टियागमाध्यमेन फलीकुर्मः।  इष्टियागेषु नानाविधकाम्येष्टियागाः सन्ति कात्यायनश्रौतसूत्रे च समेषां कामनानां पूर्णतायाः कृते आग्नेयेष्टियागस्य प्रावधानं कृतम्। (का.श्रौ. ४/५/१५) अतः समस्त कामनानां संपूर्तये कामधुगऽयं इष्टियागः समाजोपकारदृष्ट्या च महदावश्यकमित्यत्र नास्ति संन्देहः।

**सर्वोत्तमपरिपाटेः क्रियान्वयनावसरे अभिमुखीकृतानां समस्यानामभिज्ञान, आवश्यकानां संसाधनानां निर्देशश्च-**

समस्या-

1. समाजे वैदिकश्रौतप्रयोगकर्मणामभावात् मात्र अर्थपरकानुसंधान एव जनानां शोधछात्राणां च प्रवृत्तिर्दृश्यते। एवं समाजे श्रौतप्रयोगविषयकमज्ञानमेव अत्र महती समस्या।
2. यज्ञसंस्थासंचालनाय अग्निहोत्रीयजमानस्यावश्यकता वर्तते। अग्निहोत्रार्थं अग्न्याधानमावश्यकं भवति अत्र प्रश्नः समुदेति यत् अग्न्याधानाधिकारीति? "**जातपुत्रः कृष्णकेशोऽग्नीनादधीत**" इति कथनानुसारं युवावस्थायामेव अग्न्याधानं अग्निहोत्रिभिः कर्तव्यमिति श्रौतादेशः प्राप्यते। साम्प्रतं ये युवानः सन्ति ते धनोपार्जनाय वेदविषयं विहाय भिन्नविषयेषु अध्ययनरताः भवन्ति। तस्मात् कारणात् समाजे अग्निहोत्रधारिणां जनानामभावो दृश्यते।

वैदिकयज्ञप्रक्रियानां ग्रन्थज्ञानमात्रेण कर्मानुष्ठानकर्तुमशक्यत्वात् परंपरागतप्रयोगकर्तॄणां विदुषां मार्गदर्शने एतेषां श्रौतप्रयोगानामनुष्ठानं कर्तव्यमस्ति। भारतवर्षे श्रौतयज्ञपरंपरावलंबिनः विद्वांसः विरलाः सन्ति। विश्वविद्यालये तेषां विदुषां

सर्वथा उपस्थितेरभावो वर्तते। तात्पर्यतः अग्निहोत्रीणामभावे श्रौतयज्ञसंस्थासंचालनम् अत्यन्तं दुष्करं भवति इत्यस्त्येका महती समस्या।

1. अहरहः संध्यामुपासीत यथेतं वचनं महत्वपूर्णं तथैव प्रत्यहमग्निहोत्रं कर्तव्यमिति श्रौतशास्त्रस्यादेशः। अग्निहोत्रयज्ञसंपादनाय गोदुग्धस्य परमावश्यकता भवति। गोदुग्धं गोमूत्रं गोमयं गोघृतं इत्यादिद्रव्यं गां विना नैव शक्यते प्राप्तुम्। अतः यत्राग्निहोत्रस्यानुष्ठानं भवेत् तत्र गोर्व्यवस्था भवेदेव। विक्रालभाले कलिकाले दिल्लीप्रदेशे स्वल्पस्थाने संस्थितेऽस्मिन् विश्वविद्यालये कथं गोः संरक्षणं, कुत्र गोशालास्थापनं कुत्र गोचारः करणीय इत्येतादृशाः समस्याः दरीदृश्यन्ते।
2. ऋत्विजामभावः-

यज्ञप्रक्रियाकर्तुं यद्य कोऽपि अधिकारीयजमानः कदाचिदुपलभ्यते तर्हि यज्ञप्रयोगः न केवलं यजमानेन एकेनैव साध्यः अपितु तदर्थं यज्ञीयप्रयोगज्ञातारः ऋत्विजाः भवेयुः। एतेषां ऋत्विजामभावोऽपि एका समस्या एव।

**समस्यानिराकरणम्-**

1. यः श्रौतयज्ञप्रयोगं जानाति अनुतिष्ठति च स एव यथावत् अध्यापयितुं प्रभवति। अतः यज्ञशालायाः निकटे श्रौतयज्ञप्रक्रियायाः विद्वान् कस्यचित् आहिताग्नेः सर्त्विक् निवासव्यवस्था अपि कर्तव्या। यतो हि सायं-प्रातः नित्यकर्मार्थं सौकर्यं भवेत् यज्ञीयकर्मकाण्डस्य च यथाकालमनुष्ठानं भवेत्।
2. गोशालायाः गोपालनस्य च व्यवस्था भाव्यते चेद् वरम्। नो चेत् यथाप्रयोगं गोदुग्धादिपदार्थानामुपलब्धिर्भवेत् एतादृशी व्यवस्था स्याद्।
3. विश्वविद्यालये वेदविभागीयपाठ्यक्रमे वैदिकछात्राणां कृते श्रौतयज्ञीयप्रयोगशालायां समनुष्ठेयमाननां प्रयोगानां साक्षात् अवलोकनस्य अध्ययनप्रणालिः अनिवार्यतया योजनीया।
4. अर्थानुसंधानापेक्षया प्रयोगानुसंधाने शोधछात्राणां प्रवृत्तिः भवेत् एतदर्थं श्रौतप्रयोगानां वैज्ञानिकसिद्धान्तानामुपरि अधिकाधिकशोधकार्याणि कारयितुं संस्थया प्रयत्नो विधयः।

अनेन प्रकारेण समाजे वैदिकविज्ञानस्य यथावत् वैज्ञानिकं स्वरूपं स्पष्टीकर्तुं श्रौतयज्ञीयविज्ञानस्यावश्यकतां ज्ञात्वा यथा अनेन विश्वविद्यालयेन श्रौतयागविहारपरियोजनापरिकल्पिता तथैव भारतवर्षे समस्तसंस्कृतविश्वविद्यालयेषु विशेषतः यस्मिन् विश्वविद्यालये वेदविषयकमध्ययनमनुसंधानं च प्रचलति तत्र सर्वत्र एतादृशायाः श्रौतयज्ञीयप्रयोगशालायाः निर्माणम् श्रौतप्रयोगानुष्ठानञ्च अत्यन्तमावश्यकमस्तीति शम्।

---

[1] श्रीमद्भागवतमहापुराणम् 3.12.32

***The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Any additional information अतिरिक्ताः सूचनाः | View Document |
| Provide link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

**7.3 Institutional Distinctiveness**

***7.3.1 Describe/Explain the performance of the institution in one area distinctive to its vision, priority and thrust***

***संस्थया स्वस्य दूरदृष्टिं, प्राथम्यं, प्रधानविषयञ्च मनसि निधाय एकस्मिन् विशिष्टक्षेत्रे स्वेन कृतस्य कार्यनिष्पादनस्य विवरणं दीयताम् ।***

**Answer:**

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः स्वस्य दूरदृष्टिं प्राथम्यं प्रधानविषयञ्च मनसि निधाय शैक्षणिकक्षेत्रेषु हिन्दू-अध्ययनम्, भारतीयज्ञानपरम्परा, वास्तुशास्त्रम्, समाजशास्त्रम् योगविज्ञानम् चेत्यादिनां विषयाणां, शिक्षणेतरक्षेत्रेषु चिकित्सकीयव्यवस्था, स्मार्टकक्षव्यवस्था, आधुनिकतकनीकीसंस्कृतपुस्तकालयव्यवस्था चेत्यादिनां विशिष्टक्षेत्रमभिलक्ष्य दत्तावधानं यद्यपि प्रदत्तवान् तथापि विश्वविद्यालयस्य शिक्षाविभागे संस्थापितं **शिक्षणाधिगमकेन्द्रं** (*Teaching Learning center)* दूरदृष्टिसम्पन्नं निरन्तरं कार्यं करोति । शिक्षामन्त्रालयस्य उच्चशिक्षाविभागस्य अन्तर्गतस्य पंडितमदनमोहनमालवीयराष्ट्रियशिक्षक-शिक्षण-मिशन-योजना-अन्तर्गतस्य (***PMMMNMTT)*** 2017 तमे वर्षे नवदेहलीस्थ श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालये (केन्द्रीयविश्वविद्यालयः) शिक्षणाधिगमकेन्द्रम् (***TLC)*** इत्यस्य स्थापनं भर्तसर्वकारेण कृतम् । शिक्षक-शिक्षण-व्यवस्थानां परिकल्पना, विकासः, कार्यान्वयनम्, मूल्याङ्कनं च कर्तुं भाषाशिक्षायाः विशेषतः संस्कृतेन सह सम्बद्धानां शिक्षकाणां, शिक्षकशिक्षकाणां च कौशलं योग्यतां च विकासयितुं भारतसर्वकारेण अस्य केन्द्रस्य स्थापनं कृतम् । केन्द्रस्य दृष्टेः अनुरूपं कार्यशाला, संगोष्ठी, सम्मेलनं तथा च प्रशिक्षणकार्यक्रमरूपेण आफलाइन् तथा ऑनलाइन् मोड् इत्येतयोः रूपेण ६० कार्यक्रमाः सफलतया आयोजिताः आसन् । एतदतिरिक्तं केन्द्रेण संस्कृतशिक्षणार्थं हस्तपुस्तिकाद्वयं प्रकाशितं यत् एकम् उच्चप्राथमिकस्तरं अपरं माध्यमिकस्तरं च । 2018 तमे वर्षे शिक्षामन्त्रालयस्य उच्चशिक्षाविभागेन संस्कृतविषये स्वायम-माध्यमेन अध्यापन-क्षेत्रे ऑनलाइन-वार्षिक-पुनःपाठ्यचर्या-कार्यक्रमस्य (***ARPIT)*** विकासाय, वितरणाय च केन्द्रं राष्ट्रिय-संसाधनकेन्द्रत्वेन (***NRC)*** इति नामाङ्कितम् आसीत् । अस्य सफलतया त्रयः ***ARPIT*** पाठ्यक्रमाः विकसिताः, संचालनं च कृतम् आसीत् । ***ARPIT*** 2018 (संस्कृतशिक्षणस्य पद्धतिः), ***ARPIT*** 2019 (संस्कृतशिक्षाशास्त्रम्), तथा च 2020 तमे वर्षे ***ARPIT*** 2019 इत्यस्य पुनः संचालनम् आसीत् । सर्वेषां एआरपीआईटी पाठ्यक्रमानाम् नामाङ्कितैः शिक्षिकैः 5 मध्ये 4.9 इति मूल्याङ्कनं कृतम् । 2019 तमे वर्षे नूतनतया प्रविष्टाणाम् उच्चशिक्षासंकायानां कृते एकमासस्य अनिवार्यसंकायप्रवेशकार्यक्रमस्य (***FIP)*** संचालनार्थं 30 नवीनकेन्द्राणां सूच्याम् अस्य केन्द्रस्य अभिज्ञानं कृतम् आसीत् । तथा च सफलतया 04 ***FIPs*** आयोजितम् । 2023 तमस्य वर्षस्य सितम्बरमासे विश्वविद्यालयानुदान-आयोगस्य (***UGC)*** अन्तर्गतं शिक्षणाधिगमकेन्द्रस्य नाम परिवर्तनं जातं वर्तते । अस्य नाम मालविय-मिशन-शिक्षक-प्रशिक्षणकेन्द्रम् (***MMTTC)*** इति कृतम् । शिक्षामन्त्रालयेन एनईपी 2020 इत्यस्य उद्देश्यं पूरयितुं तथा च आधारभूतसंरचनानां, मानवीय-वित्तीय-संसाधनानाम् इष्टतम-उपयोगाय मानवसंसाधनविकासकेन्द्राणां (***HRDCs)*** तथा ***PMMMNMTT*** केन्द्राणां मध्ये सुदृढीकरणं एकीकरणं च प्रयतितम् अस्ति तथा च लोकप्रियतां प्राप्तुं निर्णयः कृतः अस्ति । माननीयशिक्षामन्त्री श्री धर्मेन्द्रप्रधानमहोदयः 5 दिनांके सितम्बरमासे 2023 तमे वर्षे अस्य केन्द्रस्य आरम्भम् अकरोत् । अस्य कार्यक्रमस्य कार्यान्वयनार्थं 111 उच्चशिक्षासंस्थाः (***HEIs) (***66 ***HRDCs &*** 45 ***PMMMNMTTs)*** मलाविय-मिशन-शिक्षकप्रशिक्षणकेन्द्राणि (***MMTTCs)*** इति चिह्निताः आसन् । तथा च चिह्नितेषु केन्द्रेषु अस्माकं विश्वविद्यालयस्य ***TLC*** अन्यतमः आसीत् । 30 दिनांके अक्टूबरमासे 2023 तमे वर्षे मलाविय- मिशन-शिक्षकप्रशिक्षणकेन्द्रस्य उद्घाटनं यूजीसी-अध्यक्षेन माननीय - प्रो.एम.जगदीशकुमारमहोदयेन कृतम् । अस्य केन्द्रस्य दृष्टिः एनईपी 2020 इत्यस्य अनुरूपम् उत्तमशिक्षणम्, अनुसन्धानं च कर्तुम् उच्चशिक्षासंकायसदस्यानां कौशलदक्षतां च विकासयितुं वर्तते । केन्द्रस्य नामान्तरणस्य अनन्तरं 24 कार्यक्रमाः सफलतया संचालिताः सन्ति । केन्द्रेण 18 - अष्टदिनानाम् ऑनलाइन् ***NEP*** अभिमुखीकरण-संवेदन-कार्यक्रमाः, 01- एकमासस्य संकाय-प्रवर्तन-कार्यक्रमः, 04 एकसप्ताहस्य अल्पकालिक-कार्यक्रमाः तथा च 01- द्वि-सप्ताहस्य पुनःपाठ्यचार्या-कार्यक्रमाः च चालिताः सन्ति । केन्द्रेण देशे 8000 तः अधिकाः संकायसदस्याः तथा च शोधविद्वांसः च लाभान्विताः सन्ति । अस्य विवरणम् अधो दीयते ।

केन्द्रेऽस्मिन् आभाषीयपटल *(*आनलाईन) माध्यमेन आवासीयपटल (आफलाईन) माध्यमेन च कार्यक्रमाणां समायोजनं भवति। माध्यमिकस्तरे संस्कृतशिक्षणार्थं ***'Formate Development for pupil teacher Handbook'*** छात्रशिक्षकहस्तपुस्तिकायाः प्रारूपविषयमधिकृत्य ***26-***8-1*9* तः ***28-8-19*** दिनाङ्कं यावत् केन्द्रेण त्रिदिवसीया कार्यशाला समायोजिता। कार्यशालायाः समुद्घाटनं तत्कालीनाः कुलपतयः प्रो. रमेशकुमारपाण्डेयमहाभागाः कृतवन्तः, केन्द्रस्यास्य प्रो. अमितापाण्डेयमहाभागाः निदेशिका, अस्याः कार्यशालायाः सञ्चालनं कृतवत्यः। अत्र सप्तप्रतिभागिनः उपस्थिताः आसन्। पुनश्च माध्यमिकस्तरीयसंस्कृतशिक्षणार्थं छात्रशिक्षकयोः सामग्रीविकासविषयकमुररीकृत्य 1***6-9-201***9 तः ***25-9-201***9 यावत् पञ्चदिवसीया कार्यशाला अनेन केन्द्रेण समायोजिता । यत्र पूर्वनिर्धारितपाठ्यक्रमेषु कस्यचन पाठ्यक्रमस्य लेखनं ***NCERT New Delhi*** इत्यस्य केन्द्रस्य भाषाशिक्षाविभागस्य आचार्यैः प्रो. जतीन्द्रमोहोदयेन कृतम् । अत्र 15 प्रतिभागिनः भागं गृहीतवन्तः।

भारतस्य पण्डितमदनमोहनमालवीयराष्ट्रियशिक्षकशिक्षणमिशनस्य योजनायाः अन्तर्गतं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षकशिक्षणकेन्द्रं 22-1-2020 तः 25-1- 2020 यावत् ***"Creating and using leerning management system"*** शिक्षणप्रबन्धनव्यवस्थायाः निर्माणं उपयोगं च इति विषयं पुरस्कृत्य एका राष्ट्रिया कार्यशाला समायोजिता। तत्र एल.एम.एस. सम्बद्धानां विषयाणां परिचयः एल.एम.एस.निर्माणविधिः, तद्वितरणम्,

आदानप्रदानसम्बद्धदक्षताविकासश्च इत्यादिविषयाणां विवेचनं त्तसिद्धान्तस्य व्यवस्थापनमेव अस्याः कार्यशालायाः मुख्यमुद्देश्यम् आसीत् ।

पुनश्च शिक्षकशिक्षणकेन्द्रेण 10-2-2020 तः 20-2-2020 दिनाङ्कं यावत् ***"constructivist lesson planning and teaching strategies"*** अर्थात् रचनात्मकशिक्षणरणनीतिम् उपयोक्तुं पाठयोजनानिर्माणे योगताविकासार्थं च इयं कार्यशाला समायोजिता आसीत्। अस्याः कार्यशालायाः उद्घाटनसत्रे नवदेहलीस्थस्य इन्दिरागान्धीराष्ट्रियकलाकेन्द्रस्य (***IGNCA***) सदस्यसचिवैः डाँ. सच्चिदानन्दजोशीमहोदयैः मुख्यातिथित्वरूपेण व्याख्यानं प्रदत्तम्। कार्यशालायाः समग्रं दायित्वं सम्पादितं कार्यशालायाः निदेशिकया प्रो. अमिताभाण्डेयभारद्वाजमहाभागया। अस्यां कार्यशालायां 40 प्रतिभागिनः आसन्। दिनाङ्कं 2-3-2020 तः 4-3-2024 यावत् शिक्षकशिक्षणकेन्द्रेण ***"online Assessment Tools and procedures"*** मूल्याङ्कनसाधनप्रक्रियामाधारीकृत्य त्रिदिवसीया ऑनलाइन राष्ट्रिया कार्यशाला आयोजिता। कार्यक्रमस्य समुद्घाटनं शिक्षासंकायस्य संकायाध्यक्षचरैः प्रो. नागेन्द्रझामहोदयैः कृतम्। अस्यां कार्यशालायां 36 प्रतिभागिनः भागं गृहीतवन्तः।

पं.मदनमोहनमालवीयराष्ट्रशिक्षक-शिक्षणमिशन इति मानवसंसाधनविकासमन्त्रालयस्य परियोजनान्तर्गतं श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षकशिक्षणकेन्द्रेण ऑनलाईन-मूल्यांकन-उपकरणानां साफ्टवेयर-ऐप्स आदि उपकरणानां परिचयार्थञ्च आँनलाइनमाध्यमेन दिनाङ्कं ***08-6-2020*** तः ***10-6-2020*** यावत् एका राष्ट्रिया कार्यशाला समायोजिता। कार्यशालायाः निर्धारितः विषयः आसीत्- ***"Design & Develop online Assessment"*** यत्र विभिन्नेभ्यः प्रान्तेभ्यः अध्यापकाः शोधर्थिनश्च आहत्य 227 प्रतिभागिनः भागं गृहीतवन्तः प्रशिक्षितवन्तश्च। अस्यां कार्यशालायां भारतीयशिक्षणमण्डलस्य राष्ट्रियसंगठनसचिवाः श्रीमुकुलकनित्करमहोदयाः उपर्यक्तविषयमवलम्ब्य व्याख्यानं प्रदत्तवन्तः । अत्र मुख्यविषयाः आसन्- ऑनलाइनमूल्याङकनम्, लघुप्रश्नानां दीर्घप्रश्नानाञ्च कृते दृश्यमूल्याङकनोपकरणम्, अस्याः कार्यशालायाः अध्यक्षीयभाषणं तत्कालीनैः कुलपतिभिः आचार्यरमेशकुमारपाण्डेयवर्यैः स्वागतभाषणञ्च केन्द्रस्य निदशिकाभिः प्रो. अमितापाण्डेयभारद्वाजमहाभागाभिः कृतम्।

पुनश्च शिक्षकशिक्षणकेन्द्रेण "***creating and managing"*** इति विषयं पुरस्कृत्य दिनाङ्कं ***18-6-2020*** तः 20-***6-2020*** यावत् एका ऑनलाइन राष्ट्रिया कार्यशाला आयोजिता। यत्र उपविषयाः आसन्- आँनलाइनशिक्षणस्यावलोकनम्, ***LMS-Edmodo, moodle, google classroom,*** आँनलाइनपाठ्यक्रमनिर्माणम्, शिक्षण-शिक्षणार्थं गूगल-उपकरणानामुपयोगश्चेत्यादयः। अत्र विशेषसत्रे विश्वविद्यालयानुदानायोगस्य अध्यक्षैः प्रो. डी.पी. सिंहमहोदयैः उपर्युक्तविषयाणामुपरि स्वीयं व्याख्यनं प्रदत्तम् । अस्यां कार्यशालायां विभिन्नेभ्यः प्रान्तेभ्यः 229 प्रतिभागिनः भागं गृहीत्वा प्रशिक्षितवन्तः ।

***Educational philosophy and Psychology in sanskrit vangmay*** इति विषयं पुरस्कृत्य दिनाङ्कं 20-***7-2020:*** तः ***24-7-2020*** यावत् उक्तकेन्द्रेण एका ऑनलाइन राष्ट्रिया कार्यशाला समायोजिता। अस्याः कार्यशालायाः उद्देश्यमासीत् - शैक्षिकदर्शनमनोविज्ञानानां मूलभूतसंकल्पनानां परिचयः विश्लेषणञ्च । अत्र विभिन्नेभ्यः प्रान्तेभ्यः ***266*** प्रतिभागिनः भागं गृहीत्वा प्रशिक्षितवन्तः । कार्यशालायाः मुख्यविन्दवः आसन् - संस्कृतवाङ्मये शैक्षिकदर्शनस्य मनोविज्ञानस्य च आधारः। शिक्षाशास्त्रिनिमित्तं ज्ञानविज्ञानम्, भावनात्मिकाबुद्धिः, आध्यात्मिकाबुद्धिः, भारतीयदृष्ट्या आततिबन्धनम्, मूल्याधारिता शिक्षा, वैदिकशिक्षाव्यवस्था, प्राचीनशिक्षाप्रणाली-न्याय-बौद्धदर्शनञ्चेत्यादयः।

साम्प्रतिकवैज्ञानिककाले आधुनिकयान्त्रिकविधिप्रयोगकाले च सुरक्षायाः आवश्यकता सर्वथा विद्यते। सुरक्षायाः सुरक्षोपायस्य च परिज्ञानाय शिक्षणाधिगमकेन्द्रेण दिनाङ्कं 17-8-2020 त: 21-8-2020 यावत् ***'cyber security in education"*** सुरक्षा, सुरक्षोपायश्चेति विषयमधिकृत ऑनलाइन राष्ट्रिया कार्यशाला समायोजिता।

***"Developing Assessment and Research Tools"*** इति विषयमङ्गीकृत्य 07-9-2020 त: 11.9.2020 यावत् ऑनलाइन राष्ट्रिया कार्यशाला समायोजिता अनेन केन्द्रेण। यत्र प्रमुखाः विषयाः आसन्- मूल्याङ्कनमनुसन्धानञ्च, मूल्याङ्कनसाधनविकासः, कार्यप्रदर्शनाधारितपरीक्षायाः विकासः प्रश्नावल्याः विकासः, तस्य मानकीकरणञ्च, मूल्यपरिणामश्चेत्यादयः। अस्यां कार्यशालायां विभिन्नेभ्यः प्रान्तेभ्यः 148 प्रतिभागिनः भागं गृहीतवन्तः। दिनाङ्कं 5-10-2020 त: 9-10-2020 यावत् ***'Advance Features of MS office'*** इति विषयं पुरस्कृत्य अनेन केन्द्रेण एका ऑनलाइन राष्ट्रिया कार्यशाला आयोजिता। अस्यां कार्यशालायां मुख्यवक्तव्यं स्थापितं भारतस्य साफ्टवेयर टेक्नोलॉजी इत्यस्य महानिदेशकैः डाँ. ओंकाररायमहोदयैः।

परिणामात्मकं गुणात्मकं च शोधपरिकल्पनायामनुसन्धानं कथं कर्तुं शक्यते इति मनसि निधाय शिक्षणाधिगमकेन्द्रेण ***'Quantitative and qualitative Approaches in Research'*** इति विषयं पुरस्कृत्य एका

आँनलाइन राष्ट्रिया दशदिवसात्मिका कार्यशाला दिनाङ्कं 18-11-2020 त: 28-11-2020 यावद् आयोजिता। अस्यां कार्यशालायां पृष्ठभूमिटिप्पणं प्रदत्तं भारतीयभाषासमितेः अध्यक्षैः पद्मश्री चमूकृष्णशास्त्रीवर्यैः। अत्र विभिन्नेभ्यः प्रान्तेभ्यः 203 प्रतिभागिनः भागं गृहीतवन्तः।

प्रतिभागिनां शैक्षिकप्रबन्धनस्य नेतृत्वस्य च मूलभूतसंकल्पनाभिः सह परिचयं कर्तुं दिनाङ्कं ***15-3-2021*** तः ***19-3-2021*** यावत् ***"Educational management and Leadership in sanskrit vangmaya"*** विषयमभ्युपेत्य एका आँनलाइन राष्ट्रिया कार्यशाला आयोजिता। यत्र गुरुकुलकांगडीविश्वविद्यालयस्य कुलपतयः प्रो. रुपकिशोरशास्त्रीमहोदयाः कार्यशालायाः पृष्ठभूमेः टिप्पणं प्रदत्तवन्तः। "***Development & Application of open Educational Resources'*** विषयमधिकृत्य ***14-6-2021*** त:*18-6-2021* यावत् एका आँनलाइन राष्ट्रिया कार्यशाला समायोजिता। यत्र विभिन्नेभ्यः प्रान्तेभ्यः 49 प्रतिभागिनः भागं गृहीतवन्तः। अस्याः मुख्यविषयाः आसन्- ***An Introduction to OERS, Development of text & Image based e-Resources*** इत्यादयः। ***Designing & Development of e-courses'*** विषयमाश्रित्य दिनाङ्कं ***16-11-2017*** त***: 18-11-2021*** यावत् निरुक्तकेन्द्रेण आँनलाइन राष्ट्रिया कार्यशाला आयोजिता। अस्यां कार्यशालायां 42 प्रतिभागिनः भागं गृहीत्वा प्रशिक्षितवन्तः। अनया रीत्या "***Professional skill Development of Teachers'*** इति विषयं स्वीकृत्य शिक्षणाधिगमकेन्द्रेण दिनाङ्कं ***14-12-2021*** तः ***23-12-2021*** यावत् ऑनलाइनराष्ट्रियसंकायविकासकार्यक्रमः ***(FDP)*** आयोजितः, अस्मिन् कार्यक्रमे अध्यक्षीयभाषणं विश्वविद्यालयस्य कुलपतयः प्रो. मुरलीमनोहरपाठकमहोदयाः प्रदत्तवन्तः । कार्यक्रमे स्वागतभाषणं निदेशिकाः अमितापाण्डेयभारद्वाजमहाभागाः प्रदत्तवत्यः ।

भारतीज्ञानपरम्परामाश्रित्य 20-12-22 दिनाङ्के केन्द्रेण "***Indian Knowledge system & Science"*** शीर्षकमवलम्ब्य कार्यक्रमः समायोजितः। अत्र विभिन्नेभ्यः प्रान्तेभ्यः 127 प्रतिभागिनः भागं गृहीत्वा प्रशिक्षितवन्तः। अस्य कार्यक्रमस्योद्देश्यमासीत् उपनिषत्सु विद्यमानानां तत्त्वानामन्वेषणार्थं उपायचिन्तनम् वेदेषु उपनिषत्सु च विद्यमानानां भौतिकविषयाणां गणितविषयणाञ्च अन्वेषणम्। अस्मिन्ने कार्यक्रमे कालिकटविश्वविद्यालयस्य डाँ. टी.पी. शशिकुमारमहोदयैः भारतीयवैज्ञानिकधरोहरस्य अवलोकनमितिविषयं पुरस्कृत्य ***FOWAI forum mumbia*** इत्यस्य संस्थापकैः स्वामीचिदानन्दमहोदयैश्च उपनिषदि भौतिकं गणितञ्च विषयमभ्युपेत्य व्याख्यानं प्रदत्तम्।

अस्य केन्द्रस्य इदमपि वैशिष्ट्यं विद्यते संकायाभिप्रेरणक्रार्यक्रममपि ***(FIP)*** समायोजयति केन्द्रम् । 12-11-2022 तः 16-11-2022 यावत् ***Design, Devletop & Standarize, Research fools"*** इति विषयं स्वीकृत्य, 21-11-2022 त: 1-12-2022 यावत् ***Enhancing pedagogical skills"*** विषयमभ्युपेत्य, 16-1-2023 त: 20-1-2023 यावत्" ***Application of online Assessment & Fro plagiarison fools"*** इतिविषयमङ्गीकृत्य, 13-2-2023 त:17-2-2023 यावत् ***E-Resource Development*** विपयं स्वीकृत्य च ऑनलाइनमाध्येन कार्यक्रमाः अनेन केन्द्रेण समायोजिताः।

****The English version is available in the additional information link.***

| File Description | Document |
|---|---|
| Upload any additional information अतिरिक्ताः सूचनाः | View Document |
| Link for additional information अतिरिक्तसूचनानां सन्धानम्। | View Document |

**Extended Profile**

**Program**

***Number of Programmes offered year-wise for last five years***

### ***विगतपञ्चवर्षेषु समायोजितानां पाठ्यक्रमाणां वार्षिकसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|

| | | | | |
|---|---|---|---|---|
| 88 | 88 | 84 | 102 | 102 |

**Students**

***Number of students year-wise during the last five years***

***विगतपञ्चवर्षेषु प्रविष्टानां छात्राणां वार्षिकसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 2141 | 2037 | 1980 | 1978 | 1953 |

***Number of outgoing / final year students year-wise during the last five years***

***विगतपञ्चवर्षेषु उत्तीर्णानां छात्राणां वार्षिकसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 589 | 640 | 836 | 857 | 938 |

***Number of students appeared in the University examination year-wise during the last five years***

***विगतपञ्चवर्षेषु, विश्वविद्यालये परीक्षासु सम्मिलितछात्राणां वार्षिकसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 2994 | 2631 | 2377 | 2412 | 2448 |

**Teachers**

***Number of full time teachers year-wise during the last five years***

***पूर्णकालिकाध्यापकानां विगतपञ्चवर्षाणां वार्षिकक्रमेण समष्टिसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 109 | 103 | 103 | 106 | 109 |

***Number of sanctioned posts year-wise during the last five years***

***विगतपञ्चवर्षेषु अनुमोदितानां पदानां वार्षिकसङ्ख्या***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 139 | 139 | 139 | 139 | 139 |

**Institution**

***Total Expenditure excluding salary year-wise during the last five years (INR in Lakhs)***

***विगतपञ्चवर्षेषु वेतनाद् ऋते संस्थाया वार्षिकः व्ययः (लक्षशः)***

**Answer:**

| 2023-24 | 2022-23 | 2021-22 | 2020-21 | 2019-20 |
|---|---|---|---|---|
| 1954.19 | 1754.52 | 1030.96 | 859.42 | 842.32 |

**Conclusion**

***Additional Information :***

The university has been continuously striving for becoming an International Centre for Sanskrit Teaching, Learning & Research. It has 05 traditional discipline based Schools which offer UG, PG & Doctorate level progammes with addition of one more School viz. School of Purana. The teaching, learning & research processes incorporate technology integration for enhancing their quality level. The university has a dedicated Department of Research for conducting six months Ph.D. course work as per UGC guidelines for Vidyavaridhi programme in all disciplines except that of
Shiksha Shastra. The university publishes Annual Report showcasing its yearly academic progress which is placed before the Parliament every year in 3 languages viz. English, Hindi & Sanskrit. The university has competent & committed faculty members which are not only the members of National Level committees but also the part of NAAC PEER TEAM VISITs for Accreditation & Assessment of HEIs. The ICT related infrastructure and facilities across the departments of the university are addressed through the Computer Centre of the university. This Centre also has a Studio for video development & editing as per SWAYAM & MOOC guidelines for e- course development. The University Works Department (UWD) manages the purchase & maintenance of infrastructural resources of the entire campus. All types of university related purchases follow General Financial Rules (GFR) laid by GoI.

***Concluding Remarks:***

The University has a safe, clean, green & wi-fi enabled campus which is beautifully landscaped with plants and sukati's signboards. The University has been responding to the opportunities arising from NEP 2020 as well addressing to the challenges during its implementation. Keeping in view, it has designed Four Years Under Graduate Programme (FYUGP) viz. Sammanit Shastri in 19 traditional disciplines such as viz. Vastu, Jyotish, Mimansa, Sahitya, Nyaya, Vedas, etc. along with Masters & amp; Doctorate level programmes. The students are admitted to the various offered
programmes through National Level Entrance Test conducted by NTA. The
curriculum development process involves the Outcome Based Education Approach through well defined & clearly stated Programme Outcomes (POs), Programme Specific Outcomes (PSOs) & Course Outcomes (COs) along with Choice Based Credit System (CBCS) application in the course structuring as per UGC Guidelines. The effective implementation of the curriculum is ensured through strict adherence with the pre-planned academic calendar. The university in-line with its vision & mission
organises & conducts various student driven academic & social activities alongwith the degree programmes for empowering the students with 21 st century skills & competencies. The pedagogical processes are well, supported with good Infrastructure & ICT facilities. The faculty members of the university are not only engaged in upgrading their skill-sets through participation in various training programmes but are also invited for talks, lectures and special addresses by various organisations and Higher Education Institutions (HEIs) of the country. The Teaching Learning Centre (TLC) under PMMMNMTT scheme, MoE, GoI of the university now renamed as Malaviya Mission Teacher Training Centre (MMTTC) under UGC, GoI is identified as one of the 111 MMTTCs of the country by UGC and it works for the capacity building of Higher Education faculty across the country through organising various programmes such as Faculty Induction Programme (FIP), Faculty Development Programmes (FDP), Refresher Course (RC), Short-term Programmes (STP), etc. The university conducts various types of audits viz. Academic, Finance, & Green to ensure transparency and qualitative improvements. The governance system
practices a high degree of autonomy & transparency through various Administrative & Academic Bodies and Councils. The participatory structure of the university governance provides an opportunity for various faculty members to be the part of decision-making process by making them a constituent member of different committees at Department, School & Institution Levels.

## EXCLUDED METRICES

No Metrices are Excluded

## ANNEXURE